# TATTVACINTAMANIH

(Under the Project of Content Generation with a view to develop
E - Databank, E - Learning and E - Sources of Sanskrit Text.)


**Chief Director**

**Prof. PARAMESHWARA NARAYANA SHASTRY**
Vice Chancellor

Director

**Prof. Ch. L. N. SARMA**
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Co-ordinator

**Dr. R.G.MURALI KRISHNA**

(RSKS, New Delhi)

Co-ordinator

**Dr. R. BALAMURUGAN**
Head, Department of Navya Nyaya, Guruvayoor Campus

Asst. Co-ordinators

**Dr. N. R. SREEDHARAN**
**Dr. O. R. VIJAYARAGHAVAN**



**RASHTRIYA SANSKRIT SANSTHAN**
**(DEEMED UNIVERSITY)**
**Guruvayoor Campus, Puranattukara**

# तत्वचिन्तामणिः

**भारतसर्वकारस्य योजना (Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)**


**प्रधाननिर्देशकः**

**आचार्य परमेश्वरनारायणशास्त्री**

**कुलपतिः**

**निदेशकः**

**आचार्य चल्ला.लक्ष्मीनारायणशर्मा**

**प्राचार्यः, गुरुवायूर् परिसरः**

**राष्ट्रियसंयोजकः**

**डा. रा.गायत्रीमुरलीकृष्णः**

**परियोजनाधिकारी**

**राष्ट्रिय संस्कृत संस्थानम्, नवदेहली**

**प्रधानसंयोजकः**

**डा. आर्. बालमुरुगन्**

**परिसरनव्यन्यायविभागाध्यक्षः, गुरुवायूर् परिसरः**

**उपसंयोजकौ**

**डा. एन्.आर्.श्रीधरन्**

**डा. ओ. आर्. विजयराघवन्**



**राष्ट्रिय संस्कृत संस्थानम्, (मानित विश्वविद्यालयः)**

**गुरुवायूर् परिसरः पुरनाट्टुकरा।**

**श्रीमद्गङ्गेशोपाध्यायविरचित:**

# तत्त्वचिन्तामणि:

**प्रत्यक्षखण्ड:**

**।। मङ्गलवाद: ।।**

**गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-**
**स्त्रिमूर्तिर्य: सृष्टिस्थितिविलयकर्माणि तनुते ।**
**कृपापारावार: परमगतिरेकस्त्रिजगतां**
**नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ।। 1 ।।**

**अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं**
**चिन्तादिव्यविलोचनेन च तयो: सारं विलोक्याखिलम् ।**
**तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-**
**र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ।। 2 ।।**

**यतो मणे: पण्डितमण्डनक्रिया**
**प्रचण्डपाषण्डतमस्तिरस्क्रिया ।**
**विपक्षपक्षे न विचारचातुरी**
**न च स्वसिद्धान्तवचोदरिद्रता ।। 3 ।।**

**इह खलु** सकलशिष्टैकवाक्यतया अभिमतकर्मारम्भसमये तत्समाप्तिकामा मङ्गलमाचरन्ति। तत्र यद्यपि मङ्गलस्य कारणता नान्वयव्यतिरेकगम्या, मङ्गलं विनापि प्रमत्तानुष्ठितसमाप्ते:। न च तत्र जन्मान्तरीयतत्कल्पनम्। अन्योन्याश्रयात्, लोकावगतकारणेनान्यथासिद्धेश्च। नापि मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् दर्शवदिति फलसिद्धौ, प्रारिप्सितसमाप्तेस्तदानीमपेक्षितत्वेन नियमेनोपस्थितत्वात्,

फलान्तरस्यातथाभावात्, विश्वजिन्न्यायेन फलकल्पने गौरवात्, परिशेषानुमानेन तत्कारणताग्रहः। व्यभिचारेण कारणत्वस्याभावात् उपायसहस्रेणापि ग्रहीतुमशक्यत्वात्। तथापि तथाविधशिष्टाचारानुमितश्रुतिरेव मङ्गलस्याभिमतहेतुत्वे मानम्। न च व्यभिचारः, निष्परिपन्थिश्रुत्या मङ्गलं समाप्तिसाधनमिति प्रमापिते तत्रापि तयैव लिङ्गेन जन्मान्तरीयतदनुमानात्।

तच्चेदं - आरब्धकर्माङ्गम् - कर्मार्थितया शिष्टैस्तत्पूर्वं क्रियमाणत्वात्, फलान्तराभावे सति फलवत्कर्मारिप्समानेन नियमतस्तत्पूर्वं क्रियमाणत्वाच्च, दर्शे प्रयाजादिवत्। आचारमूलकश्रुत्यनुमानाभ्यां तदर्थितया तत्फलकर्तव्यत्वबोधनात्, तत्फलकत्वबोधनाच्च। दर्शारम्भसमये नियमेन क्रियमाणाया अप्यारम्भणीयायाः तदर्थितया अक्रियमाणत्वात्, फलान्तरश्रवणाच्च प्रधानत्वमिति न तया व्यभिचारः। ननु मङ्गलमलौकिकं लौकिके नाङ्गं भवति, लोकावगतकारणत एव तदुपपत्तेः । अत एव गृहरथादौ **"आरे भग्ने इन्द्रबाहुर्बद्ध्व्यः"** **"पायसं ब्राहमणो भोजयितव्यः"** इत्यत्र तदुभयं नाङ्गम्, किं तु नैमित्तिकम्। तद्वदिदमप्यारम्भसमयनिमित्तकमस्तु। विश्वजिन्न्यायात् स्वर्गः फलमिति चेत्, न। तस्यापूर्वरूपोपकारजनकाङ्गविषयत्वात्। अयं तु प्रतिबन्धकाभावरूप उपकारः।

तस्य च लोकावगतकारणसहकारितैव। प्रतिबन्धके सति तस्मात्तदनुत्पतेः। अपूर्वं तु न तथा। विघ्नध्वंसद्वारा चेदमङ्गम्, न तु **"इडो यजति"** इत्यादिविधिबोधितप्रयाजाद्यङ्ग-यागवददृष्टद्वारा। मङ्गलजन्यादृष्टं विनापि स्वतःसिद्धविघ्नविरहवत आरब्धनिर्वाहात्। न चैवं विघ्नध्वंसद्वारापि नेदमङ्गम्, तत्रैव व्यभिचारादिति वाच्यम्। सति विघ्ने तद्ध्वंसद्वारा तस्याङ्गत्वात्। न चैवं प्रयाजादेरपि दुरितध्वंस एव द्वारम्, कल्प्यदुरितध्वंसतः अपूर्वस्य लघुत्वात्।

**वस्तुतस्तु** प्रायशो विघ्नसंशये तन्निश्चये वा नियमेन शिष्टानां मङ्गलाचरणे विघ्नाभाव एव द्वारत्वेनाभिमतः। निर्विघ्नं समाप्यतामिति कामनया तत्करणपक्षे

श्रुतित एव (द्वारत्व) तद्द्वारत्वनिर्णयः । किं चापूर्वे द्वारत्वे लौकिकाङ्गत्वविरोधः, क्लृप्तकारणादेव तदुत्पत्तेरिन्द्रबाहुबन्धनवत् ।

ननु विघ्नसंदेहे कथं तन्नाशार्थं प्रवृत्तिः, दुरितध्वंसार्थिप्रवृत्तौ तन्निश्चयस्य हेतुत्वात् प्रायश्चित्तवदिति चेत्, न । विघ्नसंशये निश्चये वा नियमेन शिष्टानां मङ्गलाचारात् विघ्नज्ञानं प्रवर्तकम् । तादृशाचारानुमितविधिनापि विघ्नज्ञानवानारब्धसमाप्तिकामोऽधिकारी बोध्यते। प्रायश्चित्ते तु तन्निश्चयवान्, तथैव विधिबोधनात् । अत एवाधिकारिविशेषणं विघ्न इति तत्संदेहे कथं प्रवृत्तिः, वैदिकेऽधिकारनिश्चयादेव प्रवृत्तेरित्यपास्तम्। यतः प्रधानाधिकारिण एवाङ्गेऽधिकारो न स्वतन्त्रः, अङ्गत्वभङ्गप्रसङ्गात्। न च प्रधाने प्रारिप्सिते दुरितमधिकारिविशेषणम्, विरोधात् । किं तु समाप्तिकामना। सा च निश्चितैव ।

**यत्त्वन्यत्र** निश्चिताधिकारकर्तृत्वेऽपि मङ्गलं संदिग्धाधिकारकर्तृकमेव, विघ्नसंदेहवतां शिष्टानामाचारानुमितवेदेन तथैव बोधनादिति । **तन्न ।** विघ्नवत्त्वेनाधिकाराभावात् । क्वचित्तन्निश्चयेऽपि प्रवृत्तेश्च । अपि च शङ्कितानिष्टवारणार्थमपि प्रवर्तन्ते परीक्षकाः, यथा सर्पादिदंशजन्यविषसंशये तन्नाशाय भेषजपानादौ। किं च फलस्य संशयेऽप्युपायत्व-निश्चयाद्यथा कृष्यादौ प्रवृत्तिस्तथा मङ्गलेऽपि। यदि च वृष्ट्यादौ सति कृष्यादितोऽवश्यं फलमिति तर्कात्तत्र प्रवृत्तिस्तदा सति विघ्ने मङ्गलादवश्यं फलमिति तर्कादत्रापि प्रवृत्तिः ।

ननु स्फ्यस्य भक्ताश्लेषनिमित्तेज्यायामिष्टित्वेन दर्शधर्मत्वे सत्यतिदेशागतपूर्वदिन-कर्तव्यदेवतावाहनस्याङ्गस्य स्फुयाश्लेषद्वारसंशयेऽननुष्ठानमुक्तम्, यथा कृष्णले द्वारबाधे। अतो विघ्नसंशयात्तद्ध्वंसद्वारसंशये कथं मङ्गलानुष्ठानमिति चेत्, न। नैमित्तिके हि निमित्तवानधिकारी, यथा **'भिन्ने जुहोति'** इत्यत्र पात्रभेदवान्। तथेहाश्लेषवानधिकारीति पूर्वदिने आश्लेषनिश्चयाभावात् युक्तमननुष्ठानम्।

अपि चेज्याकर्तव्यतानिश्चये तदनुष्ठानम्। न चाश्लेषसंशये तन्निश्चयः पूर्वदिने। अतः प्रधानेऽधिकाराभावान्नाङ्गेऽधिकार इति नावाहनं पूर्वदिने। यदि च **"यदि न स्यात्"** इति न्यायेन कुर्यात् तदा अनधिकृतकर्तृकत्वेन निष्फलं स्यात्। स्फ्याश्लेषे सतीज्याकर्तव्यता-

निश्चयेऽपि नावाहनम्, पूर्वदिनस्याङ्गस्याभावादिति इज्यायामावाहनबाध एव। मङ्गले तु विघ्नज्ञानवानधिकारीत्युक्तम्। तच्च संशयेऽप्यस्ति। प्रधाने कर्तव्यतानिश्चयोऽस्त्येवेति द्वारसंदेहेऽपि युक्तमनुष्ठानम्। भविष्यद्विवाहादावाभ्युदयिकेऽपि तज्ज्ञानवानधिकारी तथैवाचारात्।

**नन्वङ्गानां** प्रधानविधिविधेयत्वम् । न च ग्रन्थादिसमाप्तौ प्रधानविधिरस्ति। न च तत्कर्तव्यताबोधकस्य लौकिकप्रमाणस्य शास्त्रमेकदेशो युज्यते। तस्य तन्निरपेक्षत्वादिति चेत्, न। अपूर्वजनकाङ्गानां तथात्वात्, आचारानुमितश्रुत्या प्रधानविधिं विनापि तदङ्गत्व-विधानाच्च।

अपि च प्रधानकर्तव्यताबोधकबोध्यकर्तव्यताकत्वं प्रयोजकम्। तच्चेहाप्यस्ति, प्रतिबन्धकाभावस्य सकलकार्यहेतुत्वेन लौकिकप्रमाणस्यापि तत्सापेक्षत्वात्।

ननु यागादिवत् प्रधानदेशकालान्वयस्तदङ्गे मङ्गले स्यादिति चेत्, न। असाधारणेऽपूर्वजनके चाङ्गे तदन्वयात्। अत एव बद्धशिखत्वादौ न प्रधानदेशकालन्वयः। न च दुरिताभावे स्वतस्सिद्धे साङ्गमङ्गलानुष्ठानं निष्फलमिति तद्वेदाप्रामाण्यम्। लोकावगत-कारणे हि दुरिते सति वेदेन तस्य तद्ध्वंसजनकत्वं बोध्यते, न तु तदुल्लङ्घ्यम्। अत एव तत्वज्ञानवतो भोगार्थं निषिद्धानुष्ठानं दोषाभावान्नाधर्मजनकमिति न तद्वेदाप्रामाण्यम्। प्रमाणान्तरात् स्वतःसिद्धदुरिताभावावगतौ मङ्गलाकरणे नित्यवदनुष्ठानं शिष्टानां भज्येतेति चेन्न। विघ्नज्ञानवतो नित्यवदनुष्ठानादिति संप्रदायः ।

**मैवम्,** मङ्गलं विनापि प्रमत्तानुष्ठितसमाप्तेः। न च तेन विनापि सिध्यतस्तदङ्गम्। न च जन्मान्तरीयं तत्, जन्मान्तरीयग्रन्थादिकमुद्दिश्य शिष्टैस्तदकरणात्। ननु यथा पुत्रेष्टौ कर्मसाद्गुण्ये ऐहिकफलाभावे आमुष्मिकं फलं तथा साङ्गेऽपि मङ्गले यत्र न फलं तत्रामुष्मिकफलमिति चेत्, न। तत्र पुत्रमात्रस्य कामनाश्रवणात्। इह तु प्रारिप्सितसमाप्ति-कामनया मङ्गलाचार इति तथैव वेदानुमानात् कारीरीवदासन्नसमयारब्धसमाप्तिः फलम् ।

नन्वासन्नसमयस्तत्संबन्धो वा न मङ्गलजन्य इति समाप्तिमात्रं जन्यम्। तच्चैहिकामुष्मिकसाधारणमिति चेत्, न। आसन्नसमयस्य स्ववृत्तिसमाप्त्युपलक्षकत्वात्। अन्यथा कारीर्यपि नासन्नसमयफला स्यात्। तस्मात् व्यभिचारान्न तदङ्गमिति।

**अन्ये** तु मङ्गलं प्रधानम्, अदृष्टद्वारा आरब्धकर्मसमाप्ति: फलम्, तत्कामोऽधिकारी। क्वचित्तु फलाभाव: कर्मादिवैकल्यात्, कारीरीवत्। न चान्यदापि करणम्। नियतकालीनतादृशाचारेण फलवत्कर्मारिप्समानस्तत्समाप्तिकामो मङ्गलमाचरेदिति श्रुत्या आरम्भसमयकर्तव्यताबोधनात्। यथा **"आग्नावैष्णवमेकादशकपालं चरुं निर्वपेद्दर्शपूर्णमा-सावारिप्समान:"** इति श्रुत्या आरम्भणीयेष्टे: प्रधानाया: दर्शारम्भसमयकर्तव्यत्वम् । कामनोपाधिकार्यत्वेऽप्यारम्भसमये नित्यमनुष्ठानम् । आरब्धकर्मसमाप्त्यर्थिनोपायत्वेनावश्यं तदनुष्ठानात् । न च काम्यत्वे परिसमाप्तिकामनां विना फलवत्कर्मारम्भेऽपि तदनुष्ठानं न स्यादिति वाच्यम् । **'समाप्तं कर्म फलायालमि'**ति फलार्थिन: समाप्तौ कामनावश्यम्भावादिति।

तन्न। कारीरीजन्यातिशयवत् विहितप्रधानजन्यातिशयत्वात् मङ्गलजन्यापूर्वस्यापि फलासम्पादकाशेषकारणसम्पादकतया आरब्धकर्मसमाप्त्यवश्यम्भावापत्ते: । फलावश्यम्भाव-निश्चयं विना वैदिककर्माननुष्ठानात् । न चैवम्, भूयसि साङ्गेऽपि मङ्गले क्वचिदारब्ध-समाप्त्यभावात् । न च तत्रामुष्मिकं फलम्, ऐहिकमात्रफलत्वात्। वैदिककर्मण: फलावश्यम्भावे-नागन्तुकदुरितेनाप्यप्रतिबन्धात् ।

किञ्च यथा कारीर्यादिकमग्रिमपुरुषव्यापारं विनैव फलहेतु:, तथा मङ्गलमपि तेन विनैव हेतुः स्यात् । न चैवम् । लोकावगतकारणत्वात्तदपेक्षेति चेत्, तर्हि स एव हेतुरस्तु, किमनेन । आरब्धकर्मजनकादृष्टकारणसंपत्तौ पुत्रेष्टिवत्तत्समाप्तिसाधनत्वं श्रुत्या बोध्यत इति चेत्, न । तत्र दृष्टकारणसंपत्तौ पुत्रानुत्पादाददृष्टद्वारा पुत्रेष्टेस्तज्जनकत्वमस्तु । न च कर्मनिर्वाहे दृष्टसकलहेतुसंपत्तौ विलम्ब:, येन मङ्गलजन्यादृष्टापेक्षा स्यात् ।

अपि च मङ्गलं विनापि प्रमत्तनास्तिकानुष्ठितसमाप्ते: न तत्तत्र कारणम्। जन्मान्तरीयपुण्यसम्पत्तिस्तत्र हेतुरिति चेत्, न । तथापि व्यभिचारात् । क्वचित् पुण्यसम्पत्ति: क्वचिन्मङ्गलं हेतुरिति व्रीहियववद्विकल्प एवेति चेत् , तर्हि तत्सम्भावनया नियते मङ्गलानुष्ठानं न स्यात् , यवप्रयोगे व्रीहेरिव । विकल्पे चोभयस्याशास्त्रार्थत्वात् ।

ननु विधिवाक्यं न फलनियतपूर्वसत्त्वं बोधयति, किं तु मङ्गलात् फलावश्यम्भावमिति चेत्, न । इष्टसाधनत्वस्य विध्यर्थत्वात् । **अथा**न्वयव्यतिरेकाभ्यां तद्ग्रहे व्यभिचारो दोषाय, न त्वागमेन तद्ग्रहे । तदुक्तम् **'आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषाये'**ति । अत एव यागादेः स्वर्गसाधनतेति चेत्, न । नियतपूर्वसत्त्वस्य ग्राह्यस्याभावादागमेनापि बोधयितुमशक्यत्वात् । यागजनितस्वर्गे कारीरीजनितवृष्टौ च जातिविशेष एवास्ति ।

**अपरे** तु मङ्गलस्यारब्धनिर्वाहकत्वं विघ्नसंसर्गाभावद्वारा, तथैव प्रतिबन्धकाभावस्य हेतुत्वात् । स चाभाव: सतो विघ्नस्य ध्वंसोऽनागतस्यानुत्पादश्च कर्मनिर्वाहसमयस्थायी। विघ्नकारणविनाशद्वारा प्रागभावस्य साध्यत्वम् । यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वम्, यद्व्यतिरेके चासत्त्वम्, तदेव तस्य तज्जन्यत्वं न त्वसत: सत्त्वं, गौरवात् । अस्ति च विघ्नकारणनाशे सति विघ्नप्रागभावस्य तथात्वम् । तावति समये दुरितानुत्पादश्च न साक्षान्मङ्गलजन्य इत्यदृष्टद्वारा तथा। एवं निर्विघ्नं समाप्यतमिति कामनया तदाचारोऽपि संगच्छते । अत एव यत्र विघ्नाभाव: स्वत: सिद्ध: तत्र मङ्गलस्याकिञ्चित्करत्वेन वेदाप्रामाण्यमिति निरस्तम् । अनागतविघ्नाभावस्य तत्रापि साध्यत्वात् ।

**'सर्वे विघ्ना: शमं यान्ति'** इति यत्र विनायकस्तवपाठादौ श्रुतमस्ति तत्र तत एव प्रमत्तानुष्ठितसमाप्तेरनादौ संसारेऽवश्यं तदाचारात्। तथा च तेन समं मङ्गलस्य विकल्प एव। यत्र च साङ्गे मंङ्गले सत्यपि न फलं तत्र विघ्नभूयस्त्वादिति।

**तन्न।** विघ्नानुत्पादस्य व्यापारत्वे मानाभावात्। संसर्गाभावत्वेन हेतुत्वात् तथैव व्यापारत्वम्, तच्च प्रागभावेऽप्यस्तीति चेत्, न। अत्यन्ताभावस्यापि व्यापारत्वापत्ते:। स्वतस्सिद्धस्य न हेतुत्वं यदि, तदा प्रागभावेऽपि तुल्यम्।

किञ्च यत्र मङ्गलं न तत्र नियमेन विघ्नकारणमस्ति, येन तन्नाशद्वारा प्रागभावस्य साध्यत्वम्। एवमपि यत्र विघ्नानुत्पादोऽपि स्वतस्सिद्धस्तत्र मङ्गलमकिञ्चित्करमेव। विघ्नध्वंसानुत्पादयोरारब्धनिर्वाहकालावस्थायिनोर्मङ्गलादेवोत्पत्तेर्न तदर्थमदृष्टद्वारता। मङ्गलस्य विकल्पेनान्वये शिष्टैर्नियमतो मङ्गलानुष्ठानं न स्यादित्युक्तम्।

किञ्च प्रधानत्वे साङ्गमङ्गलमात्रं न समाप्तिहेतुः, तस्मिन् सत्यपि तदभावात्। प्रचितं तथेति चेत्, न। अप्रचितादपि फलसत्त्वात्। नोभयम्, अननुगमात्। गुरुकर्मारम्भे प्रचितम्, अल्पकर्मारम्भेऽल्पमिति चेत्, न। क्वचित्तादृशादपि फलासत्त्वात्, वैपरीत्येऽपि फलसत्त्वाच्च। **एतेन** बहुविघ्नशङ्कया बहुतरम्, अल्पविघ्नशङ्कया अल्पतरं च हेतुः, तादृशाचारेण तादृशश्रुत्युन्नयनादिति **निरस्तम्।** तादृशादपि प्रारिप्सितासमाप्तेः, वैपरीत्येऽपि समाप्तेश्च। बहुत्वस्य त्रिचतुरादिभावेन अल्पत्वस्य चैकद्व्यादिरूपतया अननुगमेन तादृशशिष्टाचारेण तादृशश्रुत्या बोधयितुमशक्यत्वाच्च। तस्मान्मङ्गलं नाङ्गम्, न वा प्रधानमिति पूर्वपक्षसंक्षेपः।।

**इति मङ्गलवादपूर्वपक्षः**

**अथ मङ्गलवादसिद्धान्तः**

**सिद्धान्तस्तु** - आरब्धाकर्मसमाप्तौ मङ्गलं नाङ्गम्, न वा प्रधानम्, अहेतुत्वात्। किंतु प्रायश्चित्तवत् प्रधानं, विघ्नध्वंसः फलम्। आरब्धकर्मनिर्वाहे विघ्नो मा भूदिति कामनया तदनुष्ठानात्। विघ्नस्य संशये निश्चये वा शिष्टानां तदाचरणाद् विघ्नाभावस्याकाङ्क्षितत्वाच्च। यदि च निर्विघ्नं समाप्यतामिति कामनया तदाचरणम्, तदापि **नागृहीतविशेषणन्यायेन** अहं स्वर्गी स्यामित्यत्र स्वर्ग इव विघ्नाभाव एव फलं न समाप्तिः, उभयतो व्यभिचारात्। समाप्तिस्तु विघ्नरूपप्रतिबन्धकाभावे सति लोकावगतस्वकारणादेव। प्रचिताप्रचितदेवतास्तुत्यादिसाङ्गमङ्गलात् प्रत्येकं विघ्नध्वंसो भवत्येव। अतो वैदिके फलनिश्चयान्मङ्गले प्रवृत्तिः। न च वेदाप्रामाण्यम्।

समाप्त्यभावश्च क्वचित् प्राचीनविघ्नभूयस्त्वात्, क्वचिन्मङ्गलानन्तरोत्पन्नविघ्नात्, क्वचिल्लोकावगतकारणाभावात्। प्रारिप्सितविघ्नध्वंसश्च न मङ्गलं विना। न च प्रायश्चित्तेन शङ्कितविघ्नविनाशः, विघ्नसंशये तदनुपदेशात्। न च कामनोपाधिकर्तव्यत्वे नियतमनुष्ठानं न स्यादिति वाच्यम्। आरब्धकर्मकारणप्रतिबन्धकाभावोपायत्वेनावश्यं तदनुष्ठानात्। तेन विना प्रतिबन्धकाभावाभावात् कर्मानुत्पत्तेः। न च प्रधानत्वेनान्यदापि तत्करणम्। नियतसमयशिष्टाचारानुमितश्रुत्या कर्मारम्भसमये तत्कर्तव्यत्वबोधनात्, दर्शारम्भसमये आरम्भणीयावत्।

विघ्नसंसर्गाभावश्च समाप्तिहेतुः। स च क्वचित् स्वतः सिद्धः क्वचिन्मङ्गलसाध्यः। अत एव मङ्गलं विनापि जन्मान्तरानुवर्तमानविघ्नात्यन्ताभावात् प्रमत्तनास्तिकानुष्ठित-समाप्तिः। न चानध्यवसायः। शङ्कितविघ्नवारणार्थं प्रवृत्तिरतो यावद्विघ्नशङ्कं तदाचरणात्। अत एव तच्छङ्कया मध्येऽपि तदाचरन्ति। गुर्वारम्भेऽपि बहुविघ्नशङ्कया बहुमङ्गलाचरणम्। यथा च विघ्नसंशयेऽपि प्रवृत्तिस्तथोक्तमेव।

**स्यादेतत्।** मङ्गलमाचरेदिति विधौ किं मङ्गलत्वम्। न तावद्देवतास्तुत्यादित्वम्, अननुगमात्। नापि प्रारिप्सितप्रतिबन्धकविघ्नोपशमहेतुक्रियात्वम्, विघ्नोत्सारणासाधारण-कारणत्वं वा। क्रियाविशेषस्य तदसाधारणकारणस्य वा स्तुत्यादेर्वेदाद्विशिष्टापरिचये प्रवृत्तिविषयालाभात्। नापि निर्विघ्नं समाप्यतामिति कामनया शिष्टाचारविषयत्वम्, वेदस्याचारानुपजीवकत्वात्, वेदादाद्याचारानुपपत्तेश्च, अन्योन्याश्रयात्। नापि तत्कामनया वेदविहितत्वम्, प्रारिप्सितकर्मनिर्वाहकत्वे सति कर्मारम्भकाले विहितवैदिककर्मत्वं वा, तादृशवेदान्तराभावात्। नापि स्मृत्यादौ मङ्गलत्वेनोत्कीर्तितत्वम्, वेदस्य स्मृत्यनुपजी-वकत्वात्। स्मृतिकर्तुरेव वेदादाद्याचारानुपपत्तेश्च।

**उच्यते।** **"मङ्गलमाचरेदिति"** न विधिः। किं तु **"निर्विघ्नसमाप्तिकामो देवतास्तुतिमाचरेदि"**त्यादि प्रत्येकमेव विधिः। तथैव शिष्टाचारात्। तदुपजीव्य निर्विघ्नमारब्धं परिसमाप्यतामिति कामनया तद्विघ्नोपशमहेतुत्वेन वा वेदविहितत्वं मङ्गलत्वमित्यधिगम्य

देवतास्तुतिनमस्कारादिषु मङ्गलव्यवहार: शिष्टानामिति। अत एव दुरितनाशकमपि गङ्गास्नानादि न मङ्गलम्। तथा अविधानात्।

**"मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्।**

**जपतां जुह्वतां चैव विनिपातो न विद्यते ।।"**

इत्यनेन बोधितादर्शदर्शनादे: पृथगेव मङ्गलत्वम्, न विघ्ननिवर्तकतया। तत्र नानार्थतैव। अन्यथा ग्रन्थारम्भे नमस्कारतुल्यतया तत्करणप्रसङ्ग:।

अथशब्दो विघ्ननिवर्तकत्वान्मङ्गलमेव।

**"ओंकारश्चाथशब्दश्च द्वावेतौ ब्राह्मण: पुरा ।**

**कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभौ।।"**

इति स्मृते:। न च शुभसूचकत्वमेव तस्य, शास्त्रारभ्मे महर्षिणा तदनुपादानप्रसङ्गात्। गुणवत्तया ज्ञापनं स्तुति:। यमुद्दिश्य यस्य स्वापकर्षबोधनानुकूलो व्यापारविशेष: स तस्य नमस्कार:। व्यापारे च कायिकवाचिकमानसिकरूपे विशेषो जातिविशेष एवानुभवसाक्षिकः। करशिरस्संयोगमात्रे तदव्यवहारात्, भवतोऽहमपकृष्ट इत्यादिवचने तदव्यवहाराच्च।

यद्वा कायिकादौ प्रत्येकमेव विधिकल्पनमतो नानार्थतैव।

**यत्तु** बुद्धिविशेषपूर्वकत्वज्ञानं विना कायिकादौ न तव्द्यवहार इति स एव वाच्योऽन्यत्र लक्षणेति, **तन्न।** कायिकादिव्यापारविशेषमनवगम्य बुद्धिविशेषपूर्वकत्वाज्ञानात्।

स्वीकृतवेदप्रमाणभाव: शिष्ट:। आचारे च वेदानिषिद्धत्वमविगीतत्वं विशेषणं देयम्। यद्वा अलौकिकविषयशिष्टाचारत्वमेव हेतु:। शिष्टाचारत्वं च भ्रमाजन्याचारत्वम्। आस्तिकनास्तिकयोरगम्यागमनचैत्यवन्दनादावाचारजनकज्ञानस्य भ्रमत्वात् बलवदनिष्टानुबन्धित्वादिष्टासाधनत्वाच्च। लोके च पाखण्डव्यावृत्तशिष्टव्यवहारो वेदप्रामाण्याभ्युपगमनिबन्धन:। तैर्थिकत्वेऽपि शिष्टाशिष्टव्यवहारो वेदनिषिद्धाकर्तृत्वतत्कर्तृत्वनिन्धन:। यद्वा वेदप्रामाण्याभ्युपगन्तृत्वे सति यो यदा वेदनिषिद्धाकर्ता स तदा शिष्ट: तत्कर्ता त्वशिष्ट:।

अत एव वेदनिषिद्धाकर्तृत्वेऽपि बौद्धो न शिष्टः। पापजनकत्वज्ञानं विना वेदनिषिद्धकर्तृत्वं यस्य नास्ति स शिष्ट इति तु न। तैर्थिकस्यापि कस्यचित् पापजनकत्वज्ञानं विना वेदनिषिद्धकर्र्तृत्वात्। **यत्तु** रागद्वेषहीनः शिष्टः। स च सर्वज्ञत्वान्मन्वादिरेव। अविगीततदाचारादेव वेदानुमानमिति, **तन्न।** एवं हि मन्वाद्याचारादर्शिनामाधुनिकानां मङ्गले प्रवृत्तिर्न स्यात्। आधुनिकानामाचारेण मन्वाद्याचारमनुमाय तेन च वेदमनुमाय बालः प्रवर्तत इति चेत्, तर्हि यादृशाचारेण मन्वाद्याचारानुमानं स एव वेदानुमापकोऽस्तु, किमनुमितानुमानेन। आधुनिकानामपि शिष्टत्वेन व्यवह्रियमाणत्वाच्च। तथा च स्मृतिः -

**"यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।**

**श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यते।।"**

सर्वज्ञस्य मङ्गलाचारे मानाभावाच्च। मन्वादिप्रणीतस्मृतौ मङ्गलं दृश्यत इति चेत्, तन्न। स्मृतिकर्तुरसर्वज्ञत्वेऽपि वेदादर्थं प्रतीत्य स्मृतिप्रणयनसंभवात्।

**यत्तु** शिष्टाचारत्वेन कर्तव्यतैवानुमीयतां किं वेदेनेति, तत्र वक्ष्यामः।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मङ्गलवादः ।।**

## अथ प्रामाण्यवादः

### तत्र ज्ञप्तिवादः

**अथ** जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं **"प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगमः"** (न्या.सू.1-1-1) इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते।

ननु प्रमाणादीनां तत्त्वं प्रतिपादयच्छास्त्रं परम्परया निःश्रेयसेन संबध्यत इति न युक्तम्, प्रमाणतत्त्वावधारणस्याशक्यत्वात्। तद्धि प्रमातत्त्वावधारणाधीनम्। तच्च स्वतः परतो वा न संभवति, वक्ष्यमाणदूषणगणग्रासात्।

अथ किं प्रामाण्यज्ञानेन? प्रवृत्तिमात्रे तस्य व्यभिचारात्। बहुवित्तव्ययायाससाध्ये प्रवृत्तिश्चावश्यकार्थनिश्चयादेव। न च यस्य संशयव्यतिरेकनिश्चयौ प्रवृत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतु:, अनुमितौ व्याप्तेरिवेति वाच्यम्। तत्संदेहे सत्यर्थसंदेहेनार्थानिश्चयादेवा-प्रवृत्तेस्तत्र तयोरप्रतिबन्धकत्वादिति चेत् न। प्रामाण्यसंशयानन्तरमिदमित्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य प्रामाण्यनिश्चयाधीनत्वात् ।

ननु स्वत एवास्तु तन्निरूपणम् । तथा हि तत्र विप्रतिपत्तय: - ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा।

## अथ द्वितीया विप्रतिपत्ति:

तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वा। परत: पक्षे ज्ञात एव ज्ञाने प्रामाण्यग्रह:। स्वतस्त्वे प्रामाण्यवत एव ज्ञानस्य ग्रहात्।

## अथ तृतीया विप्रतिपत्ति:

स्वाश्रयग्राहकेण गृह्यत एव न वा ।

## अथ चतुर्थी विप्रतिपत्तिः

स्वाश्रयेण गृह्यत एव न वेति प्रत्येकमेव वा। **यत्तु** योगजधर्मसामान्यलक्षणप्रत्यासत्त्या स्वाश्रयप्रामाण्यं तेनैव गृह्यत इत्यंशत: सिद्धसाधनम्, अतो योगजधर्माद्यजन्यत्वं विशेषणमिति। **तन्न।** परं प्रत्यसिद्धे:। प्रामाण्यमात्रपक्षत्वे प्रामाण्यं स्वाश्रयेण ग्रह्यत एवेत्युद्देश्यप्रतीतेरसिद्धेश्च नांशत: सिद्धसाधनम्।

## अथ पञ्चमी विप्रतिपत्ति:

यद्वा घटोऽयमिति ज्ञानप्रामाण्यम् एतज्ज्ञानग्राह्यं न वा, एतज्ज्ञानग्राहकमात्रग्राह्यं न वेति ।

## अथ पूर्वपक्ष:

तत्र यद्यपि विशेष्यावृत्त्यप्रकारकत्वमगृहीतग्राहित्वं वा, सर्वधीयथार्थत्वपक्षेऽनुभवत्वजातेरभावेन स्मरणान्यज्ञानत्वं विशिष्टज्ञानत्वं वा प्रामाण्यं स्वस्य न तेनैव न वा अनुव्यवसायेन ग्रहणयोग्यम्, विशेष्यावृत्त्यप्रकारकत्वादेर्विशेषणस्य प्रागनुपस्थितौ तद्वैशिष्ट्यस्य ज्ञातुमशक्यत्वात्। नापि ज्ञानातीन्द्रियत्वे ज्ञानानुमित्या तद् गृह्यते, ज्ञानमात्रलिङ्गस्य प्राकट्यादेस्तद्व्यभिचारात्। नापि प्रमाहितज्ञातताविशेषात्, तस्य प्रथमं दुर्निरूपत्वाच्च। अन्यथा अप्रमाहितज्ञाततया अप्रामाण्यस्यापि स्वतो ग्रहापत्तिरिति।

तथापि तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्वैशिष्ट्यज्ञानत्वं वा प्रामाण्यम्। तन्निश्चयादेव निष्कम्पव्यवहारात्, लाघवात्। नान्यत् गौरवात्। तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव।। तथा हि विशेष्ये तद्धर्मवत्त्वं तद्धर्मप्रकारकत्वं च व्यवसायस्यानुव्यवसायेनानुमित्या स्वप्रकाशेन वा गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अत: ज्ञानवित्तिवेद्यो विषय इति व्यवसाये भासमाने धर्मधर्मिवत्तद्वैशिष्ट्यमपि विषय:। व्यवसायरूपप्रत्या-सत्तेस्तुल्यत्वात् ।

सम्बन्धितावच्छेदकरूपवत्तया ज्ञायमाने सम्बन्धिनि ससम्बन्धिकपदार्थनिरूपणमित्यनुव्यवसायस्य रजतत्वावच्छिन्नत्वेन पुरोवर्तिविषयत्वाच्च। अन्यथा पुरोवर्तिनं रजतं च जानामीति तदाकार: स्यात्, न तु रजतत्वेन पुरोवर्तिनमिति। अत एवाप्रमापि प्रमेत्येव ग्रह्यते। अनुव्यवसायस्य भ्रमविषयवैशिष्ट्यविषयत्वात्। न च न प्रामाण्यं प्रथमतो ज्ञातमिति न तदारोप: स्यादिति वाच्यम्। प्रामाण्यस्य ज्ञानग्राहकसामग्रीग्राह्यत्वेन ज्ञानवित्तिवेद्यत्वात्। अभावप्रतीतौ प्रतियोगित्वाभावत्वयोरिव।

तदभाववति तत्प्रकारकज्ञानत्वमप्रामाण्यं परतो ज्ञायते। तदभाववत्त्वस्य भ्रमानुल्लिखितत्वेनानुव्यवसायाविषयत्वात्। न चैवमनुव्यवसायस्य यावद्व्यवसायविषय-

विषयकत्वे भ्रान्तभ्रान्तिज्ञसंकर इति वाच्यम्। बाधानवतारदशायां तस्येष्टत्वात् । तदवतारे तस्यैव प्रतिबन्धकत्वात् उपनायकभ्रान्तेरभावाच्च।

अत एवान्यभ्रान्तिज्ञस्य न भ्रमः। अथ तद्वत्त्वं न धर्मधर्मिवैशिष्ट्यमात्रम्, किं तु तस्य विशेषणताविशेषः। स च व्यवसाये भासते नानुव्यवसाये, मनसो बहिरस्वातन्त्र्यादिति चेत्, न। व्यवसायोपनीतत्वेन विशेषणविशेष्ययोरिव विशेषणताविशेषस्यापि तद्विषयत्वात्, विशेषणताया निराकरिष्यमाणत्वाच्च।

एतेनास्वप्रकाशे न स्वतः प्रामाण्यग्रहः, धर्म्यग्रहे तद्धर्माग्रहात्। शब्दगन्धवद्योग्यत्वात्तद्ग्रहेऽपि ज्ञानं प्रमाणमिति धीर्न स्यात्। स्वप्रकाशेऽपि स्वमात्रसाक्षिणः स्वधर्मग्रहेऽसामर्थ्यात्। सामर्थ्ये वा अप्रामाण्यमपि गृह्णीयात्। परप्रकाशे लिङ्गेन मनसा वा जायमानं ज्ञानं न भ्रमव्यावृत्तं प्रामाण्यं गृह्णीयात्, व्यभिचारात् । न च यत्र यदस्ति तत्र तद्गृह्यते, अप्रामाण्यस्यापि स्वतो ग्रहापत्तेः, अनुव्यवसायस्यानुमितेर्वा विषयाजन्यत्वाच्चेति निरस्तम् ।

तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्वैशिष्ट्यज्ञानत्वं वा प्रामाण्यं व्यवसायस्येति स्वेनानुव्यवसायेनानुमित्या वा तद्ग्रहात्, तद्विषयत्वस्य तत्प्रकारकत्वस्य च ज्ञानग्राहकसामग्रीग्राह्यत्वात्। यदि च प्रामाण्यं परतो ज्ञायेत, तदा प्रामाण्यज्ञानेऽपि तदनुमापकलिङ्गपक्षव्याप्त्यादिज्ञानेषु च स्वविषयनिश्चयार्थं प्रामाण्यस्य परतो ज्ञेयत्वे फलमुखी कारणमुखी चानवस्था स्यादिति प्रामाण्यं न ज्ञायेतैवेति परिशेषादपि स्वतः प्रामाण्यग्रहः।।

**इति पूर्व पक्षः**

**अथ सिद्धान्तः**

**सिद्धान्तस्तु** - प्रामाण्यस्य स्वतो ग्रहेऽनभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्, ज्ञानग्रहे प्रामाण्यनिश्चयात्। अनिश्चये वा न स्वतः प्रामाण्यग्रहः। ज्ञानाग्रहे धर्मिज्ञानाभावान्न संशयः।

ननु कोटिस्मरणादिना संशयपूर्वक्षणे व्यवसायविनाशान्न तद्विशेष्यको मानस: संशय इति चेत् , न। ज्ञानोपनीते व्यवसाये प्रामाण्यसंशयात्।

ननु धर्मिज्ञानं न संशयहेतु: कोटिज्ञानविशेषादर्शनधर्मीन्द्रियसंनिकर्षै: प्रामाण्यसंशयरूप एव ज्ञानग्रह उत्पद्यत इति चेत्, न। ज्ञानातीन्द्रियत्वेन तज्ज्ञानं विना तद्धर्मिकमानससंशयानुपपत्ते:। लिङ्गं च न संशयजनकम्, तस्य निश्चायकत्वात्। ज्ञानस्य मानसत्वे च प्रामाण्यज्ञानवत् तत्सामग्र्यपि संशयप्रतिबन्धिका, तन्निश्चायकत्वात् । अन्यथा विशेषदर्शनकालेऽपि संशयापत्ते।

अथ धर्मिणि विशेषादर्शनदशायां एककोटिस्मरणे तदारोप: कोटिद्वयस्मरणे संशय इति निश्चयसामग्रीत: संशयसामग्री बलवतीति कोटिद्वयस्मरणे संशय एव स्यात् न तु निश्चय इति चेत्, न। विरुद्धोभयारोपसामग्रीद्वयासमाजादुभयारोप एक एव भवति। स एव संशय:। न त्वेकारोपसामग्र्या अपरारोपसामग्रीप्रतिबन्ध:, अविरोधात्। न चोभयारोपसामग्र्या एकनिश्चयसामग्रीप्रतिबन्ध इति वाच्यम्। प्रत्येकारोपसामग्र्यतिरिक्तायास्तस्या अभावात्। न च सामग्रीद्वयात्कार्यद्वयम्। समूहालम्बनवदुपपत्ते:। तस्मात् प्रामाण्यनिश्चयसामग्री-सत्त्वान्न तत्संशय: स्यात्। धर्मिज्ञानं च संशयहेतु:। अन्यथा संशये धर्मिनियम: कोट्युत्कटत्वं च न स्यात्।

अथ पीत: शङ्ख:, आदर्शे मुखमित्यादिभ्रमो विशेषदर्शनेऽपि यथा दोषान्तरात् , तथा निश्चितेऽपि प्रामाण्ये दोषान्तरात्तत्संशय इति चेत्, न। तद्वदेवात्रापि प्रवृत्तिप्रसङ्गात्। (साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनं विरोधि)। साक्षात्कारिभ्रमे साक्षात्कार्येव विपरीतनिश्चय: प्रतिबन्धक:, न त्वानुमानिकादि:। संशये तु निश्चयसामान्यम्। अनुमानादिना तन्निश्चये कदाचिदपि तस्यानुत्पादात् , दिङ्मोहादौ तथा दर्शनात्। तच्च न, पित्तादिना प्रतिबन्धात्। न च जात्यैव कश्चिद्दोषोऽस्ति। न च प्रामाण्यसंशयाद् विषयसंशयवत् प्रामाण्यज्ञाने प्रामाण्यसंशयात् प्रामाण्यसंशय इति वाच्यम्। प्रामाण्यज्ञानेऽपि स्वत: प्रामाण्यग्रहे तत्संशयानुपपत्ते:।

ननु ज्ञानमात्रं न विरोधिबुद्धिनिवर्तकं, भ्रमोत्तरं बाधकज्ञानोदयात्, किं त्वनन्यथासिद्धम्। अत एव तेन विनापि तज्ज्ञानं सम्भवतीति अन्यथासिद्धतया शङ्कितं तन्निश्चयं परिभूय ज्ञानविषयत्वाद् विषये यथा संशयस्तथा प्रामाण्ये तन्निश्चयस्यान्यथासिद्धिशङ्कया तं परिभूय भवति संशयः। न च व्यवसायस्य ज्ञानत्वे घटविषयकत्वे च यथाऽनुव्यवसायविषयत्वान्न संशयस्तथा प्रामाण्येऽपि न स्यात्, अनुव्यवसायस्य प्रमात्वनियमादिति वाच्यम्। अज्ञाने अविषये च ज्ञानत्वविषयत्वयोरनुव्यवसायेनाग्रहणनियमात् तद्विषयत्वमनन्यथासिद्धं प्रामाण्यविषयत्वं च तेन विनापि संभवतीति तत्र संशय इति चेत्, मैवम्। भ्रमत्वमन्यथासिद्धत्वम्। ततश्च प्रामाण्यनिश्चये भ्रमत्वसंशयेन तद्विषये प्रामाण्यसंशय इति फलितोऽर्थः। भ्रमत्वसंशयश्च तज्ज्ञानाज्ञानाभ्यां न सम्भवतीत्युक्तत्वात्। एवमन्यत्रापि भ्रमत्वसंशयान्न विषये संशयः, स्वतःप्रामाण्यग्रहे भ्रमत्वसंशयाभावात्।

न च वाच्यं प्रामाण्यसंशयान्न विषये संशयः, मानाभावात्। ज्ञानविषयत्वात्समानधर्मादेव तदुपपत्तेः। न चैवं सर्वत्र विषयसंशये तन्निश्चयोच्छेदः, प्रामाण्यसंशयेऽपि तुल्यत्वादिति। तस्यासार्वत्रिकत्वात्। भ्रमत्वसंशयं विना निश्चितविषये संशयानुत्पत्तेरानुभविकत्वाच्च।

अथ तद्वति तत्प्रकारकत्वं प्रामाण्यम्, तच्च ज्ञानग्राहकेण गृहीतमेवेति न तत्संशयः। न चास्मिन्निश्चितेऽपि प्रामाण्यसंशयात् न तत्प्रामाण्यमिति वाच्यम्। एतन्निश्चयादेव निष्कम्पव्यवहारादिति चेत्, अस्तु तावदिदं प्रामाण्यम्, तथाप्यनुव्यवसायानन्तरं व्यवसायस्य प्रामाण्ये अर्थस्य तद्वत्त्वे च संशयस्यानुभवसिद्धत्वान्नार्थतद्वत्त्वं तस्य विषयः।

ननु व्यवसायस्य इदंत्वरजतत्वविशिष्टेदंविषयत्वेऽनुव्यवसाय एव मानम्। तथा च यावद्व्यवसायोल्लिखितप्रकारविशिष्ट एव धर्मी अनुव्यवसाये भासते। अन्यथा विषयांशे तस्य निर्विकल्पकत्वे इदं रजतं जानामीति तदाकारो न स्यात्। अतो धर्मिणीदंत्वरजतत्ववैशिष्ट्यमनुव्यवसायेन गृहीतमिति धर्मिणि स्वतःप्रामाण्यग्रहवद्रजतत्व-

वैशिष्ट्येपि स्वत:प्रामाण्यज्ञानमवर्जनीयम् अत एव धर्म्यंशे न कदापि प्रामाण्यसंशय इति चेत्, मैवम् - इदं रजतं च जानामीति नानुव्यवसाय:, बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात्। किं त्विदमिदत्वेन रजतत्वेनजानामीति। तत्रेदंत्वरजतत्वे प्रकारत्वेन भासेते। तत्प्रकारकज्ञानवत्वं चात्मनि भासते। अन्यथा प्रकारवाचितृतीयार्थासंभव:। रजतत्ववैशिष्ट्यस्य तदर्थत्वे व्यवसायेपि तृतीयार्थोल्लेखापत्ति:।

तथा च धर्मिणीदत्वरजतत्वप्रकारज्ञानविषयत्वे तादृशज्ञानवत्त्वे चात्मनोऽनुव्यवसाय एव मानमिति न विषये तस्य निर्विकल्पकत्वम्। अत इदंत्वरजतत्ववैशिष्ट्यं पुरोवर्तिनि नानुव्यवसायविषय इति न स्वत: प्रामाण्यग्रह:। तस्मादनभ्यासदशापन्नज्ञानप्रामाण्यं परतो ज्ञायते सांशयिकत्वादप्रामाण्यवदित्या**चार्या:**।

ननु स्वग्राह्यत्वेऽपि कदाचित्परग्राह्यत्वात् स्वस्याप्यन्यापेक्षया परत्वात् भट्टमते च परग्राह्यत्वात्सिद्धसाधनम्।

न च ग्राह्यप्रामाण्यापेक्षया परत्वम्, ग्राहकस्यापि ग्राह्यप्रामाण्यत्वेन तदपेक्षया परत्वाभावात्, अग्राह्यप्रामाण्यापेक्षया परत्वे अप्रामाण्यप्रसङ्गात्।

**उच्यते**। अनभ्यासदशापन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यम् स्वाश्रयातिरिक्तग्राह्यं वा।

स्वाश्रये सत्यपि तदुत्तरतृतीयक्षणवृत्तिसंशयविषयत्वात् अप्रामाण्यसंशयाजन्यसंशयविषयत्वाद्वा अप्रामाण्यवत्। अर्थे निश्चितेऽपि न तन्निश्चयानन्तरतृतीयक्षणे अर्थसंशयो न वा प्रामाण्यसंशयं विनेति नार्थे व्यभिचार:। विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यम् स्वाश्रयनिश्चये सति तत्तदुत्तरतृतीयक्षणे अप्रामाण्यसंशयं विना वा सन्दिह्यमानत्वात् अप्रामाण्यवत् ।

यद्वा अनभ्यासदशापन्नैतज्ज्ञानप्रामाण्यम् एतत्प्रामाण्यसंशयपूर्वकालीनैतद्ज्ञान-निश्चयाविषयः एतज्ज्ञाननिश्चयानन्तरं संदिह्यमानत्वात् अप्रामाण्यवत् ।

न च स्वपदस्य प्रामाण्यमात्रपरत्वात् तदाश्रयाग्राह्यत्वेन बाध:। स्वपदस्य सम्बन्धिपरत्वेन समभिव्याहृतपरत्वात्। अन्यथा स्वस्य परत्वात् परस्य च स्वत्वात्

तदेतत्त्वस्य तदेतदन्यत्वस्य च स्वपरसाधारणत्वात् स्वत: परतो वेति संश. न स्यात्। प्रामाण्यस्य स्वग्राह्यत्वे बाधात् परिशेषणन्यथाग्राह्यत्वं परतो ग्राह्यत्वमिति **कश्चित्।** प्रथमं च प्रामाण्यज्ञानं व्यतिरेकिणा ।

ननु प्रामाण्यप्रसिद्धिं विना व्याप्त्यग्रहात् कथमनुमानम् । अथ व्याघातदण्डभयेन प्रमातद्विषयसिद्धौ तद्दृष्टान्तेन ज्ञेयत्वादिना वह्नेः प्रमाविषयत्वमनुमेयम्।

ततश्च सामान्यतस्तत्सिद्धौ न साध्याप्रसिद्धि:। विशिष्यानिर्णयान्नान्वयित्वासाधारण्ये।

न च प्रामाण्यं नानुगतम् किं तु प्रतिज्ञानं विषयप्रकारभेदात् भिन्नम्। तथा च वह्निज्ञानस्य वह्न्यवृत्तिप्रकारानवच्छिन्नत्वादिकं साध्यं तच्चाप्रसिद्धमिति वाच्यम्।

वह्निज्ञानस्य विशेष्यावृत्तिप्रकारानवच्छिन्नत्वादिकं साध्यमानं पक्षधर्मताबलेन वह्निविषयकप्रमात्वे पर्यवस्यतीति चेत्, तर्हि प्रथमं कस्यापि स्वार्थं प्रामाण्यानुमानं न स्यात् प्रामाण्यनिषेधरूपस्य परकीयव्याघातस्य तदा अनुपस्थितेः। स्वयं प्रामाण्यनिषेधस्य तद्धीपूर्वकत्वात् प्रामाण्यमपरिज्ञाय प्रामाण्यनिषेधेन परकीयव्याघातस्यप्यज्ञानाच्च। प्रवृत्तिसंवादविसंवादाभ्यां तद्धेतुज्ञानवैचित्र्यानुमानेऽपि यथोक्तरूपप्रामाण्यस्य विशिष्याप्रतीतेरिति ।

उच्यते। प्राग्भवीयसंस्काराद् विशेष्यावृत्त्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा प्रामाण्यमात्रं स्मृतं वह्निज्ञानादौ साध्यमानं सर्वनाममहिम्ना पक्षधर्मताबलाद् वह्निज्ञानस्य विशेष्यावृत्त्यप्रकारकत्वादौ पर्यवस्यति। स्वत: प्रामाण्यनिषेधे प्राथमिकप्रामाण्य-ज्ञानस्यान्यथोपपादयितुमशक्यत्वादिति **संप्रदायविदः**।

**वयं तु ब्रूमः** - प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम्। तत एव निष्कम्पप्रवृत्तेरुपपत्तेः। तदेव वा सिध्यत् पक्षधर्मताबलेन तद्वति तत्प्रकारकत्वादिकमादाय सिध्यति। तदनन्तरमर्थाद्वा सिध्यतीति वक्ष्यते। तथा हि - अयं वह्नित्वेनानुभव: - न वह्नित्वाभाववति वह्नित्वप्रकारकः, अवह्निवृत्त्यप्रकारको न, विशेष्यावृत्तिप्रकारको न,

वह्नित्वप्रकारकत्वे सति वह्न्यविशेष्यको न, वह्नित्वव्यधिकरणप्रकारावच्छिन्नो न, वह्न्यवृत्तिप्रकारको न वा-दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात्, दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वाद्वा - यन्नैवं तन्नैवं यथा वह्न्यप्रमा। तत्र बाधानन्तरं स्मृत्युपनीते भ्रमे वह्नित्वाभाववति वह्नित्वेन मम ज्ञानं वृत्तमित्यप्रामाण्यं मनसैव परिच्छिद्यते मानान्तरेण वेति सर्वसिद्धम् ।

एवं वह्न्यप्रमायां वह्नित्वाभाववति वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वा-भावयोर्व्याप्तिग्रहेऽप्रामाण्यव्यापकहेत्वभावाभावरूपाद्धेतोरप्रामाण्याभावरूपं साध्यं सिध्यति। यद्व्यापकतया हेत्वभावो गृहीतस्तदभाव एव हेतुना साध्यते। यत्र त्वभावस्य व्यापकता हेत्वभावस्य तत्र ज्ञायते तत्र साध्यप्रसिद्धिरङ्गम्, तां विना तदज्ञानात्। यत्र तु भावव्यापकता हेत्वभावस्य तत्र न तदङ्गम्। तेन विनापि व्यतिरेकव्याप्तेर्ग्रहात्। अत एवेतरव्यापकता आकाशत्वाभावस्य गृहीतेत्याकाशत्वेनाप्रसिद्ध एवेतरान्योन्याभावः सिध्यति ।

विशेषणज्ञानं विना कथं प्रामाण्यविशिष्टानुमितिरिति चेत्, प्रथमं न कथंचित्। ज्ञाने प्रामाण्यमित्यानुमित्यनन्तरं तेनैव हेतुना तत्रैव प्रामाण्यविशिष्टानुमितिः, अभावविशेष्यकप्रतीत्यनन्तरमभाववद्भूतलमिति ज्ञानवत्। एवं चेदं वह्नित्वप्रकारकज्ञानं तद्वति तदभाववति वेति संशयानन्तरं तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यन् तत्प्रकारकतामादाय सिध्यति। तृतीयप्रकाराभावेन तेन विना साध्यस्योपसंहर्तुमशक्यत्वात्, ज्ञाननित्यत्ववत्।

यद्वा इदं वह्नित्वप्रकारकज्ञानं वह्नित्ववद्विषयकं, वह्नित्वाभाववदविषयकत्वे सति सविषयकत्वात्, यन्नैवं तन्नैवं यथा वह्न्यप्रमेति व्यतिरेक्यन्तरात्तत्सिद्धिः। अतिरिक्तविषयतापक्षे अयं वह्नित्वेनानुभवोऽवह्निवृत्तिवह्नित्वप्रकारकविषयताको न, वह्नित्वासमानाधिकरणवह्नित्वप्रकारकविषयताको न, विषयताश्रयावृत्तिप्रकारको न वेति साध्यम्। वह्निवृत्तिवह्नित्वप्रकारकविषयताकत्वं, विषयताश्रयवृत्तिप्रकारकत्वं वा अर्थात्

सिध्यति, न तु प्रथमं, साध्याप्रसिद्धेः। वह्निभ्रमे च विषयताश्रयो न वह्निः, विषयताया विशेष्यवृत्तित्वादिति भ्रमत्वेन न सिद्धसाधनम्।

**अन्ये तु** वह्निभ्रमे या विशेषणवृत्तिर्विषयता सा विशेष्यवृत्तिविषयताया अभिन्नेति न सा वह्नित्वासमानाधिकरणधर्मानवच्छिन्नेति न सिद्धसाधनमिति। न च मणिज्ञानस्य प्रामाण्यानुमाने मणिप्रभायां मणिभ्रमेण प्रवृत्तस्य मणिप्राप्तौ मणिगोचरप्रयत्नजनकमणित्वप्रकारकनिश्चयत्वमनैकान्तिकमिति वाच्यम्। मणिप्रभाविषयकज्ञानेन भिन्नविषयतया मणिगोचरप्रयत्नानुत्पादात्। मणिप्राप्तिस्तु नान्तरीयकत्वात्। ज्ञानप्रयत्नयोरसमानकालत्वेऽप्यनुभवस्मरणयोरिव मनसा कार्यकारणभावग्रह इति नासिद्धिः। अभावसाध्यके च निर्विकल्पकस्य प्रथमं सपक्षत्वेनानिश्चयान्नासाधारण्यम्। तथा इयं पृथिवीत्यनुभवः - पृथिवीत्वाभाववति पृथिवीत्वप्रकारको न, अपृथिवीवृत्तिप्रकारको न, विशेष्यावृत्तिप्रकारको न, पृथिवीत्वप्रकारकत्वे सति पृथिव्यविशेष्यको न, पृथिवीत्वव्यधिकरणप्रकारावच्छिन्नो न, पृथिव्यवृत्तिप्रकारको न वा - गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति व्यतिरेकी। पृथिवीत्वभ्रमः पृथिवीत्वाभाववति पृथिवीत्वप्रकारक इति न भ्रमत्वेन सिद्धसाधनम्, न वा गन्धवद्विशेष्यक इति न व्यभिचारः। पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादिकमर्थात्सिध्यति। विषयतापक्षे अयं पृथिवीत्वेनानुभवः - अपृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताको न, पृथिव्यवृत्तिपृथिवीत्वप्रकारकविषयताको न, पृथिवीत्वासमानाधिकरणपृथिवीत्वप्रकारकविषयताको न, विषयताश्रयावृत्तिप्रकारको न वेति साध्यम्। पृथिवीत्वसमानाधिकरणपृथिवीत्वप्रकारकविषयताकत्वादिकमर्थात् सिध्यति।

**अन्ये तु** पृथिवीत्वासमानाधिकरणप्रकारावच्छिन्नविषयताकत्वाभावः साध्यः, गन्धासमानाधिकरणाप्रकारकगन्धसमानाधिकरणप्रकारकविषयताप्रतियोगिज्ञानत्वात्। तेन संशयव्यवच्छेदः। निश्चयत्वं वा तद्विशेषण**मित्याहुः** ।

शीता पृथिवीत्यनुभव: पृथिव्यंशे प्रमैव। प्रमाभ्रमरूपे च समूहालम्बने न व्यभिचार:। अंशे तस्यापि प्रमात्वात् , विशेष्यभेदेन विषयताभेदाच्च । न च प्रकारभेदेन विषयताभेद:, मानाभावात्।

**यत्तु** - इयं पृथिवीत्यनुभव: पृथिवीत्वसमानाधिकरणधर्मावच्छिन्नपृथिवीविशेष्यक-विषयताक:, पृथिवीत्वव्यधिकरणधर्मानवच्छिन्नपृथिवीविशेष्यकविषयताक:, पृथिव्यवृत्ति धर्मानवच्छिन्नपृथिवीवृत्तिविषयताको वा-गन्धासमानाधिकरणधर्माप्रकारकविषयताप्रतियोगि-ज्ञानत्वात्, अगन्धवदवृत्तिपृथिवीत्वप्रकारकविषयताकत्वात्, गन्धसमानाधिकरणविषयता-प्रतियोगिज्ञानत्वा**द्वेति।**

**तन्न।** साध्याप्रसिद्धे:। किं त्वर्थादेव तत्सिध्यति।

एवं यत्प्रकारव्याप्यतया यद्गन्धस्नेहसमर्थप्रवृत्तिजनकत्वकरचरणादिकमवगतं तद्वति तत्प्रकारकज्ञानत्वमेव प्रामाण्ये लिङ्गम् ।

ननु वह्निज्ञानस्य दाहसमर्थविषयत्वं न दाहसमर्थोऽयमिति व्यवसायगम्यम्, ज्ञानविषयतयोस्तदविषयत्वात्। नापि तदनुव्यवसायगम्यम्, पुरोवर्तिदाहसामर्थ्यस्य तदगोचरत्वात्। व्यवसायोपनीतदाहसामर्थ्यस्य च भाने तदसामर्थ्यात्। अन्यथा व्यवसायोपनीतस्य पुरोवर्तिनि वह्नित्वस्यानुव्यवसायविषयत्वे स्वत:प्रामाण्यग्रहापत्ते:। एवं पृथिवीजलज्ञानयोर्गन्धस्नेहवद्विषयकत्वग्रहोऽप्यनुपपन्न इति।

उच्यते। वह्नित्वप्रकारकज्ञानानुव्यवसाये सति तत्र विषये दाहसामर्थ्यज्ञानानन्तरं तत्स्मृत्युपनीते वह्निव्यवसाये स्मृत्युपनीतदाहसमर्थविषयकत्वम्। एवं जलपृथिवीज्ञानयो: स्मृत्युपनीतयो: ज्ञानोपनीतस्नेहगन्धवद्विषयकत्वं मनसा परिच्छिद्यते। गन्धादिमत्येव मम पृथिवीत्वाद्यनुभव इति गन्धादिमत्वपरिच्छेदानन्तरमनुभवात्। स्मृत्युपनीते धूमादौ व्याप्तिपरिच्छेदवत् , चक्षुषा चन्दने सौरभज्ञानवच्च।

तर्हि पृथिवीत्वज्ञाने गन्धवद्विशेष्यकत्वत् चक्षुषा गन्धवति पृथिवीत्वोपनयानन्तरमियं पृथिवीति पृथिवीत्वप्रकारकानुभवे उपनीते पृथिवीत्ववति पृथिवीत्वप्रकारकत्वम्। तथा तत्रैव

ज्ञाने घटत्वप्रकारकताविरहवत् पृथिव्यवृत्तिप्रकाराभाववत्वं, विशेष्यावृत्तिप्रकाराभाववत्वं वा प्रामाण्यं मनसैव परिच्छिद्यतामिति स्वत एव प्रामाण्यग्रह इति चेत्, न। ज्ञानान्तरोपस्थापितज्ञानवृत्तिप्रामाण्यग्रहे परतस्त्वानपायात्।

यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वम्, यावत्स्वाश्रयग्राहकग्राह्यत्वम्, तज्ज्ञानविषयक-जन्यज्ञानाजन्यजन्यज्ञानग्राह्यत्वं वा स्वतस्त्वम्। तदन्यथाग्राह्यत्वं तु परतस्त्वम्। मनसा चैवं प्रामाण्यग्रहस्याभ्युपगमे तज्ज्ञानविषयकजन्यज्ञानजन्यज्ञानग्राह्यत्वान्न परतस्त्वहानिः। व्यतिरेक्यनन्तरं तज्जातीयत्वेनान्वयिना ग्राह्यत्वान्न प्रामाण्यानुमानम्। यथा इदं शरीरज्ञानं प्रमा करचरणवति शरीरज्ञानत्वात् स्वशरीरज्ञानवत्। न च करचरणान्तरवति करचरणान्तरवत्त्वज्ञाने व्यभिचारः, शरीरांशे तस्य प्रमात्वात्।

एतेन करचरणवति शरीरज्ञानत्वादित्यत्र करचरणवत्त्वं नोपलक्षणम्, व्यावृत्तोपलक्ष्याभावात्। न च विषयता ज्ञानविशेषणम्, करचरणवत्त्वप्रकारकशरीरज्ञानत्वस्य व्यभिचारात्, शरीरमिति ज्ञाने तदसिद्धेश्च। विषयविशेषणत्वे करचरणवद्विषयक-शरीरज्ञानत्वस्य व्यभिचारात्। शरीरभ्रमस्यापि वस्तुतः करादिमद्विषयकत्वात्। नापि करचरणादिशून्ये यच्छरीरत्वेन ज्ञानं तदन्यत्वे सतीति विवक्षितम्। शून्य इत्यत्र विषयत्वं सप्तम्यर्थ इति करचरणशून्यविषयकशरीज्ञानान्यशरीरज्ञानत्वादित्यर्थः। तथा चासिद्धिः। शरीरज्ञानस्य तच्छून्यशरीरत्वादिविषयकत्वनियमात्। न वा करचरणशून्ये यच्छरीरत्वेन ज्ञानं न भवतीति विवक्षितम्। तृतीयार्थस्य विषयत्वे उक्तदोषात् अन्यस्यासम्भवादिति निरस्तम्।

करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञानत्वस्य हेतुत्वात्। शरीरभ्रमे च करचरणवतः शरीरस्य विशेषणत्वात्।

विषयतापक्षे करचरणादिशून्यनिष्ठशरीरत्वप्रकारकविषयताप्रतियोगित्वशून्यत्वे सति शरीरज्ञानत्वादिति हेतुः।

ननु नान्यगृहीतप्रामाण्यं ज्ञानं परप्रामाण्यनिश्चयरूपम्, अनवस्थानात्। नापि स्वज्ञायमानप्रामाण्यम्, स्वतःप्रामाण्यग्रहापत्तेः। अतोऽगृहीतप्रामाण्यमेव ज्ञानं

परप्रामाण्यनिश्चयरूपमास्थेयम्। तथा च व्यवसायोऽप्यगृहीतप्रामाण्य एव स्वविषयं निश्चाययतु। किं विषयनिश्चयार्थं तत्प्रामाण्यनिश्चयेन। अथ व्यवसायस्याप्रामाण्यदर्शनान्न तन्मात्रादर्थनिश्चयः। तर्हि प्रामाण्यानुमितेरप्यप्रामाण्यदर्शनान्न ततोऽपि प्रामाण्यनिश्चय इति चेत्, न ब्रूमो ज्ञानप्रामाण्यनिश्चयादेवार्थनिश्चय इति। किं तु यत्राप्रामाण्यशङ्का नास्ति करतलामलकादिज्ञाने तत्र व्यवसाय एवार्थनिश्चय इति तत एव प्रवृत्तिर्निष्कम्पा। यत्रानभ्यासदशायां प्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशयः, तत्र प्रामाण्यनिश्चयाधीन-ज्ञानादर्थं निश्चित्य निष्कम्पं प्रवर्तते, नान्यथेति सर्वानुभवसिद्धम् ।

अत एवागृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति। अप्रामाण्यशङ्काकलङ्काभावात्। यत्र तु प्रामाण्यज्ञाने अप्रामाण्यशङ्कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। एवं यावदप्रामाण्यशङ्कं तज्ज्ञानप्रामाण्यनिश्चयादेव तन्निश्चयः। न चैवमनवस्था। चरमज्ञानप्रामाण्य(ज्ञानज्ञान)स्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयान्तरसंचारेण वा प्रामाण्यसंशयानवश्यम्भावात् ।

अन्यथा भट्टमते प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वेनानवस्था स्यात्। गुरुमतेऽपि प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यम्, स्वरूपप्रामाण्याभ्यां बहिर्भूतत्वात्, परग्राह्यत्वेऽनवस्थानात्। किं तु परिशेषानुमानेन प्रमाणान्तरेण वा ग्राह्यम्। तथा च तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनैवेत्यनवस्थैव।

**यत्तु** - व्यवसायस्य प्रामाण्यनिश्चयादेव प्रवृत्तेर्न तस्यापि प्रामाण्यानुसरणमिति नानवस्था। न च प्रामाण्यसंशयादौचित्यावर्जितो विषयसंशय इति वाच्यम्। निश्चिते संशयाभावात्। अन्यथा स्वतो ग्रहेऽपि तत्संशयेऽनवस्थेति।

**तदसत्।** यदि प्रामाण्यसंशयान्न विषये संशयो निश्चितत्वात्, तदा विषयनिश्चयार्थं प्रामाण्यनिश्चयो व्यर्थः। प्राथमिकविषयनिश्चयादेव निष्कम्पप्रवृत्त्युपपत्तेः। नहि विषयसंशयमनादृत्य प्रामाण्यनिश्चयः प्रवृत्तिहेतुरित्युक्तम्। अन्यसंशयादन्यत्र निश्चिते कथं

संशय इति चेत्, अनुभवं पृच्छ। येन स्वसाक्षिकमेव प्रामाण्यसंशयस्य विषयसंशयहेतुत्वमनुमतम्। ज्ञानविषयत्वमपि प्रामाण्यसंशयमासाद्य विषयसंशायकम्।

ननु लिङ्गपक्षव्याप्त्यादीनां ज्ञानस्य प्रामाण्यावधारणेऽनवस्था, अनवधारणे हेत्वसिद्धिः। अथ लिङ्गादिज्ञानं स्वविषयावधारणे कर्तव्ये स्वप्रामाण्यज्ञानं नापेक्षते, अनुमानमात्रोच्छेदप्रसङ्गात्। लिङ्गादिनिश्चयस्य च स्वकारणाधीनस्य सर्वसिद्धत्वादिति चेत्, न। प्रामाण्यसंशयेन लिङ्गस्यापि संदेहात्। न हि न लिङ्गज्ञाने प्रामाण्यसंशयः, अविरोधादिति।

उच्यते। अप्रामाण्यशङ्काकलङ्काभावे लिङ्गादिज्ञानस्यैवार्थनिश्चायकत्वात्, तत्कलङ्के तूक्तैव गतिः।

**यत्तु** - व्यवसाये क्वचिदप्रामाण्यशङ्का भवति, क्वचिन्नेति त्वयापि वाच्यम्।

एवं बहुवित्तव्ययायाससाध्ये स्वर्गसाधनं याग इति ज्ञानं न गृहीतप्रामाण्यं प्रवर्तकम्, प्रामाण्यानुमितेः पूर्वमेव तस्य विनाशात्। किं तु तज्ज्ञानसमानविषयकमप्रामाण्यशङ्काशून्यं ज्ञानान्तरमेव।

नन्वेवं बहुवित्तव्ययायाससाध्ये निष्कम्पप्रवृत्तावनुपयोगित्वात् निष्फलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेनेति चेत् , न । स्वर्गसाधनं याग इति ज्ञानप्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरे अप्रामाण्यशङ्का न भवतीति ज्ञानान्तरमगृहीत-प्रामाण्यमपि स्वार्थनिश्चयरूपं निष्कम्पप्रवृतिं जनयतीत्यप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानमिति न निष्फलम् ।

**यत्तु** - अनुमानस्य निरस्तसमस्तविभ्रमाशङ्कस्य स्वतः एव प्रामाण्यग्रह इत्युक्तम्। तत् धूमवति वह्निज्ञानत्वमनुमितेः प्रामाण्यनियतमनुव्यवसायोपनीतम्। अतो विशेषदर्शनान्न तत्राप्रामाण्यशङ्केति प्रामाण्यनिश्चयादेवाप्रामाण्यशङ्काविरहात् अर्थं निश्चित्य निष्कम्पव्यवहार इत्यभिप्रायः।

वस्तुतस्तु परत: पक्षे न क्वचिदपि प्रामाण्यग्रह: प्रवर्तक इति। एवमनुव्यवसायस्य प्रामाण्यनियतत्वान्न प्रामाण्यशङ्का। न ह्यजानन् जानामीति प्रत्येति। न वा घटज्ञाने पटं जानामीति। भ्रमेऽप्यनुव्यवसायेन रजतत्वादिकं व्यवसायप्रकारत्वेनोल्लिख्यते। तच्च तथैव।

**यत्तु** - अभ्यासदशायां झटिति प्रचुरतरनिष्कम्पप्रवृत्तिदर्शनात् प्रामाण्यं स्वत एव गृह्यते, अन्यत्र तु परत इति। **तन्न।** विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारान-वच्छिन्नत्वादिकं प्रामाण्यं स्वतो ग्रहीतुमशक्यमिति परत एव गृह्यते। झटिति प्रवृत्तिस्तु करचरणादिमति शरीरज्ञानत्वादेर्विशेषस्यानुव्यवसायेन ग्रहादप्रामाण्यशङ्काशून्यात् व्यवसायादेव, न प्रामाण्यज्ञानं प्रवर्तकमित्युक्तम्। झटिति तत्समवधानं तु स्वकारणाधीनम्। न हि पिपासूनां झटिति प्रचुरतरा समर्था च प्रवृत्तिरम्भसीति पिपासोपशमनशक्तिरस्य **प्रत्यक्षा** इति ।

**।। इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे प्रामाण्यज्ञप्तिवाद:।।**

## अथ प्रामाण्यवादे उत्पत्तिवाद:

उत्पद्यतेऽपि प्रामाण्यं परतो न तु स्वतो ज्ञानसामग्रीमात्रात्। तज्जन्यत्वेऽप्रमापि प्रमा स्यात्। अन्यथा ज्ञानमपि सा न स्यात्। ज्ञानसामग्र्यां दोषानुप्रवेशादप्रमेति चेत्, तर्हि ज्ञानविशेषवदप्रमा प्रमाविशेष: स्यात्, ज्ञानसामग्रीजन्यत्वात्। तस्मात् प्रमाप्रमयोर्वैचित्र्यात् गुणदोषजन्यत्वम् ।

अथ यत्र गुणदोषौ विना तयोरभावस्तत्र ज्ञानसामग्र्येव नास्ति। तत्सत्त्वे ज्ञानमात्रोत्पत्तिप्रसङ्गादिति चेत्, न। विशेषविनाकृतसामान्यकार्याभावात्। तत्सामग्रीमादाय हि सामान्यसामग्री तां विना नास्त्येव वा। अन्यथा कार्यविशेषे कारणविशेषोच्छेद:।

ननु यथा एकजातीयसामग्रीसत्त्वेऽपि घटयोर्भेदो यमजयोर्वैधर्म्यं च, तथा प्रमाप्रमयोर्भेदो वैधर्म्यं च भविष्यति।

अथानुगतव्यवहारात् प्रमात्वमनुगतमिति प्रमामात्रेऽनुगतो हेतुर्वाच्यः, अनुगतकार्यस्याननुगतादनुत्पत्तेरिति चेत्, न। प्रमात्वस्योपाधित्वेन कार्यतावच्छेदकत्वे मानाभावात्। कार्यमात्रवृत्तिधर्मत्वस्य नीलघटत्वघटज्ञानत्वादौ व्यभिचारात्।

अथ प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या जन्यज्ञानत्वादप्रमावत् इति चेत्, न। प्रमाया ज्ञानस्य तद्धेतुजन्यतया साध्ये बाधात्, ज्ञानाजनकजन्यत्वे विरोधात्, अप्रमायां तदसिद्धेः, व्यर्थविशेषणत्वात् व्यावर्याप्रसिद्धेः। किं च यत्किंचिज्ज्ञानहेत्वपेक्षया सर्वतद्धेत्वपेक्षया वा अतिरिक्तत्वे इन्द्रियादिभिः सिद्धसाधनात्।

नापि ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येति साध्यम्। पूर्ववत् सिद्धसाधनात्, विरोधाच्च। न च सामान्यविशेषयोः सामग्रीद्वयम्, प्रमाया ज्ञानभिन्नत्वापत्तेः। अन्यथा सामग्रीभेदासिद्धिः, तस्य कार्यभेदकल्प्यत्वात्।

एतेन ज्ञानसामान्यहेत्वतिरिक्तहेतुजन्येति साध्यं प्रत्युक्तम् ।

सकलज्ञानाभिप्राये चेन्द्रियादिभिः सिद्धसाधनम्। ज्ञानत्वाभिप्राये हेत्वसिद्धिः। नापि ज्ञानत्वावच्छिन्नकार्यत्वान्यकार्यत्वप्रतियोगिककारणजन्येति साध्यम्। ज्ञानत्वस्य नित्यवृत्तितया कार्यत्वानवच्छेदकत्वात् ।

अथ यद्धर्माश्रयस्यासतः सत्त्वं हेत्वधीनं तत्कार्यतावच्छेदकम्, ज्ञानत्वं च तथा। न चासत इत्यधिकम्, व्योमादिसाधारणसत्त्वमात्रस्य हेत्वनियम्यत्वादिति चेत्, न। यदालिङ्गितस्य स्वरूपं हेत्वधीनं तत्कार्यतावच्छेदकं लाघवात्, ज्ञानत्वं तु न तथा।

अनित्यज्ञानत्वेतिकरणे इन्द्रियादिभिर्यथायथं सिद्धसाधनम्। तेषां प्रत्येकं ज्ञानमात्राहेतुत्वात् ।

एतेन प्रमात्वं ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताभिन्नकारणताप्रतियोगिककार्यता-वच्छेदकं ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वात् अप्रमात्ववदिति निरस्तम्। प्रमात्वस्य नित्यवृत्तित्वात्। अनित्यप्रमात्वं तथा कार्यमात्रवृत्तिधर्मत्वादित्यपि नीलघटत्वादिना व्यभिचारि।

अनित्यप्रमा प्रमाप्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वात् अप्रमावदिति चेत्, न। दोषस्य पित्तादेः स्वविषयप्रमाहेतुत्वेनाप्रमायां साध्याप्रसिद्धेः। घटदृष्टान्तत्वे तयैव व्यभिचारात्। शङ्खाद्यंशे पीतः शङ्ख इति ज्ञानस्यापि प्रमात्वात्, कारणव्यक्तिभेदजन्यत्वेन सिद्धसाधनाच्च।

अथ प्रमा अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणजन्या अप्रमाविजातीय-कार्यत्वात् घटवत्। यदि प्रमा अप्रमात्वासमानाधिकरणरूपनिरूपितकार्य त्वप्रतियोगिक-कारणजन्या न स्यात्, अप्रमा स्यादिति चेत्, न। अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वं संयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्धसाधनात्। अप्रमासाधारणव्यक्तिजन्यत्वं चाग्रेऽप्रमातादात्म्ये प्रयोजकमिति तर्कोऽप्यप्रयोजकः।

अथानित्यप्रमा प्रमाप्रमान्यतरप्रतिबन्धकजन्या, प्रमाप्रमान्यतरत्वात् अप्रमावत्, चाक्षुषप्रमा चाक्षुषभ्रमाजनकजन्या अनित्यप्रमात्वात् रासनप्रमावत् इति चेत्, न। प्रमाजनकासाधारणव्यक्तिभेदस्याप्रमाप्रतिबन्धकत्वेन चाक्षुषभ्रमाजनकत्वेन च सिद्धसाधनात्।

एतेन प्रमा स्वविरोध्यनुभवप्रतिबन्धकजन्या अनित्यानुभवत्वात् अप्रमावत्। दूरात्पुरुषस्य स्थाणुतया ज्ञाने संनिधौ च भूयोऽवयवेन्द्रियसंनिकर्षस्य विरोधिस्थाण्वनुभवप्रतिबन्धकत्वं पुरुषज्ञानजनकत्वं च दृष्टम्। अप्रमायां तु पित्तादेर्लिङ्गादिभ्रमस्य च तथात्वमिति निरस्तम्। प्रमाजनकव्यक्तिविशेषस्याप्रमाप्रतिबन्धकत्वं प्रमाजनकत्वं चास्तीति सिद्धसाधनादिति न प्रमायामतिरिक्तगुणसिद्धिः ।

किं च प्रत्यक्षप्रमादौ अनुगतस्यार्थान्तरस्य गुणस्याभावः। इन्द्रियसंनिकर्षादीनां चाननुगमः। न च जात्यैव गुणदोषौ, प्रमाजनकत्वं गुणत्वं भ्रमजनकत्वं च दोषत्वमतिप्रसक्तम्। तन्मात्रजनकत्वं चासिद्धमिति।

**।। इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे ।।**

## प्रामाण्यवादे उत्पत्तिवादपूर्वपक्ष:

## अथ उत्पत्तिवादसिद्धान्त:

उच्यते। एवमप्रमापि स्वत एव स्यान्न तु परत:, प्रमावदसाधारणकारणादेव तदुत्पत्तौ दोषस्य तत्राहेतुत्वात् ।

अथ ज्ञानसामग्रीसत्त्वेऽपि विशेषादर्शनादिपित्तादेरनुविधानादप्रमायां दोषो हेतुरिति चेत्, तर्हि विशेषदर्शनपित्ताद्यभावादित: तत्रैव विषये प्रमा तदभावान्नेति प्रमायामागन्तुककारणापेक्षेति कथं न परतस्त्वम्। अपि च नियमगर्भ: कार्यकारणभाव:। नियमश्च न व्यक्त्योरेव, व्यभिचारादतिप्रसङ्गाच्चेति नियमनिरूपकमनुगुणमनुगतमास्थेयम्। एवं चाप्रमायामिव प्रमायामपि तद्व्यावृत्तं कारणमनुगतमास्थेयम्।

किं च यत्कार्यं यत्कार्यविजातीयं तत् तत्कारणविजातीयकार्यजन्यम्, यथा घटविजातीय: पट:। अन्यथा कार्यवैजात्यस्य आकस्मिकत्वापत्ते:। घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रियसंनिकर्षादिजन्यमिति न व्यभिचार:।

एवं चानित्यप्रमा अप्रमाकारणविजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात्, घटवत्। एवं चानुगतस्य प्रमाहेतुत्वे प्रमा स्वविरोध्यनुभवप्रतिबन्धकजातीयजन्या जन्यानुभवत्वात् अप्रमावदित्यादावपि न सिद्धसाधनम् ।

अपि चानित्यप्रमात्वं कार्यतावच्छेदकम्, बाधकं विना कार्यमात्रवृत्तिधर्मत्वात्, अप्रमात्ववत्। नीलघटत्वं तु विशिष्टं न कार्यतावच्छेदकम्, प्रत्येकानुगतप्रयोजकद्वयादेव विशिष्टसिद्धिरार्थ: समाज:। घटज्ञानत्वादौ तु बाधकम्। अस्तु वा तत्राप्यनुगतभोजकादृष्टहेतुकत्वम्। अन्यथा कार्यमात्रे नादृष्टं हेतु: स्यात्।

एवमनित्यप्रमात्वम् अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणता-प्रतियोगिककार्यतावच्छेदकम्, अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् अप्रमात्ववत् इत्यनित्यप्रमायामप्रमाव्या-वृत्तानुगतहेतुसिद्धि:। अन्यथा अनुगतकार्यानुपपत्ते:।

तथा अनित्यप्रमात्वम् अप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, भ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्। चाक्षुषप्रमात्वं चाक्षुषाप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, चाक्षुषभ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्। अनित्यरजतप्रमात्वं रजताप्रमाकारणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, रजतभ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्। अन्यथा नियामकं विना चाक्षुषादिरजतज्ञानं किंचिद्रजतवृत्तिप्रकारकं किंचिद्रजतावृत्तिप्रकारकमिति नियमो न स्यात्। ज्ञानसामग्र्यास्तुल्यत्वात्।

**यत्तु** - प्रमाया असाधारणकारणजन्यत्वे साध्ये प्रमान्यत्वमुपाधि:। न च पक्षेतरत्वम्। तव ईश्वरज्ञानस्य प्रमात्वात् पक्षस्य व्यावर्यत्वात्। उभयसिद्धव्यावर्तकत्वं तन्त्रम्, न तु व्यावर्यस्य उभयसिद्धि:, गौरवात्। व्यतिरेकेऽसाधारणत्वं च पक्षेतरत्वस्यानुपाधित्वे बीजम्। तच्चात्र नास्ति। भगवज्ज्ञानस्य त्वत्संमतस्य सपक्षत्वादिति।

**तन्न।** विपक्षबाधकबलेन हेतो: साध्यव्याप्यत्वेनोपाधे: साध्याव्यापकत्वात्।

नन्वस्तु प्रमायां दोषाभावो हेतु:, आगन्तुकभावानपेक्ष्यज्ञानसामग्रीजन्यत्वं स्वतस्त्वम्। **यत्तु** अभावो न कारणम्। किंतु दण्डत्वादिवत्कारणतावच्छेदकत्वेन सामग्रीभेदोपलक्षक इति। **तन्न।** जपाकुसुमादिसंनिधौ न प्रमा, तदसंनिधौ स्फटिकादौ प्रमोत्पत्तेरनन्यथासिद्धत्वेन हेतुत्वादिति चेत्, न। भूयोऽवयवेन्द्रियसंनिकर्षविशेषदर्शनादिसमवधाने प्रमा तदभावे त्वप्रमेति प्रमायां गुण:, अप्रमायां तदभावो हेतुरित्येव किं न स्यात्।

अथासदर्थविषयकत्वे सदर्थविषयकहेत्वभावो न प्रयोजक:, ज्ञाने सदर्थविषयतानियमेन तदसंभवात्। सदर्थविषयकत्वेऽसदर्थविषयकारणाभावो हेतु: संभवति। प्रमाया: सदर्थमात्रविषयत्ववदप्रमायामसदर्थमात्रविषयत्वाभावादिति चेत् , न। तर्ह्यप्रमाया: सदर्थविषयता न स्यात्, हेत्वभावात्। सदर्थमात्रविषयत्वे असदर्थविषयहेत्वभावो हेतुरिति चेत्, तर्हि गुण एव तत्र हेतु:। तदभावस्त्वसदर्थविषयत्वे प्रयोजक इत्यस्तु।

ननु गुणाभावस्य साधारणत्वात्तदेव सत्यमसत्यं च न स्यात्, गुणतदभावयोरेकत्रासत्त्वादिति चेत्, न। दोषाभावेऽपि तुल्यत्वात्। क्वचित्कश्चिद्दोष इति गुणेऽपि समानम्।

गुणाभावादसन्मात्रविषयकमपि ज्ञानं स्यादिति चेत्, न। दोषादप्यसन्मात्रविषयकज्ञानापत्तेः। सर्वत्र विषये दोषो न संभवतीति गुणाभावेऽपि तुल्यम्।

अथ विशेषदर्शनादिर्गुणस्तदभावश्चाननुगत इति न तौ प्रमाप्रमाहेतू, किं तु दोषतदभावाविति चेत्, तर्हि पित्तादिर्दोषस्तदभावश्चाननुगत इति तावपि न तत्र हेतू। स्वप्रमायां स्वाभावस्य व्यभिचारश्च।

अथ दोषत्वं नैकम्। न हि तत्तद्भ्रमहेतुत्वं तत् , आत्मादौ गतत्वादननुगमाच्च। नापि भ्रममात्रहेतुत्वम्, पित्तादेरननुगतत्वेन तदभावादसंभवाच्च। नापि प्रमाहेत्वभावप्रतियोगित्वम्, अन्योन्याश्रयात्, पित्तादेः स्वप्रमाहेतुत्वाच्च। नापि स्वप्रमाभिन्नप्रमाप्रतिबन्धकत्वम्। एवं हि प्रत्यक्षप्रतिबन्धकस्य सल्लिङ्गपरामर्शस्य दोषत्वादनुमितिः प्रमा न स्यात्, भ्रमश्च स्यात्। तस्मात् क्वचित् कश्चिद्दोष इति चेत्, तर्हि गुणेऽपि तुल्यम्। स्यादेतत्, प्रमां भ्रमं चाकुर्वति ज्ञानहेतुस्तोमे मण्डूकवसाञ्जनदोषात् वंशोरगविभ्रमः, तदभावे वंशप्रमेति तत्र दोषाभावः प्रमाहेतुरित्यान्यत्रापि तथा, क्लृप्तत्वात् ।

मण्डूकवसा (च) नयन एव दोषः न त्वचीति तत्र दोषाभावात् त्वचा वंशप्रमैव। गौरोऽहमित्यभेदभ्रमहेतुदोषसंस्कारसत्त्वेऽपि मम शरीरमिति प्रमेति चेत्, न। विशेषादर्शनस्य तत्र हेतुत्वम्, न तु संस्कारस्य, तदसत्त्वे तदसिद्धेः। न च दूरे चक्षुषः संनिकर्षेऽपि केशादौ सजातीयसंयोगे प्रमा, तदभावे नेति तत्र संयोगरूपो गुणः प्रमाहेतुरित्यन्यत्रापि गुणजन्यतेति वाच्यम्। तावद्देशवर्तिकेशसाक्षात्कारे स हेतुः, तेन विना तदभावात्। तवापि तावद्दूरप्रमायां स हेतुः संनिकृष्टकेशप्रमायास्तेन विनापि भावात्। तत्रापि वा दोषाभावः कल्प्यो दोषजन्यत्वे अप्रमात्वापातात्।

ननु विशेषदर्शनं प्रमाहेतु:, विशेषादर्शनस्य दोषत्वे तदभावस्य हेतुत्वादिति चेत्, तर्हि दोषाभावत्वेन स हेतु: न तु गुणत्वेन भावत्वेन वा।

किं च विशेषदर्शनप्रतिबन्धका: पित्तादयो दोषा: आवश्यकत्वात्, न विशेषादर्शनम्। न च तेषामननुगतत्वेन विशेषदर्शनप्रतिबन्धकतयानुगमे लाघवाद् विशेषादर्शनमेव हेतुरिति वाच्यम्। क्वचित् कश्चित् दोष इत्यनुगमात्। अन्यथा पित्तादितोऽप्यप्रमा न स्यात्। अननुगमात्। मण्यादेरिवाननुगमेऽप्यदोषत्वाच्च। तदभावकूटस्य हेतुत्वात्। सर्वत्र विशेषादर्शनमेव हेतु:, पित्तादेरननुगमेन तत्रोपक्षयादिति चेत्, न। पित्ताद्युत्कर्षेण भ्रमोत्कर्षात्। पित्तादेरदोषत्वे च विशेषप्रमैव कुतो न भवति। विशेषस्य विशेषान्तरादर्शनादिति यदा, तदा अनवस्थैव।

किंच विशेषदर्शनं न प्रमामात्रे न वा प्रत्यक्षप्रमायां हेतुर्व्यभिचारात्। तत्रैव तद्धेतुत्वेऽनवस्थापाताच्च।

अथ प्रत्यक्षे इन्द्रियसंनिकर्षो गुण: अप्रमांशे तदर्थस्यासत्त्वेन संनिकर्षाभावात् दोषो हेतु:। न च प्रमांशेऽपि स हेतु:, अदोषत्वप्रसङ्गात्, प्रमांशस्याप्रमात्वप्रसङ्गाच्च। साक्षात्कारित्वं चेन्द्रियसंनिकर्षजन्यत्वादिति चेत्, न। ज्ञाने विषयरूपस्यांशस्ये-न्द्रियतद्दोषाजन्यत्वात् अप्रमांशे चेन्द्रियसंनिकर्षाभावेन साक्षात्कारित्वं न स्यात्।

दोषस्य तद्धेतुत्वेऽतिप्रसङ्गोऽननुगमश्च। प्रमायां च याथार्थ्यप्रयोजकमस्ति अप्रमायां दोषवदिति चेत्, न। दोषाभावस्य सत्त्वादिति।

उच्यते। प्रमामात्रे नानुगतो गुण:, किं तु तत्तत्प्रमायां भूयोऽवयवेन्द्रियसंनिकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम्, अन्वयव्यतिरेकात्।

तत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्ववत् प्रत्यक्षे विशेषदर्शनमपि गुण:, तदनुविधानात्।

ननु विशेषदर्शनहेतुरेव तद्धेतुरस्तु, तद्व्यतिरेकादेव तदभावोपपत्तेः। अन्यथा विशेषदर्शनमेव तत्र कुतो न स्यात्। तत्रापि तदपेक्षायामनवस्थानादिति चेत्, एवं व्याप्यविषयकव्यापकप्रत्यक्षनियमे अनुमिताविव पुरुषप्रत्यक्षे प्रामाण्यसंशयो न स्यात्, करादिमति पुरुषज्ञानत्वस्यानुव्यवसायेन निश्चयात्। तवापि विशेषदर्शनं विना कथं व्यापकप्रत्यक्षमिति चेत् - न। संशयविपर्ययोत्तरप्रमायां तस्य हेतुत्वात्। ममापि तद्धेतुस्तत्रैव हेतुरिति चेत्, न। करचरणचिबुकादीनां प्रत्येकं विशेषत्वेन तद्धेतूनामननुगततया तादृशप्रत्यक्षे अहेतुत्वात्। तद्दर्शनेषु च व्याप्यदर्शनत्वमनुगतमस्ति।

नन्वेवं संशयोत्तरं व्याप्यज्ञाने सत्यनुमितिः स्यात्, न प्रत्यक्षमनुमितिसामग्र्या बलवत्त्वादिति चेत्, न। अन्यत्र तथात्वेऽप्यत्र प्रत्यक्षसामग्र्या बलवत्त्वात्। तत्र पुरुषं पश्यामीत्यनुव्यवसायात्। अत एव विशेषदर्शनजन्यत्वेन ज्ञातं बाधकम्। तद्दर्शनजन्यं बाध्यम्। अन्यथा बाध्यबाधकव्यवस्था न स्यात्।

न च प्रमा बाधिका, करभ्रमजन्यपुरुषज्ञानस्यापि स्थाणुज्ञानबाधकत्वात्। नापि विपरीतबोधकत्वेन बाधकम्, बाध्यतुल्यत्वात्। अनन्यथासिद्धं बाधकमिति चेत्, न। विशेषदर्शनजन्यत्वस्यैव तदर्थत्वात्।

न च पीतः शङ्ख इत्यत्र विशेषदर्शनेऽपि श्वैत्यप्रमा नेति न तद्धेतुः। यद्विशेषदर्शनं हि भ्रमविरोधि तद्भावः प्रमाहेतुः।

प्रत्यक्षभ्रमे च प्रत्यक्षविशेषदर्शनं विरोधि। दिङ्मोहे गौरोऽहमिति भ्रमे च तथा दर्शनात्। तच्च तत्र दोषान्नास्ति।

अपि च लिङ्गसादृश्यवाक्यार्थभ्रमदोषाभावमात्रान्नानुमित्यादिरिति सत्यपरामर्शादि-गुणसिद्धिः।

एवं प्रमायाः गुणजन्यत्वेन वेदेऽपि प्रमा वाक्यार्थयथार्थज्ञानगुणजन्येति तदाश्रयेश्वरसिद्धिः।

ननु प्रत्यक्षादावस्तु गुणजन्यत्वम्। वेदे तु भ्रमाद्यभावचतुष्टयं प्रमाहेतुः। लोके भ्रमाद्यभाव एव प्रमोत्पत्तेरिति चेत्, न। तत्र लाघवाद् वाक्यार्थयथार्थज्ञानस्य हेतुत्वेन भ्रमाद्यभावानामन्यथासिद्धत्वात्। आप्तस्य भ्रमाद्यभावमात्रेण वाक्यार्थज्ञानं विना तादृशवाक्याभावाच्च। अन्यथा तवापि तत्र वक्तृज्ञानानुमानं न स्यात् तस्याहेतुत्वात्।

अस्तु वोभयमपि हेतुः, विनिगमकाभावात्। तथापि वेदे गुणसिद्धिः। न च नित्यनिर्दोषत्वात् दृष्टादेव वेदे प्रामाण्योपपत्तौ नापरिदृष्टनित्यज्ञानादिसर्वज्ञकल्पना, गौरवादिति वाच्यम्। प्रमाणवतः फलमुखगौरवस्यापि स्वर्गादाविवादोषत्वात्। पूर्वं कारणताग्रहसमये फलानुपस्थित्या गौरवाज्ञानात् लोके नित्यत्वाभावाच्च।

अथ वेदे कर्त्रस्मरणादेर्बाधकात् लोकेऽपि निर्दोषत्वेनैव प्रमाहेतुत्वम्, वेदे तु नित्यत्वेनैव वक्तुरभावेऽपि निर्दोषत्वमवधार्यत इति चेत्, न। बाधकस्य बहुशो निराकरिष्यमाणत्वात् भ्रान्तप्रतारकवाक्ये घटोऽस्तीति वाक्ये पटोऽस्तीति दोषजन्यवाक्ये च विसंवादात् प्रामाणे तदभावाच्च।

किं च दैववशसंपन्नं चैत्यं वन्देतेत्यादिकं शुकबालादिवाक्यमप्येवं प्रमाणं स्यात्, वक्तृदोषाभावात् प्रमाणानपेक्षत्वेन वेदतुल्यत्वाच्च।

ननु तवापि शुकादिभ्रान्तप्रतारकवाक्यं कथं प्रमाणम्, गुणाजन्यत्वात्। न च गुणाजन्यत्वात् वक्तृतात्पर्याविषयत्वाच्च तदप्रमाणम्। संवादेन साध्ये बाधात्।

**यत्तु** भ्रान्तप्रतारकवाक्ये योग्यतैव नास्ति। वक्तृज्ञातवाक्यार्थाबाधो हि योग्यता। भ्रमविषयश्च बाधित इति। **तन्न।** घटवति घटो नास्तीति भिन्नविषयतया भ्रमस्याहेतुत्वात् ।

किं च वाक्यार्थाबाधो योग्यता लाघवात्। वाक्यार्थश्च तत्राबाधित एव। न च शुकबालादिवाक्यादर्थबोध एव न भवति, किं त्वेवमयं वदतीत्येवंप्रकारा प्रतीतिरिति वाच्यम्। आकाङ्क्षादेरन्वयबोधसामग्र्याः सत्त्वेऽनुभवानपलापात्। संवादेन यथार्थत्वानुभवाच्च ।

एवं धूमभ्रमाद् वह्निमत्येव वह्न्यनुमितिर्न प्रमा स्यात् , यथार्थलिङ्गज्ञानाजन्यत्वात्। न च वह्न्यन्तरमेव तत्र विषयः, प्रत्यभिज्ञानात्

गोत्वाद्येकव्यक्तिके तदभावाच्च। नापि तत्रान्यतादात्म्यारोपः, संसर्गारोपात् लिङ्गोपधानांशे भ्रमत्वेऽपि साध्यांशे प्रमात्वादिति।

**उच्यते।** भ्रान्तप्रतारकवाक्ये शुकादिवाक्ये च प्रमाणशब्दत्वेनाप्तोक्तत्वात् वेदवदीश्वरस्यैव यथार्थवाक्यार्थज्ञानं जनकम्, तस्य कार्यमात्रे कर्तृत्वात्। शुकादिवाक्यस्य च वेदतुल्यता दोषाभाववादिनापि वाच्या।

नन्वेवं शब्दाभासोच्छेदः तस्यापीश्वरवक्तृकत्वादिति चेत्, न। तद्वाक्यार्थस्यासत्त्वेन भगवज्ज्ञानागोचरत्वात्। एवं लिङ्गाभासजन्यप्रमायामपि वह्निव्याप्यवत्त्वज्ञानमीश्वरस्यैव जनकमिति **संप्रदायविदः**।

(अत्र) (वयं तु) **ब्रूमः**। शाब्दप्रमायां लोके वक्तुर्यथार्थज्ञानं न गुणः, किं तु योग्यतादिकं यथार्थतज्ज्ञानं वा। लाघवादावश्यकत्वाच्च। भ्रमप्रमादविप्रलिप्साजन्ये वाक्ये विसंवादिनि न यथार्थयोग्यताज्ञानम्, वाक्यार्थस्य बाधितत्वात्। एवं करणापाटवादन्यस्मिन्वक्तव्येऽन्याभिधाने विसंवादिनि, संवादिनि तु प्रमाणमेव। योग्यतादिज्ञानमेव क्वचिन्नास्ति।

नन्वेवं नानार्थादन्यपरात्तात्पर्यभ्रमे तं विनैव वा यथार्थयोग्यतादिज्ञाने सति **संवाद्य**परशक्यज्ञानमपि प्रमेति तत्रापि तद्वाक्यं प्रमाणं स्यादिति चेत्, न। इष्टत्वात्। तात्पर्यविषये च तद्वाक्यं न तदा प्रमाजनकमिति न प्रमाणम्। एवं वेदेऽपि यथार्थयोग्यताज्ञानमेव गुण इति न वैदिकप्रमायां गुणजन्यत्वेनेश्वरसिद्धिः।

**स्यादेतत्।** वेदे वक्तुर्यथार्थवाक्यार्थज्ञानमपि गुणः। लोके प्रमाणशब्दं प्रति तादृशस्य ज्ञानस्य हेतुत्वात्।

अत एव तव लोके वक्तृज्ञानानुमानम्। एवं च वेदो वाक्यार्थगोचरयथार्थज्ञानवत्स्वतन्त्रपुरुषप्रणीतः प्रमाणशब्दत्वात् गामानयेति वाक्यवदितीश्वरसिद्धिः।

**मैवम्।** प्रमाणशब्दत्वं हि वाक्यार्थयथार्थज्ञानपूर्वकतां विनापि संभवति, आवश्यकयोग्यतादिसत्त्वात् यथार्थतज्ज्ञानाद्वेत्युपपादितम्, अतोऽप्रयोजकमेतदिति। तथापि

लोके वाक्यार्थज्ञानं प्रमाणवाक्ये कारणं गृहीतमिति तेन विना कथं तदिति चेत्, न। प्रवृत्त्याद्यर्थं हि प्रयोज्यस्य वाक्यार्थज्ञानमुद्दिश्य एतादृशपदेभ्यो वाक्यार्थं ज्ञास्यतीति बुद्ध्या वाक्यप्रयोग इत्यन्यथासिद्धं प्रथमं वक्तुर्वाक्यार्थज्ञानम्, न तु तादृशपदावलीप्रयोगे तस्य हेतुत्वम्। तादृशपदसमूहस्य प्रत्येकपदहेतोरेव शुकादिवदुपपत्तेः।

अथ तात्पर्यविषये वेदः प्रामणम्। तात्पर्यं च तत्प्रतीतीच्छयोच्चारणम्। न चास्मदादेर्वेदं विनातीन्द्रियवेदार्थगोचरज्ञानं, येन तत्प्रतीतीच्छयोच्चारणं भवेत्। न च वेदादेव तत्, अन्योन्याश्रयात्। अतः सकलवेदार्थदर्शिना यस्य वेदस्य यदर्थप्रतीतीच्छयोच्चारणं कृतं स तत्र प्रमाणमिति तादृशेच्छैव गुणः, तज्जन्या वेदार्थप्रमेति तदाश्रयस्वतन्त्रपुरुषधौरेयसिद्धिरिति चेत् ,

मैवम्। मीमांसादिसकलाङ्गसाचिव्याद्वेदवाक्यार्थज्ञानवताध्यापकेन तत्तदर्थ-प्रतीतीच्छया वेदस्योच्चारणमिति वेदार्थयथार्थविदस्तत्तदर्थे तात्पर्यमस्त्येव। एवं पूर्वपूर्वतादृशाध्यापकेन तत्तदर्थप्रतीतीच्छयोच्चरितत्वं तत्परत्वमवगम्योत्तरोत्तरेषां वेदार्थप्रत्यय इत्यनादिस्तात्पर्यपरंपरेति किमीश्वारेण।

तर्हि वेदार्थानभिज्ञाध्यापकेनोच्चारितवेदस्य न तदर्थप्रतीतीच्छयोच्चारणमिति तात्पर्याभावान्न प्रमाणं न वा ततोऽर्थनिश्चय इति चेत्, न। अनादौ संसारे तस्य वेदस्य कदाचित् केनचित् मीमांसाद्यधीनवेदार्थज्ञानवता तत्प्रतीतीच्छयोच्चारणं कृतम्, तावतैव तत्परत्वमिति ।

**प्राभाकरास्तु** - प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते चेति। तथा हि - निष्कम्पप्रवृत्त्यङ्गं स्मृत्यनुभवसाधारणं यथार्थत्वमेव प्रामाण्यम्। तच्च ज्ञानमात्रसामग्रीजन्यम्, न तु गुणं दोषाभावं वापक्षते। सर्वज्ञानानां यथार्थत्वेनाव्यभिचारात्।

अयथार्थस्तु व्यवहारः, तस्यैव बाध्यत्वात्। ज्ञानं तु न बाध्यते। बाधकाभिमतज्ञानतुल्यत्वात्। ज्ञाने चायथार्थत्वव्यपदेशः विपरीतव्यवहारजननोपाधिकः।

अथ यथार्थत्वस्य प्रामाण्यत्वे रजतज्ञानं शुक्तौ कथमप्रमाणम्, अप्रामाण्यं च कथं परत उत्पद्यत इति चेत्, न। अयथार्थत्वं नाप्रामाण्यम्, सर्वधियां यथार्थत्वात्। किं तु विपरीतव्यवहारप्रवर्तकत्वम्। तच्च ज्ञानसामग्र्यामधिकदोषानुप्रवेशात् दोषहेतुकासंसर्गाग्रहाद्वा उत्पन्ने ज्ञाने दोषसहकाराद्वा धर्मधर्मिणोरसंसर्गाग्रहरूपमेकत्वासंसर्गाग्रहसहितं परत उत्पद्यते, न तु ज्ञानमात्रसामग्रीतः, प्रमायामतिप्रसङ्गात्।

उन्नीयते च विपरीतव्यवहारजनकत्वं बाधकात्। तस्य तेन तदनुव्यवसायेन वा ग्रहीतुमशक्यत्वात् । ज्ञानस्वरूपे च न दोषतदभावौ हेतू, व्यभिचारात्।

ज्ञानायथार्थत्वेऽपि यथार्थत्वं ज्ञानसामग्रीजन्यमेव। न तु गुणात् दोषाभावाद्वा, विपर्ययादेरपि धर्म्यंशे यथार्थत्वात्, असदर्थविषयता दोषात् इन्द्रियाणामसंनिहितेऽसदर्थे सामर्थ्याभावात्।

ननु दोषमात्रं न कारणम्, किं तु तदपेक्षा ज्ञानसामग्रीति यथार्थत्वे दोषाभावसापेक्षा सा हेतुरिति चेत्, न। सैव सामग्री असदर्थांशे दोषसापेक्षेति तदंशे ज्ञानमयथार्थम्। सदर्थांशे दोषनिरपेक्षेति तदंशे यथार्थम्। न तु सैव तत्रैव ज्ञाने दोषतदभावसापेक्षा, विरोधात्।

(अयथार्थ)यथार्थत्वे दोषतदभावौ नान्तरीयकौ। यथार्थत्वं च ज्ञानोल्लिखितप्रकार-वत्त्वमर्थस्य, यद्धर्मवत्त्वमर्थस्य तत्प्रकारकज्ञानत्वं वा।

इदं रजतमिति ज्ञानमर्थस्य रजतत्वं स्वस्य रजतत्वाश्रयविषयकत्वं यथार्थत्वरूपं प्रामाण्यं स्वप्रकाशत्वेन स्वयमेव परिच्छिन्दत् स्वार्थनिश्चयरूपम्। तदतिरिक्तं च न प्रामाण्यं मानाभावात्। अस्तु वा तदपि स्वतो ज्ञायतां, परतो वा, मा वा ज्ञायि किं तन्निरूपणेन। प्रवृत्तावनुपयोगात्। अर्थं हि निश्चित्य प्रवर्तत इत्यावश्यकार्थनिश्चयादेव प्रवृत्त्युपपत्तेः।

अथार्थनिश्चयादेव प्रवृत्तिरिति सत्यम्। किं त्वेवंरूपोऽयमर्थ इति निश्चयो ज्ञानप्रामाण्यग्रहाधीन इति चेत्, न। सर्वं हि ज्ञानं रजतरूपोऽयमर्थ इत्याद्याकारं स्वार्थनिश्चयरूपमेवोत्पद्यते। का तत्र परापेक्षा। अत एवार्थतथात्वं स्वयमेव परिच्छिद्यत इति स्वतः प्रामाण्यग्रहः। यदि च तज्ज्ञानं न स्वार्थनिश्चयरूपं तदा प्रामाण्यज्ञानमपि न

प्रामाण्यनिश्चयरूपं, न वा तदधीनं ज्ञानान्तरमपि स्वार्थनिश्चयरूपमिति व्यर्थमर्थनिश्चयार्थं प्रामाण्यनिरूपणम्। प्रामाण्यज्ञानेऽपि स्वविषयनिश्चयार्थमन्यापेक्षायामनवस्था।

किं च परत: पक्षे गृहीतप्रामाण्यस्य परस्य प्रामाण्यनिश्चायकत्वेऽनवस्था । अतो यथा ज्ञानान्तरमगृहीतप्रामाण्यमेव परप्रामाण्यनिश्चयरूपम् , यदा तु तत्प्रामाण्यजिज्ञासा तदा तस्यापि प्रामाण्यमगृहीतप्रामाण्येनैव परेण निश्चीयत इति नानवस्था, तथा अर्थज्ञानमपि अनिश्चितप्रामाण्यमेवार्थनिश्चयरूपमविशेषात्। न ह्युत्पन्ने ज्ञाने अर्थसंशय: किमेवमनेवं वेति।

अथ ज्ञानमर्थनिश्चयरूपमपि स्वमगृह्णत् कथं स्वप्रामाण्यं गृह्णीयादिति चेत्, तर्हि स्वप्रकाशत्वे विवाद:। अर्थस्य तथाभावरूपं प्रामाण्यं स्वत एव गृह्यत इति तवाप्यनुमतम् ।

अथ स्वत: प्रामाण्यग्रहे अनभ्यासदशापन्नज्ञाने इदं प्रमा न वेति संशयो न स्यात्। निश्चिते तदभावात्। अत एवाप्रमात्वशङ्कया अर्थेऽपि किमेवमनेवं वेति संशयात् न ज्ञानमात्रात् करतलामलकादावप्यर्थनिश्चयो व्यभिचारादिति चेत्, न। न ह्यत्र ज्ञाने सत्यत्वासत्यत्वसंशय:, सर्वज्ञानानां सत्यत्वात्। किं तु अगृहीतभेदं ज्ञानद्वयमेकं वा ज्ञानमित्याकारो ज्ञानं प्रमा न वेति संशय:। स च कारणदोषसंशयात्। स च ज्ञानान्तरान्निवर्तते।

नन्वनुभूतित्वं प्रमात्वम्। तच्च स्मृत्यन्यज्ञानत्वम्। स्मृतित्वं च संस्कारासाधारणकारणकत्वमिति स्वतो न गृह्यते। संस्कारादेरग्रहात्। अत एव न स्वत एवोत्पद्यते, स्मृतिसाधारणत्वादिति चेत्, न। प्रवृत्त्यौपयिकं हि प्रामाण्यमर्थतथात्वनिश्चयत्वम्। तच्च (स च) स्वत एव गृह्यते उत्पद्यते च। न त्वनुभूतित्वसहितम्, गौरवात्। तवापि संवादादिना प्रवृत्ते: प्रामाण्यं यथार्थत्वमेवानुमीयते, न त्वनुभूतित्वे सति, स्मृतौ व्यभिचारात्। स्मृत्यनुभवयोरप्रमाप्रमाव्यपदेशस्तान्त्रिकाणां सापेक्षत्वनिरपेक्षत्वनिबन्धन:। **"यथार्थानुभवो मानमनपेक्षतयेष्यते"** इति तैरभिधानादिति ।

अत्र ब्रूमः। प्रामाण्यनिश्चयो निष्कम्पप्रवृत्तिहेतुर्न तत्संशय इत्यनुभवसिद्धं त्वदनुमतं च। तच्च प्रामाण्यं नार्थतथात्वनिश्चयरूपम्। अनभ्यासदशापन्नज्ञानस्य स्वप्रकाशेनानुव्यावसायेन वार्थतथात्वनिश्चयग्रहेऽपि निष्कम्पप्रवृत्त्यभावात्, प्रामाण्यसंशयाच्च। सर्वधियां यथार्थत्वनियमेनार्थतथात्वनिश्चयत्वस्य स्वरूपतो विषयतश्चागृहीतभेदज्ञानद्वयरूपभ्रमसाधारणत्वात्। तस्मान्न भ्रमसमानाकारादिदं रजतमिति ज्ञानान्निष्कम्पप्रवृत्तिः, किं तु तद्व्यावृत्ताकारात्।

अथ तत्र प्रामाण्ये न संशयस्तस्यार्थतथात्वनिश्चयत्वरूपस्य निश्चयात्। किं त्वगृहीतभेदं ज्ञानद्वयं विशिष्टज्ञानं वेति संशयः। स एव निष्कम्पप्रवृत्तिप्रतिबन्धकोऽपि। अतस्तस्य ज्ञानान्तरान्निवृत्तौ निष्कम्पप्रवृत्तिरिति चेत्, तर्हि यस्य संशयो व्यतिरेकनिश्चयश्च यत्प्रतिबन्धकस्तन्निश्चयस्तद्धेतुरिति व्याप्तेः भ्रमव्यावृत्तस्य विशिष्टज्ञानत्वस्य निश्चयः प्रवृत्तिहेतुः न त्वर्थतथात्वस्य, भ्रमसाधारण्यात्, तस्मिन् सत्यप्रवृत्तेश्च। तत्संशयाभावसहितस्यार्थतथात्वनिश्चयस्य प्रवर्तकत्वे गौरवात्।

किं च प्रवृत्तिहेतुज्ञानं विघटयत एव ज्ञानस्य तत्र प्रतिबन्धकत्वम्। न चेह तथा, संशये सत्यपि तस्य सत्त्वात् ।

अपि च विशिष्टज्ञानत्वमेव प्रामाण्यं भ्रमव्यावृत्तत्वात्। न त्वर्थतथात्वनिश्चयत्वम्, भ्रमसाधारणत्वात्। लौकिकपरीक्षकाणां भ्रमव्यावृत्ते प्रामाण्यव्यवहारात्। तदतिक्रमे प्रमात्वस्य पारिभाषिकत्वापत्तेः। तस्मात् भ्रमव्यावृत्तत्वात् निष्कम्पप्रवृत्तिहेतुत्वात् प्रामाण्यसंशयनिवर्तकत्वाच्च विशिष्टज्ञानत्वमेव प्रामाण्यम् ।

नन्वस्तु तथा, तदेव स्वतो गृह्यत इति चेत्, न। अगृहीतासंसर्गधर्मधर्मिविषयैकज्ञानत्वं भ्रमव्यावृत्तं विशिष्टज्ञानत्वम्। तत्तु स्वतो ग्रहीतुं न शक्यते। अगृहीतासंसर्गादेः प्रागनुपस्थितेः सामग्रीविरहात्। स्वप्रकाशता हि स्वमात्रसाक्षिणी। अन्यथा अनभ्यासदशापन्नेऽपि तस्य स्वतोग्रहादप्रामाण्यसंशयो न स्यात्। अत एव न ज्ञानसामग्रीत एव प्रामाण्यमुत्पद्यते। भ्रमस्यापि तथात्वापत्तेः।

**नव्यास्तु** - अविद्यमानभेदस्याग्रह: प्रामाण्यम्। स चात्यन्ताभाव:। कदापि तस्य ज्ञानाभावादत्यन्ताभावरूपतया स्वत: सिद्धत्वेन प्रामाण्यं स्वत इत्युच्यते। विद्यमानभेदस्याग्रहोऽप्रामाण्यम्। स चाग्रहः प्रागभाव:। अग्रे भेदस्य ग्रहात्। भेदग्रहे प्रसक्ते न स जायते दोषादित्युत्तरकालसंसर्गरूपस्य तत्परिपालनस्य दोषजन्यत्वेनाप्रामाण्यं परत उत्पद्यते।

विसंवादिसंवादिविचित्रव्यवहारोऽपि विद्यमानाविद्यमानभेदाग्रहरूपविलक्षणहेतुक एव। व्यवहारोपयुक्तं तु प्रामाण्यं यथार्थत्वमेव। तच्च ज्ञानहेतुमात्रहेतुकम्।

अप्रामाण्यं दोषात्। अनभ्यासदशापन्ने प्रामाण्यसंशयोऽपि विद्यमानाविद्यमानभेदाग्रहकोटिद्वयावलम्बी, स एव निष्कम्पप्रवृत्तिप्रतिबन्धक इति। **तन्न।** निष्कम्पप्रवृत्तिहेतुर्हि प्रामाण्यं ग्राहयं न त्वन्यत्। निष्प्रयोजनत्वात्। तच्च यद्यपि अविद्यमानभेदग्रहरूपं तदा तन्न स्वतो ज्ञातुं शक्यते। अविद्यमानभेदग्रहस्य तत्प्रतियोगिनोऽसत्त्वात्, प्रागनुपस्थितेश्च। अनभ्यासदशायां ज्ञाने ज्ञातेऽप्यविद्यमानभेदाग्रहे संशयाच्च।

एतेन औत्सर्गिक: संसर्गग्रह एव प्रामाण्यम्, असंसर्गाग्रह एवाप्रामाण्यमिति निरस्तम्। संसर्गग्रहत्वस्य स्वेन ग्रहीतुमशक्यत्वात्। शक्यत्वे वा अनभ्यासदशायामपि तद्ग्रहे तत्संशयो न स्यात्। तस्मात् भ्रमव्यावृत्तं निष्कम्पप्रवृत्तिहेतु: प्रामाण्यमगृहीतसंसर्गधर्मधर्मिविषयकैक-ज्ञानत्वरूपं विशिष्टज्ञानत्वं, संसर्गज्ञानत्वं वा, अविद्यमानभेदाग्रहत्वं वा स्वतो ज्ञातुं न शक्यते। किं तु विशेषदर्शनादिजन्यज्ञानादवधार्यत इति वज्रलेपायितं परत: प्रामाण्यमित्युत्पत्तिवाद:।

**इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ।**

**प्रत्यक्षखण्डे प्रामाण्योत्पत्तिवाद:**

**अथ प्रमालक्षणवाद:**

अथ किं तत् प्रामाण्यम्। न तावज्जातिः। योग्यव्यक्तिवृत्तित्वेन प्रत्यक्षत्वे प्रमात्वसंशयानुपपत्तेः, प्रमात्वस्यानुमेयत्वाच्च। साक्षात्त्वादिना संकरापत्तेश्च। बीजसाम्येन गुणेऽपि तस्य दोषत्वात्। तारत्वादेरुत्कर्षरूपतया जातित्वनियमे चानन्यगतिकतया च नानात्वात्। प्रमात्वनानात्वे त्वननुगमः।

किं चैवमप्रमाया अंशे प्रमात्वं न स्यात् , जातेर्व्याप्यवृत्तितानियमात्। न चेष्टापत्तिः। अंशे संवादिनि विसंवादिनि च समूहालम्बने प्रमात्वाप्रमात्वयोरनभूयमानत्वेन एकशेषस्य कर्तुमशक्यत्वात्। अथ विपर्ययस्यांशे न प्रमात्वम्, किं तु स्मृतिवद्यथार्थत्वमेवेति चेत्, तर्हि यथार्थानुभवत्वमेव प्रामाण्यम्, आवश्यकत्वात्। न च तदपीति वक्ष्यते।

अथ यथा भावोऽभावो वा नाव्याप्यवृत्तिरिति नियमं तिरस्कृत्याबाधितानुभवबलात् संयोगतदभावयोरव्याप्यवृत्तित्वं, तथा जातिर्व्याप्यवृत्तिरेवेति व्याप्तिमभिभूयानुभवबलादेव प्रमात्वतदभावयोरव्याप्यवृत्तित्वमस्तु। न च यदव्याप्यवृत्ति तन्न व्याप्यवृत्ति, यच्च व्याप्यवृत्ति न तदव्याप्यवृत्तीति व्याप्तेः प्रमात्वस्य नोभयरूपत्वमिति वाच्यम्। संयोगात्यन्ताभावे व्यभिचारात्। न च तस्याभावद्वयं, मानाभावात्। गुणदोषयोरेकत्र सत्त्वे अव्याप्यवृत्तित्वम्, गुणमात्रसत्त्वे व्याप्यवृत्तित्वमित्यन्यथोपपत्तेश्च। अन्यथा प्रमात्वस्योपाधेरप्यन्ताभावसामानाधिकरण्यं न स्यात् सामान्यत्वात् न स्याच्चोभयरूपत्वमिति।

मैवम् । अवच्छेदकभेदं विना विरुद्धयोरेकत्रासमावेशात् अप्रतीतेश्च । न च विषय एवांशरूपः प्रमात्ववृत्तावच्छेदकः । तद्विषयत्वस्य भ्रमेऽपि सत्त्वात् ।

ननु विशेष्यावृत्त्यप्रकारकत्वं विशेष्यावृत्तिप्रकारकत्वं च प्रमात्वतदभावयोर्वृत्तावच्छेदकमस्तीति चेत्, तर्हि तयोरेव प्रमाप्रमाव्यवहारजनकत्वमस्तु, आवश्यकत्वात् प्रथमोपस्थितत्वाच्च, किं जात्या । न च तदपीति वक्ष्यते। नापि यथार्थागृहीतग्राहित्वं लोकसिद्धप्रमात्वम्, धारावाहिकबुद्ध्यव्याप्तेः। न च प्रत्यक्षस्य वर्तमानार्थग्राहित्वेन स्वाश्रयक्षणविशिष्टस्तम्भादिग्राहकत्वेनागृहीतग्राहित्वं लोकसिद्धम्,

अन्यथा एकसमये ज्ञानयौगपद्यप्रसङ्ग इति वाच्यम्। क्षणानामतीन्द्रियत्वात् स्थूलोपाधिमादाय वर्तमानत्वग्रहात् स्वरूपसत्क्रमिकक्षणोत्पत्तिकत्वेन ज्ञानायौगपद्यात्।

न च स्तम्भादिषु प्रतिक्षणं गुणकर्माद्युत्पत्तिरस्ति, येन तदादायागृहीतग्राहित्वं स्यात्। वेदात् क्रमोत्पन्नवेदार्थगोचरधारावाहिकबुद्ध्यव्याप्तेश्च ।

नापि यथार्थानुभवत्वम्, ज्ञाने घटत्वादिना यथाशब्दार्थसादृश्याभावात्। सादृश्यमात्रस्य भ्रमेऽपि गतत्वात्। न च गुणजन्यानुभवत्वं (गुणजन्यत्वम्) दोषाभावजन्यानुभवत्वं वा। तयोरननुगतत्वात् प्रमाप्रमानिरूप्यत्वाच्च। नाप्यबाधितानुभवत्वम्। बाधस्य विपरीतप्रमात्वात्। नापि संवाद्यनुभवत्वम्। ज्ञानान्तरेण तथोल्लिख्यमानत्वस्य संवादित्वस्य भ्रमसाधारणत्वात्। नापि समर्थप्रवृत्तिजनकानुभवत्वम्। उपेक्षाप्रमायामव्याप्तेः। तद्योग्यतायाः प्रमानिरूप्यत्वात्। नापि तत्त्वानुभवत्वम्, अवस्तुनोऽभानात्। भाने वा भ्रमसाधारण्यात्।

नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वम् संयोगादिप्रमाव्याप्तेः। अभावे व्याप्यवृत्तित्वविशेषणे संयोगभ्रमेऽतिव्याप्तिः। तदत्यन्ताभावस्यैकत्वात्। नापि विशेष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकधर्माप्रकारकानुभवत्वम्, अव्याप्यवृत्तिप्रमानुपग्रहात्। मूले वृक्षः कपिसंयोगवान्नाग्रे इत्यबाधितानुभवात् संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वात्। भेदाभेद एवं स्यादिति चेत्, अनुभवमुपालम्भस्व, यद्बलादवच्छेदभेदेनात्यन्ताभाववदन्योन्याभावस्याप्यव्याप्यवृत्तित्वमुपेयम्। अत एव पक्वे इदानीं न श्याम इति धीः समयभेदादविरुद्धा तत्रैव तदन्योन्याभावमवलम्बते। नापि विशेष्यावृत्त्यप्रकारकानुभवत्वम्। एकैकविशेष्यावृत्तिनानाप्रकारकसमूहालम्बना-व्याप्तेः। न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यम्। प्रमाप्रमारूपसमूहालम्बनाति-व्याप्तेः। न च यावद्विशेष्यावृत्तित्वं विवक्षितम्। एकैकविशेष्यवृत्तेर्यावद्विशेष्यावृत्तित्वेन समूहालम्बनाव्याप्तेः। एकविशेष्यके यावदर्थाभावाच्च।

अथ विषयताया आश्रयो विशेष्यः, ज्ञानं तत्प्रतियोगि। भ्रमे च शुक्तिवृत्तिर्विषयता व्यधिकरणेन रजतत्वेनावच्छिद्यते। रजतवृत्तिस्तु समानाधिकरणेन रजतत्वेन। विषयता च

विषये न ज्ञानाहिता ज्ञाततारूपा विवक्षिता। अपसिद्धान्तादसिद्धेः, अतीतानागतप्रमायां तदभावाच्च। किं तु ज्ञानस्य विषये विशेषणताविशेषः कश्चित्। परज्ञानं ज्ञानत्वेन तद्विषयं च घटत्वेन जानतो घटमयं जानाति न वेति संशयाद् विषयज्ञानस्वरूपातिरिक्तस्य स्वाश्रयस्वाभावादिविशेषणताविशेषस्यावश्यं स्वीकारात्। अन्यथा घटत्वेन ज्ञातोऽर्थ इति तृतीयार्थासंभवः। प्रकारत्वमपि विषयस्य ज्ञाने विशेषणताविशेष एव, न तु विषयत्वमतिप्रसङ्गात्।

एवं च विषयतासमानाधिकरणप्रकारकानुभवः, प्रकारसमानाधिकरणविषयता-प्रतियोग्यनुभवो वा स्वसमानाधिकरणधर्मप्रकारकविषयताप्रतियोग्यनुभवो वा स्वसमानाधिकरणधर्मावच्छिन्नविषयताप्रतियेग्यनुभवो वा प्रमेति चेत्, न।

निर्विकल्पकाव्याप्तेः, विषयतासमानाधिकरणेदन्त्वप्रकारकभ्रमस्यापि प्रमात्व-प्रसङ्गाच्च। भ्रमस्तत्रांशे प्रमैवेति चेत् - तर्हि अनुभवत्वमेव प्रमात्वम्, व्यर्थमधिकम्। अनुभव एव क्वचिदंशे प्रमाप्रमा चेति चेत्, न। उक्तलक्षणे तादृशालाभात्।

अथ स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा। समूहालम्बने च प्रतिविशेष्यं विषयताभेदादेकवृत्तिर्विषयता नापरवृत्तिनावच्छिद्यते। अतो नाव्याप्तिरिति चेत्, न।

भ्रमांशप्रमायामव्याप्तेः। न हि या विषयता व्यधिकरणधर्मेणावच्छिद्यते सा तदनवच्छिन्ना, विरोधात्। नापि प्रकारव्यधिकरणविषयत्वाप्रतियोग्यनुभवः प्रमा। प्रकारव्यधिकरणविषयताप्रतियोगिनि तदप्रतियोगित्वस्याभावेन भ्रमांशप्रमाव्याप्तेः। नापि स्वव्यधिकरणधर्मावच्छिन्नविषयत्वाप्रतियोग्यनुभवः, स्वाधिकरणावृत्त्यप्रकारकविषयताप्रति-योग्यानुभवो वा प्रमा, तत एव। भ्रमे विषयतायाः स्वव्यधिकरणप्रकारावच्छिन्नत्वात् स्वाधिकरणावृत्तिप्रकारकत्वाच्च। नापि स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदक-धर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा। भ्रमांशप्रमाव्याप्तेः। अन्योन्याभावस्याव्याप्य-वृत्तित्वेनाव्याप्यवृत्तिप्रमायाम व्याप्तेश्च।

**यत्तु** प्रमात्वाप्रमात्वयोर्विरोध एव भ्रमो न प्रमेति, **तत्तुच्छम्।** अंशभेदमादायोभयस्यानुभवात्। अन्यथा भ्रमस्योभयबहिर्भावापत्तेः। एतेन स्वव्यधिकरणप्रकारकं ज्ञानं भ्रमस्तदन्योऽनुभवः प्रमा, भ्रमो धर्म्यंशे न प्रमेति निरस्तम् ।

नापि प्रकाराधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवः, प्रकारानधिकरणावृत्ति-विषयताप्रतियोग्यनुभवो वा प्रमा। प्रमेयमिदमिति ज्ञाने प्रकारानधिकरणस्याप्रसिद्धेः।

किं च रजतत्वप्रकारकविषयताया रजतवृत्तित्वनियमात् रजतत्वावच्छिन्नैव रजतभ्रमे रजतवृत्तिविषयता। अतो रजतभ्रमोऽपि रजते प्रमा स्यात्।

अथ रजतपुरोवर्तिनोरेकैव विषयता। सा च प्रकारानधिकरणवृत्तिधर्मावच्छिन्नैवेति चेत्, तर्हि धर्म्यंशेऽपि तज्ज्ञानं प्रमा न स्यात्, व्यधिकरणप्रकारकत्वस्य तुल्यत्वात्। धर्म्यंशे तु रजतेऽपि प्रमा स्यात्।

अथ रजतांशे धर्म्यंशे च तज्ज्ञानं प्रमैव। वैशिष्ट्यांशे न प्रमेति चेत्, न। वैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेनाप्रकारत्वात्। वैशिष्ट्यवृत्तिविषयतायां रजतत्वपुरोवर्तिनोः प्रकारत्वेन भ्रमस्य वैशिष्ट्यांशे प्रमात्वाप्रमात्वापातात्।

नापि स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा। प्रमेयमिदमिति ज्ञाने प्रमेयत्वप्रकारकविषयतानाश्रयस्याप्रसिद्ध्या अव्याप्तेः।

न च संयोगित्वादिना प्रमेयत्वप्रकारकविषयताव्यतिरेको घटादौ प्रसिद्ध इति वाच्यम्। प्रतियोगितावच्छेदकरूपवत्त्वेन प्रतियोगिज्ञानस्याभावधीहेतुत्वात्। किं च यत्किंचिव्द्यधि-करणप्रकारानवच्छिन्नत्वं भ्रमसाधारणम्, प्रकृतज्ञानव्यधिकरणप्रकारानवच्छिन्नत्वं निर्विकल्पकाव्याप्तम्, तस्य निष्प्रकारकत्वादिति ।

**इति प्रमालक्षणपूर्वपक्षः समाप्तः**

**अथ प्रमालक्षणसिद्धान्तः**

**उच्यते।** यत्र यदस्ति तत्र तस्यानुभवः प्रमा। तद्वति तत्प्रकारकानुभवो वा।
यत्र यन्नास्ति तत्र तस्य ज्ञानं, तदभाववति तत्प्रकारकज्ञानं वा अप्रमा।

तदन्यत्वे सति अनुभवत्वमेव वा प्रमात्वम्। तत्प्रकारकत्वं च तद्वैशिष्ट्यविषयकत्वं तद्विशेषणज्ञानजन्यत्वं वा।

ईश्वरस्य तद्विशिष्टविषयं ज्ञानं न तु तत्प्रकारकम्। निर्विकल्पकं च प्रमाप्रमाबहिर्भूतमेव, व्यवहारानङ्गत्वात्। अव्यपदेश्यपदेन तदुपग्रहस्य नामजात्यादियोजनारहितमपि प्रत्यक्षमस्तीत्यत्र तात्पर्यम्। इदं रजतमिति ज्ञानमिदन्त्ववति तदनुभवत्वात् प्रमा, रजतत्वाभाववति तत्प्रकारकज्ञानत्वादप्रमा। अंशे समूहालम्बनं च नाप्रमा। एकप्रकाराभाववत्यपि तदप्रतीतेः।

नन्वेवमव्याप्यवृत्तिभावाभावयोरेकत्र प्रमाप्रमा च स्यात् तदभाववति तत्प्रकारकज्ञानत्वादिति चेत्, न। भिन्नभिन्नावच्छेदेन हि वृक्षे संयोगतदभावौ, न वृक्षमात्रे, विरोधादननुभवाच्च। तथा च यत्र वृक्षे संयोगो न तत्र तदभावः। यदवच्छेदेन यत्र यदस्तीति वा विवक्षितम्।

गोत्वादेरपि सास्नाद्यवच्छेदेन वृत्तेः। पाकरक्ते श्यामोऽयमिति धीः प्रमैव। कदाचित्तत्र तत्सत्त्वात्। इदानीं श्याम इति त्वप्रमैव। न च यत्तद्भ्यां लक्षणाननुगमः, न हि प्रमा सर्वत्र प्रमा, किं तु क्वचित्। तथा च किं ज्ञानं कुत्र प्रमेति तत्तद्विशेषस्य लक्ष्यत्वेन यत्तद्भ्यामेव लक्षणं युक्तम्।

**अन्ये तु** - अनुभवत्वमेव प्रामाण्यम्, भ्रमेऽप्यंशमादाय प्रमाव्यवहारात्। रजतादिप्रमाप्रमा च विशिष्य लक्षणीया, रजतत्ववति तदनुभवः तदभाववति तदनुभवो वेत्यादिना।

नन्वनुभवत्वस्य प्रमाप्रमासाधारण्येन तज्ज्ञानस्य न निष्कम्पप्रवृत्त्यङ्गत्वमिति चेत्, सत्यम्। विशेषविषयप्रमाया एव प्रवर्तकत्वात्।

अतिरिक्तविषयतापक्षे विषयताश्रयावृत्त्यप्रकारकानुभवः प्रमा। केवलान्वयिनि विषयताश्रयावृत्तिरवृत्तिरेव प्रसिद्धः।

यद्वा यत्प्रकारिका या विषयता तत्प्रकारसमानाधिकरणविषयताक:, स्वप्रकारसमानाधिकरणविषयताको वानुभव: प्रमा।

(यत्प्रकारिका)यत्प्रकारा या विषयता तत्प्रकारव्यधिकरणविषयताकं स्वप्रकारव्यधिकरणविषयताकं वा ज्ञानं भ्रम: ।

प्रकारभेदेनैकत्र विषयताभेद इति लक्षणद्वयसमावेशात् प्रमाभ्रमसंकर: ।

यद्वा विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिप्रकारकविषयताप्रतियोगी, विशेष्य निष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नविषयत्वप्रतियोगी वा, विषयतासमानाधिकरणा-त्यन्ताभाव-प्रतियोगिप्रकारकविषयत्वाप्रतियोगी वा, विषयतासमानाधिकरणात्यन्ताभाव-प्रतियोगिप्रकारानवच्छिन्नविषयताप्रतियोगी वा अनुभव: प्रमा।

स्वसमानाधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगि ज्ञानं, स्वव्यधिकरणप्रकारा-वच्छिन्नविषयताप्रतीयोगि ज्ञानं वा भ्रम:। इदं रजतमिति भ्रमे च विषयताद्वये व्यधिकरणप्रकारावच्छिन्नत्वतदनवच्छिन्नत्वयो: विषयत्वप्रतियोगित्वतदप्रतियोगित्वयोर-विरोधात्। समूहालम्बने च विषयताभेदान्न प्रमाप्रमालक्षणेऽव्याप्त्यतिव्याप्ती।

वस्तुतस्तु विशेषणताविशेषो नास्त्येव, मानाभावात्। सामान्यतो ज्ञाने ज्ञाते तस्य क्वचिद्विशेषणतेति सामान्यतो विशेषणताज्ञानेऽपि घटमयं जानाति न वेति संदेहतादवस्थ्यात्।

तस्मात् घटतज्ज्ञानयो: स्वरूपग्रहेऽपि तदीयत्वं तद्विषयत्वं न गृहीतमिति तद्विषयत्वे संदेह:। तदीयत्वं च संबन्धं विना तत्संबन्धस्वभावत्वम्। तदुक्तम् - **"प्रकाशस्य सतस्तदीयतामात्रनिबन्धन: स्वभावविशेष: तद्विषयत्वम्"** इति।

संबन्धं विना कथं तदीयत्वम्, संबन्धस्यैव स्वभावत्वात्, यथा तवैव विशेषणतायाम्। अन्यथानवस्थानात्। अन्यत्रापि स्वरूपसंबन्धे एषैव गति:। अन्यथा सामान्येनाभावसमवाययोर्ज्ञानेऽधिकरणे ज्ञाते तयो: संशयो न स्यात्।

अधिकरणतदुभयस्वरूपाणां ज्ञातत्वात्। तत्राप्यभावसमवाययोर्विशेषणताविशेषो न गृहीत इति चेत्, न। सामान्यतस्तद्ग्रहेऽपि संशयात्।

**यत्तु** समूहालम्बनविशिष्टज्ञानयोर्विशेषानुभवाद्विशिष्टज्ञाने विशेषणताविशेषो विषय इति। **तन्न।** विशेषणतामादायापि समूहालम्बनसंभवात्। तत्रापि विशेषणतान्तरस्वीकारेऽनवस्था।

समूहालम्बनात्तु विशिष्टज्ञानस्य विशेष: कारणकृत: कार्यकृत: प्रकारकृतो वा।

प्रकारोऽपि विशेषणताविशेष:। स च धर्मिण्येवास्त्विवति चेत्, न। तमादायापि समूहालम्बनसंभवात्।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**प्रत्यक्षखण्डे प्रामाण्यवादे प्रमालक्षणसिद्धान्त:**

**समाप्तश्चायं प्रामाण्यवाद:।**

## अथान्यथाख्यातिवाद:

ननु सर्वज्ञानानां यथार्थत्वात् प्रमाणलक्षणे (विशेषणस्य) व्यावर्त्याप्रसिद्धेर्विशेषणवैयर्थ्यम्, अन्यथाख्यातौ मानाभावात्। तथा हि - रजतार्थिप्रवृत्तिविषयत्वं रजतत्वप्रकारकानुभवविषयत्वव्याप्यं रजतार्थिप्रवृत्तिविषयमात्रवृत्ति-धर्मत्वात् रजतमात्रवृतिधर्मवत् इत्यन्यथाख्यातिव्याप्यं सिध्यतीत्यप्राप्तकालत्वम्, रजतमात्रवृत्तित्वं चोपाधि:।

शुक्तिवृत्तिज्ञानविषयता रजतत्वप्रकारिका रजतार्थिताजन्यप्रवृत्तिविषयवृत्ति-विषयतात्वात् रजतवृत्तिविषयतावदित्यत्र रजतवृत्तित्वमुपाधिः। रजतत्वम् अरजतवृत्तिज्ञानविषयतावच्छेदकम् अरजतविषयप्रवृत्तिहेतुज्ञानप्रकारत्वात् शुक्तित्ववदित्यत्र रजतावृत्तित्वमुपाधि:।

रजतत्वप्रकारिका ज्ञानविषयता अरजतवृत्ति: अरजतनिष्ठात्यन्ताभाव(भावा)-प्रतियोगिनी वा अरजतविषयप्रवृत्तिहेतुज्ञानविषयतात्वात् शुक्तिवृत्तिविषयतावदित्यत्र

रजतावृत्तित्वमुपाधिः। विषयताया निरस्तत्वाच्च। विवादपदं रजतज्ञानं शुक्तिविषयकं शुक्तौ प्रवर्तकज्ञानत्वात् शुक्तिज्ञानवदित्यत्र ज्ञायमानेष्टभेदाग्रहे कारणतावच्छेदकं रजतज्ञानं न प्रवर्तकमित्यसिद्धिः।

शुक्ती रजतज्ञानविषयताश्रयः रजतार्थिप्रवृत्तिविषयत्वात् रजतवदित्यत्र रजतत्वमुपाधिः। शुक्तौ रजतार्थिप्रवृत्तिः स्वधर्मिधर्मिकरजतत्वप्रकारकज्ञानसाध्या रजतार्थिप्रवृत्तित्वात् रजतप्रवृत्तिवदित्यत्र रजतविषयत्वमुपाधिः स्वपदार्थाननुगमश्च। तत्परित्यागे तु रजतार्थिप्रवृत्तिधर्मिकरजतत्वप्रकारकज्ञानेनोभयसिद्धेन रजतस्मरणेनार्थान्तरम्।

उच्यते। रजतार्थिताजन्या शुक्तौ प्रवृत्तिरिष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या प्रवृत्तित्वात् शुक्तौ शुक्त्यर्थिप्रवृत्तिवत् ।

न चेष्टविषयप्रवृत्तित्वमुपाधिः साधनविशेषितत्वात् ।

यद्वा रजतेच्छाजन्यशुक्तिविषयप्रवृत्तिजनकरजतत्वप्रकारकं ज्ञानं शुक्तिविशेष्यकं शुक्तिप्रवृत्तिप्रयोजकज्ञानत्वात् शुक्तौ शुक्त्यर्थिप्रवृत्तिजनकज्ञानवत्। अवच्छेदकत्वेऽपि प्रयोजकत्वान्नासिद्धिः। हेतुत्वमपि तस्य साधयिष्यामः। तथाविधमिदं ज्ञानं वा रजतत्वप्रकारकं रजतेच्छाजन्यप्रवृत्तिहेतुज्ञानत्वात् सत्यरजतज्ञानवत्।

न च ग्रहणस्मरणयोर्विशिष्टस्य ज्ञानस्य वा पक्षत्वे बाधः आश्रयासिद्धिर्वा। उभयसिद्धेन शुक्तिनिष्ठप्रवृत्तिहेतुत्वेन पक्षत्वात्। अन्यथा साध्यतदभाववतः पक्षत्वेनानुमानोच्छेदः।

समवायातीन्द्रियत्ववादिनं प्रति अगृहीतासंसर्गकधर्मधर्मिविषयकमेकं ज्ञानमेव विशिष्टज्ञानं सिध्यति। न चैवमुभयख्यातिः, नान्यथाख्यातिरिति वाच्यम्। व्यधिकरणप्रकारकज्ञानस्य तत्त्वात्।

न च विसंवादिप्रवृत्त्यजनकत्वमुपाधिः। तथाविधे इदंज्ञाने रजतज्ञाने च त्वन्मते साध्याव्यापकत्वात्।

नापि दोषाजन्यत्वम्, परस्य ज्ञानमात्रे तथात्वात्। अन्यथा तयोरेव साध्याव्यापकत्वात्। न चाप्रयोजकत्वम्। इष्टपुरोवर्तिविशिष्टज्ञानस्य प्रवृत्तिहेतुत्वात्।

**अत्र प्राभाकरा:** - अप्रयोजकमिदम्। स्वतन्त्रोपस्थितेष्टभेदाग्रहादेव प्रवृत्त्युपपत्ते: किं विशिष्टज्ञानेन। परेणाप्यारोपनियमार्थं तदभ्युपगमात्। न च रजते प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वात् इहापि तत्सिद्धि: प्रवृत्तिमात्रे भेदाग्रहे सतीष्टपुरोवर्तिज्ञानस्य लाघवेन हेतुत्वात्, न तु सदपि विशिष्टज्ञानं तन्त्रं, गौरवात्।

न च रजते इष्टपुरोवर्तिभेदग्रहस्याप्रसिद्ध्या कथं तदभाव इति वाच्यम्। पुरोवर्तिनिष्ठे भेदे रजतप्रतियोगित्वज्ञानविषयत्वाभावस्य पुरोवर्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावस्य वा हेतुत्वात्। न चाभेदव्यवहारो व्यवहर्तव्यधीसाध्यो न तु तदभावाग्रहात्, अन्यथा भेदाग्रहात् भेदव्यवहारापत्तिरिति वाच्यम्। इच्छादीनां ज्ञातपुरोवर्तिमात्रविषयत्वात्। अभेदाभिलापोऽपि ज्ञातभेदस्यासंसर्गाग्रहादिति नाज्ञाते व्यवहार:।

ननु पीत: शङ्खो न श्वेत इति भेदज्ञानेऽपि श्वेताभेदानुमित्या श्वेतार्थिप्रवृत्तेरभेदधीस्तद्धेतुरिति चेत्, न। तवापि पीत: शङ्ख: इत्यभेदज्ञानात् पीतार्थी न प्रवर्तते भेदानुमितेरिति भेदाग्रह एव तद्धेतु: स्यात्। भ्रमत्वेन ज्ञातमभेदज्ञानमकिंचित्करमिति यदि, तदा भ्रमत्वेन ज्ञातं भेदज्ञानमपि तथा।

यद्वा इष्टभेदाविषयकं ज्ञानं प्रवर्तकम्। न चाभेदानुमिताविष्टभेदो विषय:। अत एव पूर्वं भेदप्रत्ययेऽपि स प्रत्ययो न भेदग्राहीति दिङ्मोहप्रतिबिम्बादिप्रत्यया:।

नन्वेवं रजतेऽपि विशिष्टज्ञानं न सिध्येत् प्रवृत्तेर्भेदाग्रहादेवोपपत्ते:। इदं रजततया जानामि रजततया ज्ञातमित्यनुभव: शुक्तावपि तुल्य:। न च शुक्तौ रजतत्वबाधात् सोऽप्यसंसर्गाग्रह:, बाधस्यापि विशिष्टज्ञानत्वे मानाभावादिति चेत्, न। तत्र हि रजतस्य न स्मृति: प्रागननुभवात्। ग्रहणं च तस्य धर्मिविषयकं योग्यधर्मियोगेन रजतत्वजातिग्रहादित्यर्थसिद्धं धर्मधर्मिविषयकमेकं ज्ञानम्। न च रजतत्वस्य

शुक्त्यनुभवविषयत्वे हेतुरस्ति। न च प्रत्यभिज्ञानवत् संस्कारेन्द्रिये हेतू। तयोरत्र भिन्नविषयकत्वात्। एकदा स्वतन्त्रोपस्थितविरुद्धानेकभेदाग्रहे संशयः।

(न च) (न तु) क्रमेणोपस्थितानेकभेदाग्रहो येन स क्रमिकविपर्ययद्वयरूपः स्यात्। अन्यथा तवाप्यप्रतीकारात्। न च संशयानन्तरं विपर्ययदशायामुभयभेदाग्रहे संशयः, एकभेदाग्रहे अन्यथाख्यातिः, दोषमहिम्ना ह्येकस्य न स्वातन्त्र्येणोपस्थितिः किं त्वभावविशेषणतयेति तद्भेदाग्रहोऽप्यकिंचित्करः। न च संशयानन्तरं धूमभ्रमादस्ति क्वचिद्वह्न्यर्थिप्रवृत्तिर्न तु तेन विना। न च तस्य स्वतन्त्रोपस्थितवह्न्यसंसर्गाग्रहो द्वारम्, संशयानुरोधेन तस्य प्रागपि सत्त्वाद्वह्न्यनुमितिदर्वारमिति वाच्यम्। लिङ्गभ्रमस्य हि निर्वह्नित्वस्य स्वातन्त्र्येणोपस्थितिप्रतिबन्धकत्वेन नियमतः स्वतन्त्रवह्निस्मृतिदर्वारमिति न संशयान्यथारव्याती। न च पर्वतस्य प्रत्यक्षत्वे वह्नेश्च स्मरणे प्रत्यक्षभ्रमान्न विशेष इति साक्षात्करोमीति स्यात् न त्वनुमिनोमीति (इति?) वाच्यम् । लिङ्गज्ञानानन्तरभावित्व-प्रतिसन्धानाप्रतिसन्धानाभ्यामुभयसंभवात्। एवं स्वतन्त्रोपस्थितानिष्टभेदाग्रहोऽपि निवर्तकः। तेनेदं रजतं न शुक्तिरित्यभावप्रतियोगित्वेनानिष्टोपस्थितेस्तद्भे। दाग्रहो न निवर्तकः। शुक्त्यभावासंसर्गाग्रहश्च नकारस्यार्थ इति नान्यथाख्यातिः।

अनिष्टाभेदग्रहस्य निवर्तकत्वे च रजत एव नेदं रजतमिति कृत्वा न निवर्तेत , अन्यथा अन्यथाख्यात्यापत्तेः। अत एव रजत एव नेदं रजतमिति ज्ञानेऽपि न प्रवृत्त्यन्यथाख्याती रजतभेदासंसर्गाग्रहात्।

ननु रजतरङ्गयोरिमे रङ्गरजते इत्यत्र प्रत्येकमुभयभेदाग्रहे युगपत्प्रवृत्तिनिवृत्ती स्यातामिति चेत्, न। एवंविधभ्रमे मानाभावात्। कार्योन्नेयधर्माणां यथाकार्यमुन्नयनात्। क्रमोत्पन्नज्ञानयोर्भेदाग्रहादेकत्वाभिमानः। अन्यथा तवापि स्वतन्त्रोभयभेदाग्रहात् प्रत्येकं रजतं रङ्गं वेति संशयः स्यात्। यदेव वा तत्र विपर्ययनियामकं तत एव प्रवृत्तिनिवृत्ती स्याताम् तद्धेतोरेवेति न्यायात्।

**यत्तु - "प्रसक्तप्रतिषेधात्मा बाधोऽख्यातौ न युज्यते ।**

**साधयत्यन्यथाख्यातिं बाध एव हि नः स्फुटम्।।"** इति।

**तद्विपरीतम्।** परस्परविरुद्धत्वाविशेषेण बाध्यत्वाव्यवस्थितेः। विरुद्धार्थकतयोत्पन्नत्वं च तुल्यम्। पूर्वेणापि क्वचित्परस्य बाधात्। तस्मादभेदाग्रहात् प्रसञ्जितो व्यवहारो भेदग्रहात् बाध्यत इति युक्तम्।

उपेक्षाभ्रमे च शब्दप्रयोगो बाध्यः। तदीयतामात्रस्वभावत्वात् तद्विषयत्वस्य। कथं रजतीयमात्रज्ञानमरजतीयं स्वभावव्याघातात्। न चोभयीयम्, समूहालम्बनापत्तेः। तदुक्तम् -

**"अन्यस्य ह्यन्यथाभानं प्रतीत्यैव पराहतम्।**

**परस्मिन् भासमाने तु न परं भासते यतः।।"** इति।

विषयं विनैव तदाकारं ज्ञानमिति साकारवादः। ज्ञानायथार्थत्वे च ज्ञानमात्रस्य तच्छङ्कया न निष्कम्पप्रवृत्तिः। न च दोषाजन्यत्वादिना विश्वासः। भ्रमादविश्वासे प्रवृत्त्यभावापत्तेः। नापि तज्ज्ञानात्। ज्ञानत्वेन तत्राप्यविश्वासात्। तदुच्यते - **"अहो बत महानेष प्रमादो धीमतामपि। ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबन्धनः"।।** इति। भ्रमस्य च सन्मात्रविषयकत्वेनायथार्थता। असद्विषयकत्वेऽसत्ख्यातिः। न च तत्र हेतुरस्ति। शब्दस्याप्तोक्तस्य निर्दोषस्य लिङ्गस्य चाहेतुत्वात्। न च शब्दानुमानाभासात्सा। योग्यतादिमत्तया शब्दस्य लिङ्गवत्तया पक्षस्य ज्ञानाच्छाब्दानुमिती। न चाभासे तज्ज्ञानमस्ति, हेत्वभावादेव। किं त्वगृहीतासंसर्गज्ञानद्वयम्। तत्र इन्द्रियस्य संबद्धग्राहकत्वात् न च प्रत्यभिज्ञानवत्, उक्तोत्तरत्वात्। न च दोषवशादसंबद्धेऽपि विजातीयं कार्यम्। दोषस्याजनकत्वात्। न हि दुष्टात् कुटजबीजाद्यवाङ्कुरः। भस्मकं च न दोषः। किं तु वह्नेरुद्भवः। तस्य च दाहसामर्थ्यं दृष्टमेव। रसार्जनं तु न भवति, भक्ष्यदाहात्। दवदहनदग्धवेत्रवीजं च नष्टमेव। तद्भस्मनः कदलीजनकत्वम्। तदुक्तम् - **"साकारवादादसतो न भानात् संविद्विरोधादथ हेत्वभावात्, धियामनाश्वासभयाच्च नेष्टा यतोऽन्यथाख्यातिरतो यथार्था"।** तस्माद्विवादपदं ज्ञानं न व्यधिकरणप्रकारकं ज्ञानत्वात् सत्यज्ञानवत्। भेदाग्रहजन्यरजतत्वप्रकारकशुक्तीच्छायां प्रतियोगिप्रसिद्धिः। ज्ञानत्वं स्वव्यधिकरणप्रकारा-

वच्छिन्नविषयताप्रतियोगिवृत्ति न भवति ज्ञानमात्रवृत्तिधर्मत्वात् प्रमात्ववत्। न च चक्षुश्चाक्षुषसत्यज्ञानातिरिक्तज्ञानजनकं इन्द्रियत्वात् रसनवदिति प्रतिरोधः, अप्रयोजकत्वात्। चाक्षुषज्ञानातिरिक्तज्ञानजनकत्वोपाधेः अन्यथाख्यातेरपि धर्म्यंशे सत्यत्वात् तुल्यन्यायतया व्यापकेऽपि व्यर्थविशेषणत्वाच्च।

एवं (च) स्वरूपतो विषयतश्चागृहीतभेदं ज्ञानद्वयमेव विसंवादिप्रवत्तिहेतुः। तदुक्तम् - **"संनिहितरजतशकले रजतमतिर्भवति यादृशी सत्या। भेदानध्यवसायादियमपि तादृक् परिस्फुरति"।।** इति। व्यवहारमात्रस्य भेदाग्रहजन्यत्वेऽपि तस्य संवादतदभावाभ्यां ज्ञाने यथार्थत्वायथार्थत्वव्यपदेशः। अत एव लोके उष्णं जलमिति ज्ञाने नायथार्थत्वव्यपदेशः। उपेक्षाज्ञाने तु तद्व्यपदेशस्तद्योग्यत्वात्।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे**

**अन्यथाख्यातिवादपूर्वपक्षः।।**

**अथान्यथाख्यातिवादसिद्धान्तः**

**सिद्धान्तस्तु** - सत्यस्थले प्रवृत्तिमात्रं प्रतीष्टपुरोवर्तिज्ञाने हेतुतया व्यवस्थितेऽति-प्रसङ्गवारणार्थं विषयतया वैशिष्ट्यमेव कारणतावच्छेदकं कल्प्यते लाघवात्। कारणताग्रहसमये ज्ञानवित्तिवेद्यतया शीघ्रोपस्थितिकत्वात् बाधकाभावाच्च ।

(ननु) (न तु) स्वतन्त्रोपस्थितेष्टभेदाग्रहः कारणम्, तादृशभेदाग्रहत्वं च कारणतावच्छेदकं, गौरवात् कल्पनीयोपस्थितिकत्वाच्च। विशिष्टज्ञानेऽपि हेतुत्वेनावश्यकत्वात् भेदाग्रह एव हेतुरिति चेत्, न ।

विशिष्टज्ञाने तद्धेतुत्वस्य तत्कल्पनोत्तरकल्प्यत्वेन प्रवृत्तिकारणताग्रहसमये तदनुपस्थितेः । न चैवं मिथ्याज्ञानकल्पने गौरवम्। प्रमाणप्रवृत्तिसमये सिद्ध्यसिद्धिपराहतत्वेन फलमुखगौरवस्यादोषत्वात्। प्रमाणवतस्तस्य न्याय्यत्वात् ।

एवं च विसंवादिप्रवृत्तिरपि विशिष्टज्ञानसाध्या प्रवृत्तित्वात् सत्यप्रवृत्तिवत्। क्लृप्तकारणं विनानुपपत्तेः अनन्यथासिद्धतया प्रवृत्त्या समानीतविशिष्टज्ञानबलात् तत्कारणं

सदोषमिन्द्रियाद्येव। सर्वतो बलवती ह्यन्यथानुपपत्तिः। न च भेदाग्रहात् प्रवृत्त्युपपत्तिरपि। विपरीतचतुष्के युगपत् प्रवृत्तिनिवृत्त्यापत्तेः।

न च तत्र मानाभावः। इमे रङ्गरजते इति सत्यज्ञानवत् रजतरङ्गयोः प्रत्येकभ्रमसामग्र्योरेकदा सत्त्वेन तादृशभ्रमोत्पत्तेरानुभविकत्वात्। अन्यथा समूहालम्बनोच्छेदे द्वित्वाद्यप्रत्यक्षतापत्तेः। इमे रङ्गरजते इति शब्दाभासादेवंविधभ्रमसंभवाच्च।

मम दोषमहिम्ना रजतरङ्गयो रजतरङ्गभेदग्रहान्न संशयः। तव चैकत्र स्वतन्त्रोभयभेदाग्रहात् प्रत्येकं रङ्गं रजतं वेति संशयः स्यात् ।

अथ यद्धर्मज्ञानाद्यदुपस्थितिस्तत्र तद्भेदाग्रहात् प्रवृत्तिनिवृत्ती। रङ्गरजतधर्मेण रजतरङ्गे स्मारिते न तु रङ्गरजते। माषराशिस्थमसीविषये माषार्थिप्रवृत्तिः मसीनीलिमस्मारितमाषभेदाग्रहात्। अनुभूयमानारोपोऽसिद्ध एव। अन्यथा तवापि प्रत्येकमुभयज्ञानं स्यादिति चेत्, मैवम्। शब्दाभासात् प्रत्यक्षाद्वा इष्टानिष्टोपस्थितौ तदभावात्। ममत्वेकधर्मादुभयोपस्थितावपि रजतरङ्गयोस्तत्तया न ज्ञानं दोषादित्युभयसिद्धं विपरीतज्ञानं च दोषात्। न चैवमावश्यकदोषादेव प्रवृत्तिनिवृत्ती, सत्यस्थले तदभावात्। न च विसंवादिनी दोषात्, इन्द्रियलिङ्गशब्दादिदोषाणामननुगतत्वात्। तज्जन्यज्ञाने च जातिभेदात्।

**नव्यास्तु** - रङ्गवृत्तितया ज्ञातधर्मस्य रजते उत्कटाकाङ्क्षा, तेन सह भूयस्सहचारदर्शनात्, न रङ्गे अल्पतथात्वादिति तत्रानुत्कटा सा। एवं रजतवृत्तितया ज्ञातधर्मस्यापि। अतः उत्कटाकाङ्क्षया अनुत्कटाकाङ्क्षा प्रतिबन्धान्न रङ्गे निवृत्तिः। एवं रजते न प्रवृत्तिरिति।

**तन्न।** इमे रङ्गरजते इति शब्दाभासाद्युगपत्प्रवृत्तिनिवृत्तिप्रसङ्गात् शब्दादुपस्थितावाकाङ्क्षायास्तुल्यत्वात्।

किं चैवं धर्मयोर्भूयोऽल्पसहचारावगमादुत्कटानुत्कटकोटिको रङ्गं रजतं वेति संशयः स्यात् । उत्कटानुत्कटाकाङ्क्षाकल्पने मानाभावात्, उत्कटत्वानिरुक्तेश्च। **स्यादेतत्।** संवादिविसंवादिप्रवृत्त्योर्वैचित्र्ये विशिष्टज्ञानभेदाग्रहौ हेतू क्लृप्तत्वात्, न तु

विशिष्टज्ञानसत्यत्वासत्यत्वे गौरवात्। असिद्धेश्च। प्रवृत्तिनिवृत्तिमात्रे चेष्टानिष्टपुरोवर्तिज्ञानं हेतुरिति नाननुगमः। न तु विशिष्टज्ञानं गौरवात्। न च भेदग्रहेऽतिप्रसङ्गः। विशिष्टज्ञानं भेदाग्रहं च विशेषद्वयहेतुं विना सामान्यहेतोः कार्यानुत्पादात्। न हि निर्विशेषं सामान्यं नाम। अन्यथा अन्धस्य त्वक्संबन्धे महत्युद्भूतरूपवति चन्द्रमहसि प्रत्यक्षतापत्तिः। द्रव्यसाक्षात्कारहेतोः सत्त्वात्।

एवं रङ्गे रजते च विसंवादिन्यौ भवतः भेदाग्रहात्। न च संवादिन्यौ, विशिष्टज्ञानाभावात् ।

अथ रजतरङ्गयोः रजतरङ्गभेदाग्रहात् विसंवादिन्यौ बलात् स्याताम्, तत्सामग्रीसत्त्वात्। विसंवादिनी तत्र सत्यरजते न संभवतीति चेत्, अत एव भेदाग्रहो न तद्धेतुः, तत्सत्त्वेऽपि तदभावात्। न च प्रवृत्तिनिवृत्तिगतं विसंवादित्वं संवादित्वमपेक्ष्य तद्धेतुना ते जन्येते। कारणस्य कार्यानपेक्षणादिति।

मैवम्। प्रवृत्तेरनिष्टविषयत्वं निवृत्तेरिष्टविषयत्वं विसंवादः। तथा चानिष्टविषयप्रवृत्ताविष्टविषयनिवृत्तौ च भेदाग्रहो हेतुरिति कथं तत इष्टानिष्टविषयप्रवृत्तिनिवृत्ती स्यातां, तत्र तस्यासामर्थ्यादिति।

अत्र ब्रूमः - ज्ञानं स्वविषये प्रवर्तकमित्याद्यप्रवृत्तौ संवादिप्रवृत्तौ च सर्वैरवधारितं, लाघवाद्बाधकाभावाच्च। तत इष्टज्ञानं शुक्तौ प्रवर्तकं तद्विषयकं तव्द्यवहारहेतुत्वात् स्वाविषये तस्यासामर्थ्यात्।

अथ भेदाग्रहात् ग्रहणस्मरणाच्चावश्यकाद् विसंवादिप्रवृत्त्युपपत्तेर्विशिष्टज्ञानकल्पने गौरवाच्च स्वाविषयेऽपि ज्ञानं प्रवर्तकमिति कल्पनात् **सर्वैः** प्रथममवधारितमपि त्यज्यतामिति चेत्, न। प्रथमप्रवृत्तप्रमाणबलेन तत्रापि विशिष्टज्ञानकल्पनात्। तत्र बाधकं विना तद्विरोधेन कल्पान्तरानुदयाच्च फलमुखगौरवस्यादोषत्वात्। अन्यथा प्रथमं सर्वैर्गृहीतापि कार्यान्विते शक्तिः सिद्धार्थदर्शनाद्गौरवाच्च परित्यज्येतेति साधु समर्थितं गुरुमतम्।

ननु स्वविषये ज्ञानं प्रवर्तकमिति सत्यम्। किं तु विसंवादिप्रवृत्ताविदं ज्ञानमेव प्रवर्तकं न त्विष्टज्ञानमपि। तद्धि ज्ञायमानेष्टभेदाग्रहे कारणतावच्छेदकं लाघवादिति दण्डत्ववदन्यथासिद्धम्। एवं हि तत्प्रतिबद्धव्यवहारानुकूलत्वं तद्विषयत्वं रजतज्ञानस्य शुक्तौ नास्ति। अन्यथा रजतज्ञानस्य शुक्तिविषयत्वापत्तेः। संवादिप्रवृत्तौ चेष्टज्ञानं प्रवर्तकम्, तस्य विशिष्टज्ञानत्वात् अभेदेनावच्छेदकत्वाभावादिति मम सिद्धान्तसारः इति चेत्,

उच्यते। स्वतन्त्रान्वयव्यतिरेकादिष्टज्ञानं हेतुरेव न त्वितरहेतुतावच्छेदकमन्यथासिद्धं वा। न हीष्टज्ञानमादायैव इष्टभेदाग्रहस्यान्वयव्यतिरेकौ येन दण्डत्ववत्तदवच्छेदकम्। नापीष्टज्ञानस्य भेदाग्रहगर्भत्वेनान्वयव्यतिरेकौ, येन दण्डरूपवत्तदन्यथासिद्धम्।

अन्यथा अगृहीतभेदेष्टज्ञानं हेतुरवच्छेदको भेदाग्रह इत्येव किं न स्यात्। तस्मात् स्वतन्त्रान्वयव्यतिरेकादुभयोरपि हेतुत्वम्।

किं चेष्टविषयप्रवृत्तिस्थले प्रवृत्तिमात्रं प्रतीष्टज्ञानस्य हेतुत्वादियमपि प्रवृत्तिस्तज्जन्या क्लृप्तहेतुं विना कार्यानुत्पत्तेः। न चेष्टज्ञानजन्यत्वे इष्टविषय-प्रवृत्तित्वमवच्छेदकं गौरवात्। बाधकं विना सामान्ययोः कार्यकारणभावनियमात्। अत एव तन्नोपाधिरपि।

अथ तत्रापीदं ज्ञानं प्रवर्तकम्, दैवाधीनं तस्येष्टविषयत्वमपीति चेत्, तर्हीष्टे इदमिति ज्ञानादेव प्रवृत्तिः स्यात्। न ह्यत्रेव तत्रापि ज्ञायमानेष्टभेदाग्रहः प्रवर्तकः। एतेन न रजतज्ञानं शुक्तिविषयकं तत्प्रतिबद्धव्यवहाराहेतुत्वादिति निरस्तम्। असिद्धेः।

ननु ज्ञानं यथार्थमेवेति व्याप्तिरेव तद्बाधिका। अत एव प्रवृत्तिमात्रे विशिष्टज्ञानमिष्टज्ञानं च हेतुर्लाघवात् स्वविषये ज्ञानं प्रवर्तकम्, सर्वैरेवाद्यप्रवृत्तौ तथावगमात्। असत्यस्थले इष्टज्ञानमपि प्रवर्तकं, न तु भेदाग्रहे हेतुतावच्छेदकमित्यन्यथाख्यातिसाधनं न भवतीति चेत्, न। तेषामन्यथासिद्धावन्वयव्यतिरेकावधारितकारणतामूलकत्वेन तैरेव व्याप्तिबाधात्। क्लृप्तहेतुं विना कार्यानुत्पत्तेः विपक्षे बाधकाभावाच्च। ज्ञानायथार्थत्वेऽपि निष्कम्पप्रवृत्त्याद्युपायस्य वक्ष्यमाणत्वात् ।

एतेन संस्कारेन्द्रियाभ्यां प्रत्यभिज्ञानवच्छब्दाभासादितो वा परस्परं संबन्धविरहिणि एकं ज्ञानं न भवतीति ज्ञानं यथार्थमेवेति व्याप्तिरिति निरस्तम्। व्याप्त्याद्यसिद्धेः सामग्रीसत्त्वे कार्यावश्यकत्वाच्च।

**एकदेशिनस्तु** - रजतरङ्गयो रजतरङ्गभेदाग्रहान्न युगपत् प्रवृत्तिनिवृत्ती। न चान्यथाख्यातिः, दोषवशात् पुरोवर्तिनं विहाय स्मृतरजतरङ्गाभ्यां पुरोवर्तिनि भेदग्रहात्। न च रजतत्वेन स्मृतिः संस्कारगोचरसर्वरजतविषया स्यात् सामान्यप्रत्यासत्तेस्तुल्यत्वादिति वाच्यम्। तत्तांशे रजतत्वे च प्रत्यासत्तावपि दोषात् स्मृत्यनुभवप्रतिबन्धवदुपपत्तेः।

किं च प्रत्यक्षे सामान्यं प्रत्यासत्तिः, स्मरणे तु मनः करणं संस्कारः प्रत्यासत्तिः, न तु तस्य सामान्यं प्रत्यासत्तिरकरणत्वात्।

**तन्न।** एकरङ्गरजतमात्रज्ञानानन्तरं तयोरेव यमजयोर्वा विपरीतचतुष्केऽतिप्रसङ्गादन्यथाख्यातेर्वा।

**अन्ये तु** - रजते नेदं रजतमिति ज्ञानं रजतत्वासंसर्गाग्रहरूपं रजतभेदासंसर्गाग्रहरूपं प्रवृत्तिप्रतिबन्धकमिति।

**तन्न।** अन्यवृत्तितयोपस्थितस्य रजतत्वासंसर्गस्य रजतभेदस्य च रङ्गेऽसंसर्गाग्रहात् निवृत्तिप्रसङ्गात् रङ्गे च तयोरसंसर्गग्रहेऽन्यथाख्यातिः। रजते रजतभेदासंसर्गासंसर्गस्यासंसर्गाग्रहान्निवृत्तिरिति चेत्, न। भेदासंसर्गासंसर्गस्य भेदसंसर्गरूपत्वेन रजतभेदसंसर्गासंसर्गग्रहाद्रङ्गे निवृत्तिप्रसङ्गात्। रजतभेदसंसर्गासंसर्गग्रहे चान्यथाख्यातिः।

रजतवृत्तितयोपस्थिते भेदे रजतभेदेन सह भेदाग्रहः प्रवृत्तिप्रतिबन्धकः, एवं रङ्गे निवृत्तावपीति चेत्, न। एवमपि शब्दाभासात् युगपत् प्रवृत्तिनिवृत्त्यापत्तेः प्रवृत्तिनिवृत्तिविषयनिष्ठभेदयो रङ्गरजतभेदयोश्च शब्दादनुपस्थित्या प्रतिबन्धकत्वाभावात्।

**अपरे तु** पुरोवर्तिनिष्ठतया ज्ञाते भेदे इष्टानिष्टप्रतियोगित्वाभावग्रहात् प्रवृत्तिनिवृत्ती। तथा हि - रङ्गे रजतभेदः सन्नपि दोषान्न भासतेऽन्यस्माद्भासत एव। तथा च रङ्गवृत्तितया

ज्ञाते भेदे रजतप्रतियोगित्वाभावग्रहाद् यथार्थादेव रङ्गे प्रवृत्तिः, रङ्गप्रतियोगित्वाभावः सन्नपि दोषान्न भासत इति तत्र न निवर्तते। एवं रजतनिष्ठतयोपस्थिते भेदे रङ्गप्रतियोगित्वाभावग्रहात् रजते निवर्तते। रजतप्रतियोगित्वाभावः सन्नपि दोषान्न गृह्यत इति न युगपत्प्रवृत्तिनिवृत्ती। न च रङ्गवृत्तिभेदत्वं रजतभेदेऽप्यस्तीति तेन रूपेण सोऽपि भासते सामान्यबुद्धेः सर्वविशेषविषयत्वात्। तथा च रजतभेदेऽपि तत्प्रतियोगित्वाभावग्रहेऽन्यथाख्यातिरिति वाच्यम्। प्रत्यासत्तावपि रङ्गवृत्तिभेदत्वेन रजतभेदस्य दोषेणाग्रहादिति ।

**मैवम्।** इदं रजतमिति ज्ञानमन्वयव्यतिरेकाभ्यां प्रवर्तकमित्यनुभवसिद्धम्। तच्च सत्यस्थले विशिष्टज्ञानं अन्यत्र ज्ञानद्वयमेकं वा ज्ञानमिति विवादः। तत्र तज्ज्ञानं न प्रवर्तकमित्यनुभवबाधितम्। तदपि हेतुरित्यपि न। तस्य सत्यस्थलेऽसिद्धत्वात्। विशिष्टज्ञानापेक्षया गुरुत्वात् शब्दाभासात् प्रवृत्तौ भेदादिज्ञानाभावाच्च। एवं निवृत्तावपि।

**अन्ये तु** - इष्टवृत्तितया गृह्यमाणोऽनिष्टवृत्तितया चागृह्यमाणो धर्म स्वाश्रये प्रवर्तक इति, स च धर्मो रजते रजतत्वं रङ्गे रजतसादृश्यम् । एवं निवृत्तावपीति न युगपत्प्रवृत्तिनिवृत्ती इति ।

**तन्न** । एवं हि इमे रङ्गरजते इति शब्दाभासात् रङ्गरजतयोः प्रवृत्तिनिवृत्ती न स्याताम्। रजतवृत्तिधर्मस्य च रङ्गे, रङ्गवृत्तिधर्मस्य रजते शब्दादनुपस्थितेः। न च शब्दानन्तरं प्रत्यक्षेण तयोरुपस्थितिः, तत्र हेतुर्न शब्द इति वाच्यम्। अनन्यथासिद्धशब्दानुविधानात् इमे रजतरङ्गे इति स्वकीयं यथार्थज्ञानमनादृत्य तत्रैवेमे रङ्गरजते इति प्रतारकवाक्ये विश्वासेन प्रवृत्तिनिवृत्तिदर्शनाच्च।

**इतरे तु** - रजते रजतत्वं न गृह्यते दोषात्। तथा च रजतवृत्तितया यावदुपस्थितधर्मस्य रजतत्वेन भेदाग्रहान्न प्रवर्तते। रङ्गवृत्तितयोपस्थितस्य च कस्यचिद्धर्मस्य रजतत्वेन भेदाग्रहाद्रङ्गे प्रवर्तते। एवं निवृत्तावपि। यथा तवाभेदग्रहेऽपि

मानान्तरात् भेदग्रहः प्रवृत्तिप्रतिबन्धकस्तथा रजते रजतभेदग्रहेऽपि रजतवृत्तितया यावदुपस्थितस्य रजतत्वेन मम भेदग्रहः प्रवृत्तिप्रतिबन्धक इति।

**तन्न।** एतदपेक्षया विशिष्टज्ञानस्य लघुत्वेनान्वयव्यतिरेकाभ्यां च हेतुत्वात्। न च हेत्वभावः। प्रत्यभिज्ञानवत् संस्कारेन्द्रियाभ्यां विशिष्टधीसंभवात्।

तस्य ज्ञानद्वयत्वेऽभेदोच्छेदः, तस्य तदेकमानत्वात्। न चैकविषयत्वेन तयोः परस्परसहकारिता। नामविशिष्टनामिप्रत्यक्षे तत्तांशे च तदभावात् गौरवाच्च। न चातिप्रसङ्गः। भेदाग्रहस्यापि तद्धेतुत्वात्।

अथ प्रत्यभिज्ञाया एकत्वेऽपि तत्तांशे न साक्षात्कारित्वं। तत्रेन्द्रियासंनिकर्षात् तज्ज्ञानजन्यत्वाच्च। किं तु स्मृतित्वम्। पुरोवर्त्यभेदांशे च साक्षात्त्वं स्मृतित्वमनुभूतित्वं च न जातिरव्याप्यवृत्तिर्वेति चेत्, तर्हि संस्कारादसंनिकृष्टमपि भासत इति तवाप्यनुमतम्। तथा च तवैव रीत्या प्रत्यभिज्ञानवदिदं रजतमित्येकं ज्ञानमस्तु, तत्सामग्रीसत्त्वात्। मम त्विन्द्रियजन्यत्वात् जात्यसंकराच्च साक्षात्कारित्वमेवोभयत्र।

ननु यो यत्साक्षात्कारः स तदिन्द्रियसंनिकर्षजन्यः। न च रजते स इहास्तीति चेत्, न। प्रत्यभिज्ञाया इन्द्रियजन्यतया साक्षात्कारित्वेन तत्तायां नाम्नि च व्यभिचारात्। संस्कारस्य स्मृतेर्वा संनिकर्षत्वाच्च। न च रजतत्वप्रत्यक्षे संयुक्तसमवायस्य प्रत्यासत्तित्वेन हेतुत्वात्तं विना न तदिति वाच्यम्। तद्विशिष्टज्ञाने विशेषणज्ञानोपक्षीणत्वेन तस्याहेतुत्वात्। न हि विशिष्टधीसामग्रीसत्त्वे तेन विना तद्विलम्बः।

किं च विशेषणज्ञानं विशेष्यसंबन्धस्तयोरसंसर्गाग्रह इति प्रत्यभिज्ञासत्यप्रत्यक्षसाधारणस्य विशिष्टप्रत्यक्षहेतोर्भ्रमेऽपि संभवात्। रजतसाक्षात्कारे रजतसंयोगस्य हेतुत्वेऽपि विशेष्यसंनिकर्षत्वेन हेतुता, न तु रजतसंयोगत्वेन। यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषस्य हेतुत्वनियमात्। संयोगस्य विशेष्यभानसामग्र्यन्तरितत्वेनान्यथासिद्धतया विशेषसामग्र्यन्तराकल्पनात् गौरवाच्च। प्रत्यक्षहेतुत्वेन क्लृप्तविशेष्यसंबन्धादेव तदुपपत्तेः।

अपि च प्रवृत्तौ स्वतन्त्रोपस्थितेष्टभेदाग्रहकारणत्वापेक्षया रजतसाक्षात्कारे विशेष्यसंनिकर्षत्वेन हेतुत्वस्य लघुत्वात्।

वस्तुतस्तु - दोषाद्भ्रम इत्युभयसिद्धम्, तत्र भ्रमो नासंसर्गग्रहाभावः। तस्याधिकरणरूपत्वे असाध्यत्वात्। तज्ज्ञानरूपत्वे च तस्य प्रमात्वेन दोषाजन्यत्वात्। भ्रमस्थानाभिषिक्तप्रमा दोषजन्यैवेति चेत्, न। तस्या: क्लृप्तसामग्रयन्तरजन्यत्वादिति भ्रमोऽसत्यज्ञानमित्यसंनिकृष्टमपि दोषात् भासत इत्यभ्युपेयम्। अपि च दोषस्य विशिष्टमेव ज्ञानं व्यापारः, प्रवृतौ तद्धेतुत्वस्य क्लृप्तत्वात्। न च भेदाग्रहः, कल्पनीयकारणभावत्वात्। **यत्तु** दुष्टात्कार्यं नेति, तत्र बीजेन्द्रियसाधारणं न दुष्टत्वमेकमस्ति ।

एवं प्रत्यक्षमप्यन्यथाख्यातौ मानं कारणबाधाभावात्। तथा हि-इदं रजततया जानामीत्यनुव्यवसायसाक्षिकमेवान्यस्यान्यथा भानम्। न हि विषयत्वेऽनुव्यवसायादन्यत् प्रमाणम्। न ह्यतद्विषयस्तज्ज्ञानविषयत्वेन न वा तदविषयकं तद्विषयकत्वेनानुव्यवसीयते। अनुव्यवसायस्य प्रमात्वनियमात्। अन्यथा घटज्ञानेऽपि कदाचित्पटं जानामिति स्यात्। न च भेदाग्रहदशायां रजतज्ञानविषयत्वासंसर्गाग्रहः। शुक्तौ भेदग्रहेऽपि शुक्ती रजतत्वेन मया ज्ञाता शुक्तौ रजतज्ञानं मे वृत्तमित्यनुव्यवसायात्।

अथ विचारसाध्यासंसर्गग्रहबाध्योऽयमसंसर्गाग्रहः, तेन विचारं विना भेदग्रहेऽप्यवतिष्ठत इति चेत्, न। इदं रजततया जानामीत्यत्र शुक्तिकर्मकरजत त्वप्रकारकज्ञानासंसर्गाग्रहस्यात्मन्यसंभवात् तादृशज्ञानाप्रसिद्धेः।

न चेदं जानामीति रजतं जानामीति तदाकारः, तृतीयार्थस्य प्रकारत्वेन प्रकारिणोऽभानेऽभानप्रसङ्गात्।

विशिष्टज्ञानं च सर्वत्र विशेषणविशेष्यीयमित्यन्यथाभानमपि तथा। ज्ञाने रजतत्वानभ्युपगमाद् विशेषणविशेष्यविषयकत्वाच्च न साकारवादः।

**यत्तु** - ज्ञानमिथ्यात्वे बाध्यबाधकव्यवस्था न स्यादविशेषादिति। **तन्न।** अनन्यथासिद्धाया धियो बाधकत्वात्। तथा हि यत्र दुष्टादुष्टेन्द्रियजन्यं परस्परनिरपेक्षमेकत्र

विरुद्धं ज्ञानद्वयमुत्पद्यते, तत्र प्रथममनुपजातविरोधित्वान्नानागतं बाधते, तस्याप्राप्तत्वात्। उत्तरं तु स्वकारणादुत्पद्यमानमुपजातविरोधितया नानुपमृद्य पूर्वमुत्पत्तुमर्हतीति पूर्वं बाधात्मकमुत्पद्यते, अन्यथा नोत्पद्येतैव। न चैवमेवेति वाच्यम्। अनुभवविरोधात् । **यदाहुः**-

**"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयते ।**

**अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्"।।**

इति। यत्र पूर्वापेक्षमुत्तरं ज्ञानमुत्पत्तुमुन्मुखं तत्रोपजीव्यपूर्वविरोधेनोत्तरं नोत्पद्यते। अतोऽजातं सत्पूर्वं कथं बाधताम्। यथा प्रत्यक्षादिविरुद्धानुमितिः।

ननु भ्रमस्य किं बाध्यते। न स्वरूपं तस्य सत्त्वात्। नापि रजतत्वप्रकारकत्वं शुक्तिविषयकत्वं वा, तयोरपनेतुमशक्यत्वात्। जातं हि तद्रजतत्वेन शुक्तिं विषयीकृत्य। नापि व्यवहारः, प्रवृत्त्यादेर्वृत्तत्वात्। नाप्यनागतव्यवहारजनकत्वम्, तस्य कारणाभावादेवासंभवात् ।

उच्यते। बाधकेन भ्रमस्य भ्रमत्वबुद्धिरेव बाधः। **यत्तु** धियामयथार्थत्वे कथमाश्वास इति। **तन्न।** प्रामाण्यग्रहोपायस्य दर्शितत्वात्। सत्यत्वनियमेऽपि सदसंसर्गाग्रहस्यागृहीता-संसर्गस्य ज्ञानद्वयस्य च बहुषु दर्शनात् कथमाश्वासः।

अथ सदसंसर्गाग्रहस्य प्रतिसन्धानं विलम्बितम्। सद्विषयत्वं च शीघ्रोपस्थितमित्यौत्सर्गिकसद्विषयत्वज्ञानाद्विश्वासः। यत्र तु कदाचित्संशयस्तत्र ज्ञानान्तरादेव संशयनिवृत्तिरिति चेत्, ममाप्यौत्सर्गिकं धियां सत्यत्वं बाधकेनापनोद्यत इति तदनवतारात् सत्यत्वविश्वासः।

किं च तव ज्ञानान्तरेऽप्यविश्वासः। विशेषदर्शनाद्विश्वसस्तुल्य एव। यथा च तत्रापि न संदेहस्तथोक्तं परतः प्रामाण्ये ।

**अन्ये तु** - स्मृतयोग्यवैधर्म्याभावोऽधिकरणं तज्ज्ञानं वा। तच्च प्रत्यक्षत एव गृहीतमिति युक्तो विश्वासः। अयोग्ये भेदकेऽधिकरणे च भेदसंशये ज्ञानान्तराद्विश्वास इति।

**तन्न।** उभयत्रापि ज्ञानान्तराद्विश्वासतुल्यत्वेन शिष्यदन्धनमात्रत्वात्।

वस्तुतस्तु भेदाग्रहादेवाभेदव्यवहारोपपत्तावभेदविषयत्वं क्वापि न सिद्धमस्तीति कथं सद्विषयत्वसिद्धिः।

**यत्तु दोषो** न हेतुरिति, **तन्न।** फलबलेन तथात्वात्।

अथेदं रजतमिति ज्ञानं कथमयथार्थम्, इदंरजतयोः सत्त्वात्। न च तदुभयतादात्म्यमसत्, उभयं तादात्म्यं चेत्यतोऽधिकस्याभावात्। तयोश्च सत्त्वात्। असत्त्वे वा असत्ख्यातिः। एवं संसर्गारोपोऽपीति।

उच्यते। सन्मात्रविषयत्वेऽपि तदभाववति तत्प्रकारकत्वं प्रकारव्यधिकरणविषयताकत्वं वा अयथार्थत्वम्।

**प्राञ्चस्तु** - तादात्म्यसंसर्गयोरसतोरेव मन्यन्ते विषयत्वम्। न चैवमसत्ख्यातिः, सदुपरक्तस्यात्यन्तासतः ख्यात्यभ्युपगमात्। सदनुपरक्तस्याखण्डस्यात्यन्तासतः ख्यातिरसत्ख्यातिर्नाभ्युपेयते कारणाभावात्। तदनुपपत्तिस्तुल्यैवेति चेत्, न। अत्र विशिष्टज्ञानसामग्र्या दर्शितत्वात्। तदुक्तं **वाचस्पतिमिश्रैः -**

**"तस्माद्यदन्यथा सन्तमन्यथा प्रतिपद्यते ।**

**तन्निरालम्बनं ज्ञानमसदालम्बनं मतम्"।। इति ।।**

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अन्यथाख्यातिवाद: ।।**

## अथ प्रत्यक्षलक्षणवाद:

सा च प्रमा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दीभेदात्। एवं चतसृणां तासां करणं प्रमाणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। अन्येषां यथायथमेष्वेवान्तर्भावात्। तथा च वक्ष्यामः।

ननु न प्रत्यक्षं तावदिन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यभिचारि। आत्मानुमितिस्मृत्योर्वानमात्रे चातिव्याप्तेः। आत्मनोऽर्थस्य मनसेन्द्रियेण संयोगादुत्पत्तेः। ईश्वरप्रत्यक्षाव्याप्तेश्च। संनिकर्षस्य च संयोगादिरूपत्वेनाननुगमाच्च। संयोगाद्यन्यतमस्य चानिर्धारितैकपरत्वे भागासिद्धिरितरभेदसाधने, व्यर्थविशेषणत्वं च।

इन्द्रियार्थयोरेकजन्यत्वस्य लक्षणत्वे व्यर्थविशेषणत्वम्। न च तयोरेकैकजन्यत्वमेव लक्षणम्। आत्ममनोजन्यत्वेन ज्ञानमात्रे गतत्वात्, इन्द्रियस्य प्रत्यक्षनिरूप्यत्वाच्च।

नापि ज्ञातकरणाजन्यत्वे सति सत्योऽनुभवः प्रत्यक्षम्। लिङ्गादेरजनकतया ज्ञानस्याज्ञातस्य करणत्वे अनुमित्यादौ गतत्वात्।

ज्ञानाजन्योऽनुभवः सत्य इत्यपि न। विशिष्टप्रत्यक्षाव्याप्तेः तस्य विशेषणज्ञानजन्यत्वात्।

नापि सत्यत्वे सति साक्षात्कारित्वम्, नियतव्यञ्जकाभावेन ग्रहीतुमशक्यतया तस्य जातित्वासिद्धेः। सत्त्वे वा तदेव लक्षणं व्यवहारनिमित्तं चास्तु, किं जात्या।

उच्यते। प्रत्यक्षस्य साक्षात्कारित्वं लक्षणम्। चाक्षुषादिज्ञाने साक्षात्करोमीत्यनुगतबुद्धेर्बाधकं विना जातिविषयत्वात्। न चेन्द्रियजन्यत्वं तथा। अन्योन्याश्रयादिन्द्रियस्यातीन्द्रियत्वाच्च। न च नियतव्यञ्जकाभावान्न जातिः। गोत्वादौ सास्नादेरिवाननुगतस्यापि चक्षुः करणकानुभवत्वादेर्व्यञ्जकत्वात्।

न च जातावनुगतव्यञ्जकनियमः। ज्ञानेच्छासुखदुःखादेस्तदभावात्। प्रत्युत नियतव्यञ्जकसत्त्वे जात्यसिद्धिरेव। तत एवानुगतबुद्ध्युपपत्तेः। निर्विकल्पकेश्वरयोगिप्रत्यक्षे च प्रत्यक्षत्वं धर्मिग्राहकमानसिद्धम्।

योगजधर्माजन्यजन्यस्वविषयकसविकल्पकाजन्यसामान्यलक्षणप्रत्यासत्त्यजन्यजन्यप्रत्यक्षस्य लक्षणमनागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यजन्यजन्यसाक्षात्कारत्वम्।

**अन्ये तु** सामान्यज्ञानप्रत्यासत्त्योरिन्द्रियसंबद्धविशेषणतान्तर्भावात् तज्जन्यं प्रत्यक्षं संग्राह्यमेवेति ।

(यद्वा विषयत्वेन)(विशेष्यत्वेन) स्वविशेष्यजन्यं ज्ञानं जन्यप्रत्यक्षम्। आत्मविशेष्यकानुमितिशाब्दस्मृतिषु विशेष्यत्वेन तस्य न हेतुत्वम्, विशेष्यं विनापि तासामुत्पत्ते किं तु समवायित्वेन।

यद्वा इन्द्रियजन्यं ज्ञानं जन्यप्रत्यक्षम्। इन्द्रियत्वेन जनकत्वं विवक्षितम्। जन्यप्रत्यक्षमात्रे इन्द्रियत्वेन चक्षुरादीनां कारणता। अनुगतहेतुं विना अनुगतकार्यस्याकस्मिकत्वापत्तेः। स्मृत्यनुमित्यादौ च मनसो नेन्द्रियत्वेन हेतुत्वम्, किं तु मनस्त्वेन। अन्यथा स्मृत्यादेः साक्षात्कारत्वापत्तेः।

इन्द्रियत्वं च स्मृत्यजनक (ज्ञानहेतु) (ज्ञानकारण) मनस्संयोगाश्रयत्वम्। प्राणशरीरात्मानश्च स्मृतिजनकमनस्संयोगवन्तः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानहेतुमनस्संयोगाश्रयत्वं वा।

ज्ञानाकरणकं ज्ञानमिति तु **वयम्।**

विशिष्टप्रत्यक्षे च विशेषणज्ञानं न करणं व्यापाराभावात्। विशिष्टवैशिष्ट्यप्रत्यक्षे च विशेषणज्ञानं हेतुर्न तु विशेषणविशेषणधीरपि विशेषणधीद्वारा करणम्, मानाभावात्।
प्रत्यभिज्ञायां तु तत्तास्मृतिः कारणं न तु संस्कारद्वारा अनुभवः करणम्। तस्याः संस्कारजन्यत्वे स्मृतित्वापत्तेः। स्मृतित्वे लाघवेन संस्कारजन्यत्वस्य तन्त्रत्वात्। तद्धेतुत्वेनैव तत्सिद्धेश्च ।

**प्राभाकरास्तु** - साक्षाद्धीः प्रत्यक्षम्। साक्षात्त्वं च न जातिः, नियतव्यञ्जकाभावात्। नापि सविकल्पकानपेक्षज्ञानत्वम्, प्रत्यभिज्ञासादृश्यद्वित्वादिप्रत्यक्षाव्यापनात्। किं तु यज्ज्ञानं यद्विषयत्वे सविकल्पकाजन्यं तत्तत्र साक्षाद्धीः। मितिमातृप्रकाशे च सर्वमेव ज्ञानं प्रत्यक्षं ज्ञानाजन्यत्वात्। जातावनुगतधीरपि प्रत्यक्षा जातिव्यक्तिनिर्विकल्पकजन्यत्वात्। सादृश्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे च न विशेषणज्ञानं हेतुः, तेन विनापि युगपदिन्द्रियसंनिकृष्टे विशिष्टप्रत्ययोदयात्।

दीर्घादिप्रत्यक्षे च न ह्रस्वादिज्ञानापेक्षा, किं तु तव्द्यवहारे। अनुमित्यादेर्मेयांशे प्रत्यभिज्ञायाश्च तत्तांशे ज्ञानजन्यत्वान्न प्रत्यक्षत्वम्, किं तु परोक्षत्वमेव। मितिमात्रंशे इदन्तांशे च द्वयोरेव प्रत्यक्षत्वम्।

**यत्तु** तत्ताप्रकाशे न तत्तासविकल्पकत्वेन कारणता, किं तु तत्ताज्ञानत्वेन। **तन्न।** अनुमित्यादावपि लिङ्गादिज्ञानत्वेनानुमेयादितुल्यत्वादिति।

अत्रोच्यते। यदि तत्तायां प्रत्यभिज्ञा परोक्षानुभवरूपा तदा नोत्पद्येत, तद्धेतुलिङ्गादेरभावात्। तत्ताज्ञानसहितमिन्द्रियं जनकमिति चेत्, तर्हि इन्द्रियजन्यत्वात्तत्र साक्षाद्धीरेव स्यात्। न च ज्ञानानपेक्षेन्द्रियजन्यत्वं तत्र तन्त्रम्, गौरवात्। ज्ञानसहितेन्द्रियजन्यत्वेनेदन्तांशेऽप्यप्रत्यक्षत्वप्रसङ्गाच्च। न ह्येकस्मिन् ज्ञाने जनयितव्ये तदपेक्षा तदनपेक्षा च संभवति।

अंशे तदुभयमपीति चेत्, न। ज्ञाने अंशस्य विषयत्वेन तदजन्यत्वात्। एवं मितिमात्रंशे च सर्वं ज्ञानं न प्रत्यक्षम् इन्द्रियाजन्यत्वात् साक्षात्कारे तस्य कारणत्वात्। मनो जन्यत्वे अनुमेयांशेऽपि तत्त्वप्रसङ्गः। न च ज्ञानमात्रसामग्रीजन्यत्वं प्रत्यक्षत्वे तन्त्रम्, गौरवात्। ज्ञानमात्रं च न ज्ञानत्वं, तस्याजन्यत्वात्। नापि सर्वं ज्ञानं, प्रत्यक्षज्ञाने प्रत्येकं सर्वज्ञानसामग्र्यजन्यत्वात् सर्वज्ञानसामग्र्यप्रसिद्धेश्च।

अपि च ज्ञाने अवयवाभावेनांशो विषय एव। विषये च ज्ञानं न कारणम्। अतोऽनुमितिप्रत्यभिज्ञयोः स्वविषयेऽनुमेये तत्तायां च प्रत्यक्षत्वं स्यात्। विषयस्य सविकल्पकाजन्यत्वात् ।

अथ प्रत्यभिज्ञायां तत्ताविषयत्वेन तज्ज्ञानं कारणम्। एवमनुमित्यादौ मेयविषयत्वेऽपि। मितिमात्रिदन्ताधर्मिविषयत्वे च न ज्ञानं कारणं, किं तु ज्ञानसामग्रीति चेत्, न। तद्विषयत्वं हि ज्ञाने स्वकारणाधीनं तदीयस्वभावत्वं स्वरूपविशेषः। स च (ज्ञानाजन्य)(ज्ञानजन्य) एव। दण्डिज्ञानादौ चाव्याप्तिः। तस्यानुमित्यादिवद्विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यत्वात्। न च परोक्षत्वमुपाधिः। प्रत्यभिज्ञायां प्रथमोत्पन्नजातिव्यक्तिज्ञाने जन्ये जातेरनुगतप्रत्यक्षे च साध्याव्यापकत्वात्।

पूर्वव्यक्तिवृत्तित्वे सत्येतव्द्यक्तिवृत्तित्वमनुगतत्वमिति तत्र पूर्वानुभूतव्यक्ते-र्विशेषणत्वेन तत्र ज्ञानस्यानुगतत्वप्रत्यक्षे कारणत्वात्। अन्यथा प्रथममप्यनुगतधीप्रसङ्गः।

अत एव ज्ञानसाक्षादजन्यं ज्ञानं प्रत्यक्षम्। प्रत्यभिज्ञायां संस्कार एव साक्षाज्जनकः। जातावनुगतधीरपि संस्कारजन्या। एवं सादृश्यादिप्रत्यक्षेऽपि प्रतियोगिसंस्कार एव कारणमिति निरस्तम्। दण्डानुभवजन्यदण्डिप्रत्यक्षे धारावाहिकप्रत्यक्षे चाव्यापनात्। उत्तरविशिष्टज्ञाने पूर्वविशिष्टानुभवस्यैव विशेषणज्ञानत्वेन हेतुत्वात् संस्कारस्य स्मरणेतराजनकत्वाच्च। अन्यथा प्रत्यभिज्ञादेः संस्कारजन्यत्वेन स्मृतित्वं स्यात् इत्युक्तत्वात् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे प्रत्यक्षलक्षणवादः।।**

## अथ संनिकर्षवादः

प्रत्यक्षविशेषे संनिकर्षविशेषो हेतुरननुगत एव। संयोगेन द्रव्यग्रहः संयुक्तसमवायेन रूपकर्मणोग्रहणम् , संयुक्तसमवेतसमवायेन रूपत्वादेः, समवायेन शब्दस्य, समवेतसमवायेन शब्दत्वादेः, विशेषणतया शब्दाभावस्य, इन्द्रियसंबद्धविशेषणतया समवायघटाभावादेर्योग्य-संनिकर्षादेव ग्रहो न संनिकर्षमात्रात्।

अथ सूक्ष्मावयवावच्छेदेनावयविसंयोगेऽपि न तद्ग्रह इति महावयवावच्छेदेन संयोगो हेतुः। तथा चावयवेन्द्रियसंयोग एव हेतुः। न च ग्राह्यसंयोगावच्छेदकावयवसंयोगापेक्षया ग्राह्यसंयोगस्य लघुत्वात् स एव हेतुः। तस्यातिप्रसक्तत्वात्।

एतेन स्वावयवसंयोगापेक्षया स्वसंयोगस्य लघुत्वात् स एव हेतुरिति निरस्तम्। नाप्यवच्छेदकसंयोगेनान्यथासिद्धौ तत्राप्यवच्छेदकान्तरसंयोगेनान्यथासिद्धिरिति संयोगो हेतुरेव न स्यादिति वाच्यम्। अल्पतरतमभागावच्छेदेन संयोगस्य हेतुत्वेऽतिप्रसङ्गादिति।

मैवम्। द्रव्यग्रहेऽवयविमात्रग्रहे वा स्थूलावयवावच्छेदेन संयोगो न हेतुः, आत्मत्रसरेणुसूक्ष्मभागग्रहे व्यभिचारात्। किं तु घटादिग्रहे स हेतुः। एवं च आत्मादिद्रव्यग्रहो ग्राह्यसंयोगजन्य इति घटादिग्रहोऽपि तद्वदेव स्वग्राह्यसंयोगजन्य इति। तस्मिन् सत्यपि घटादिग्रहो नास्तीति यदि तदा स्थूलावयवसंयोगोऽवच्छेदकोऽस्तु तत्संयोगोऽपि वा हेतुः। न तु क्लृप्तहेतुपरित्यागः।

ननु संयुक्तसमवायेन अवयविग्रहोऽस्तु, न तु संयोगादिस्तत्र हेतुः, तस्य रूपादिग्रहे क्लृप्तत्वात्। न च लाघवात्संयोग एव तथा। तस्य कल्पनीयकारणत्वादिति चेत्, न। आत्मग्रहे इन्द्रियसंयोगस्य कारणत्वात् अन्यत्रापि द्रव्यसाक्षात्कारत्वेन तथा कल्पनात्। न च बहिरिन्द्रियद्रव्यग्रहे अवयविग्रहे वा संयुक्तसमवायः कारणम्। लाघवेन संयोगस्यैव कारणत्वेन कल्पनात्।

ननु संयुक्तसमवायो न गन्धग्राहकः, किंतु आश्रयसंयोगः। एवं गन्धत्वग्रहोऽपि आश्रयाश्रयसंयोगादिति संयुक्तसमवेतसमवायोऽपि न हेतुः। न च गन्धे सति गन्धसमवायं विना गन्धाग्रहोऽस्ति। न चैवं संयुक्तघटे भाविगन्धग्रहः स्यात्, गन्धस्यापि स्वग्रहे हेतुत्वात्। न च गन्धस्य प्रत्यक्षत्वेनेन्द्रियसंनिकर्षाश्रयत्वमनुमेयम्। शब्दप्रत्यक्षहेतोः समवायस्य गन्धेऽपि सत्त्वात्, गन्धेन्द्रियसंनिकर्षसाधने साध्याप्रसिद्धेः।

मैवम्। गन्धसमवायिसंयोगस्य हेतुत्वे हि यदि गन्धसमवायस्य विशेषणता तदा स हेतुरेव। उपलक्षणत्वे च संयुक्तद्रव्यमात्रमुपलक्ष्यम्। तथा च घटसंयोगात्पटगन्धग्रहप्रसङ्गः।

अथ स्वसमवायिसंयोगो हेतुः। तत्र समवायोऽवच्छेदक इति चेत्, तर्हि संयोगिसमवायस्य हेतुत्वे संयोगोऽवच्छेदकः समवायो हेतुरिति तुल्यम्। तदेतत् परिवर्त्य क्षौमपरिधानमित्युच्यते।

ननु संयुक्तसमवायो न संयोगो न वा समवायः नोभौ वा, गन्धे इन्द्रिये चावृत्तेः। न चेन्द्रियेण गन्धस्य परम्परासम्बन्धः। परम्परा हि संयोगसमवायावेव। तत्र विरोध एव नाधिकोऽपसिद्धान्तादिति चेत्, न। इन्द्रियतत्संयोगतदाश्रयसमवायानामेव परम्परा-सम्बन्धत्वात्। अन्यथा नीलत्वजातेः परम्परासम्बन्धेन वस्त्रचर्मकम्बलेषु अनुगतव्यवहारोच्छेदः।

ननु संयुक्तसमवेतसमवायात् न रूपत्वादिग्रहः तदभावादिति चेत्, न। तदनभ्युपगमेऽपि रूपादिसादृश्यस्य ततो ग्रहात्। न च द्रव्यसादृश्यादेव तव्द्यवहारः, बाधकं विना प्रतीत्यविशेषात् वैपरीत्यापत्तेः। आश्रयवैसादृश्येऽपि रूपरसादेः सादृश्यानुभवाच्च।

रसत्वमधुरत्वगन्धत्वसुरभित्वादिश्च जातिः अनुगतप्रत्ययात्। रूपे च यद्यपीदं नीलमित्यनुभवो न तु इदं रूपमिदं रूपमिति, तथापि पीतो वर्णः नीलो वर्ण इति वर्णाकारानुगतबुद्धिरस्ति रूपत्वे मानम्। न च चक्षुराद्येकैकेन्द्रियग्राह्यत्वं रूपत्वादिकम्। बाधकं विनानुगतबुद्धेर्जातिविषयत्वात्। इन्द्रियातीन्द्रियत्वेन चक्षुराद्यग्रहेऽपि रूपत्वादिप्रतीतेः। न हि अननुसंहितोपाधेरुपहितप्रत्ययः। अतीन्द्रियरूपरसगन्धाननुमानापत्तेश्च । योग्यताया रूपत्वादिजातिनिरूप्यत्वात्।

यद्यपि तन्मते नीलपीताद्येकैकमेव नित्यं नातीन्द्रियं, तथापि चक्षुघ्राणादिरूपस्यालोकपृथिव्यादिरूपाभिन्नत्वेन प्रत्यक्षत्वप्रसङ्गः। न चैकमेव रूपमुद्भूतमनुद्भूतं चेति। विरोधात्। रूपत्वादिना परस्परव्यावृत्ततया ज्ञातस्य रूपादेरुपलब्ध्या तत्कारणत्वेन परस्परव्यावृत्तचक्षुराद्यनुमितिः, परस्परव्यावृत्तचक्षुराद्यनुमितौ च चक्षुग्राह्यत्वादिना रूपादिपरस्परव्यावृत्तधीरित्यन्योन्याश्रयाच्च। नीलपीतादिप्रतीतौ भिन्नभिन्नकरणत्वसिद्धावपि तत्तत्करणग्राह्यत्वस्य सर्वरूपेष्वसिद्धिः।

ननु नीलपीताद्युपलब्धिकरणेषु गन्धरसस्पर्शाव्यञ्जकत्वे सति नीलादिव्यञ्जकत्वात् आलोकवदिति तैजसत्वं प्रसाध्य तैजसेन्द्रियग्राह्त्वेन नीलादौ रूपाकारानुगतधीरेवं गन्धादावपीति चेत्, न। एवंप्रणालीज्ञानाभावेऽपि रूपरसादावनुगतप्रत्ययात् नीलाकारानुगतबुद्धेश्च नीलत्वं जातिः। न च चक्षुग्राह्यत्वं तत्, पीतादौ गतत्वात्।

ननु एकैका एव नीलारुणादिव्यक्तयः, नानामसीनीलिम्नि (समी)(मसी) भेदग्रहेऽपि तत्त्वेन प्रत्यभिज्ञानात्। न चानेकव्यक्तिवृत्तित्वे नित्यत्वे जातित्वापत्तिः। जातेः संस्थानमात्रव्यङ्ग्यत्वात्, अवयवावयविवृत्तित्वात्, गोत्वादिना परापरभावानुपपत्तेश्च। नीलेतरादिप्रतीतिश्च तदन्यरूपासंभेदादिति चेत्, न। पाकेन श्यामं नष्टं रक्तमुत्पन्नमिति प्रत्ययात्।

न चासौ भ्रमः, बाधकाभावात्। न चोत्पादविनाशप्रत्ययस्य समवायो विषयः, तदनुल्लेखात्। एवं च मधुरादिरसानां सौरभासौरभाणां च गन्धानामेकैकत्वं स्यात्

नीलादितुल्यत्वात्। एवमस्तु इति चेत्, न। तेषामुत्पादविनाशानुभवात्। एकैकत्वे मधुरतरत्वाद्यनुपपत्तेश्च।

ननु श्रोत्रेण समवायेन शब्दग्रहे सर्वशब्दोपलब्धिः स्यात्। न च कर्णशष्कुल्यवच्छेदेनोत्पन्नो गृह्यते। अवच्छेद्यस्य आकाशत्वेनाविशेषात्। तदन्यत्वे शब्दस्य तत्रासमवायात्। तस्मात् यः शब्दो यं प्रति योग्यः स तेन गृह्यते नान्यः। न च पुरुषविशेषं प्रति योग्यत्वं न स्वरूपम्, अननुगमात्; न च जातिः, तस्याः निष्प्रतियोगिकत्वात्; न हि गौः कंचित् प्रत्यगौरिति वाच्यम्। सप्रतियोगिकत्वं हि न सावधित्वं दीर्घत्वादिवत्। नापीतरधीनिरूप्यत्वमभाववत्। किं तु शब्दग्रहे सा जातिः कारणं तदवच्छेदिका वा। अत एव न कुर्वद्रूपत्वप्रवेशः, सहकारितास्वीकारात्। सर्वसाधारणत्वमिष्टमेव, सर्वैस्तथा व्यवह्रियमाणत्वात्। गोत्वेऽपि तदेव तत्। शब्दमात्रस्य योग्यत्वमननुगतमेव, गुणयोग्यत्ववदिति।

मैवम्। शब्दस्य प्रत्यक्षत्वेन प्रत्यासत्तिसाधनात्। न च समवायोऽति-प्रसक्तोऽन्योऽनभ्युपगत इति वाच्यम्। कर्णसंयोगावच्छिन्नसमवायस्य प्रत्यासत्तित्वात्। कर्णसंयोगो हि समवायवृत्त्या शब्दाधारतायां परिचायकः। एवं च इह शब्दः, नेह शब्दः इत्यनुभवात् शब्दस्याव्याप्यवृत्तित्वे सिद्धे यस्य शब्दस्य समवायवृत्त्या आधारता कर्णसंयोगेनावच्छिद्यते स गृह्यते, यस्य तु तदत्यन्ताभावेनावच्छिद्यते स न गृह्यते। तथा (यथा) संयोगस्य समवायेनाधारता हस्तसंयोगेनावच्छिद्यते न तदभावेनेति हस्तसंयोगावच्छेदेन गृह्यते नान्यत्र; अन्यथा हस्तसंयोगस्यानवच्छेदकत्वे सर्वमिदं समानमिति संयोगस्यापि सर्वत्रोपलब्धिः स्यात्। न चैवं समवायोऽप्यव्याप्यवृत्तिः। समवायेन वृत्त्या तस्याधारावृत्तित्वात्। अभावस्तु विशेषणतया व्याप्यवृत्तिरेव।

न चैवं सर्वत्र सर्वशब्दोपलब्धिः स्यात्। शब्दसमवायस्य सत्त्वेऽप्यन्यत्र शब्दात्यन्ताभावसत्त्वात्।

अथ वीणादौ शब्द इत्यबाधितानुभवबलात् तदवच्छिन्नं नभः श्रोत्रं, न तु कर्णावच्छिन्नमेव। कर्णे न शब्दः किं तु वीणायामित्यनुभवात्। अन्यथा कर्णे शब्द इति धीः स्यात्। न चानन्तवीणाद्यवच्छेदकत्वेनानन्तश्रोत्रस्वीकारे गौरवम्, शब्ददेशत्वेनैकत्वे चातिप्रसङ्गः, सर्वदेशानां शब्दावच्छेदकत्वादिति वाच्यम्। वीणादिदेशताग्रहस्य बाधकं विना प्रमाणत्वे गौरवस्य न्याय्यत्वात्। प्रत्युत सर्वतो दिक्षु अनन्तशब्दसन्तानोत्पादक्रमेण कर्णोत्पादे कल्पनागौरवं मानाभावात्। न च दूरसंनिधानयोः शब्दानां अबाधिततारमन्दत्वादिवैधर्म्यप्रतीत्या भेदसिद्धेः संतानसिद्धिः। दूरत्वादिदोषात्तारत्वाग्रहे मन्दत्वारोपात् तदुपपत्तेः। व्यवहितकर्णे शब्दानुत्पादवत् व्यवहितशब्दानुपलब्धिः निमित्तवायुसंयोगाभावात्।

(ननु)(न तु) व्यवधानाभावस्य हेतुत्वात् तस्य संनिध्युपक्षीणत्वात् कर्णानुपघातोऽपि हेतुरिति न तदुपघाते शब्दग्रह इति।

मैवम्। कर्णावच्छेदेनापि शब्दग्रहात् कर्णशष्कुल्यप्यवच्छेदिकेति कर्णावच्छिन्नमेव नभः श्रोत्रम्, आवश्यकत्वात् लाघवाच्च। शब्दमात्रग्रहे तदनुविधानात् , शरीरसंयुक्तस्य सतः साक्षात्प्रतीतिसाधनस्य इन्द्रियत्वात्, कर्णेन वीणाशब्दं शृणोमीति तत्कारणत्वेनाबाधितानुभवाच्च। न तु वीणदिकम्, अनन्तत्वात्, शब्दमात्रग्रहे तदननुविधानात्, वीणाद्यवच्छिन्नस्य नभसः शरीरासंयुक्तत्वेनानिन्द्रियत्वात् वीणया शब्दं श्रृणोमीत्यननुभवाच्च।

कथं तर्हि वीणायां शब्द इति ज्ञानं, श्रूयमाणस्य शब्दस्य तदनधिकरणत्वादिति चेत्, न। न हि सर्वत्र शब्दे मृदङ्गाद्यधिकरणग्रहनियमः। अन्यथा क्वचिदपि देशे संदेहविपर्ययतदनुल्लेखानामनुपपत्तेः। यत्राप्यस्ति तत्र शरीरे सुखमितिवत् उत्पत्तये परंपरया वीणाद्यपेक्षणात् तदधिकरणत्वम्। तवापि वीणायाः शब्दानाश्रयत्वेन तथैवाधिकरणत्वात्।

नन्वेवं कर्णे अनेकगकारोत्पादे अनेकग्रहणप्रसङ्गः। न चैकग्रहे अन्यग्रहसामग्री प्रतिबन्धिका। कोलाहले तथा अदर्शनादिति चेत्, न। तारेण मन्दाभिभवात्। तुल्यत्वे वा

अनेकग्रहस्येष्टत्वात्। भेदाग्रहस्तु अत्यन्तसारूप्यात्। एवं च वीणादेरश्रोत्रत्वे मैत्रेणाहमनुवाकमध्यापितो यद्गीतं त्वया श्रुतं तन्मयापीत्यादिप्रतीतीनां तदुच्चारणादिप्रयोज्यजातीयत्वं विषयः। शब्दे हि कारणविशेषप्रयोज्या जातिरवश्यं वाच्या। अन्यथा शब्दविशेषेण पुत्राद्यनुमानं न स्यात्, जातिं विना विशेषान्तराभावात्। एवं च कर्णावच्छिन्नस्य नभसः श्रोत्रत्वे तेन वीणादिप्रभवशब्दग्रहो न तत्र सन्तानक्रमेणोत्पादं विना इत्यनन्यगतिकतया तत्कल्पनापि प्रामाणिकी।

शब्देन चाव्यवहितपरमाणुदेशोत्पादक्रमेण न शब्दारम्भो येन मेघजादिशब्दानां भूलोकप्राप्तिर्युगान्तरेऽपि न स्यात्। किं तु मेघाद्यभिहतसर्वतोगामिमहावायोः महति देशे संयोगनिमित्तमासाद्य आद्यशब्देन सर्वदिग्वर्ती शब्द एक एव जन्यते। निमित्तसंयोगानुरोधित्वात् विभुकार्याणां उत्तरोत्तरेणापि अधिकाधिकदेशतः सर्वत्र एकैक एव शब्दो वीची (तरङ्गत्वात्)(तरङ्गवत्) उत्पाद्यते। अत एव सर्वैरेकशब्दग्रहः।

वायोश्च नयनवन्महावेगतया शीघ्रगामित्वेन अग्रिमशब्दारम्भादाद्यशब्दानन्तरमचिरेणैव शब्दोपलम्भः। वायोरेव च (मन्दतरतमादिक्रमेण) मन्दतरतमादिक्रमेण मन्दादिशब्दोत्पत्तिः।

यद्वा आद्यशब्देन कदम्बगोलकवत् दश दिशि दश शब्दा आरभ्यन्ते तैश्च दश शब्दसन्ताना इति।

नन्वेकशब्देन कथमनेकशब्दारम्भः सामग्रीभेदादिति चेत्, न। सर्वतोऽनेकवाय्वादिसहकारात् प्रागभावभेदाद्वा।

न च तदितरहेतुसाकल्ये तद्भेदान्न कार्यभेदः तथा अदर्शनादिति वाच्यम्। कार्यभेदो हि सामग्रीभेदात्। स च हेत्वन्तरभेदादिव प्रागभावभेदादपि। अन्यथा समवाय्यादिभेदेऽपि कार्यवैजात्यं न स्यात्। घटव्यक्तिषु तथा अदर्शनात्। पाकजे रूपादौ हेत्वन्तराभेदेऽपि प्रागभावपूर्वरूपादिध्वंसभेदेन भेदाच्च ।

अथ रूपाद्येकैकप्रागभावध्वंसयोः सर्वत्र तुल्यत्वे किं विनिगमकम्, गन्धादिप्रागभावानां रसादौ व्यभिचारेऽपि गन्धादौ रसादिप्रागभावानामव्यभिचारादिति चेत्, न। वायुस्पर्शे गन्धरसरूपप्रागभावप्रध्वंसानां, तेजोरूपे गन्धरसाभावयोः, जलरसे गन्धप्रागभावस्य व्यभिचारेण अहेतुत्वे स्वप्रागभावहेतुताया आवश्यकत्वात्। पाकजेषु रूपरसस्पर्शेषु गन्धादिप्रागभावानामन्यथासिद्धत्वाच्च। रूपादिषु तथादर्शनात्। गन्धेऽपि स्वप्रागभावस्यावश्यहेतुत्वात् अभावान्तराणामन्यथासिद्धत्वम्।

यद्वा रूपरसस्पर्शतुल्यत्वेऽपि अग्निसंयोगविशेषात् क्वचित् सौरभमसौरभं चोत्पद्यते। न चाग्निसंयोगो रूपादिमात्रे कारणं, व्यभिचारात्। एवं रसादावपि।

ननु कार्यमात्रे प्रागभावमात्रं न हेतुः, तयोर्व्यतिरेककालानवगमात्। सर्वमुक्तावितरहेत्वभावादेव कार्यानुत्पादादिति चेत्, न। हेत्वन्तरसत्त्वेऽप्युत्पन्नस्य पुनरनुत्पादेन प्रागभावस्य हेतुत्वात्। एका सामग्री (एकमेव कार्यं)(एकं कार्यं) जनयति स्वभावादिति चेत्, न। कार्यानुत्पादस्य सामग्रीविरहप्रयोज्यत्वनियमात्।

न च कार्यसहभावेन कारणत्वम्, गौरवात्। न च विनश्यदवस्थे समवायिनि कार्यानुत्पत्तेस्तथात्वमिति वाच्यम्। तावता समवायिकारणस्यैव तथात्वात्, कारणमात्रे मानाभावेन तस्याप्रयोजकत्वात्।

ननु समवेतसमवायो न ग्राहकः शब्दत्वादिजातेरभावादिति चेत्, न। रूपत्वादिन्यायेन तत्साधनात्।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे संनिकर्षवादः।।**

## अथ समवायवादः

ननु समवायासिद्धेः न सा प्रत्यासत्तिः। विप्रतिपत्तिश्च शुक्लः पट इति प्रतीतिः विशेषणविशेष्यसम्बन्धविषया न वेति।

अथ जातिगुणक्रियातद्वन्तौ मिथः सम्बद्धावनुभूयेते। न हि असंबद्धस्वरूपद्वये विशिष्टधीव्यपदेशाविति चेत्, न। संबद्धानुभवेन हि संबन्धो न विशेषणम् भासते, तस्य

प्रथममज्ञानात्, संयोगिनाविमावितिवत् समवायिनावित्यननुभवाच्च। नापि विशेष्यः, अनयोः समवाय इत्यननुभवात्। नापि स्वरूपेण भासते। समवायं जानामीति विषयताननुभवात्।

ननु नीलो घट इत्याद्यनुभवो विशेषणविशेष्यसम्बन्धविषय: विशिष्टप्रतीतित्वात् दण्डिज्ञानवदिति चेत्, न। अघटं भूतलं ज्ञातमिष्टं कृतं चेत्यत्र व्यभिचारात्। संबन्धविषयत्वे बाधकं विनेति विशेषणमिति चेत्, न। बाधकाभावस्यैव समर्थत्वे शेषवैयर्थ्यात् साधकाभावेन सत्प्रतिपक्षाच्च। बाधकाभावस्य साधकत्ववत् साधकाभावस्य बाधकत्वात्। तस्मादुभयाभावे संशयः स्यात्।

न च प्रतीतिरेव समवायसाधिका, तस्यास्तद्विषयत्वासिद्धे:। अन्यथा अन्योन्याश्रयात्।

अथाघटं भूतलं ज्ञातमित्याद्यपि विशिष्टधीः संबन्धविषया, किं तु भ्रान्ता, बाधकसत्त्वादिति चेत्, तर्हि भूतलेऽघटत्वस्य ज्ञातत्वादेश्चाभावः स्यात्। तथा च व्यवहारविलोपः। संबन्धश्च न संयोगः समवायो वान्यतरो वा बाधादसिद्धेर्वा। नापि संबन्धमात्रम्, ज्ञापकत्वादिना सिद्धसाधनात्।

नाप्यविशिष्टव्यावृत्तविशिष्टज्ञाननियामकः। अभावज्ञानादाविव स्वरूपसंबन्धेनार्थान्तरत्वात्। न च संबन्धिभिन्नत्वं साध्ये विशेषणम्। अभावज्ञानादिना व्यभिचारात्। बाधकाभावस्य च विशेषणत्वं हेतौ निरस्तमेव। विनापि भिन्नसंबन्धं अभावज्ञानादाविव विशिष्टधीसंभवेनाप्रयोजकत्वाच्च। विशेषणताविशेषरूपः प्रकारादिकृतो वा विशेषः संबन्धाविषयत्वेऽपि तुल्यः।

स्यादेतत्। अवयवगुणक्रियाजातितद्वतां इह तन्तुषु पटः, इह पटे शौक्ल्यं, इह चलनं पटत्वं चेति इहप्रत्ययः आधाराधेयसंबन्धनिमित्तकः यथार्थेहप्रत्ययत्वात् इह कुण्डे बदरमिति प्रत्ययवदिति चेत्, न। इह भूतले घटाभावो ज्ञानं चेत्यादौ व्यभिचारात् , बाधकं विनेत्यस्य निरस्तत्वात्, तथैवाधाराधेयभावादेवोपपत्तेश्च। उत्पत्तये स्थितये ज्ञप्तये चापेक्षणीयस्य आधारत्वात्।

**अन्ये तु** - शब्दजातिरूपादिरिन्द्रियसंबद्धः प्रत्यक्षत्वात् घटवदित्यनुमानात् संयोगबाधे इन्द्रियसंबन्धघटकतया समवायसिद्धिः, इन्द्रियस्य संबद्धग्राहकत्वात्। अत एव समावायो न प्रत्यक्षः इन्द्रियेणासंबन्धात्। न च संबन्धत्वेन तत्सिद्धिः। अनवस्थानात्, स्वभावादेव ज्ञानवत् स्वसंबद्धव्यवहारकारित्वाच्च। समवायो हि संबन्धं विनैव स्वभावादेव कस्यचित्। न च जात्यादेरपि स्वभावादेव स्वसंबद्धव्यवहारकारित्वे समवायविलोपः। जात्यादेः इन्द्रियासंबन्धे समवायवदप्रत्यक्षत्वापातादिति।

**तन्न**। समवायस्वीकारेऽपि स्वरूपसंबन्धस्यावश्यकत्वात्। घटज्ञानयोः भूतलाभावयोरिव वा द्रव्येण गुणजात्यादिभिः स्वरूपमेव संबन्धोऽस्तु। तथा च शब्दस्येन्द्रिय-विशेषणतया, शब्दत्वस्य विशेषणविशेषणतया, रूपादिजात्यादेरिन्द्रियसंबद्धविशेषणतया, रूपत्वादेरिन्द्रियसंबद्धविशेषणविशेषणतया स्वभावसंबन्धरूपया ग्रहणसंभवे किं समवायेन। द्रव्ये स्वभावसंबन्धात् नेन्द्रियेण ग्रहणमिति कथं गुणादेस्तेन ग्रह इति चेत्, समवायेनापि न द्रव्यग्रहणमिति तुल्यम्।

**अपरे तु** - एकत्र घटे आमपाकदशायां क्रमेण श्यामरक्तरूपोपलम्भोऽस्ति। स च न तदुभयनिबन्धनः, रूपस्य नित्यत्वेनैकदोपलम्भापत्तेः। नित्यत्वादेव च न तयोरुत्पादविनाशौ। तस्मात्तयोः संबन्धस्य तौ स्याताम्, स एव समवाय इति।

**तन्न। "श्यामं नष्टम्", "रक्तमुत्पन्नम्",** इत्याद्यबाधितानुभवात् समवायस्योत्पाद-विनाशानुल्लेखाच्च। त्वन्मते तस्यातीन्द्रियत्वात्। अन्यथा अवयविज्ञानगन्धरसादेरपि नित्यत्वं समवायस्योत्पादविनाशाविति किं न रोचयेत्। न ह्युत्पादविनाशप्रतीतिरप्रामाणिकी बाधकं विनेति।

उच्यते। गुणक्रियाजातिविशिष्टबुद्धयो विशेषणसंबन्धविषयाः विशिष्टबुद्धित्वात्, दण्डीति बुद्धिवत्। न च व्यभिचारः। अभावादिविशिष्टबुद्धेरपि स्वरूपसंबन्धविषयत्वात्। न चैवमत्रापि तेनैवार्थान्तरम्, यतो गुणक्रियाजातिविशिष्टबुद्धीनां पक्षधर्मताबलेन विषयः

संबन्धः सिध्यन् लाघवादेक एव सिध्यति। स एव समवायः, न तु स्वरूपसंबन्धः, तत्तत्स्वरूपाणामनन्ततत्वात् संबन्धत्वेनाक्लृप्तत्वाच्च।

अथवा विशेषणसंबन्धनिमित्तिका इति साध्यम्। हेतौ तु सत्यत्वं विशेषणम्। विशेषणसंबन्धश्च कारणत्वेनैक एव सिध्यति। लाघवात्, अनुगतकार्यस्य अनुगतकारण-नियम्यत्वाच्च। न तु स्वरूपसंबन्धः, तेषामननुगतत्वादनन्तत्वाच्च। न चोभयमप्य-प्रयोजकम्। विशिष्टसाक्षात्कारस्य संबन्धाविषयत्वे तदजन्यत्वे वा गवाश्वादावपि विशिष्टबुद्धिप्रसङ्गात् ।

**नव्यास्तु** - गुणक्रियाजातिविशिष्टबुद्धिः संबन्धिभिन्नविशेषणसंबन्धविषया निर्विषयकभावविशेषणकविशिष्टबुद्धित्वात् इतरनिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वाद्वा। अतोऽभावादिविशिष्टबुद्धौ न व्यभिचारः। न चाप्रयोजकम्, निरुपाधिसंबन्धशालित्वात्। संबन्धश्चाविशिष्टव्यावृत्तविशिष्टधीनियामकः।

यद्वा इन्द्रियप्रत्यासत्तित्वेन समवायसिद्धिः। तथा हि गुणक्रियाजातिसाक्षात्कारः इन्द्रियसंबन्धसाध्यः जन्यप्रत्यक्षत्वात् दण्डिज्ञानवदित्यतः साक्षात्संबन्धबाधकारणत्वेन इन्द्रियसंयुक्ते संबन्धः सिध्यन् पक्षधर्मताबलाल्लाघवेनानुगतः समवाय एक एव सिध्यति, अनुगतकार्यस्यानुगतकारणजन्यत्वात्। न तु संयुक्तविशेषणतारूपस्वरूपसंबन्धः, तस्य च तत्तद्रूपादिरूपत्वेनाननुगतत्वात्।

एवं रूपत्वरसत्वसाक्षात्कारेऽपि कारणत्वेनेन्द्रियसंबन्धः समवाय एवानुगतः सिध्यति लाघवात्। न तु इन्द्रियसंबद्धविशेषणता, तस्या रूपत्वादिस्वरूपत्वेनाननुगतत्वात्

अत एव संयोगो विशेषणता च प्रत्यासत्तिरस्तु , न तु समवायादिचतुष्टयमिति निरस्तम्। तस्यास्तत्तत्स्वरूपत्वेनाननुगतत्वात्। प्रत्यासत्तित्वेनाभ्युपगते च समवाये प्रत्यक्षता संबन्धिद्वयप्रत्यक्षत्वात्।

नन्वेवमभावविशिष्टप्रत्यक्षेऽपि विशिष्टबुद्धित्वात् संयोगसमवायबाधेऽनुगतं वैशिष्ट्यं संबन्धो विषयः निमित्तं च भवेदिति चेत् ,

न। तस्य हि समवायवदेकत्वे घटाभाववति पटवति पटाभावधीप्रसङ्गः। घटाभाववैशिष्ट्यमेव हि पटाभाववैशिष्ट्यम्। पटाभावैशिष्ट्यसत्त्वेऽपि पटाभावो नास्ति, ततः तस्य भिन्नत्वादिति चेत्, न। पटाभावाभावस्याभावत्वे सोऽपि वैशिष्ट्येन सम्बन्धेन तत्रास्ति, वैशिष्ट्यस्यैकत्वात्। वैशिष्टचस्यैकत्वात्। पटाभावाभावस्य भावत्वे च पट एव प्रतिबन्धको वाच्यः। एवं पटाभावः पटाभावधीहेतुः स्यात्। (पटाभावस्य) (पटाभावश्च) वैशिष्ट्येन संबन्धेन तत्रास्त्येव।

वैशिष्ट्यस्य प्रत्यभावव्यक्ति नानात्वे चाभावविशिष्टबुद्धौ नैकः संबन्धः कारणं विषयो वेति तदभावप्रत्यक्षेऽननुगतमेव वैशिष्ट्यं विषयः कारणं च वाच्यम्। तथा चाननुगततत्तत्स्वरूपरूपा विशेषणतैवास्तु क्लृप्तत्वात्, किमनन्तवैशिष्ट्येन। समवायस्य वैशिष्ट्यस्य च प्रत्यक्षत्वे त्वयापीन्द्रियसंबद्धविशेषणतास्वीकारात्।

ननु समवायस्यैकत्वे कथं रूपिनीरूपव्यवस्था। घटेन सह रूपसंबन्धरूपत्वं समवायस्य न वायुनेति चेत्, न। रूपसंबन्धरूपत्वहि समवायस्य स्वरूपमेव यदि, तदा रससंबन्धरूपत्वं न स्यात् तयोर्विरोधात्, अन्यच्च दुर्वचमिति चेत्,

उच्यते। वायौ रूपसमवायसत्त्वेऽपि रूपात्यन्ताभावोऽस्ति न घटे। कथमेवम्, अधिकरणस्वभावात् अबाधितरूपिनीरूपप्रतीतेश्च।

नन्वेवं ज्ञातो घट इति प्रतीतेः ज्ञाततापि स्यात्, वर्तमाने बाधकाभावात्। अतीतानागतयोश्च तद्धीः भ्रान्तेति चेत्, न। अतीतानागतयोः ज्ञातताया अभावे व्यवहाराभावापत्तेः, तस्य ज्ञाततासाध्यत्वात्। न च ज्ञातताज्ञानमेव व्यवहारहेतुः। गौरवात्। अतीतादौ ज्ञानतद्विषयावेव ज्ञातताधीगोचराविति चेत्, तर्हि वर्तमाने तावेव तद्विषयौ। न ह्यतीतवर्तमानयोः ज्ञातताप्रतीत्योः विषयवैलक्षण्यमीक्षामहे।

ननु रूपघटयोर्न समवायः किं तु अभेदः। दण्डी पुरुष इत्यत्र दण्डिपुरुषयोरिव नीलो घट इत्यत्रापि नीलघटयोरबाधिताभेदानुभवात्। नीलो घटः, दण्डी पुरुष इति बुद्ध्योः

विशेषणसम्बन्धमात्रगोचरत्वे नीलो घट इतिवत् दण्डः पुरुषः, दण्डी पुरुष इतिवत् नीली घट इत्यपि स्यात्। तस्मादेकत्राभेदो विषयः अपरत्र विशेषणसंबन्धः, विषयेणैव धियां विशेषात्।

अथवा विशेषणताविशेष्यतावच्छेदकयोर्नीलत्वघटत्वयोः एकवृत्तित्वं ज्ञायते दण्डित्वपुरुषत्वयोरिव पुरुषे। एवं नीलघटपदयोः शाब्दमपि सामानाधिकरण्यं युज्यते। नीलत्वघटत्वाभ्यां भिन्नप्रवृत्तिनिमित्ताभ्यां तयोरेकप्रवृत्तेः। न च मतुपो लोपात् अभेदोपचाराद्वा नीलपदं नीलवत्परमिति वाच्यम्। न हि प्रयोगं साधकं ब्रूमः, किंतु नीलघटयोरभेदप्रतीतिम्। पदेऽपि नोपचारादिकल्पना, गौरवात् मुख्ये बाधकाभावाच्चेति।

उच्यते। शुक्लपटशब्दयोः एकार्थत्वे घटः कुम्भ इतिवत् शुक्लः पट इति सहप्रयोगो न स्यात्। अन्धस्य पटग्रहवत् रूपग्रहः , रूपाग्रहवत् पटाग्रहोऽपि वा स्यात्। महारजतरक्ते पटग्रहवत् शुक्लग्रहः, शुक्लाग्रहवत् पटाग्रहोऽपि भवेत्। पटमानयेत्युक्ते यं कंचित् शुक्लमानयेत्। अपटः पट इतिवत् अशुक्लः पट इति विरुध्येत, पटशुक्लयोरभेदात्। अग्निसंयोगादेकत्र शूयामरक्तयोः विनाशोत्पादे घटस्य तौ स्याताम्, घटसत्त्वे वा तयोरपि न स्याताम्।

अथ शुक्लत्वादीनां द्रव्यभेदात् तद्बोधार्थं सह प्रयोगः। अन्धादिना शुक्लादिग्रहे शुक्लत्वादीनामग्रह उपपद्यते। शुक्लत्वादिजातेश्च द्रव्येणाभेदो न समवायः, किंतु स्वरूपसंबन्ध इति चेत्, न। शुक्लत्वमधुरत्वसुरभित्वोष्णत्वादीनां द्रव्यवृत्तित्वे द्रव्यग्राहकत्वगादिभिः ग्रहणप्रसङ्गात्। रूपत्वादीनां द्रव्यवृत्तित्वे प्रतिनियतेन्द्रियग्राह्यतैव न स्यात् , योग्यवृत्तित्वेन जातेग्रहणयोग्यत्वात्। तत्तज्जातित्वेन योग्यत्वेऽननुगमात्। तस्मात् रूपत्वादीनां प्रतिनियतेन्द्रियग्राह्यतापि गुणगुणिभेदे मानम्। अभेदे च कथं पटस्य शुक्लं रूपमिति भेदबुद्धिः। पटो नीलिमेति बुद्धिप्रसङ्गश्च ।

नन्वेकान्ताभेदे सर्वमिदं दूषणम्। वयं तु भेदाभेदवादिनः। तथा च भेदमादायापौनरुक्त्यादि। भेदाभेदे च उक्तमेव प्रमाणं प्रत्यक्षम्। अथ वा उभयसिद्धभेदे सामानाधिकरण्यधीरभेदे प्रमाणम्। यद्वा अत्यन्तमभेदे भेदे च न सामानाधिकरण्यमिति तत

एव भेदाभेदसिद्धिः। न च भेदाभेदयो: परस्परविरहरूपतया विरुद्धयो: कथमेकत्र समावेश इति वाच्यम्। संयोगतदभावयोरिवाविरोधात्। पाकानन्तरं रक्तोऽयं न श्याम इत्यबाधितानुभवबलात् तत्रैव तदन्योन्याभावसिद्धे: त्वयापि भेदाभेदस्वीकारात्। अन्योन्याभावत्वमव्याप्यवृत्ति नित्याभाववद्वृत्त्यभावत्वसाक्षाद्व्याप्यधर्मत्वात् अत्यन्ताभावत्ववत्। नित्येति वा न विशेषणम् अव्याप्यवृत्तिप्रतियोगिकप्रागभावप्रध्वंसयोरव्याप्यवृत्तित्वात् इत्यतोऽपि भेदाभेदसिद्धि: ।

उच्यते। तस्यैव तत्राभावोऽवच्छेदभेदेन वर्तते ज्ञायते च यथा संयोगाद्यभावः। श्यामावच्छिन्नस्य तस्यैवान्योन्याभावस्तत्रैव रक्तावच्छिन्ने। तदन्योन्याभावाभावश्च श्यामावच्छेदेन। तदिहापि नीलस्यान्योन्याभावो घटत्वावच्छेदेनेति नीलात् घटस्य भेदोऽस्तु। अभेदस्तु नीलान्योन्याभावाभावरूपो न घटे घटत्वावच्छेदेनैव, विरोधात्। एकावच्छेदेन भावाभावयो: एकत्रावृत्तेरज्ञानाच्च। नाप्यवच्छेदकान्तरेण। घटत्वावच्छिन्ने घटे तदभावात् तदज्ञानेऽपि नीलो घट इत्यनुभवाच्च। न चान्योन्याभावरूपो भेदोऽस्तु, अभेदस्तु न भेदाभावः किं त्वन्य एवेति वाच्यम्। अभेदव्यवहारे तस्याहेतुत्वात्। तस्मात् नीलो घट इत्यत्र नीलसंबन्ध एव भासते। तथा सति नीली घट इति धीः स्यादित्युक्तमिति चेत् , नीली घट इत्यत्र बुद्धौ यदि संबन्धविषयत्वमापाद्यते, तदिष्यत एव। मतुपो लोपात् अभेदोपचाराद्वा नीलपदमेव नीलवत्परमिति।

ननु शब्दरूपादिषु विशेषणता इन्द्रियसंबद्धविशेषणता वा ग्राहिकास्तु किं समवायादिना। अथ विशेषणतायां समवायः इन्द्रियसंबद्धविशेषणतायां च संयुक्तसमवायादिरुपजीव्यः, तैर्विना तयोरभावादिति चेत्, विशेषणतास्वरूपे तेषामुपजीव्यत्वम् न तु तस्याः प्रत्यासत्तित्वेऽपि। तैर्विनापि समवायाभावयोर्विशेषणतासत्त्वात्।

संयुक्तसमवायादिरपि तत्रास्तीति चेत्, आस्ताम्, न तु प्रत्यासत्तिः, किं तु विशेषणतैव, क्लृप्तत्वात्। संयुक्तसमवायादिकं विना विशेषणता रूपादौ न ज्ञायते चेत्, मा ज्ञायि। न हि सा प्रत्याज्ञातासत्तिर्ज्ञाता, अपि तु स्वरूपसती।

मैवम्। शब्दादीनां साक्षात्कारविषयत्वेन इन्द्रियसंबन्धानुमितौ शब्दादौ समवायादिकं ज्ञात्वैव विशेषणताग्रह इत्यवश्यं प्रथमोपस्थिततत्वात् समवायादिरेव विषयो न विशेषणता चरमोपस्थिततत्वात्।

ननु अभावग्रहे नेन्द्रियसंबद्धविशेषणता प्रत्यासत्तिः, चक्षुषा संयुक्ते परमाण्वादौ योग्यस्य जलत्वादेरभावग्रहप्रसङ्गात्। किं तु स्वग्राह्यसंबद्धविशेषणता। महति वायौ उद्भूतरूपाभावस्य, कुसुमे सौरभाभावस्य, गुडे तिक्तत्वाभावस्य वा न चक्षुरादिना ग्रहः, अपि तु योग्यानुपलब्ध्या सोऽनुमीयते। इन्द्रियविशेषणतापि न प्रत्यासत्तिः। चक्षुरादिना स्वविशेषणजलत्वाद्यभावग्रहप्रसङ्गात्। यदि शब्दाभावः प्रत्यक्षः तदा प्रत्यासत्त्यन्तरं कल्प्यम्। तदभावे प्रत्यक्ष एव न भवतीति चेत् ,

मैवम्। लाघवादिन्द्रियसंबद्धविशेषणतैव प्रत्यासत्तिः। न चैवं परमाणौ जलत्वाद्यभावग्रहप्रसङ्गः। यत्र हि यत्सत्त्वमनुपलब्धिविरोधि तत्र तस्याभाव इन्द्रियसंनिकर्षेण गृह्यते। न च परमाण्वादौ जलत्वादिसत्त्वमनुपलब्धिविरोधि। योग्यसंयुक्तसमवायाभावेन पृथिवीत्ववदनुपब्धिसंभवात्। महति वाय्वादौ उद्भूतरूपाद्यभावश्चक्षुरादिग्राह्य एव। तत्रोद्भूतरूपादिसत्त्वेऽनुपलब्ध्यनुपपत्तेः। अत एव स्तम्भे पिशाचतादात्म्याभावः प्रत्यक्षः, स्तम्भतादात्म्ये च तस्य स्तम्भस्येवानुपलम्भासंभवात्। एवं शब्दस्याप्यभावः प्रत्यक्षः तदा तत्र शब्दसत्त्वस्य अनुपलब्धिविरोधित्वादिति तत्रेन्द्रियविशेषणतैव प्रत्यासत्तिः। चक्षुषि जलत्वादिसत्त्वं च नानुपलब्धिविरोधीति चक्षुषा न तद्ग्रहः।

नन्वभावे न विशेषणता प्रत्यासत्तिः। किं तु समवाय एव समवायसाधकविशिष्टप्रतीतेरविशेषात्। न च समवेतत्वे तस्य भावत्वापत्तिः। भावस्य तत्त्वेऽभावत्वापत्तिरिति वैपरीत्यसंभवात्। रूपादौ प्रत्यासत्तित्वेन समवायकल्पनमभावेऽपि तुल्यम्। विशेषणतापि तुल्या। प्रागभावप्रध्वंसौ प्रतियोग्याश्रये समवेतौ। प्रतियोग्याश्रयनाशजन्यध्वंसो देशे समये वा समवैति, तत्रैव निरूपणात्। न च समवायिनाशे

ध्वंसनाशः, घटोन्मज्जनप्रसङ्गात् भावत्वस्योपाधित्वाच्च। अन्यथा तवापि तस्य जन्यत्वेन नाशापत्तिः।

अथैवमन्योन्यात्यन्ताभावयोर्नित्यत्वेऽनेकसमवेतत्वे च जातित्वप्रसङ्ग:। न च तत्र भावत्वं तन्त्रम्। गौरवात्। न चाभावानां विशिष्टप्रतीतौ विशेषः, येनात्र समवायपरित्याग इति चेत्, न। घटत्वाभावादेर्जातित्वे सत्त्वद्रव्यत्वपृथिवीत्वादिना परापरभावानुपपत्तेः। तेषां व्याप्यत्वे घटे तदभावप्रसङ्ग:। व्यापकत्वे सामान्यादौ घटत्वाभावो न स्यादिति।

उच्यते। समवेतत्वे ध्वंसस्य समवायिकारणनाशात् नाशः स्यात्। न च नाश्यत्वे भावत्वं तन्त्रम्, गौरवात् प्रागभावेऽभावाच्च। असमवेतत्वे तद्ध्वंसस्य जन्यत्वेऽपि न नाशः आश्रयनाशादेरभावात्। घटोन्मज्जनापत्तेः न नश्यतीति चेत्, न। न हि प्रयोजनक्षतिभयेन सामग्री न कार्यमर्जयति। तस्मादुन्मज्जनाभावनिर्वाहकध्वंसस्यासमवेतत्वं कल्प्यताम्। (स्व) (स्वस्व) समवायिनाशात् ध्वंसपरंपराकल्पने च घटकपालादेः आपरमाणु नाशे घटादितद्ध्वंसविराधी चरमो ध्वंसः परमाणुवृत्तिः स्यात्। तथा च न प्रत्यक्षः। घटध्वंसस्य कपालसमवेतत्वे च न भूतले निरूपणं स्यात्। उभयवृत्तित्वे च व्यासज्यवृत्तित्वेन कपालं विना न निरूप्येत।

**।।इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे समवायवादः।।**

## अथानुपलब्धिवाद:

नन्वभावग्रहो नेन्द्रियात्। किं तु योग्यानुपलब्धेः, तदुपलम्भे तदभावाग्रहात्। न चैवं भावबुद्धिरपि अभावानुपलब्धेरेव नेन्द्रियादिति वाच्यम्। भावग्रहे इन्द्रियानुविधानात्। अन्यथा निमीलिताक्षस्यापि घटाभावानुपलब्ध्या घटग्रहप्रसङ्गः। अत एव भावग्रहे अभावानुपलब्धिः पृष्ठलग्नापि न हेतुः इन्द्रियेणान्यथासिद्धत्वात्। न हीन्द्रियार्थसंनिकर्षे सति तां विना भावधीविलम्बः। अभावग्रहेऽपीन्द्रियं हेतुः तदनुविधानादिति चेत्, न। अभावेन चक्षुरादेः प्राप्त्यभावेन आश्रयग्रहे तदुपक्षयात्।

अथाधिकरणधीरिन्द्रियव्यापारः न च तया तदन्यथासिद्धम्। अन्यथा संनिकर्षोपक्षीणतया इन्द्रियं न हेतुः स्यादिति चेत्, न। हेतुत्वे सिद्धे तद्व्यापारत्वम्। तदेव नास्ति, प्राप्त्यभावात्।

एतेन अधिकरणग्रहेन्द्रिययोः पृथगन्वयव्यतिरेकग्रहात् दण्डचक्रयोरिव हेतुत्वं द्वयोरिति निरस्तम्। प्राप्त्यभावेनाभावाग्राहकत्वात्। न चेन्द्रियं प्राप्तविशेषणमप्राप्तमपि गृह्णाति। संयुक्तसमवायाद्युच्छेदप्रसङ्गात्, प्राप्तचैत्रगताप्राप्तदण्डस्यापि ग्रहप्रसङ्गात् इन्द्रियस्य प्राप्तग्राहकत्वाच्च। न च विशेषणता प्राप्तिः, अन्यत्र तदकल्पनात्। न च समवाये तत्कल्पनम्। तस्यानभ्युपगमात् तत एवातीन्द्रियत्वाद्वा।

अथाभावस्य इन्द्रियग्राह्यत्वेन संयोगादिबाधे इहैव सा कल्प्यते, रूपादौ तद्बाधे संयुक्तसमवायादिरिवेति चेत्,

तत्रानुपक्षीणेन्द्रियानुविधानात् तथैव। इह स्वाश्रयग्रह एव तदुपक्षीणं लाघवात्, न तु प्राप्त्यन्तरकल्पना, गौरवात्। अन्यथा त्वगनुविधानाद्रूपं विनापि वायुधीः प्रत्यक्षेति न सा स्पर्शलिङ्गग्रहे उपक्षीयेत। किं च विशेषणतायां इन्द्रियग्राह्यत्वं तेन सेत्यन्योन्याश्रयत्वम्। अपि च विशेषणता ग्राह्यस्वरूपमेव। न च त्वगादौ स्वरूपसंबन्धो हेतुः, किं तु यथायथं संयोगसमावायौ। न च तयोरन्योन्यव्यभिचारात् इन्द्रियं संबद्धं गृह्णातीत्येव व्याप्तिरिति वाच्यम्। दृष्टान्ते हि संबन्धिगतः संबन्धो हेतुः गृहीतः। चक्षुषि अन्यत्रापि तथा, न तु ग्राह्यस्वरूपम्। संबन्धस्य संबन्धिभिन्नत्वनियमात्। न हि स एव तद्वांस्तेनैव भवति। स्वरूपसंबन्धस्य हेतुत्वे च रूपादिग्रहोऽपि तत एवास्तु किं समवायादिना। अतः संयोगविशेषणते एव प्रत्यासत्ती इति षोढा कीर्तनमपि विफलम्।

एतेनालोकापेक्षणे चक्षुरपेक्षा तस्य तदेकसहकारित्वादिति निरस्तम्। प्राप्तिं विना चक्षुषोऽहेतुत्वात् आलोकस्य च प्रतियोगिग्राहकत्वेन योग्यताघटकतया अभावग्राहकत्वात्। न चैवं प्रतियोग्युपलम्भकत्वेन चक्षुरपि हेतुः। एवं हि तत्तद्व्याप्येतरतदुलम्भकसाकल्ये अनुपलब्धिःग्राहिका भवतीति वाच्यम्। प्राप्तिं विना तस्याहेतुत्वेनाश्रयग्रहोपक्षयात्।

नन्वेवमन्धस्य त्वगिन्द्रियोपनीते नीले स्मृतपीतस्यानुपलब्ध्या अभावग्रहप्रसङ्गः। प्रतियोगिग्राहकेन्द्रियग्राह्यत्वे त्वभावस्य नायं दोषः, अन्धस्य चक्षुरभावादिति चेत्, न। अभावग्राहकत्वेनाभिमतमिन्द्रियमाश्रयग्रहोपक्षीणम्। तथा च प्रतियोगिग्राहकेन्द्रियेण आश्रयग्रहे अनुपलब्ध्या अभावग्रहात्। अन्यथा चक्षुस्संयुक्ते परमाणौ जलत्वाभावग्रहप्रसङ्गः।

अथैवं वायौ रूपाभावो, जले तिक्ताभावः, पाषाणे सौरभाभावश्च न गृह्येत। वाय्वादीनां प्रतियोगिग्राहकैश्चक्षुरादिभिरग्रहात्। न च तवापि तेऽभावाः कथं प्रत्यक्षाः, वाय्वादीनां तदिन्द्रियायोग्यत्वादिति वाच्यम्। लिङ्गेन त्वगादिना वा उपनीते वाय्वादौ योग्यरूपाद्यभावविशेष्यकं प्रत्यक्षं चक्षुरादिनैव न वाय्वादिविशेष्यकम्, प्रत्यक्षे योग्यविशेष्यस्य हेतुत्वादिति चेत्, न। वाय्वादौ रूपाद्यभावप्रतीतीनामनुपलब्धिलिङ्गकत्वात्। तव नीरूपो वायुरिति वायुविशेष्याभावप्रतीतिवत्।

अथ भूतले अभावधीरिन्द्रियजन्या साक्षात्कारित्वात्, तत एव विशेषणताकल्पनमपि। न च साक्षात्कारित्वमसिद्धम्। परोक्षत्वे अज्ञातकरणकत्वानुपपत्तेः। तथा हि-मन्दिरोदरे चैत्रो निपुणमनुसृतोऽपि न चोपलब्ध इत्याप्तवाक्यावगतानुपलब्ध्या श्रोतानुमिनोति नासीत्तत्र चैत्र इति। एवमभावधीः परोक्षा चेत्, तदा नाज्ञातकरणिका परोक्षत्वाजातेः ज्ञातकरणप्रयोज्यत्वात्। ज्ञातकरणत्वं च ज्ञानकरणत्वम् लिङ्गादेरजनकत्वात्। तस्मात् साक्षात्कारित्वम् अज्ञातकरणत्वात्। न चेन्द्रियजन्यत्वमुपाधिः , तत एव तत्साधनादिति चेत्,।

मैवम्। परोक्षत्वं हि न जातिः, अनुभवत्वेन संकरप्रसङ्गात्। किं तु साक्षात्कारिभिन्नज्ञानत्वम्। एवं चाभावज्ञानं परोक्षमेव स्मृतिवत् । यथा च ज्ञातकरणत्वेऽपि शाब्दादिः नानुमितिः, एवमज्ञातकरणत्वेऽपि इन्द्रियजन्यं साक्षात्कार्यनुपलब्धिजन्यम् , तद्विजातीयमनुपलब्धम्। यदि चाज्ञातकरणत्वेन साक्षात्कारित्वं तदा ज्ञातकरणत्वेन शाब्दादेरनुमितित्वापत्तिः। ज्ञातकरणत्वेऽपि लिङ्गादिकरणभेदात् अनुमित्यादिफलभेद इति चेत्, अज्ञातानुपलब्धीन्द्रियकरणभेदात् फलभेद इहापि। एवं च साक्षात्कारित्वे इन्द्रियजन्यत्वं परोक्षत्वे च तदजन्यत्वं प्रयोजकम्, न तु ज्ञाताज्ञातकरणजन्यत्वम्, गौरवात् स्मृतावभावाच्च।

नन्वनुपलब्धिर्न मानम् भावभूतमानसहकृतस्यैव मनसो बाह्यानुभवजनकत्वादिति चेत्, न। भावत्वस्य गुरुत्वेनाप्रयोजकत्वात्। अन्यथा इन्द्रियसहकृतस्यैव मनसो बाह्यानुभवजनकत्वमित्यनुमानादि न मानं स्यात्। न चेदमभावज्ञानं भावमानसहकृतमनस्साध्यं बाह्याभावज्ञानत्वात् लिङ्गादिजन्याभावज्ञानवदिति वाच्यम्। अयमभावो नेन्द्रियग्राह्यः अभावत्वादयोग्याभाववत्, इयमभावबुद्धिर्नेन्द्रियजन्या अभावबुद्धित्वात् लिङ्गादिजन्याभावबुद्धिवत् इति सत्प्रतिपक्षात्।

अथ प्रतियोगिग्राहकं मानं तदभावमपि गृह्णाति यथा अनुमानादि, प्रतियोगिग्राहकं चेन्द्रियम्, अतोऽभावग्राहकमिति चेत्, न। भावग्राहकयोरेव लिङ्गशब्दयोस्तदभावा रग्राहकत्वात्। प्रतियोगिग्राहकजातीयं मानं तथेति चेत्, न। उपमाने व्यभिचारात्। न च चक्षुष्ट्वादिकमभावग्राहकवृत्ति जातित्वात्, उपमानत्वं च न जातिरिति वाच्यम्। प्राप्तिं विना चक्षुरादेरभावग्राहकत्वसाधनात्।

अथ भाववृत्त्यभावभ्रमः स च करणदोषात्। न च प्रतियोगिस्मृत्याश्रयग्रहानुपलब्धयः स्वरूपतो दुष्टाः, किं तु इन्द्रियं पित्तादिना दुष्टमिति तदेव च भ्रमहेतुरित्यभावप्रमायामपि तदेव मानमिति चेत्, न। इन्द्रियस्यापि दुष्टत्वं दोषसाहित्यमात्रम्, न त्वन्यत्। तच्चानुपलब्धावपि तुल्यम्। न च ज्ञातकरणाजन्यभ्रमत्वेन इन्द्रियजन्यत्वम्। एवं हि अभावप्रमाकरणत्वमपीन्द्रियस्य तत एवास्तु, किमनया कुसृष्ट्या। एवमस्त्विति चेत्, न। प्राप्त्यभावेनोक्तोत्तरत्वात्। किं चासंनिकृष्टेऽपि दोषादुपनीतेऽभावे भ्रम इन्द्रियेण संभवति, चक्षुषा पाषाणः सुरभिरिति भ्रमवत्। अभावप्रमा न संभवति प्राप्त्यभावादित्युक्तम्।

ननु अधिकरणाभावयोर्विशिष्टबुद्धिरस्ति। सा नेन्द्रियजन्या अभावबुद्धित्वात्, नानुपलब्धिजन्या भावबुद्धित्वात्, नोभयजन्या जातिसंकरप्रसङ्गात्। अत उभयग्राहकमिन्द्रियमभ्युपेयमिति चेत्, अभाववद्भूतलमित्यनुपलब्ध्युपनीताभावविशिष्ट-बुद्धिरिन्द्रियेणैव चक्षुषा चन्दनं सुरभीतिवत्। भूतले घटो नास्तीति च चक्षुरुपनीतभूतलेऽभावबुद्धिरनुपलब्ध्यैव, घ्राणेन चन्दने सौरभमितिवत्।

**यत्तु** व्यापाराभावान्नानुपलब्धिः प्रमाणम्, व्यापारवत एव करणत्वादिति। तन्न। क्रियया अयोगव्यवच्छेदेन संबन्धिकरणं न तु व्यापारवदित्यपि विशेषणं गौरवादिति।

अत्रोच्यते। प्रतियोगिग्राहकेन्द्रियेणाश्रयग्रहो न हेतुः, प्राङ्नास्तिताग्रहे तु (अन्वयेन) (त्वन्नयेन) व्यभिचारात्। वाय्वादौ च रूपाद्यभावधीरिन्द्रियजन्यैव नानुपलब्धिलिङ्गजन्या, अनुपलब्धेरज्ञानात्। आप्तवाक्यस्येव तज्ज्ञापकस्याभावात्। अथाज्ञातैव रूपाद्युपलम्भस्यानुपलब्धी रूपाद्यनुपलॉब्ध गृह्णाति भूतले घटाभावमिवेति चेत्, त्वन्मते उपलम्भस्यातीन्द्रियत्वेन योग्यानुपलब्ध्या उपलम्भाभावस्य ग्रहीतुमशक्यत्वात्। अनुपलब्धिमात्रस्याभावाग्राहकत्वात्। अस्तु तर्हि ज्ञानं योग्यमिति चेत्, न। अपसिद्धान्तात्। योग्यत्वेऽपि भूतलीयघटाभावेऽपि ज्ञातैव योग्यानुपलब्धिर्लिङ्गमस्तु, योग्यघटोपलम्भस्यानुपलब्ध्या ग्रहसंभवात् कृतमनुपलब्ध्या मानान्तरेण।

घटाभावधीरज्ञातकरणिका लिङ्गाद्यनुसंन्धानं विना जायमानत्वादिति चेत्, न। वाय्वादौ रूपाद्यभावप्रतीतिरपि तथा। अथ रूपादिमत्तया ज्ञातत्वाभावः तदनुमितरूपवत्तानुपलब्धिर्वा लिङ्गमिति चेत्, न। वाय्वादौ ज्ञातत्वाभावस्यापि रूपाद्यभावतुल्यतया ग्रहीतुमशक्यत्वात्। वाय्वादौ तस्य प्रत्यक्षत्वे रूपाद्यभावोऽपि तथास्तु। नापि कायवाग्व्यवहाराभावेनानुपलब्धिरनमीयते। उपेक्षाज्ञानमूकस्वप्नयोर्दर्शनेन व्यभिचारात्। न च व्यवहाराभावमात्रं लिङ्गम्। कस्यचित् व्यवहाराभावस्य व्यभिचारात्, सर्वव्यवहाराभावस्य ग्रहीतुमशक्यत्वात्।

किं च घटवत्तया ज्ञातत्वाभावेन तदनुमितानुपलब्ध्या वा लिङ्गेन भूतलादौ अभावानुमितिरस्तु, किं मानान्तरेणानुपलब्ध्या। अपि च प्रतियोगिग्राहकेन्द्रियजन्यमधिकरण-ज्ञानं अनुपलब्धिसहकारि तदा स्यात् यदि तेन विना सा नाभावं बोधयेत्। न चैतद्दृष्टम्। वाय्वादौ रूपाद्यभावे तथा दृष्टमिति चेत्, न। असिद्धेः। न च व्याप्तिबलात्सहकारित्वम्। एवं हि वाय्वादौ रूपाद्यभावप्रत्ययोऽनुपलब्धेर्भवन्स्तादृशाश्रयमाक्षिपेत्। अनाक्षेपे वा अनुपलब्धेर्नभवेत्। ततो न भवति, किं तु लिङ्गादिति चेत् - लिङ्गमपि सैव, तच्च

दूषितमेव। किं च नानुपलब्धिर्लिङ्गम्। ततो हि नीरूपो वायुरित्यनुमितिः स्यात्, न तु वायौ रूपाभाव इति।

अपि च घटवत्युपलम्भप्राक्कालेऽनुपलब्ध्या घटस्मृतिमतः कुतो नाभावधीः। (घटाभावादिति) घटाभावाभावादिति चेत्, तर्हि अभावरूपार्थजन्याभावबुद्धिरर्थजन्यत्वेन साक्षात्कारिणी इन्द्रियजन्या च स्यात्। तदा घट एव प्रतिबन्धक इति चेत्, तथापि तदभावोऽभावबुद्धौ जनक एव स्यात्।

स्यादेतत्। गृहमुपलभ्य निर्गतश्चैत्रो यत्र केनचित् पृष्टः तत्र मैत्र आसीदिति, स च क्षणं ध्यात्वा अनुपलब्ध्या तत्र मैत्राभावमवगम्याह नासीत्तत्र मैत्र इति। सेयं प्राङ्नास्तिताधीः न स्मृतिः, पुरा गेहेऽनुभूयमाने मैत्रास्मरणेन तदभावाननुभवात्। एवं च तत्रैव इन्द्रियव्यापारं विनैवानुपलब्ध्या अभावानुभवात् अन्यत्रापि सैव हेतुः क्लृप्तत्वात्। तदाहुः -

**"स्वरूपमात्रं दृष्टं हि वेश्मादूयर्थं स्मरन्नथ।**

**तत्रान्येनास्तितां पृष्टस्तदैव प्रतिपद्यते"।। इति।**

मैवम्। प्राङ्नास्तितायां हि न तावदज्ञातानुपलब्धिः भूतले घटाभावस्येवाभावग्राहिका, तदानीं गेहस्य विप्रकृष्टत्वेन योग्यानुपलब्धेरभावात्। नापि ज्ञाता, अनवस्थाप्रसङ्गात्। अनुपलब्धेरप्यभावरूपतया अनुपलब्ध्यन्तरेण ग्राह्यत्वात्। उपलम्भस्यानुपलब्धिरज्ञातैव स्वरूपसती मैत्रानुपलब्धिं गृह्णाति चेत्, त्वन्नये उपलम्भस्यातीन्द्रियत्वेन तदभावस्य योग्यानुपलब्ध्यग्राह्यत्वात्।

अथ गेहस्य योग्यमैत्रवत्तया स्मरणार्हस्य स्मरणाभावस्तत्र अज्ञात एव गेहे मैत्राभावग्राहक इति चेत्, न। स्वरूपसतः स्मरणाभावस्य ग्राहकत्वे तस्मिन् सत्यभावसंशयविपर्ययाभावप्रसङ्गात्। भवति च कदाचित् तत्रासीदिति विपर्ययस्तत्रासीन्न वेति संशयश्च। अथ दोषात्संशयविपर्ययौ। न चासाधारणं प्रमाकरणं दूषयन्त एव दोषाः संशयादिहेतवो भवन्ति। न चात्र स्वरससिद्धस्य योग्यास्मरणस्य किंचिद्दूषितमिति वाच्यम्। दोषसाहित्यमेव हि करणानां दुष्टता। न हि दूरत्वादिना चक्षुषः किंचिदपक्रियते। किं तु

मण्यादेर्दाह इव स्वरूपसतामेव प्रतिबन्धकत्वमिति चेत्, न। अज्ञाताद्योग्यास्मरणात् तत्राभावधीरित्यसिद्धेः। किं तु मनसा ज्ञाताद्योग्यास्मरणाल्लिङ्गात् प्रमाणत्वेन क्लृप्तात्तत्राभावप्रतीत्युपपत्तौ नानुपलब्धि: प्रमाणान्तरं कल्प्यते।

योग्यस्मरणाभावो न मनोग्राह्यः प्रत्यासत्त्यभावात् ज्ञानस्यायोग्यत्वाद्वेति चेत्, न। वाय्वादौ रूपाद्यभावप्रतीतेरलैङ्गिकत्वेनेन्द्रियानुविधानेन तज्जन्यत्वे सिद्धे इन्द्रियसंबद्ध-विशेषणतायाः प्रत्यासत्तित्वकल्पनात् तज्ज्ञानं प्रत्यक्षम्। जानामीत्यनुभवस्य लिङ्गाद्यजन्यत्वात्। न च ज्ञातता लिङ्गम्, निराकृतत्वात्। तवापि कथमभावे संशयविपर्ययाविति चेत्, न। लिङ्गसंशयविपर्ययाभ्यां लैङ्गिकसंशयविपर्ययदर्शनात्।

यदा तु सुनिपुणेनैकज्ञानविषयतायोग्यस्य मैत्रस्यानुभवे सति स्मरणार्हस्या-स्मरणमवधार्यते तदानुमितिः प्रमा। अत एवास्मरणमात्रस्य व्यभिचारमुपलभ्य तदुपेक्ष्य विशिष्टास्मरणं ज्ञातुकामस्य प्रणिधानमुपयुज्यते। अन्यथा ध्यानमनुपपन्नं , स्वरूपसत एवास्मरणस्याभावग्राहकत्वात्। तस्माद्योग्यास्मरणं लिङ्गत्वेनैवोपयुज्यते।

प्रयोगस्तु - तद्गेहं तदा मैत्राभाववत् तत्तुल्यपरिमाणादियोगितया स्मरणेऽपि तद्वत्तया अस्मर्यमाणत्वात् , यदेवं तदेवं यथा घटाभाववद्भूतलमिति।

**।।इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अनुपलब्धिवाद:।।**

## अथाभाववाद:

अथाभावो भावात्मैव। ततस्तत्र संयोगादिरेव ग्राहक इति न तत्र विशेषणता प्रत्यासत्तिः।

**तत्र प्राञ्च:** - अस्ति तावदिह भूतले घटो नास्तीत्यबाधिता बुद्धिः। सा चेयं न भूतलालम्बना। घटवत्यपि प्रसङ्गात्। नापि केवलतदालम्बना, अतिरिक्तकैवल्यानभ्युपगमात्। भूतलमेव कैवल्यमिति चेत्, तर्हि पौनरुक्त्यमधिकम्। अभेदे आधाराधेयभावानुपपत्तिश्च।

अथाधिकाभाववादिनापि अभावः साश्रयो वाच्यः। देशादिनियमेन व्यवहारात्। तथा चास्ति भूतले विशेषो योऽभावाश्रयः। स न भूतलमात्रम्। घटवत्यपि प्रसङ्गात्। नाभावयुक्तम्,

अन्योन्याश्रयात्। न च घटवत्, विरोधादिति चेत्, न। विशेषस्यैवाभावाश्रयत्वात्। स चाननुगत एव। एकाश्रयता त्वननुगतस्यापि घटाश्रयतेव भवति।

किं च कुत्राभाव इति, यत्र प्रतीयेत इत्येवोत्तरम्। क्व प्रतीयेत इत्यत्र, यत्रास्तीत्येव। अन्यथा गोत्वादिकमपि न स्वीक्रियेत। तदाश्रयविशेषादेव व्यवहारसंभवात्। तथापि कीदृशि भूतले अभाव इति चेत्, अभावपूर्वसमये कीदृशं भूतलमिति प्रश्ने घटवदित्युत्तरम्। अभावसमये अभाववदिति। मध्यसमयस्तु नास्त्येव। इह भूतले घटो नास्तीत्याधाराधेयभावप्रतीतेश्च। अभावाधारत्वं भूतलस्य न प्रतीयते, किंतु तन्मात्रबुद्धिविषयत्वमिति चेत्, अहो! व्याख्याकौशलम्। अनुभवोऽपि व्याख्याय कथ्यते। तन्मात्रपदार्थानिर्वचनं च। न हि भूतलबद्धिस्तन्मात्रबुद्धिः। घटवद्भूतलबुद्धेरपि भूतलबुद्धित्वात्। सा बुद्धिर्न भूतलस्य, किंतु घटभूतलयोः अग्नीषोमयोरिव देवतात्वमिति चेत्, न। ततो भूतलाव्यवहारप्रसङ्गात्। भूतलस्याविषयत्वात्। आशुभाविभूतलविषयकज्ञानान्तरादिति चेत्, तर्हि सैव भूतलबुद्धिस्तन्मात्रबुद्धिरिति तद्देशे घटाभावस्य व्यवहारप्रसङ्गः।

एतेन भूतलेन्द्रियसंनिकर्षजघटवद्भूतलेन्द्रियसंनिकर्षजज्ञानयोर्विशेषोऽङ्गीकरणीयः। सामग्रीभेदस्य कार्यभेदनियतत्वात्। तथा च स एव तन्मात्रपदार्थ इति निरस्तम्। ततोऽपि भूतलव्यवहारात्। प्रतियोगितद्व्याप्येतरजनिता भूतलबुद्धिरभाव इति चेत्, न। घटवति तज्जनिताया अपीतरजनितत्वात्। तन्मात्रजनिता सेति चेत्, न। मात्रार्थस्याभावत्वात् तस्य चापरिज्ञानात्। घटाविषया सती भूतलविषयेति चेत्, न। उक्तोत्तरत्वात्।

किंच प्रतियोगिनिरूपणाधीननिरूपणोऽभावः। बुद्धिस्तु न तथा। प्रतियोगिप्रकाशं विनापि बुद्धिनिरूपणात्। व्यवहारार्थं दृश्यप्रतियोगिज्ञानापेक्षा अभावो ज्ञात एवेति चेत्, न। व्यवहारस्य व्यवहर्तव्योपलम्भनिबन्धनत्वेन तथा अदृष्टचरत्वात्।

यदि च प्रतियोगिस्मरणसापेक्षा तन्मात्रधीरभावपदार्थः तदा अन्धकारादौ या तन्मात्रधीः सा अभावो न स्यात्। तथा च तत्र विचरन् कण्टकैर्विध्येत। कण्टकस्मरणं विना

कण्टकाभावाभावात्। निर्जने बन्धविच्छेदेऽपि जलनिस्सरणं न स्यात्। तदानीं तन्मात्रबुद्धेः सर्वथा अभावात्।

किं च तन्मात्रधीनाशे घटोन्मज्जनप्रसङ्गः, घटाभावाभावस्य घटत्वात्। यदि चाभावो नातिरिक्तस्तदा यत्र घटसंसृष्टत्वबुद्धिरासीत् कुतस्तत्र तन्मात्रधीः। मुद्गरपातजन्यातिरिक्तविषयानङ्गीकारात्।

अतिरिक्ताभावे किं मानमिति चेत्, नास्तीति बुद्धिरेव।

नन्वभावव्यवहारानुपपत्तिरन्योन्याश्रयादिति। **अत्र प्राभाकराः। घटवद्भूतलबुद्धिभिन्ना** भूतलबुद्धिरभावव्यवहारकारणम्। न च दोषात् घटवति घटवत्त्वाज्ञाने भूतलज्ञानमभावः स्यादिति वाच्यम्। घटवतो भूतलस्य ज्ञानात् भिन्नस्य भूतलज्ञानस्याभावत्वात् तद्भ्रमाच्चाभावभ्रमः।

वस्तुतोऽत्यन्ताभावे प्रतियोगिमदधिकरणज्ञानस्याप्रसिद्धेः प्रतियोगिमज्ज्ञानभिन्न-मधिकरणज्ञानं व्यधिकरणाभावव्यवहारे कारणम्। समानाधिकरणनिषेधप्रतीतिश्च प्रतियोग्यधिकरणयोः स्वरूपभेदमालम्बते। तेन घटवत्त्वेन ज्ञायमानेऽपि भूतले भूतलं घटो नेति प्रतीतिः। तथा च यस्याभावज्ञानकारणत्वं परेषां तदेवाभावव्यवहृतिकारणमस्तु। न ह्यधिकरणबुद्धिं विना तद्बुद्धिः। न च भूतलबुद्धिस्तथा । घटवत्यपि प्रसङ्गात्। न चाभावाधिकरणभूतलविषयत्वाद्बुद्धेर्विशेषः। प्रतियोगिसत्त्वेऽपि प्राङ्नासीदिदमत्रेति प्रतीतेः।

किं च ज्ञानविषयभूतलस्याभावो यदि विशेषणम्, तदा अभावज्ञानमेव तद्ज्ञानकारणम्। उपलक्षणं चेत्, न कश्चिद्विशेषः। प्रतियेगिमत्तयानुपलब्धिरपि कारणमिति चेत्, न। प्रतियोगिमत्तयोपलम्भेऽपि प्राङ्नासीदिदमत्रेति प्रतीतेः।

बुद्ध्योश्च विशेषः स्वरूपविशेषावेव, नान्योन्याभावोऽनवस्थानादात्माश्रयाद्वा। भूतलज्ञानापेक्षया घटवद्भूतलज्ञानत्वमेव वा वैधर्म्यभेदः। न चातिरिक्ताभावपक्षेऽप्यन्योन्या-भावेऽत्यन्ताभावे च नित्ये मानमस्ति। प्रतियोगिनि बुद्धिस्थेऽधिकरणस्वरूपस्यैवानति-

प्रसञ्जकत्वात्। न हि तत्राधिकरणस्य प्रतियोगितादात्म्यं प्रतियोगिमत्त्वं वा संभवति। अत एवाभावेऽभावान्तरं त्वया न स्वीक्रियते। अधिकरणस्य तद्वैरूप्याभावात्।

नन्वर्थैनैव विशेषो बुद्धेः। न चार्थभेदोऽस्ति। मैवम्। न हि तावदर्थो ज्ञानकारणमवश्यम्। किं तु सामग्रीविशेषात् बुद्धिविशेषो जायते धारावाहिकबुद्धिवत्।

यद्वा घटवद्भूतलभिन्नं भूतलमभावः यत्र परेषामभावः भेदश्च स्वरूपमेव, तादात्म्येनाप्रतीतौ प्रतीतिरिति तवापि स्वरूपभेदलक्षणम् । इदानीमिदं भूतलं घटवद्भूतलं न भवतीति प्रतीतेः ।

एतावांस्तु विशेषो यत्तव समानाधिकरणनिषेधप्रतीतिरियमन्योन्याभावभेदमवगाहते , मम तु स्वरूपम् ।

ननु यदेव भूतलं घटवद्भूतलाभिन्नमासीत् तदेव कथं तद्भिन्नमिति चेत् , न। तवाप्यबाधितसमानाधिकरणनिषेधप्रतीतिबलेनान्योन्याभावसिद्धौ तथात्वस्य दुर्वारत्वात्। समयभेदेनैव भेदाभेदौ न विरुध्येते इति तु समम् । यदि च घटवद्भूतलाभिन्नं तदिदानीं स्यात् तदा घटवद्भूतलव्यवहारस्तत्र स्यात् । घटतदभावावच्छेदकभेदेनान्यो-न्याभावतदभावौ भूतले वर्तेते इति चेत् , ममापि भूतल (बुद्धिः) (बुद्धेः) घटवद्भूतलबुद्ध्यवच्छेदेन स्वरूपभेदतदभावौ वर्तेते इति गृहाण ।

ननु भूतले घटोऽस्ति न वेति संशयो घटो नास्तीति विपर्ययो वा कथं भवेत् । प्रतियोगिनि बुद्धिस्थेऽधिकरणस्य तज्ज्ञानस्य चाभावस्योपलम्भादिति चेत् , न। भूतले तज्ज्ञाने वा घटवद्भिन्नत्वस्य घटवद्भूतलज्ञानभिन्नत्वस्य च दोषवशेनानिश्चयात् । भूतलतज्ज्ञानस्वरूपाणामननुगमात् कथमनुगतव्यवहार इति चेत् , न । अभावेऽपि तुल्यत्वात्। न ह्यभावत्वं सामान्यम् । अभावत्वगतान्योन्याभावाव्यापकत्वात् ।

न च भावविरोधित्वम् । विरोधस्याभावनिरूप्यत्वात् भावाभावयोः सहावस्थाना-भावस्य स्वरूपानतिरेकाच्च । नापि भावप्रतियोगित्वम् । प्रतियोगित्वस्याभावविरहरूपत्वात्, अभावाभावस्य भावस्य भावाप्रतियोगिकत्वाच्च । नापि सप्रतियोगिकत्वम् ।

समवायसादृश्यादीनामपि तथात्वात् । नापि परकीयस्वभावत्वम् , ज्ञानादिगतत्वात् , स्वभावशब्दस्य स्वरूपार्थेऽननुगमाच्च । नापि सत्ताशून्यत्वम् , सत्तायामेव गतत्वात् , शून्यत्वस्याभावरूपत्वाच्च । सत्तात्यन्ताभाववत्त्वमभावत्वम् , अत्यन्ताभावश्चाभावत्वानवगतावप्यवगत इति चेत् , न । अभावेऽभावानभ्युपगमात् , तथात्वेऽपि तत्रैव तदभ्युपगमात् ।

सत्ताबोधविधुरत्वमभावत्वम् । सामान्यादौ सत्तावगमेऽपि बाधात् सा त्यज्यते , अभावस्य तद्विरुद्धतयैव प्रतितेरिति चेत् , न । विरोधित्वस्य स्वरूपानतिरेकात्।

सहानवस्थाननियमो विरोध इति चेत्, न । अनवस्थानस्यावस्थानाभावत्वेनात्माश्रयात् । भावभिन्नत्वमिति चेत्, न । भेदस्य स्वरूपान्योन्याभावरूपत्वे उक्तदोषात्। वैधर्म्यस्य चिन्त्यमानत्वात् । प्रागभावत्वादेरभावनिरूप्यत्वात् । एवं चेदभावेऽपि नानुगमस्तदा किमधिकेन । स्वरूपविशेषादेव घटव्यवहारोऽप्यस्त्विवति चेत्, न । भूतलविलक्षणघटानुभवात् । एक एवाभावोऽनुगत इति चेत्, न। तस्य नित्यत्वेन प्रतियोगिकालेऽप्यभावव्यवहारप्रसङ्गात् । प्रागभावादिव्युत्पादनविरोधाच्च।

यद्वा अभाववादिनाप्यभावज्ञानकारणमनुगतो भूतलबुद्धिविशेषः स्वीकार्यः । तद्वरं स एवास्तु प्रमेयं प्रमाणं च । स्वप्रकाशत्वाद्बुद्धीनाम् ।

ननु तन्मात्रबुद्धेरभावत्वे तस्याः स्वप्रकाशत्वेन प्रतियोगिज्ञानापेक्षा न स्यादिति चेत्, न । न ग्रहणाय तदपेक्षा, किं तु व्यवहाराय । ज्ञानस्य सत्यामिच्छायां व्यवहारार्थमधिकापेक्षेति चेत्, न । दृष्टा हि व्यवहारार्थमधिकापेक्षा यथा परिमाणस्य दीर्घत्वव्यवहारे । तथा हि अधिकसंख्यावच्छिन्नहस्तवितस्त्याद्यवच्छेदः परिमाणस्य दीर्घत्वम्। तद्विपरीतं तु ह्रस्वत्वम् । तादृशपरिमाणं चावयविग्रहसमकालमेवानुभूतम् । दीर्घत्वव्यपदेशस्तु अल्पसंख्याद्यवच्छिन्नहस्ताद्यवच्छेद्यपरिमाणज्ञानमपेक्षते । तन्मात्रबुद्धेरभावत्वे दृश्यप्रतियोगिज्ञानापेक्षतया दृश्यतासंपत्त्यर्थं केशकीटादिसूक्ष्मजिज्ञासाप्यर्थवती । न च तन्मात्रबुद्धेरभावत्वे तद्विनाशे अभावाभावे भावोन्मज्जनप्रसङ्ग इति। वाच्यम्। यथा घटाभावो बुद्धिः तथा बुद्ध्यभावस्यापि बुद्ध्यन्तरत्वात् । निर्जने बन्धविच्छेदे च

जलनिस्सरणं नातुपपन्नम् । मनुष्याभावेपि पक्षिकीटादिबुद्धिविशेषसभवात् । मोक्षे पुरुषान्तरस्य नियमे प्रमाणं नास्तीति चेत् , न । कार्यात् कारणकल्पनात् । न चैवं बुद्धिनाशे पुनः संसारिता । बुद्धिधारासत्त्वात् । न च सर्वमुक्तिः प्रमाणाभावात्। प्रतियोगि-मदधिकरणभिन्नाधिकरणस्वरूपस्याभावत्वे सर्वं समञ्जसमेवेति **पूर्वपक्षः** ।

**सिद्धान्तस्तु** सप्रतियोगिकोऽभावोऽनुभूयते । घटो न पटो नेत्यनुभवात् । न तु तन्मात्रम् । अतोऽभाववित्तिवेद्यत्वं प्रतियोगिनः प्रतियोगिज्ञानाधीनज्ञानत्वं चाभावस्यानुभवसाक्षिकं गोसादृश्यवत् । न च केवलमधिकरणं तज्ज्ञानं वा अभावः । प्रतियोगिज्ञानं विनापि **तद्वित्तेः, तद्वित्तौ** प्रतियोगिनोऽविषयत्वाच्च । सप्रतियोगिकत्वाभावे च कस्य प्रतियोगी घटः।

अथ केवलमधिकरणं तज्ज्ञानं वा अभावः । स चाप्रतियोगिक एव । अभावव्यवहारस्तु प्रतियोगिज्ञानमपेक्षत इति तस्य प्रतियागी घटः, घटतदभावव्यवहार-योर्विरोधादिति चेत्, न । इह घटो नेति नञर्थस्य प्रतियोगी घटोऽनुभूयते । न त्वभावज्ञानानन्तरभाविनोऽभावव्यवहारस्य। तस्याभावानुभवसमयेऽप्रतीतेः । व्यवह्रियतेऽसौ न त्वनुभूयत इति चेत्, न । तादृशानुभवं विना तथा व्यवहाराभावात् । व्यवहारे प्रतियोगि-ज्ञानापेक्षेत्यपि न युक्तम् । व्यवहर्तव्यज्ञानस्य सत्यामिच्छायां व्यवहारेऽधिकापेक्षाया अदृष्टचरत्वात् । लाघवादिह तथा कल्प्यते न त्वभाव इति चेत् , न । व्यवहारमात्रे तथा कारणत्वानवधारणात् व्यवहारविशेषस्याननुगतत्वात् ।

ह्रस्वत्वदीर्घत्वे च परिमाणान्तरे एव । तवाप्यधिकसंख्यावच्छिन्नहस्ताद्य-वच्छेद्यत्वं परिमाणस्य ह्रस्वत्वं, दीर्घत्वं च अल्पाधिकावधिज्ञानाधीनज्ञानम्। अतो द्रव्यसमकालं परिमाणानुभवेऽपि नानुभूतमिति न तदा तव्द्यवहारः । गोसादृश्यं यद्यपि गवयगतानि सामान्यानि तज्ज्ञानसमकालमेवानुभूतानि, तथापि गोवृत्तित्वे सति गवयवृत्तित्वं गोसादृश्यं गोज्ञानाधीनज्ञानमिति न तदा सादृश्यव्यवहारः ।

**स्यादेतत्** । अस्ति तावत् कस्यचित् ज्ञानात् क्वचित् अभावपदप्रयोगः सर्वसिद्धः । तत्र प्रयोगालम्बनं भूतलाद्यव घटवदतिरिक्ताप्रकाशात् । ततश्च यदपेक्षं यस्याभावपदप्रयोगविषयत्वं तत्तस्याभाव इत्युपेयते । तद्बुद्धिजनिताभावपदप्रयोगविषयत्वमेव घटभूतलयोः प्रतियोग्यनुयोगिरूपः सबन्धः । अत एव भूतलस्य सप्रतियोगिकत्वं, तद्बुद्धिजनिताभावपदप्रयोगविषयत्वेन तद्बुद्धिं विना अभावपदप्रयोगाविषयत्वात् । अनेनैवोपाधिना घटाभावादिपदव्युत्पत्तिग्रह इति चेत् , (न।) (तन्न) अभावपदप्रयोगालम्बनं न भूतलम् । न हि भूतलं घटाभाव इति प्रतीतिप्रयोगौ , अपि तु भूतले घटाभाव इति । भूतले घट इतिवत् भूतले घटो नास्तीति भूतलाधिकरणातिरिक्तनञर्थप्रकाशात्।

अपि च घटबुद्धिजनिताभावपदप्रयोगविषयत्वं भूतलस्य घटाभावत्वम् । तथा च घटाभावत्वे तस्यावगते घटाभावपदप्रयोगविषयत्वम् । घटाभावपदप्रयोगविषयत्वे च ज्ञाते तस्य घटाभावत्वमिति अन्योन्याश्रयः। पदप्रवृत्तिनिमित्तेऽवगते पदप्रयोगनियमात् । घटाभावत्वं च घटाभावपदे प्रवृत्तिनिमित्तम् । यदि च भूतलं सप्रतियोगिकं तदा प्रतियोगिनं विना केवलं न भासेत सादृश्यादिवत् । घटाभावपदप्रयोगदशायां तत् सप्रतियोगिकं नान्यदेति चेत् , तर्हि घटप्रतियोगिकत्वे तस्य घटबुद्धिजनिताभावपदप्रयोगविषयत्वम्, सति च तस्मिन् घटप्रतियोगिकत्वमित्यन्योन्याश्रयः, केवलस्याप्रतियोगिकत्वात् । एवं च गोबुद्धिजनितसदृश-पदप्रयोगविषयत्वं गवयस्य गोसादृश्यमस्तु, कृतमतिरिक्तसादृश्येनेति सप्रतियोगिक-पदार्थापलापः।

अपि च न केवलं भूतलमभावः, भूतलाभावयोः आधाराधेयभावानुभवात् अभेदे तदनुपपत्तेः । दुःखवदात्मभिन्नस्य चात्मनो दुःखाभावत्वे मोक्षस्यापुरुषार्थत्वप्रसङ्गः, आत्मनोऽसाध्यत्वात्।

अथ घटवद्भूतलज्ञानभिन्नं भूतलज्ञानमभावः । तस्य च भूतलाधारता स्वरूपसंबन्धेनानुभूयत इति चेत्, न । तस्य निष्प्रतियोगिकत्वेनाभावत्वानुपपत्तेः इत्युक्तत्वात् ।

अपि च तज्ज्ञानं किं स्वरूपसदेवाभावव्यवहारकारणम्, भूतलाधिकरणकनिषेध-रूपतयानुभूयानं वा । नाद्यः, स्वरूपसतो भूतलाधेयतया प्रतीत्यनुपपत्तेः । न द्वितीयः, घटवद्भूतलज्ञानस्य तदानीमनुपस्थितेः तद्भिन्नज्ञानस्य प्रत्येतुमशक्यत्वात् ।

किं च यदि घटवद्भूतलज्ञानात् भिन्नभूतलज्ञानमभावः तदा घटवति दोषात् घटवत्त्वाज्ञाने भूतलज्ञानमभावो भवेत् । तथा च तदेव तदैव घटवत् घटाभाववच्च स्यात्, न स्यातां च घटाभावज्ञानतद् व्यवहारौ विसंवादिनौ विषयाबाधात् ।

अथ वस्तुतो घटवतो भूतलस्य ज्ञानात् भिन्नं भूतलज्ञानमभावः । न च घटवति भूतलज्ञानम् । तथा व्यवहारस्तु विसंवादी । तथाविधभ्रमादर्शनादिति चेत्, तर्हि घटवतो भूतलस्य ज्ञानात् भिन्नत्वेन ज्ञानं भूतलज्ञानमभावव्यवहृतिहेतुः। न च तत्संभवति । स्वप्रकाशेनानुव्यवसायेन वाधिकरणज्ञाने तदप्रकाशात् भेदप्रतियोगिनोऽनुपस्थितेः। न च ज्ञानान्तरेण तथानुभवः । योग्यानुपलब्ध्या तत्र घटाभावनिश्चयं विना तथा निश्चेतुमशक्यत्वात् ।

अपि चाधिकरणतज्ज्ञानानामननुगतत्वेनानुगताभावव्यवहारानुपपत्तिः । न चाति-रिक्ताभावपक्षेऽपि तथाभावत्वस्यानुगतस्याभावादिति वाच्यम् । अनुगताभावत्वं विनापि घटादिर्न पट इति समानाधिकरणनिषेधादनुगतव्यवहारः पटान्योन्याभावेनैकेन, एवं घटादौ न गोत्वमित्यनुगतव्यवहार एकेनात्यन्ताभावेन, कपालेषु भूतलेषु इदानीं घटो विनष्ट इत्यनुगतव्यवहारो ध्वंसेनैकेन, घटानुत्पाददशायामेतेषु घटो नास्तीत्यनुगतव्यवहार एकेन प्रागभावेन, एवं चत्वारोऽनुगतनिषेधव्यवहाराश्चतसृभिरेव व्यक्तिभिः क्रियन्ते । तव तु अभावचतुष्टयं तत्तदधिकरणतत्तदबुद्धीनामननुगतत्वान्न संभवति, अनुगताभावचतुष्टय-व्यवहारस्य प्रत्येकाभावेनोपपादयितुमशक्यत्वादित्यतिरिक्ता

भावव्यक्तिचतुष्टयसिद्धिः । तस्य च यथा अभावत्वेनैकेनैकपदार्थत्वं तथानुपदमेव **वक्ष्यामः** ।

स्यादेतत् । यस्मिन् समयविशेषे यत्र भूतलेऽभावः परैः स्वीक्रियते, तत्समयविशेषयोग एव भूतलस्य घटाभावः। एवं चेह भूतले घटो नास्तीत्याधाराधेयभाव-प्रतीतिरप्युपपद्यते। समयविशेषयोगस्य भूतलवृत्तित्वात् । न च समयविशेषयोगस्या-भावत्वेऽननुगमो दोषः । अतिरिक्ताभावपक्षेऽपि तुल्यत्वात् । अभावत्वस्य जातेरुपाधेर्वा असत्त्वात् । यदि चाभावप्रतीतिप्रयोगानुगमार्थं तत्र धर्मान्तरं स्वीक्रियते, तदा समयविशेषयोगवृत्त्येव तदस्तु लाघवादिति ।

तन्न । समयविशेषयोगस्य निष्प्रतियोगिकत्वेनाभावव्यवहारासामर्थ्यात् । किं च भूतलवत् समयविशेषोऽपि अभावाधारतयानुभूयते इदानीं भूतले घटो नास्तीति प्रतीतेः। न च तत्समयविशेषे तत्समयविशेषयोगः। अभेदे संबन्धानुपपत्तौ आधाराधेयभावाभावात् ।

अपि च समये किमभावाश्रयतैव विशेषः, तत्तत्समयस्वरूपं वा । आद्यऽभावस्वीकारः । द्वितीयेऽननुगमः । मम तु एकाभावव्यक्तेरेव तथा , नानासमयवृत्तित्वात्।

किं च समयविशेषयोगादिदानीं भूतलमिति प्रतीतिप्रयोगौ स्याताम् , विशेषणस्य स्वप्रकारकविशिष्टप्रत्ययजनकत्वात् न तु भूतले घटाभाव इति ।

यदि च तत्तत्समयविशेषयोगाद्भूतले घटाभावव्यवहारस्तदा यादृशसंस्थानविशेष-विशिष्टे कपाले घटो वर्तते तादृशकपालादिकमेव तत्तत्समयविशेषयोगात् घटादिव्यवहारजनकमस्तु किं घटादिना । प्रतीतिश्च तुल्या ।

एतेन --

**"दृष्टस्तावदयं घटोऽत्र च पतन् दृष्टस्तथा मुद्गरो**

**दृष्टा कर्परसंहतिः परमितोऽभावो न दृष्टोऽपरः ।**

**तेनाभाव इति श्रुतिः क्व निहिता किं चात्र तत्कारणं**

**स्वाधीना कलशस्य केवलमियं दृष्टा कपालावली'।।** इति **निरस्तम्** । मुद्गरपाताद्विनष्टो घट इति प्रतीत्यतिरिक्तविनाशानुभवात् । न च केवलभूतलं तद्बुद्धिर्वा

तज्जन्या, तेन विनापि तयोः सत्त्वात् । त्वन्मते च तयोरभावमात्रत्वेन विनाशत्वायोगात् । योगे वा अभावमात्रस्य विनाशित्वापत्तिः ।

अथ त्वन्मते यद्विनाशकं तदेव तत्सहितं भूतलं ज्ञानं वा विनाश इति चेत् , न । मुद्गरपातजन्यो हि विनाशोऽनुभूयते । न च तस्यैव तज्जनकत्वम् । सप्रतियोगिकश्च विनाशोऽनुभूयते । न च मुद्गरपातस्तथा।

नन्वभावेन समं भूतलस्य संबन्धाभावात् कथं भूतले घटाभावप्रत्ययः । स्वरूपसंबन्धादिति चेत् , तर्हि घटवद्भूतलस्यापि चत्वरीयाभावेन स्वरूपसंबन्धोऽस्ति। भूतलमभावश्चेत्यधिकस्य स्वरूपसंबन्धस्याभावात् ।

प्रतियोग्यारोप एव स्वरूपसंबन्धः । अत एवारोप्य निषिध्यत इत्युच्यत इति चेत् , न । तत्राभावसंबन्धे सत्यारोपः , स एव चाभावसंबन्ध इत्यन्योन्याश्रय इति चेत् , न । संबन्धान्तरमन्तरेण विशिष्टप्रत्ययजननयोग्यत्वस्य स्वरूपसंबन्धत्वात् । न च घटवद्भूतलचत्वरीयाभावयोः परस्परं विशिष्टप्रत्ययः । ज्ञानविषययोः समवायसमवायिनोरिव संबन्धान्तराभ्युपगमने चानवस्थाभिया तत्संबन्धसंबन्धिनोरपि तादृशसंबन्धस्वीकारादिति सिद्धोऽतिरिक्तोऽभाव इति तद्ग्राहिका विशेषणतेति सिद्धमेतत् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अभाववादः।।**

## अथ विषयालोकसंनिकर्षवादः

षोढा संनिकर्षः प्रत्यक्षविशेषे कारणम् । विषयेणालोकसंयोगविशेषश्च तत्र कारणम् , न तु चक्षुषा । प्रकाशस्थेन चक्षुषा अन्धकारस्थस्याग्रहणात् वैपरीत्ये च ग्रहणात्।

नन्वेवं परभागावच्छेदेनालोकसंयुक्तोऽपि घटो गृह्येत । न चावयविग्रहसामग्र्याः स्वावयवग्रहसामग्रीनियमात् परभागावच्छिन्नो न गृह्येत इति वाच्यम् । त्र्यणुके व्यभिचारात्, प्रत्यक्षावयवे च सामग्रीभेदकल्पने मानाभावात् ।

अथाभिमुखावयवावच्छेदेन घटालोकसंयोगः कारणम् , तर्हि अभिमुखावयवावच्छेदेन चक्षुरालोकसंयोगोऽपि हेतुरस्तु । यदि चालोकसंयोगावच्छिन्ने चक्षुस्संयोगस्तथा

समानदेशताविरोधश्च निबिडयोरेव, अन्यथा पटमहारजतयोः पटोदकयोश्चाग्रहप्रसङ्गः । तर्हि घटसंयोगावच्छिन्ने चक्षुरालोकसंयोगः कारणमस्तु ।

अथ चालिनीन्यायेन आलोकसंयोगसंनिहिते चक्षुर्घटसंयोगः कारणम् तदा घटचक्षुस्संयोगसंनिहिते चक्षुरालोकसंयोगो हेतुरस्त्विति चेत् , नैवम् । अन्वयव्यतिरेकाभ्यां विषयालोकसंयोगस्य कारणत्वे निश्चिते तेनैवोपपत्तौ न चक्षुरालोकसंयोगः कारणं कल्प्यते ।

**अन्ये तु** द्वयोरप्यालोकसंयोगयोः कारणत्वे विषयालोकसंयोगः कारणमेवेति । नन्वभिमुखावयवावच्छेदेन विषयालोकसंयोगयोः कारणत्वे (विषयालोकसंयोग: कारणमेवेति। नन्वभिमुखावयवावच्छेदेन विषयालोकसंयोगस्य कारणत्वे ) आवश्यकसंयोग एव हेतुरस्तु इति चेत् , न । अवयवसंयोगमात्रस्यातिप्रसक्तेः स्वावयवसंयोगो वक्तव्यः । तथा च स्वसंयोग एव लाघवात् । अवयवसंयोगेन चान्यथासिद्धौ कारणतैव न स्यात् संयोगस्येत्युक्तम्। आलोकस्योद्भूतरूपमपि व्यञ्जकम् , अन्वयव्यतिरेकित्वात्। न तु तेजः कारणतावच्छेदकं तत् ऊष्मादीनां चाक्षुषत्वाभावात् । न च स्वातन्त्र्येणान्वयव्यतिरेकित्वात् द्वयोरपि हेतुत्वम् । अन्यथा दण्डादेरपि चक्रावच्छेदकत्वं स्यादिति वाच्यम् । उद्भूतरूपतेजोमात्रयोः समवधाने कार्यानुदयादिति चेत्, मैवम् । उद्भूतरूपस्य तेजस्त्वम्, तेजसश्चोद्भूतरूपत्वं वावच्छेदकमिति विनिगमकाभावादुभयोरपि हेतुत्वात्, दण्डचक्रयोरिवैकैकं विहायापरस्यान्वयव्यतिरेकाभावात् । एवं चक्षुषो रूपमपि व्यञ्जकं व्यञ्जकतेजोरूपत्वात् आलोकरूपवत् । रूपस्य व्यञ्जकत्वे उद्भूतरूपत्वं तेजोगतोद्भूतरूपत्वं वा नोपाधिः, व्यभिचारेण गौरवेण चाप्रयोजकत्वात् । किं तु व्यञ्जकरूपमेव तथा, लाघवात्। विषयस्थमपि रूपमुद्भूतं सहकारि । तदुद्भवे च मानम् - इन्द्रियालोकादिप्रत्यासन्नं महदवयविवायूपनीतसुरभिशीतोष्मचक्षुरादिकं साक्षात्कार (कारण) (कारणभूत) किंचित्समवधानशून्यम् अप्रत्यक्षत्वात् अन्धकारस्थघटवदिति ।

तच्च कारणं लाघवादनुगतं सामान्यं रूपादिवृत्ति न द्रव्यगतम् । ऊष्मादौ स्पर्शग्रहे रूपस्य, प्रभादौ रूपग्रहे स्पर्शस्य ग्रहप्रसङ्गात् , उद्भवत्वैकार्थसमवायाविशेषात्। अन्यथा

स्पर्शरूपयोरग्रहप्रसङ्गात् । नाप्युभयवृत्ति , रूपादिवृत्तित्वेनैवोपपत्तेः । रूपस्पर्शयोस्तु तन्नाना, एकग्रहेऽप्यपरस्याग्रहात् । न च रूपत्वादिना परापरभावानुपपत्तिः, तारत्वादिवन्नानात्वात् । रूपादिप्रत्यक्षे एकैकोद्भवस्यैव प्रयोजकत्वात् ।

ननु महत्त्व एवोद्भवत्वमस्तु । तदेव प्रत्यक्षत्वे तन्त्रम्, लाघवात् । न (च) रूपेऽपि, गौरवादिति चेत्, न । आश्रयमहत्त्वोद्भवाभावेऽपि गन्धस्पर्शयोः प्रत्यक्षत्वेनोद्भवत्वमिति प्रत्यक्षमूर्तविशेषगुणत्वेन रूपेऽप्युद्भवत्वात् न महत्त्वे, सामान्यगुणत्वात् ।

अथानुद्भवत्वमेव जातिः , अप्रत्यक्षत्वप्रयोजकत्वेन साक्षादेव तत्कल्पनात् तदभावात् प्रत्यक्षत्वमिति चेत्, न । अप्रत्यक्षतायाः प्रत्यक्षकारणविरहप्रयोज्यत्वेन प्रत्यक्षकारणस्य लाघवेन जातेः कल्पनात् । न तु प्रतिबन्धकत्वेनानुद्भवत्वं कल्पयित्वा तदभावः कारणं गौरवादिति संप्रदायविदः ।

वयं तु ब्रूमः । शुक्लत्वादिना कारणरूपाग्निसंयोगप्रयोज्याभ्यां जातिभ्यां परापरभावानुपपत्त्या रूपवृत्त्युद्भवत्वमनेकं वाच्यम् । तथा चोद्भूतत्वेन कारणत्वेऽननुगमः। तस्मादनुद्भवत्वं शुक्लत्वादिव्याप्यं नानाजातिः, तदभावकूटस्तु प्रत्यक्षत्वे प्रयोजकः । अन्यथानुगतप्रत्यक्षानुपपत्तेः । एवं स्पर्शादावपि ।

अथ वोद्भूतत्वमनुद्भूतत्वं वा न जातिः । किं तु रूपत्वव्याप्यजातिमत्त्वमेवोद्भूतत्वं तदभावोऽनुद्भवत्वम् । प्रत्यक्षे रूपे शुक्लतरतमत्वादिजातिमत्त्वात् । ऊष्मचक्षुरादिरूपे तु शुक्लत्वमात्रमेव, तव्द्याप्यजातौ मानाभावादुत्कर्षाभावात् । न च रूपत्वमेव मानम् । लाघवेन तस्य प्रयोजकत्वे प्रत्यक्षत्वप्रसङ्गात् । एवं स्पर्शादावपीति । इतोऽपि महत्त्वे नोद्भवत्वं प्रयोजकम् । वाय्वादौ महत्त्वोत्कर्षेऽप्यप्रत्यक्षत्वात् ।

ननु भर्जनकपालगतो वह्निः वारिस्थघटव्यञ्जक(सूर)(सूर्य)तेजश्च गृह्येत, वारिकपालयोः प्रत्यक्षत्वेनोद्भूतरूपवत्त्वात् । तयोः संयोगविशेष एव प्रतिबन्धक इति चेत्, न। जलकपालादीनामालोकव्यङ्ग्यतया तद्ग्रहे प्रतिबन्धकत्वाभावात् । प्रतिबन्धकत्वे वा

भर्जनकपालवारिसंयोगिवह्निसौरालोकयोरग्रहप्रसङ्गः । संयोगे च न विशेषो जातिकृतः , अन्यतरकर्मजत्वादिना संकरप्रसङ्गात् । तारत्ववन्नानात्वे गौरवात् । नापि तत्संयोगभेदः, अननुगमादिति ।

**मैवम्** । जलस्थं तु तेजो गृह्यत एव । उभयोः स्वच्छतया विविच्य ग्रहो न भवति। भर्जनकपाले चानुद्भूतरूपमुद्भूतस्पर्शमन्यदेव तेजस्तादृशैरवयवैर्वह्निसहचरितैरारभ्यते। अतितप्ततैलादौ कदाचिदुद्भूतरूपावयवप्रवेशाद्वह्न्यारम्भोऽपि । न चैवं दुग्धसहचरितदधि-परमाणुभिरेव दध्यारम्भः । दुग्धध्वंसजन्यद्रव्यत्वेन खण्डदुग्धवद् दध्नो दुग्धोपादानोपादेयत्वात्।

नन्वेवमुद्भूतरूपवह्न्यादौ उद्भूतस्पर्शो नास्ति । तत्सहचरिततेजोऽन्तरनियमेन तत्रोष्मबुद्धेरुपपत्तेः । उद्भूतरूपोद्भूतस्पर्शसामग्र्योरूष्मणि प्रभादौ विरोधावधारणादिति चेत्, न। यं वह्निमद्राक्षं तं स्पृशामीत्यबाधितप्रत्यभिज्ञानवशात् दर्शनस्पर्शनाभ्यां वह्नौ रूपस्पर्शयोरुपलम्भात् । न च तेजस्त्वं बाधकम् । उद्भवानुद्भवयोर्निमित्तभेदसंसर्ग-प्रयोज्यत्वात्, तेजस्त्वस्य रूपवद् वृत्तिद्रव्यत्वसाक्षाद् व्याप्यजातित्वेनोद्भूतरूपस्पर्श-वद्वृत्तित्वात्। न चोद्भूतरूपस्पर्शयोर्विरोधः, जलपृथिव्योरुभयसत्त्वात् । तेजसि विरोधस्य निमित्तभेदोपाधिकत्वादिति। उद्भूतरूपसहचरितयोर्महत्त्वानेकद्रव्यवत्त्वयोः युगनद्धवाहितया अन्वयव्यतिरेकतुल्यत्वेऽपि द्रव्यचाक्षुषत्वे नानेकद्रव्यवत्त्वमुभयं वा तन्त्रम्, किं तु महत्त्वमेव लाघवात् । अनेकद्रव्योत्कर्षं विनापि तूलकादौ प्रचयजन्योत्कृष्टपरिमाणात् प्रत्यक्षोत्कर्षदर्शनाच्च । दूरस्थकेशराशौ द्रव्यानुत्पादेन महत्त्वाभावेऽप्येककेशस्य सजातीयसंयोगेनानेकद्रव्यवत्त्वात् द्रव्यप्रत्यक्षतेत्यनेकद्रव्यवत्त्वं तत्र तन्त्रमिति चेत्, न । अनेकद्रव्यसंबन्धित्वस्य समवायेन प्रयोजकत्वात्, न तु संयोगेन, अतिप्रसङ्गात् । तथा च दूरग्रहणे सजातीयसंयोगस्यानेकद्रव्यवत्त्वे सहकारिता वाच्या । सा महत्त्व एवास्तु ।

यद्यु ननु द्भूतरूपवत्त्वं महत्त्वं च द्रव्यप्रत्यक्षतायां स्वरूपयोग्यता तदा दण्डत्ववत्तयोः कारणता न स्यादिति चेत्, न । तदुत्कर्षात्, प्रत्यक्षोत्कर्षेण तयोः कारणत्वात्।

न ह्यकारणोत्कर्षमकार्यमनुविधत्ते । दण्डत्वादौ नैवम् , प्रकारभेदेनोभयरूपत्वाच्च चाक्षुषद्रव्यज्ञाने विषयत्वेन तयोः कारणत्वम् , द्रव्येऽनुगतत्वेन कारणतावच्छेदकत्वमिति ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे विषयालोकसंनिकर्षवादः।।**

## अथ वायुप्रत्यक्षवाद:

ननु नोद्भूतरूपवत्त्वं तत्र तन्त्रम् , वायोः प्रत्यक्षत्वात् । तथा हि - वायुः प्रत्यक्ष: प्रत्यक्षस्पर्शाश्रयत्वात् महत्त्वे सत्युद्भूतस्पर्शवत्त्वाद्वा घटवत् । ऊष्मादौ प्रत्यक्षत्वान्न व्यभिचारः । न चाप्रयोजकम् । स्पार्शनप्रत्यक्षत्वे महत्त्वे सत्युद्भूतस्पर्शवत्त्वं प्रयोजकम्, नोद्भूतरूपवत्त्वमपि, गौरवात् । न च पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्न-साध्यव्यापकश्चोद्भूतरूपवत्त्वमुपाधिः । स्पार्शनप्रत्यक्षत्वे तस्याप्रयोजकत्वात्, त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतेश्च । न च स्पर्शलिङ्गाग्रहे तदुपक्षयः। घटेऽपि तथात्वापत्तेः । लैङ्गिकत्वे च स्पर्शो वायुवृत्तिरिति धीः स्यात्, न त्वनुष्णाशीतस्पर्शो वायुरिति, स्पर्शाग्रहेऽपि शीतो वायुरिति प्रतीतेश्च । न च शीतद्रव्योपनायकत्वेनानुमिते वायौ तथा धीः । बाधकाभावात् विशेषदर्शने सत्यारोपाभावाच्च ।

अथाचाक्षुषत्वं स्पार्शनत्वे बाधकम् । चक्षुषानुपलभ्यमानस्य त्वचानुपलम्भादिति चेत्, तर्हि चक्षुरेव द्रव्यग्राहकम् । त्वचा स्पर्शमात्रं प्रतीयेत, वायाविव प्रत्यभिज्ञापि तद्वदेव ।

अथानुभवस्य दुरपहनवत्वात् त्वचा आश्रयरहित एव स्पर्श उपलभ्यते, तदा वायावपि तुल्यम् । अथ दोषाभावे सति द्रव्यग्रहे तद्गतसंख्यादिग्रहनियमात् वायौ सर्वथा तदग्रहात् न स प्रत्यक्ष इति चेत्, न । न च तावदयं व्यक्तौ नियम: । पृष्ठलग्नवस्त्रादेः संख्यापरिमाणाग्रहे त्वचा ग्रहणात् । तज्जातीये तु फूत्कारादौ संख्यापरिमाणादीनां वाय्वभिघातस्य च शरीरे प्रत्यक्षत्वात् ।

स्यादेतत् । बहिरिन्द्रियजद्रव्यसाक्षात्कारे महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकम् । सति संभवे त्यागायोगात् । न तु जन्येन्द्रियग्राह्यविशेषगुणवत्त्वम्,

कार्यमहत्त्वसमानाधिकरणविशेषगुणवत्त्वं वा । रसनगतपित्तद्रव्यस्योद्भूततिक्तरसस्य वायूपनीतसुरभिद्रव्यस्य च प्रत्यक्षतापत्तेः ।

मैवम् । नोद्भूतरूपवत्त्वं तथा, नयनगतपित्तद्रव्यस्य च प्रत्यक्षतापत्तेः । अस्तु वा उद्भूतस्पर्शवत्त्वं तत्र तन्त्रम् । न चैवं प्रभायामप्रत्यक्षत्वम् । प्रभा हि तेजसो रूपं न द्रव्यम्। तदाश्रयतेजः प्रतीतिः प्रत्यक्षरूपलिङ्गाधीनैव, यथा तवोष्मादिप्रतीतिः । तत्र संयोगकर्मादि कथं प्रत्यक्षमिति चेत्, चान्द्रसौरदीपप्रभादौ तु न कथंचित् । इन्द्रनीलादिप्रभाया रूपस्य पूर्वदेशानुपलम्भेन उत्तरदेशोपलम्भेन लिङ्गेन तदाश्रयतेजस्संयोगविभागाद्यनुमानमिति । त्वन्नये यथा त्वचा स्पर्शमात्रग्रहानन्तरं फूत्कारे संगोगादीनाम्।

एतेन धूमबाष्पयोरस्पार्शनत्वेनोद्भूतस्पर्शाभावेऽपि चाक्षुषत्वम्, अन्यथा तद्गतसंयोगविभागकर्मणां प्रत्यक्षता न स्यात्, लिङ्गाभावादिति निरस्तम् । न च बहिरिन्द्रिययोग्यानेकविशेषगुणवत्त्वं तन्त्रम् । तव त्रसरेणुप्रभयोरप्रत्यक्षतापत्तेः, गौरवाच्च ।

नन्वेवं विनिगमकाभावादुभयोरपि तथात्वमस्तु । तथापि वायुरप्रत्यक्ष इति चेत्, एवं बहिरिन्द्रियजद्रव्यसाक्षात्कारे चाक्षुषत्वे स्पार्शनप्रत्यक्षत्वे च प्रत्येकमुद्भूतरूपवत्त्वे सत्युद्भूतस्पर्शवत्त्वं प्रयोजकं पर्यवस्यतीति गौरवम् । मम तु चाक्षुषत्वे उद्भूतरूपवत्त्वं, स्पार्शनत्वे उद्भूतस्पर्शवत्त्वम् । यस्य विशेषे प्रयोजकत्वं तस्यानुगतेन रूपेण सामान्यप्रयोजकत्वमिति द्रव्यग्राहकबहिरिन्द्रियव्यवस्थापकोद्भूतविशेषगुणवत्त्वं सामान्य-प्रयोजकमिति लाघवम् । विशेषस्य सामान्यस्य च भिन्नप्रयोज्यत्वनियमान्नैकं प्रयोजकम्।

अथ वायुर्यदि बहिरिन्द्रियजन्यसाक्षात्कारविषयद्रव्यं स्पार्शनसाक्षात्कारविषयद्रव्यं वा स्यात् उद्भूतरूपः स्यात् । न चैवम्, तस्मात्तथा । तादृशसाक्षात्कारविषयद्रव्यस्य रूपजनकत्वनियमादिति चेत्, न । रूपवत्समवेतत्वेन हि द्रव्यस्य रूपजनकत्वम्, न तु तादृशसाक्षात्कारविषयद्रव्यत्वेन, तस्य रूपजननोत्तरकालीनत्वात् । घटो यदि चक्षुरितरेन्द्रियग्राह्यद्रव्यं स्यात् अरूपमस्पर्शमचाक्षुषादि स्यात् । त्वगिन्द्रियं यदि

द्रव्यग्राहकबहिरिन्द्रियं स्यात् रूपवत् स्यात् स्पर्शग्राहकं वा न स्यात् रूपग्राहि वा स्यात् चक्षुर्वत् । न चैवम्, तस्मान्न तथेति घटोऽपि न त्वगिन्द्रियग्राह्यः स्यात्, तद्गतसंख्यादिज्ञानं फूत्कारादाविवेति स्यात्, स्पृशामीत्यनुव्यवसायश्च घटवद्वायावपि ।

अथ स्पार्शनत्वे उद्भूतस्पर्शवदुद्भूतं रूपमपि तन्त्रम् । उद्भूतरूपवत्त्वे चाक्षुषत्ववत् स्पार्शनत्वदर्शनादिति चेत्, न । उद्भूतरूपवत्त्वे सत्यपि प्रभायां न स्पार्शनत्वमिति उद्भूतस्पर्शस्यावश्यकत्वेनोद्भूतरूपस्यान्यथासिद्धत्वात् । न ह्युद्भूतस्पर्शे सत्युद्भूतरूपाभावात् स्पार्शनत्वाभावः।

नन्वेवं स्पर्शगत उद्भवः कारणमस्तु । न तु रूपमकारणमिति चेत् , तथापि स्पर्शस्तदुद्भवश्च कारणम् , न तु रूपमपि । तस्मिन् द्वये सति तदभावेन तदभावादर्शनात्। वस्तुतो रूपस्पर्शगते उद्भवत्वजाती कारणतावच्छेदिके न तु कारणे इति ।

**उच्यते** । द्रव्यस्य स्पार्शनत्वे उद्भूतस्पर्शमात्रं न तन्त्रम् । निदाघोष्मणि वायूपनीतशीतोष्णद्रव्ये च प्रत्यक्षत्वेन तद्गतसंख्यापरिमाणसंयोगविभागकर्मणां प्रत्यक्षत्व-प्रसङ्गात्। योग्यव्यक्तिवृत्तित्वेन तेषां योग्यतया द्रव्यग्राहकसामग्रीग्राह्यत्वावधारणात् । न चोष्मादिजातीये दोषाभावेऽपि घटादाविव करपरामर्शे कदाचित् केनापि संख्या गृह्यते । तथोद्भूतरूपवत्त्वमात्रस्य तथात्वे चान्द्राद्युद्योतस्य नयनगतपित्तद्रव्यस्य च प्रत्यक्षत्वे तद्गतसंख्याग्रहोऽपि स्यात् । न च घटादाविव निपुणं निभालयन्तोऽपि तद्गतसंख्याद्वित्वादि हस्तवितस्त्यादिपरिमाणं कर्म वा वीक्षामहे इत्येकैकव्यभिचाराद्विनिगमकाभावात् उभयमपि बहिरिन्द्रियद्रव्यप्रत्यक्षत्वे प्रयोजकमिति वायुरप्रत्यक्षः । न चैवमपसिद्धान्तः । पीतः शङ्ख इत्यादौ नयनपित्तपीतिमैव गृह्यते न तु पित्तद्रव्यम् । (विभक्ता)(विषक्ता)वयवत्वात् प्रभायामिव तेजस इति **टीकाकृता**मभिधानादिति **नवीनाः** ।

**संप्रदायविदस्तु** -- चलति पक्षिकाण्डादौ पूर्वदेशविभागोत्तरदेशसंयोगयोः प्रत्यक्षता न स्यात् पूर्वोत्तरदेशस्य प्रभामण्डलस्यानुद्भूतस्पर्शत्वेनाप्रत्यक्षत्वात् । तथा च परेषां चलतीति

प्रतीतिरपि तल्लिङ्गिका न स्यात् । अस्माकमपि चन्द्रतारादौ संयोगविभागलिङ्गक-गत्यनुमानं न स्यात् । न च पूर्वोत्तरदेशे उपलम्भानुपलम्भाभ्यां संयोगविभागावनुमाय ताभ्यामेव गत्यनुमानम् । पूर्वोत्तरदेशयोरप्रत्यक्षत्वेन लिङ्गासिद्धेः । तस्मादुद्भूतरूपवत्त्वं तत्र प्रयोजकमिति वायुरप्रत्यक्षः ।

ननु शीतो वायुरित्यारोपो न स्पार्शनः , विशेष्यस्यायोग्यत्वात् । न च प्रभायां तथा। सामान्ये बाधकाभावात् । नाप्यनुमानोपनीते वायौ त्वगिन्द्रियोपनीतः शीतारोपः शीतद्रव्याभेदारोपो वा । मनसा तल्लिङ्गस्पर्शादिचतुष्कस्याग्रहणात् शीतस्पर्श-स्यातल्लिङ्गत्वात् । न च शीतद्रव्योपनायकत्वेनानुमिते वायौ मनसा शीतारोपः। शीतानाश्रयत्वेनानुमिते वायौ तदनारोपात् । नापि पीतः शङ्ख इतिवत् बहिरिन्द्रियजन्योऽयं भ्रमः, येनानुमानिकविशेषग्रहेऽपि दोषमाहात्म्यात् भवेत् । शीतद्रव्योपनयनजनक-प्रणालीमविदुषोऽपि शीतो वायुरिति प्रत्ययाच्च । नापि लिङ्गाभासजन्यानुमितिरूपो भ्रमः । तदप्रतीतेः, शीतस्पर्शस्य वायुलिङ्गत्वेन भ्रमाविषयत्वात्। न च शीतस्पर्शानुमिते द्रव्ये स्मृतवाय्वभेदारोपः, वायुविशेष्यकशीतप्रत्ययात् । अत एव शीतस्पर्र्शोऽयं वायोरिति भ्रमशरीरमपास्तम् । न च स्वप्नविभ्रमवत् स्वोत्प्रेक्षितपदार्थसंसर्गारोपवच्च मानसोऽयम् । त्वगिन्द्रियव्यापारानुविधानादिति।

**उच्यते** । यथा वायुवैधर्म्येण जलवृत्तितया गृहीतस्य शीतस्पर्शस्य वायावारोपो दिङ्मोहवद्दोषमाहात्म्यात् तथा शीतस्पर्शे वायुलिङ्गत्वारोपात् वायवीयत्वानुमानम्। न चैवं शीतो वायुरिति प्रतीतिः न स्यादिति वाच्यम् । शीतोऽयं वायवीय इति ज्ञानानन्तरं शीतोऽयं वायुरिति च मनसारोपात्, अनुष्णो वायुरितिवत् ।

अथ त्वग्व्यापारानन्तरं कथं वायुर्वातीति प्रतीतिः, तल्लिङ्गसंयोगविभागयोर-प्रत्यक्षत्वात् । न च शरीरे वाय्वभिघात एव तल्लिङ्गम् । अभिघातस्य संयोगत्वेनाप्रत्यक्षत्वादिति चेत्, न । अभिघातजन्यसुखदुःखविशेषेणाभिघातमुन्नीय तस्य स्पर्शवद्वेगवज्जन्यत्वमनुमाय वेगेन कर्मानुमानात् । एवं प्रणालीमविदुषस्तत्प्रत्ययासिद्धेः।

अथ वायु: शीतो वातीति कथं विशिष्टवैशिष्ट्यप्रतीतिरेका, शीतविशिष्टप्रतीतेः मानसत्वेन कर्मप्रतीतेरानुमानिकत्वेन जातिसंकरप्रसङ्गादिति चेत्, न । शीतविशिष्टत्वेन स्मृते वायौ कर्मानुमानाद्विशिष्टवैशिष्ट्यम्, न तूभयं विशेषणमेकदा भासते । न चैवं कल्पनागौरवं दोषाय, प्रत्यक्षत्वे बलवद्बाधकसत्त्वात् ।

एवं बहिरिन्द्रियजद्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वस्य प्रयोजकत्वे व्यवस्थिते प्रत्यक्षत्वसाध्यकानुमाने पक्षधर्मावच्छिन्नस्य साध्यस्य साधनावच्छिन्नस्य वा व्यापकमुद्भूतरूपवत्त्वमुपाधिः। न च विशिष्टस्य व्यभिचारव्यतिरेकयोः साधनेऽर्थान्तरम् । विशेष्यव्यभिचारव्यतिरेकसिद्धिपर्यवसानात् इत्युपाधौ वक्ष्यामः ।

अथ वायुवदात्मापि न प्रत्यक्षः , द्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वस्य तन्त्रत्वात् । न च लिङ्गज्ञानं विनैव अहं जानामीति प्रत्ययात् न लैङ्गिकत्वम् । ज्ञानमविदुषो जानामीति विशिष्टप्रत्ययाभावेन ज्ञानस्य लिङ्गत्वात् । न च घटमहं जानामीति वर्तमानप्रत्ययो न स्यात्, घटज्ञानस्यानुमितिपूर्वतृतीयक्षणे विनाशादिति वाच्यम् । स्थूलसमयोपाधिमादाय वर्तमानप्रत्ययात् । यथा कुलाले चेष्टादर्शनेन करोतीत्यनुमितिरिति ।

**उच्यते** । योऽहं घटमद्राक्षं सोऽहं घटं स्पृशामीत्यभेदप्रत्यभिज्ञानादात्मा प्रत्यक्षः । न चैतत् स्पर्शनेन्द्रियजन्यज्ञानाश्रयोऽहं तद्दर्शनज्ञानाश्रयाभिन्नः मदीयाहंप्रत्ययविषयत्वात् तद्दर्शनज्ञानाश्रयवदित्यात्माभेदप्रत्यय इति वाच्यम् । मदंशस्याप्रत्यक्षत्वेनानुमानलिङ्गासिद्धेः । न च ज्ञानेनात्मानुमानं ततस्तत्र ज्ञाने आत्मीयत्वानुमानं ततो मदीयाहं-प्रत्ययविषयत्वज्ञानमात्मनीति वाच्यम् । एवं प्रणालीमविदुषोऽपि योऽहं सोऽहमिति प्रत्ययात् । न च वायौ प्रत्यभिज्ञानमस्ति । सदागतिमत्त्वेन गतस्य पुनरज्ञानात् । स एव पुनः पुरोवात इति प्रतीतेः तज्जातीयानुमितिरूपत्वात् ।

तस्माद्वायुः बहिरिन्द्रियाप्रत्यक्षः नीरूपद्रव्यत्वात् आकाशवत् । न च साधनावच्छिन्नसाध्यव्यापकमुद्भूतस्पर्शानाश्रयत्वमुपाधिः । उद्भूतस्पर्शस्य तत्राहेतुत्वेनोपाधेः साध्याव्यापकत्वात् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे वायुप्रत्यक्षवादः ।।**

## सुवर्णतैजसत्ववादः

किं चोद्भूतस्पर्शवत्त्वस्य बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारप्रयोजकत्वे सुवर्णरूपं तेजोद्रव्यं प्रत्यक्षं न स्यात् प्रभावत् तस्यानुद्भूतस्पर्शवत्त्वात् । रूपं तु तस्योद्भूतमेव । किं तूपष्टम्भकपीतरूपाभिभूतम् । अभिभवश्च बलवत्सजातीयसंबन्धः । एवमन्धकारे पीताग्रहणेऽप्यभिभवः । न चैवमन्धकारे सुवर्णोपलम्भापत्तिः, अभिभूतस्यापि तेजसो ग्रहात्। न च तेजसि तेजोऽन्तरं व्यञ्जकमिति वाच्यम् । रूपे गृह्यमाण एव चक्षुषा द्रव्यग्रहात् । सुवर्णरूपमभिभवादेव नोपलभ्यते, उपष्टम्भकरूपं चालोकाभावात् ।

अथ यथा अरुणकपिलादिरूपाभिभूतमपि वह्निरूपं परम् आत्मानं च प्रकाशयति तथा कनकमपि प्रकाशेत प्रकाशयेच्चेति चेत्, न । तत्र हि अभिभूतरूपवह्निसंबद्धानभिभूतरूपा वह्निमध्यादिव्यापिनी प्रभैव व्यञ्जिका । यद्वा वह्नौ रूपभास्वरत्वे नाभिभूते किं तु शुक्लत्वमात्रम्, सुवर्णे तु रूपमभिभूतम् । तेन तद्गतशुक्लत्वभास्वरत्वे अनभिभूते अपि व्यक्त्यग्रहान्न गृह्येते इति फलबलात्कल्प्यते । न च पीतिमगुरुत्वाश्रयातिरिक्तं तदसिद्धम् । अस्ति हि सुवर्णस्यात्यन्तानलसंयोगेऽपि पीतं रूपं न तद्विजातीयम् । तदनुपपन्नमसति द्रवद्रव्यसंबन्धे, पार्थिवे अत्यन्ताग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वनियमात् । जलसंबन्धे तदपगमे च पटादौ दाहादाहदर्शनात् । तदिदं ध्मायमानं कनकं यद्यत्यन्ताग्निसंयोगिपार्थिवत्वे सति विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तं न स्यात्, पूर्वरूपविजातीयरूपवत् स्यात् वह्निसंबद्धघटवत्। अन्यथा पार्थिवं न स्यात् जलं वा स्यात् अग्निसंयोगि वा न स्यात्।

तदयं प्रयोगः--अत्यन्ताग्निसंयोगि पीतं विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तम्, अत्यन्ताग्निसंयोगित्वे सति पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् जलमध्यस्थिताग्नि-संयुक्तपीतपटवत् । यद्वा पीतं सुवर्णं पीतरूपातिरिक्तरूपोत्पत्तिप्रतिबन्धकद्रवद्रव्यसंयुक्तम्, नक्तंदिवमग्निसंयोगेऽपि पीतरूपातिरिक्तरूपानाश्रयत्वात् तावत्पर्यन्तमग्निसंयुक्तजलमध्यस्थ-पीतपटवत् । न चाप्रयोजकत्वम्, विरोधिद्रवद्रव्यसंबन्धं विना पार्थिवेऽत्यन्ताग्निसंयोगस्य विजातीयरूपजनकत्वात् । तच्च द्रवद्रव्यं न जलम्, स्वाभाविकद्रवत्वानाश्रयत्वात्। न चानुद्भूतं तत्, शीतलशिलातलेऽग्निसंयोगाद्दाहदर्शनेनानुद्भूतद्रवत्वस्य दाहाविरोधित्वात् नैमित्तिक-द्रवत्वाच्च । नापि तत एव पार्थिवत्वं, द्रुतपार्थिवस्य विजातीयरूपप्रतिबन्धकत्वे घृतादावपि तथात्वापत्तेः, तत्रापि रूपपरावृत्तिप्रसङ्गाच्च । उपष्टम्भकस्यापि पार्थिवत्वेन विजातीयरूपाप्रतिबन्धकत्वात्।

यद्यपि तेजोऽन्तरं न नैमित्तिकद्रवत्वाधिकरणं, नापि विजातीयरूपप्रतिबन्धकं, किंतु तज्जनकम् ; तथापि प्रत्यक्षद्रव्यत्वेन तस्य रूपवत्त्वे पृथिवीजलान्यत्वेन तेजस्त्वात् धर्मिग्राहकमानसिद्धं तथात्वम् । पीतभागद्रवत्वमपि अग्निसंयोगे न नश्यति, द्रुततेजः प्रतिबन्धादेव जलमध्यस्थाग्निसंयुक्तघृतवदिति ।

अथ यदि द्रुततेजसो विजातीयरूपप्रतिबन्धकत्वं तदा जलस्थपटवत् द्रुतसुवर्णमध्यस्थितपटादेरपि रूपपरावृत्तिर्न स्यादिति चेत्, न । लोके सुवर्णत्वेनानुभूयमाने पीतद्रव्ये अविनिर्भागवर्तिन्युपष्टम्भके द्रुतं तेजो विजातीयं रूपं प्रतिबध्नाति नान्यत्र, तथैवान्वयव्यतिरेकात् । तर्हि उपष्टम्भकत्वमनुभवसिद्धं सुवर्णस्येत्यस्यावश्यकत्वात्, तस्यैव स्वरूपपरावृत्तौ प्रतिबन्धकत्वमस्तु, कृतं दृष्टविजातीयतेजःकल्पनयेति चेत्, न । उपष्टम्भकमात्रे हि विजातीयरूपप्रतिबन्धकस्वभावत्वं द्रुततेजसो धर्मिग्राहकमानसिद्धत्वात् तस्य तेनैव रूपेण सिद्धेः । यदि द्रुतं तेजो रूपपरावृत्तिप्रतिबन्धकं स्यात् पटादिरूपपरावृत्तिमपि प्रतिबध्नीयादिति तर्कस्य तद्विपर्ययस्य च सिद्ध्यसिद्धिव्याहतत्वात् । अनुभूयमानसुवर्णस्य च उपष्टम्भकरूपपरावृत्तिप्रतिबन्धकस्वभावत्वं न धर्मिग्राहक-

मानादन्यतो वा सिद्धं येन पार्थिवे असति विरोधिद्रवद्रव्यसंबन्धे अग्निसंयोगस्य रूपपरावर्तकत्वमन्वयव्यतिरेकसिद्धं परिभूयेते**त्याचार्याः** ।

**नवीनास्तु** -- अत्यन्ताग्निसंयोगेनानुच्छिद्यमानप्रत्यक्षद्रवत्वाधिकरणं तैजसं जलपृथिवीभ्यामन्यत्वे सति रूपवत्त्वाद्वह्निवत् । न चासिद्धिः प्रत्यक्षद्रव्यत्वाधिकरणत्वेन तस्य रूपवत्त्वात् । न च तज्जलम्, सांसिद्धिकद्रवत्वानाश्रयत्वात् नैमित्तिकद्रवत्वाधारत्वात् स्नेहशून्यत्वाद्वा लाक्षावत् । स्नेहे सति स्नेहद्रवत्वाधीनसंग्रहप्रसङ्गात् । न च पार्थिवम्, अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानं यद्द्रवत्वं तदधिकरणत्वात् जलपरमाणुवत् । असति विरोधिद्रवद्रव्यसंबन्धे इति विशेषणम्, तेन क्वथ्यमानजलस्थघृतेन न व्यभिचार: । न चाप्रयोजकत्वम्, अत्यन्तानलसंयोगेन लाक्षादिघृतादिपृथिवीद्रवत्वोच्छेदे पृथिवीद्रवत्वत्वमेव प्रयोजकम्, असति बाधके अनुगतस्य प्रयोजकत्वे संभवति त्यागायोगात् । न च घृतद्रवत्वत्वादिकम्, अननुगमात् । नापि नैमित्तिकद्रवत्वत्वम्, द्रवत्वत्वमेव वा, सुवर्णे द्रवत्वोच्छेदप्रसङ्गात् ।

अथ अपार्थिवमपि सांसिद्धिकद्रवत्वं तैले जन्यजलान्तरे चात्यन्ताग्नि-संयोगादुच्छिद्यते । अतोऽनुगतमेव तृणारणिमणिन्यायेन द्रवत्वोच्छेदप्रयोजकमिति चेत्, न। पृथिवीद्रवत्वोच्छेदे पृथिवीद्रवत्वत्वं, जलद्रवत्वोच्छेदे जन्यजलद्रवत्वत्वम्, द्रवत्वमात्रोच्छेदे च जन्यरसवद्द्रवत्वं प्रयोजकं लाघवात् ।

एतेन विवादविषय: पृथिवी नैमित्तिकद्रवत्वाश्रयत्वात् घृतवदिति सत्प्रतिपक्षत्वमपास्तम् । अनुकूलतर्काभावेन, अग्निसंयोगाद्द्रवत्वोच्छेदप्रसङ्गलक्षण-प्रतिकूलतर्केण च हीनबलत्वात् ।

अथ नैमित्तिकद्रवत्वे पृथिवीत्वं समवायिकारणतावच्छेदकमसति बाधके त्यागायोगादिति चेत्, न । घटादावपि नैमित्तिकद्रवत्वप्रसङ्गात् । न च घृतलाक्षादिषु पृथिवीत्वावान्तरं किञ्चिदेकमनुगतं नैमित्तिकद्रवत्वसमवायिकारणतावच्छेदकमस्ति । पृथिवीनियतनैमित्तिकद्रवत्वं कथमपृथिव्यामिति चेत्, न तावत्तिर्यग्गमनोर्ध्वज्वलनवत् तत्

जातिनियतम्, घटादावभावात् । नापि पृथिवीत्वावान्तरजातिविशेषनियतम्, घृतं विहाय लाक्षादिष्वपि भावात् ।

अथोपष्टम्भके पीतिमगुरुत्वाश्रये पार्थिवे अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्वाधारत्वमनैकान्तिकम् । न हि तेजोद्रवत्वदशायां तदद्रवमेवास्ते, पीतं द्रुतमिति प्रतीतेरिति चेत्, न । तत्र द्रवत्वाभावात् ।

पार्थिवद्रवत्वस्यात्यन्ताग्निसंयोगेनोच्छित्त्यापत्त्या बाधकेन द्रुतप्रतीतेर्भ्रमत्वात् । जलमध्यस्थितमसीक्षोदादेरिव तदवयवानां द्रवद्रव्यसंबन्धेन प्रशिथिलसंयोगाश्रयत्वात्, न तु तेषां द्रवत्वम् । न चैवं घृतादावपि तथा, द्रवत्वे तत्र बाधकाभावात् ।

**अन्ये तु** -- उपष्टम्भके द्रवत्वमुत्पद्यत एव, अनुभवस्य दुरपह्नवत्वात् । अत्यन्ताग्निसंयोगेन तदुच्छेदस्तु न भवति, द्रवद्रव्यस्य तेजसः प्रतिबन्धकत्वात् । न चैवं द्रुततेजसि मानाभावः । तथा हि पीतं द्रवत्वाधिकरणं द्रवत्वोच्छेदप्रतिबन्धकद्रवद्रव्यसंयुक्तम् अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधारपार्थिवत्वात् क्वथ्यमानजलमध्यस्थितघृतवत्। न चाप्रयोजकत्वम्, अत्यन्ताग्निसंयोगेन विरोधिद्रवद्रव्यसंबन्धासंबन्धे पार्थिवद्रवत्वोच्छेदानुच्छेददर्शनात् ।

अथ वा रूपवत्त्वे जलान्यत्वे च सति तैजसत्वपार्थिवत्वसंदेहे विवादाध्यासितं द्रवत्वाधिकरणं तैजसम्, असति द्रवद्रव्यसंयोगे अत्यन्ताग्नि

संयोगेऽप्यनुच्छिन्नानित्यद्रवत्वाधारत्वात् यन्नैवं तन्नैवं यथा जलं घृतं वेति व्यतिरेकी । न चासाधारण्यम्, अगृह्यमाणविशेषदशायां तस्य दोषत्वात् ।

तथा हि यथा साध्याभाववद्व्यावृत्तत्वेन पक्षे तस्य साध्यसाधकत्वं तथा साध्यवद् व्यावृत्तत्वेन साध्याभावसाधकतापि स्यादिति सत्प्रतिपक्षोत्थापकतया तस्य दोषत्वम् । न च साध्याभावसाधकस्य पृथिवीत्वसिद्धिपर्यवसायिनस्तुल्यबलत्वम्, अनुकूलतर्काभावेन हीनबलत्वात् । यदीदं पार्थिवं स्यात् असति विरोधिद्रवद्रव्यसंबन्धे अत्यन्ताग्निसंयोगेनोच्छिद्यमानद्रव त्वाधिकरणं स्यात् तैलवदिति प्रतिकूलतर्केण हीनबलत्वात् । यदीदं

जलान्यरूपवत्त्वे सति तैजसं न स्यात् पार्थिवं स्यात्, यदि च पार्थिवं स्यात् अत्यन्ताग्निसंयोगेनोच्छिद्यमानद्रवत्वाधिकरणं स्यादित्यनुकूलतर्कसद्भावेन प्रतिकूलतर्काभावेन च तैजसत्वसाधकस्याधिकबलत्वात् ।

यदि चासाधारणस्य साध्यतदभाववद् व्यावृत्तत्वेन तदुभयसंशयजनकतया दोषत्वं तथापि विशेषादर्शनसहितस्य संशायकत्वम्, प्रकृते चानुकूलतर्कविशेषदर्शनसहकृतस्य व्यतिरेकिभावेन साधकत्वम् । तस्माद्यदा साध्यतदभावकोटौ न विशेषदर्शनं तदा असाधारण्यस्य दोषत्वम् । न चैवं शब्दोऽनित्यः शब्दत्वादित्यादिकमपि हेतुः स्यात्, विशेषदर्शनदशायामिष्टत्वात् ।

**अन्ये तु** -- तेजस्त्वं नाद्रव(नाद्रुत)रूपवन्मात्रवृत्ति रूपवद्वृत्तिद्रव्यत्वसाक्षाद् व्याप्यजातित्वात् पृथिवीत्ववत् । यद्वा तेजस्त्वं द्रुतवृत्ति रूपवद्वृत्ति-द्रव्यत्वसाक्षाद्दव्याप्यजातित्वात् जलत्ववत् । न च रसवद् वृत्तित्वमुपाधिः, रसवत्त्वं द्रवत्वसमानाधिकरणात्यन्ताभावप्रतियोगि अद्रुतवृत्तिद्रव्यत्वव्याप्यधर्मत्वात् पटत्ववदिति द्रुततेजस्सिद्धौ साध्याव्यापकत्वादिति सामान्यतोदृष्टेन तेजसि प्रसाध्य विवादाध्यासितं द्रुतं तैजसं अत्यन्ताग्निसंयोगेनानुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात्, न यदेवं न तदेवं यथा जलमिति **वदन्ति** ।

अथ (प्रथमानुमाने) (आद्यानुमाने) तेजोमात्रावृत्तित्वमुपाधिः । न च पक्षेतरत्वम् । प्रदीपत्वादेरपि व्यावर्यत्वादिति चेत् , न । बलवद्विपक्षबाधकेन विवादविषये द्रुततैजसत्वसिद्धावुपाधेः साध्याव्यापकत्वात् । एवं च विवादाध्यासिते पार्थिवत्वतैजसत्वसाधकानि यद्यपि बहून्यनुमानानि सन्ति, तथापि विपक्षबाधकतर्कात् तैजसत्वसाधकस्य बलवत्त्वमिति ध्येयम् ।

अथ द्रुतद्रुततरादेः क्रमशः प्रतीतेः प्रबलानलसंयोगेन सुवर्णनाशात् तद्द्रवत्वं नश्यतीत्यसिद्धो हेतुः । न च द्रवत्वप्रागभावासमानाधिकरणद्रवत्वध्वंसरूप उच्छेदो न सुवर्णे, द्रवत्वनाशेऽप्यग्रिमद्रवत्वेनोत्पादात् घृते च तथेति वाच्यम् । सुवर्णे द्रवत्वनाशे सति

विनष्टाश्रये द्रवत्वान्तरस्यानुत्पादेन द्रवत्वप्रागभावासमानाधिकरणद्रवत्वध्वंसस्य सत्त्वादिति चेत्, न । सुवर्णद्रवत्वं हि आश्रयनाशाद्विनश्यति न त्वग्निसंयोगात् । यदि चाग्निसंयोगाद्विनश्येत् तदा घृतवन्न द्रवत्वान्तरमुत्पद्येत, द्रवत्वोच्छेदकाग्निसंयोगस्य द्रवत्वान्तरप्रतिबन्धकत्वात् । तथा च अग्नि (संयोगित्वे) (संयोगे) सति तद्धेतुकनाशा-प्रतियोगिद्रवत्वाधिकरणत्वादिति हेत्वर्थः । अथवा घृते द्रवत्वोच्छेदसमये समानाधिकरणद्रवत्वसामग्रीसमवधानं नास्ति, सुवर्णे त्वस्ति । एवं च समानाधिकरणद्रवत्वसामग्रीसमवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्वावान्तरसामान्यव द्द्रवत्वं हेत्वर्थः।

यद्वा घृतपरमाणौ अग्निसंयोगदशायां द्रवत्वनाशे सति द्रवत्वान्तरं नोत्पद्यते तदारब्धभस्मनि द्रवत्वाभावात् । एवं सुवर्णपरमाणुद्रवत्वमग्निसंयोगाच्च यदि विनश्येत् तदा तदारब्धसुवर्णमद्रवं स्यात् । तथा सुवर्णारम्भकाः परमाणवो न पार्थिवाः अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्वाधिकरणत्वात् जलपरमाणुवत् । तैजसा वा तत एव यन्नैवं तन्नैवं यथा घृतपरमाणुरिति व्यतिरेकी (वा) ।

एवमपार्थिवारब्धं तैजसारब्धं वा सुवर्णमपार्थिवं तैजसं वा अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणपरमाण्वारब्धत्वादित्यन्वयव्यतिरेकी चेति ।

एकदेशी तु द्रवत्वाधिकरणं न तेजः पीतवत् । न चासिद्धिः, पीतं द्रुतमिति प्रतीतेः । पीतत्वे पार्थिवत्वापत्त्या बाधकेन पीतप्रतीतिर्भ्रमः इति चेत्, न । शुक्लत्वेऽप्यपार्थिवत्ववत् पीतत्वेऽप्यपार्थिवत्वे बाधकाभावात् । यथा नैमित्तिकद्रवत्वं पृथिवीत्वे न तन्त्रमतिप्रसङ्गात्, तथा पीतत्वेऽपि गन्धनियतत्वमपि नैमित्तिकद्रवत्ववदेव। पृथिवीजलान्यत्वे सति रूपित्वेन तेज इति चेत्, न । अप्रयोजकत्वात् । अन्यथा जलतेजोऽन्यत्वे सति स्पर्शवत्त्वेन वायोरपि पृथिवीत्वापत्तेः। अथ रूपरसगन्धानामभावात् न तथात्वं, तेषामनुद्भवे च पृथिवी उद्भूतरूपरसगन्धाद्यन्यतमवतीत्यादिबहुविधव्याप्तिविरोध इति चेत्, न । तेजोऽद्रवमेव प्रत्यक्षं, तेजः प्रत्यक्षरूपस्पर्शाद्यन्यतरवदेव, स्वपरप्रकाशकमेवेत्यादिव्याप्तिविरोधस्य

तेजस्यपि सत्त्वात् । द्रवत्वाधिकरणं च न पृथिवीति त्वयैव साधितम् । अतो नैमित्तिकद्रवत्वाधिकरणं पीतं सुवर्णं द्रव्यान्तरमे**वेत्याह**।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे सुवर्णतैजसत्ववादः ।।**

**अथ मनोऽणुत्ववादः**

ननु इन्द्रियजन्यत्वं सुखादिप्रत्यक्षाव्यापकं प्रत्यक्षलक्षणमिति चेत्, न । ज्ञातकरणाजन्यः सुखाद्यनुभवः इन्द्रियजन्यः जन्यप्रत्यक्षत्वात् रूपप्रत्यक्षवत्, जन्यसाक्षात्कारस्येन्द्रियजन्यत्वादिति तत्रापि तल्लक्षणसत्त्वात् । स्पर्शाद्यविषयत्वेन त्वगादिना नार्थान्तरम् । गन्धरूपरसस्पर्शेष्वेकैकमात्रसाक्षात्काराजनकत्वेन पृथिव्यादिभेद-सिद्धौ निःस्पर्शं लाघवान्निरवयवं च मनः ।

तच्च विभु ज्ञानासमवायिकारणसंयोगाधारत्वात् , नित्येन्द्रियत्वात् , नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वात्, विशेषगुणशून्यद्रव्यत्वात्, आत्मादिवत् । न च महत्त्वमुपाधिः, साधनव्यापकत्वादिति ।

ननु सुखादिकं मूर्तसंयोगासमवायिकारणकगुणवृत्तिगुणत्वावान्तरजातियोगि नित्यवृत्त्यनित्यविशेषगुणत्वात् शब्दवत् पाकजरूपवच्चेति चेत्, न । अनात्मवृत्तित्वस्य शब्दभिन्नविशेषगुणग्राहकेन्द्रियाजन्यत्वस्य शब्दस्य द्रव्यत्वेन मूर्तवृत्तिगुणत्वस्य चोपाधित्वात् अप्रयोजकत्वाच्च । कारणे मूर्तत्वस्य गुरुत्वात् । अस्तु वा शरीरात्मसंयोगजन्यत्वेनार्थान्तरम्।

अथ असमवाय्यधीनो विभुकार्याणां प्रादेशिकत्वनियम इति विभुमनोयोगादात्ममात्रे सुखादेरुत्पत्तौ नियतदेशता न स्यात्, अतः अणु मन इति । मैवम् । किमसमवायिकारणं स्वावच्छिन्ने विभुकार्यं जनयतीति नियमः, स्वावच्छिन्ने जनयत्येवेति वा, स्वावच्छिन्न एव जनयतीति वा। आद्ये सुखादेरधिकदेशत्वे आपादकाभावः। द्वितीयेऽणुमनस्संयोगेऽपि स्वावच्छिन्नेऽधिकदेशे च जनयेत् नियामकाभावात् । अन्त्ये तवापि सुखादेरणुमात्रदेशतापत्तिः । मनोवैभवेऽप्यविरोधश्च ।

अथ निमित्तचन्दनाद्यनुरोधेन सुखादौ न्यूनाधिकदेशता निमित्तवायुसंयोगादिव शब्दे न तु असमवाय्यनुरोधात् । तथा च सुखादिकं तदवच्छिन्न एवोत्पद्यत इति चेत्, हन्त! तर्हि वैभवेऽपि तथास्तु । न च विभुकार्यासमवायी स्वावच्छिन्ने कार्यं जनयत्येव भेर्याकाशसंयोग इव शब्दमिति चन्दनाद्यवच्छिन्नेऽपि सुखादिकमुत्पद्येतेति वाच्यम्। तद्देशीयचन्दनसुखे हि तद्देशीयचन्दनसंबन्धसापेक्षोऽसमवायी हेतुरिति कथं तन्निरपेक्षस्तत्कुर्यात् । चन्दनं च स्वावच्छिन्ने सुखजनकं कथं स्वानवच्छिन्नेऽपि तदुत्पादयेत्, कथं वा तद्देशीयचन्दनसुखं तद्देशचन्दनसंबन्धजन्यं तेन विनैवोत्पद्येत ।

अथ मनोवैभवे सुखाद्युत्पत्तौ नियत उपाधिर्वाच्यः । तेन नानानिमित्तसमवधानेऽपि तदवच्छेदेनैकदा सुखदःखादिष्वेकमेवोत्पद्यते, न नाना । एकावच्छेदेन एकदा एक एव विभुविशेषगुण उत्पद्यत इति नियमात् । निमित्तस्य त्ववच्छेदकत्वे नानासुखादिकमुत्पद्येत शब्दवदिति चेत् , न ।

श्रोत्रे कर्णशष्कुल्यवच्छेदेन नानानिमित्तादनेकशब्दोत्पादात् । अन्यथा कोलाहलग्रहो न स्यात् । नानावच्छेदेनैकदा चन्दनदहनादिसंबन्धे सुखदुःखयोश्चैकदा अनुभवसिद्धत्वेनेष्टापादनात् । न च तद्यौगपद्यप्रत्ययो भ्रमः, बाधकाभावात् । न चान्यत्र क्रमादत्रापि क्रमानुमानम्, अन्यत्र क्रमस्य निमित्तक्रमाधीनत्वात् ।

एवं च विवादविषयसुखदुःखानि युगपदुत्पन्नासमवायिकारणकानि युगपदुत्पद्यमानत्वात् युगपदुत्पन्नघटादिवत् । अबाधितानुभवाच्च नासिद्धिः ।

एतेन चरणदुःखं यदि शरीरावच्छिन्नासमवायिहेतुकं स्यात् शरीरव्यापकं स्यादिति निरस्तम् । निमित्तसमवधानस्य तन्त्रत्वेऽस्याप्रयोजकत्वात् । अन्यथा अणुत्वपक्षे शरीरव्यापकं सुखादि न स्यात् । आभिमानिकाभ्यासिकमानोरथिकसुखेषु ज्ञानेच्छाप्रयत्नद्वेषेषु च देशानियमः । शरीरावयवेषु यत्क्रियायामिच्छा तदवच्छेदेन प्रयत्न इति तत्रैव चेष्टा, आवश्यकत्वात् अनियतदेशज्ञानेच्छादौ लघुत्वाच्च । अन्यथा अणुत्वपक्षे प्रयत्नस्याणुदेशत्वं शरीरमात्रदेशत्वं वा स्यात् ।

**अन्ये तु** सुखादौ तन्निमित्तावच्छेदेन आत्ममनस्संयोगोऽसमवायी तन्मात्रसुखाद्युपलम्भात्, न त्वात्ममनस्संयोगमात्रम् **अतिप्रसङ्गादित्याहुः** ।

यावति यत्सुखादिप्रागभावस्तावत्येव तत्सुखादिकमुत्पद्यत **इत्यपरे** ।

**यत्तु** तदितरहेतुसाकल्ये तद् व्यापकत्वेन प्रागभावस्य आवश्यकत्वमिति । **तन्न** । प्रागभावस्याहेतुत्वापत्तेः । तदितरहेतुसाकल्ये तदभावेन कार्याभावाभावात् । एतेन व्यापकमनवच्छिन्नं नेन्द्रियमतिप्रसङ्गादित्याकाशे कर्णशष्कुलीवत् नियत उपाधिर्वाच्यः । स च न शरीरम्, तदवयवमात्रं वा, नियतस्तदवयवी वा, चेष्टाश्रयमात्रं वा । नानावयवावच्छेदेन अव्याप्यवृत्तिसुखाद्युपलब्धेः । एवं च सूक्ष्ममिन्द्रियमुपाधित्वेन कल्पनीयम् । तथा च तदेव मनः , किमुपधेयेन विभुना । तत्र च सर्व एव हेतवो धर्मिग्राहकमानबाधिता इति निरस्तम् ।

इन्द्रियत्वेन तस्य शरीरमात्रस्योपाधित्वेऽपि निमित्तवशात् सुखादेर्नियतदेशतोपपत्तेः। न चैकदा अनेकविषयेन्द्रियसंबन्धे युगपज्ज्ञानानुत्पत्त्या इन्द्रियसहकारितया अनुमितं मनोऽणु, तदेव सुखग्राहकमिन्द्रियं लाघवादिति तद्वैभवहेतवो बाधिता इति वाच्यम् । बुभुत्सावशात् करणधर्मत्वाद्वा, अणुत्वपक्षे श्रोत्रे अनेकशब्दसमवायेऽपि बुभुत्सितमात्रशब्दग्रहवत् व्यासङ्गदशायां युगपज्ज्ञानानुत्पत्तेरुपपत्तेः, अन्यत्र दीर्घशष्कुलीभक्षणादौ युगपज्ज्ञानोत्पत्तेरिष्टत्वादिति ।

**अत्रोच्यते** । व्यासङ्गदशायामिन्द्रियाणां स्वस्वविषयसंबन्धेऽप्येकस्मात् ज्ञानं नान्यस्मादित्यनुभवसिद्धम् । अतो यस्यासंबन्धात् न युगपज्ज्ञानानि तदिन्द्रियसहकारि क्रमेण तदधिष्ठायकं मनः तदेव सुखादिग्राहकमिति तस्य धर्मिग्राहकमानबाधितं विभुत्वम् ।

तथा हि -- चाक्षुषज्ञानवतो मैत्रस्य स्वस्वविषयसंबद्धानि घ्राणरसनत्वक्श्रोत्राणि स्वस्वविषयसाक्षात्कारहेतुसंयोगशून्यानि, तदानीं स्वविषयसाक्षात्काराजनकत्वात्, इन्द्रियासंबद्धघटवत् ।

एकैकं वा पक्षः, अन्यथा हेतुसाकल्ये युगपज्ज्ञानोत्पत्तिप्रसङ्गः । न च वैभवेऽप्यदृष्टविलम्बाद्विलम्बः । तदितरहेतुसाकल्ये तस्यापि सत्त्वात्,

इन्द्रियान्तरविलोपप्रसङ्गाच्च। न च बुभुत्सावशात् क्रमः, दृश्यते हि नृत्यदर्शनवतो बुभुत्सातोऽभिमतविषयान्तरज्ञानमिति वाच्यम् । सा हि न स्वविषयज्ञाने हेतुः अबुभुत्सितेऽपि ज्ञानोदयात् । नाप्यन्यज्ञानप्रतिबन्धिका, घटबुभुत्सायामपि पटज्ञानोदयात् । बुभुत्सा च क्रियाहेतुमनोगोचरप्रयत्नद्वारा इन्द्रियान्तरादाकृष्याभिमतार्थग्राहिणीन्द्रियान्तरे मनो निवेशयन्ती बुभुत्सितग्रहे हेतुरन्यग्रहे प्रतिबंन्धिका च, न तु साक्षात् । अत एव बुभुत्सासत्त्वेऽपि मनोगोचरप्रणिधानाभावे सा न किंचित्करी ।

ननु इन्द्रियमनस्संयोगविशेष एव विषयविशेषग्रहे हेतुः कल्प्यताम् । न चैवं सिद्धकारणभावस्य विशेषकल्पने हेत्वन्तरोच्छेदः, तस्याप्यन्वयव्यतिरेकित्वादिति चेत्, न। इन्द्रियमनस्संयोगे हि विशेषो न जातिरूपोऽनुगतहेत्वभावात् जातिसंकरप्रसङ्गाच्च । नापि सहकारिरूपः, तस्यैव हेतुतापत्तेः ।

अथास्तु करणधर्मत्वेन क्रियाक्रमः । एकं करणमेकत्र एकदा एकावच्छेदेन तुल्यदेशे वा एकजातीयामनेकां क्रियां न करोति, किं तु एकामेव । एकत्रेत्यादिविशेषणात् कुठाराग्निसंयोगशब्देषु न व्यभिचार इति चेत्, तर्हि चक्षुराद्यवच्छेदेन भिन्नदेशीयशब्दवत् परमाणाविव विजातीयामग्निसंयोगवदनेकां क्रियां कुर्यादेव ।

अथ ज्ञानकरणमेकत्रात्मन्येकदा एकमेव ज्ञानं करोति समूहालम्बनकरणवत् । कथमन्यथा नानासामग्रीसत्त्वे समूहालम्बनमेकम् । **यत्तु**- अपरज्ञानसामग्री यदि तदा कार्यावश्यंभावः । तदसत्त्वे किं करणधर्मत्वेन, तस्य सहकार्यन्तरपर्यवसायित्वादिति- **तन्न** । समूहालम्बनसाम्यात् । करणस्यैकदा एकमात्रजनकत्वेनापराजनकतया तत्र कारणाभावेनैव सामग्र्यसत्त्वादिति चेत्, तर्हि पञ्चसु यदेकं जनयति नापराणि तत्र नियामकमास्थेयम् । अन्यथा ज्ञानजनने तेषां कलहं कः समादध्यात् ।

किं चैवं युगपज्ज्ञानानि माभूवन् युगपज्ज्ञानं तु केन वार्यते , एकसमूहालम्बनवत् । न च चाक्षुषत्वादिजातिसंकरापत्तेः नैकज्ञानमिति वाच्यम् । एवं हि फलविरोधेन एकमपि ज्ञानं न जनयेत् अविशेषात् । उत्पद्यतां वा चाक्षुषादिविजातीयं ज्ञानं सामग्रीसत्त्वात् चित्ररूपवत् ।

फलबलात्तत्र तथेति चेत्, तर्हि अत्र फलाभावे हेतुः कल्प्यताम्, अन्योन्यप्रतिबन्धकस्य तत्त्वे वा ज्ञानमेव न स्यात् न त्वेकज्ञानमित्युक्तम् ।

ननु चक्षुरादि न संभूयजनकमन्यविषयेऽन्यस्यासामर्थ्यात् । शीतं सुरभि शुभ्रं चन्दनमित्यत्रेव कारणान्तरानुपनयनाच्च । न च स्वस्वविषयज्ञानायोद्यतमिन्द्रियं कारणान्तरसहकारात् तत्तद्विषयमादायैव स्वस्वविषयं ज्ञापयेदिति वाच्यम् । भिन्नविषयप्रमाणानां संभूयाजनकत्वनियमात् । तत्तदिन्द्रियं तत्तज्ज्ञानांशे जनकमित्यपि न, विषयस्यांशत्वादिति चेत्,

मैवम् । न हीन्द्रियाणां संभूयकारित्वम्, किं त्वार्थः समाजः । प्रत्येकज्ञानसामग्रीसत्त्वात् एकदा नानाज्ञानप्रसक्तौ करणधर्मत्वेन मनः तावद्गोचरामेकामेव ज्ञानक्रियामुत्पादयेत् समूहालम्बनवत् । न चैकक्रियाजननदशायामपरविषयक्रियायां मनो न समर्थमिति कथं तां जनयेदिति वाच्यम् । भिन्नक्रियायामसामर्थ्येऽप्येकक्रियायां सामर्थ्यात् ।

वस्तुतस्तु विशेषाभावादेकामिवापरामपि बुद्धिं जनयेदविशेषात् । न चैकामपीत्यनेकज्ञानोत्पत्तिर्ज्ञानानुत्पत्तिर्वा न त्वेकविषयज्ञानोत्पत्तिरिति नियामक-मास्थेयम्। समूहालम्बने फलबलेन परस्परापेक्षितत्वेनैकैव सामग्री ।

ननु मनोऽणुत्वे कथं मन्दोऽपि बुभुत्सितः शब्दो गृह्यते नान्यः । अथ शब्दे बुभुत्सैवेतरग्रहप्रतिबन्धिका अग्रहस्य तदनुविधानात् । अनन्यगतिककार्यदर्शनात् बुभुत्सितशब्दग्रहसामग्र्येव वा बलवतीति यदि मन्यसे, तदा वैभवेऽपि तत एव युगपज्ज्ञानानुत्पत्तिरिति चेत्, मैवम् । बुभुत्सा न रूपादिग्रहे हेतुः न वा इतरग्रहे प्रतिबन्धिकेत्युक्तत्वात् । किं च रूपादिसकलबुभुत्सायां परस्परप्रतिबन्धादज्ञानं बुभुत्साधीनसामग्रीबलवत्त्वाद्वा सर्वेषां ज्ञानं स्यात् न त्वेकस्य पञ्चावधानस्य । सर्वेषां ज्ञानं भवत्येवेति चेत्, न । तत्रापि क्रमानुमानात् । अन्यथा सर्वबुभुत्साधीनप्रणिधानेऽप्यन्येषां कथं न स्यात्।

नन्वणुत्वेऽपि दशभिः पठ्यमानासु गाथासु तावद्गोचरबुभुत्सायां प्रणिधाने चोक्तरीत्या सर्वेषां ज्ञानमज्ञानं वा न त्वेकज्ञानमिति चेत् ,

**अत्र कश्चित्** । श्रोत्रमनस्संयोगे आत्ममनस्संयोगे वा कश्चिद्विशेषः कार्योन्नेयः किंचिच्छब्दग्रहे हेतुः तदन्यग्रहे प्रतिबन्धक इति ।

**तन्न** । वैभवेऽपीन्द्रियमनस्संयोगविशेषस्य तथात्वे व्यासङ्गोपपत्तेः । अनुगतरूपाभावेन प्रतिव्यक्ति प्रतिबन्धकत्वे हेतुत्वे च व्यभिचारात् । संयोगे च विशेषस्य जातित्वे जातिसंकरः । उपाधित्वे स एव हेतुर्न मनः ।

**अपरे तु** -- प्रत्यक्षानुकूलेन्द्रियमनस्संयोगद्वारा बुभुत्सा प्रणिधानं च प्रत्यक्षहेतुरिति चाक्षुषादिबुभुत्सितग्रहे क्लृप्तत्वात् ताभ्यां श्रोत्रे बुभुत्सितशब्दावच्छेदेन मनः संयुज्यत इति स गृह्यते नान्यः । क्वचित् प्रणिधानं विनैव तथा । अन्यत्र प्रणिधानाधीनक्रियया अश्रूयमाणशब्दावच्छिन्नात्मनो विभज्य बुभुत्सितशब्दावच्छेदेन मनः संयुज्यत इति तद्ग्रहो न सर्वस्येति ।

तत्तुच्छम् । युगपदुत्पद्यमानासु विंशतौ गाथासु तावद्गोचरबुभुत्सायां प्रणिधाने च तावद्गाथावच्छेदेन मनस्संयोगाद्युगपत् तासामुपलम्भप्रसङ्गात्, प्रत्येकसामग्रीसत्त्वात्, निकटाहन्यमानढक्कादिशब्दानां श्रोत्रव्यापकत्वनियमाच्च ।

अथ यत्र कोलाहले श्रूयमाण एव बुभुत्सितशब्दग्रहः तत्रोभयशब्दावच्छेदेन मनस्संयोगादुभयग्रहः कोलाहले तूपेक्षाज्ञानं तदिति तथात्रापीति चेत्, तर्हि कृतमनया कुसृष्ट्या । अबुभुत्सिते उपेक्षाज्ञानमेवास्तु । न च तदपि । इतो न शब्दान्तरमश्रौषमित्यनुभवात् । अन्यथा वैभवेऽपि व्यासङ्गदशायामितरेषामुपेक्षाज्ञानमेवेति ।

**अत्रोच्यते** । यद्यपि बुभुत्साप्रणिधाने न शब्दग्रहमात्रे सहकारिणी न वेतरग्रहप्रतिबन्धके, तथापि नानाशब्दसमवायदशायां यः शब्दग्रहस्तत्र तयोस्तथाभावः तथैव तयोरन्वयव्यतिरेकनियमात् । यद्वा कोलाहले श्रूयमाण एव बुभुत्सितग्रह इत्यन्येऽपि कोलाहलत्वेन तद्विषया एव । बहूनां चैकदा समवाये युगपत्संनिधाने वा व्यक्तिग्रहे

तद्गतगत्वकत्वादिग्रहो न भवति । अगृहीतकत्वादिनानाशब्दस्य कोलाहलबुद्धिविषयत्वात् । तस्यां दशायां बुभुत्सितशब्दकत्वादिजातिग्रहे बुभुत्सैव शरणम् । एककालीनबहुशब्दबुभुत्सा च न हेतुर्व्यभिचारात् ।

**यत्तु** कोलाहलात् अन्यत्रैकदा नानाशब्दग्रहे श्रोत्रं न समर्थम् , किं तु एकशब्दग्रहे विनिगमिका बुभुत्सैवेति । **तन्न** । एकगीयमानापेक्षया एकदा नानागीयमानसजातीयगीतादिषु सुखादिवैलक्षण्यानुभवात् ।

अथ दीर्घशष्कुलीभक्षणे कथं पञ्च ज्ञानानि । क्रमस्तत्रेति चेत् , न । ज्ञानानां यौगपद्यप्रत्ययस्य बाधकं विना प्रमात्वात् । व्यासङ्गो बाधक इति चेत् , तर्हि मनोऽवयव्यस्तु । तेन संकोचविकासाभ्यामुभयमुपपद्यत इति **केचित्** ।

तन्न । यदि हि संकोचविकासहेतुरदृष्टं तर्हि तत एव तदुभयमस्तु कृतं मनसा । नाप्येकपञ्चबुभुत्सया तौ भवतः, तस्या अहेतुत्वात् । हेतुत्वे वा अस्तु विभु मनः, अवयवितो लघुत्वात् । अथ यथा क्वचिद्बुभुत्सया क्वचित्तीव्रविषयेन्द्रियसंनिकर्षात् इन्द्रियमनस्संयोगः, एवं मनस्संकोचविकासयोः बुभुत्सादिकं हेतुरिति चेत्, तर्हि पञ्चबुभुत्सायां प्रणिधाने च सर्वदा सर्वेषां पञ्च ज्ञानानि जायेरन् । पञ्चावधानज्ञाने क्रम एव ।

एतेन अणु मन: पञ्चतयमस्तु अवयवितो लघुत्वात्, बुभुत्सादिवशात्तेषामेकपञ्चेन्द्रियसंबन्धादुभयमुपपद्यत इति निरस्तम् । पञ्चबुभुत्सायां सर्वेषां पञ्चेन्द्रियसंबन्धे व्यासङ्गानुपपत्तेः । कथं तर्हि दीर्घशष्कुलीभक्षणे गन्धरसरूपस्पर्शशब्दान् प्रत्येमीत्यनुव्यवसाय: क्रमिकज्ञानपञ्चतयेन युगपत् मनस्संनिकर्षाभावादिति चेत्, न । अनुव्यवसायस्यैकत्वासिद्धेः अनुव्यवसाया: पञ्चैव, समयसौक्ष्म्यात्तेषां क्रमो न गृह्यते ।

अथ वा क्रमिकानुव्यवसायाहितसंस्कारात् पञ्चज्ञानविषयस्मृतावनुभवत्वारोपात् युगपत् प्रत्येमीत्यनुव्यवसाय:। विभुत्वे हेत्वभावात् आत्ममनस्संयोगाभावात्

नात्मसुखाद्युपलम्भः स्यात् । द्रव्यत्वेनात्मसंयोगित्वसाधने त्वजसंयोगसिद्धौ तत एव तद्विभागित्वेऽपि सर्वदा तयोः परस्परविरुद्धसंयोगविभागप्रसङ्गः ।

ननु अणुत्वेऽसमवाय्यनुरोधात् चेष्टाहेतुप्रयत्नस्याणुदेशत्वं शरीरदेशमात्रत्वं वा स्यात्, न तु शरीरतदवयवदेशत्वं येन क्रियानियमो भवेत्, नियामकाभावात् । न च नोदनाभिघातादिवाव्यापिनोऽपि प्रयत्नात् शरीरादिक्रिया, अतिप्रसङ्गात्। एवमेकदा विंशतिप्रयत्नाभावात् कथमङ्गुलीषु विंशतिः क्रियाः । न च यौगपद्यभ्रमः, बाधकाभावात्। युगपत्संनिकर्षाभावेनाङ्गुल्यश्चलन्तीति समूहालम्बनानुपपत्तेः । विंशतिज्ञानानामेकदानु-व्यवसायासंभवात् अग्रपश्चाद्भावे विनिगमकाभावाच्च । क्रमोत्पादे च भ्रूनयनकरचरणादि-सकलशरीरावयवानां युगपद्विचित्रनानाकर्मसमूहरूपं नृत्यं न प्रत्यक्षं स्यात् । तथा च प्रत्येककर्मजन्यसुखात् विलक्षणसुखविशेषो नानुभूयेतेति ।

अत्र ब्रूमः । सुखे चन्दनादिवत् चिकीर्षैव नियामिका । यत्क्रियायां चिकीर्षा सा क्रिया तच्चिकीर्षाजन्यात् प्रयत्नाद्भवति । तत्र शरीरक्रियापि तच्चिकीर्षाजन्यादणुमात्रदेशादपि प्रयत्नात् भवति । अथ वा यस्य क्रियायां चिकीर्षा तदवच्छेदेन प्रयत्न उत्पद्यते । तेन शरीरावच्छेदेनोत्पन्नप्रयत्नादेव शरीरक्रिया । एवं विंशतिक्रियाचिकीर्षाजन्यादणुमात्रदेशादपि प्रयत्नात् विंशतिक्रिया युगपदुत्पद्यन्ते । अथवा अङ्गुलीविंशतिक्रियायां चिकीर्षेति विंशत्यवच्छेदेन विंशतिप्रयत्नाद्विंशतिक्रियाहेतव उत्पद्यन्ते ।

एवं नृत्यादावपि एतच्चिकीर्षानुविधानात् क्रियाप्रयत्नयोरध्यवसेयम् ।

तदेवम् अणुमनस्सिद्धौ तद्ग्राह्याः आत्मविशेषगुणा बुद्धिसुखादय इति नाव्यापकं प्रत्यक्षलक्षणम् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मनोऽणुत्ववादः।।**

## अथानुव्यवसायवाद:

ननु वर्तमानं ज्ञानं न मानसम् , किंतु स्वयमेव स्वव्यवहारहेतुः, स्वस्मिन् सत्येव स्वव्यवहारात्, न तु ज्ञानान्तरमपेक्षते तदन्वयतिरेकाननुविधानात् । ज्ञानान्तरविरहदशायां

स्वविरहादेव स्वव्यवहारविरहात् , स्वत एव  स्वव्यवहारोपपत्तौ ज्ञानान्तरकल्पने गौरवाच्च । घटादिव्यवहारे ज्ञानान्वयव्यतिरेकादस्तु तदपेक्षा । स्वीयमतीतमनागतं परकीयं च ज्ञानं स्वव्यवहारे ज्ञानान्तरमपेक्षत एव, व्यवहारकाले तदभावात् ज्ञानान्तरान्वयव्यतिरेकानु-विधानाच्च ।

नन्वेवमिच्छादिकमपि स्वव्यवहारज्ञानं नापेक्षेत, ज्ञानतुल्यतया स्वयमेव स्वव्यवहारशक्तत्वादिति चेत्, न । व्यवहारस्य ज्ञानजन्यत्वनियमेनेच्छादिव्यवहारे ज्ञानापेक्षणात्।

अथ ज्ञानमात्रं न व्यवहारहेतु:, अतिप्रसङ्गात् । किंतु व्यवहर्तव्यविषयमिति ज्ञानव्यवहारोऽपि तद्विषयज्ञानान्तराद् भवेदिति चेत्, सत्यम् । स्वस्यैव स्वविषयकत्वात्। यद् व्यवहारानुकूलशक्तियोगि यज्ज्ञानं तस्यैव तद्विषयकत्वात् । शक्तिश्च पदार्थान्तरं, न कारणतेति नान्योन्याश्रय: । स्वव्यवहारे ज्ञानं शक्तमिति स्वविषयकम् । व्यवहारशक्तिसमवायादयश्च स्वभावत एव तदीयाः संबन्धान्तरेऽप्यनवस्थानात् स्वभाव एव शरणम्।

एतेन भेदनियतो विषयविषयिभावः कथमभेदे इति निरस्तम् । स्वव्यवहारशक्तत्वस्य स्वविषयत्वस्याभेदेऽपि संभवात् ।

अस्तु वा ज्ञानस्य स्वभावविशेष एव स्वविषयत्वम् । संबन्धं विनैव स्वभावविशेषात् यथा ज्ञानं घटीयं घटव्यवहारजननयोग्यं स्वीयमपि तथा । कोऽसौ स्वभावविशेष इति चेत्, न। आख्यातुमशक्यत्वेऽप्यनुभवसिद्धस्य स्वभावविशेषस्य माधुर्यादिविशेषवत् प्रत्याख्यातुमशक्यत्वात् । यद्यपि  स्वभावविशेष इति वाक्येनाख्यायते एव, तथापि पदेनाख्यातुमशक्यत्वात् ।

अथ व्यवहारो व्यवहर्तव्यभिन्नज्ञानसाध्य: कथं तेन विना स्यादिति  चेत्, न । व्यवहारं प्रति व्यवहर्तव्यज्ञानत्वेन हेतुत्वात्, न तु व्यवहर्तव्यभिन्नज्ञानत्वेन गौरवात् ।

समूहालम्बनं च एकैकव्यवहारजनकत्वादेकैकविषयकमपि, न तु समूहविषयकमेव, अतिरिक्तस्य तस्यासत्त्वेन संनिकर्षाभावात् ।

भ्रमस्थले रजतव्यवहारानुकूला शक्तिरस्त्येव रजतज्ञाने । किं तु दोषादभिभूतैव सा जायत इति न तया रजते व्यवहारः । रजतज्ञानं न शुक्तौ प्रवर्तकम् किं तु इन्द्रियजन्यमिदंज्ञानमेव । रजतार्थिप्रवृत्त्यर्थं तु उपस्थितरजतभेदाग्रहमपेक्षत इति रजतज्ञानं कारणतावच्छेदकम् । एवं च स्वविषयत्वं स्वप्रकाशत्वम्, न तु स्वव्यवहारे ज्ञानान्तरानपेक्षत्वम्, गौरवात् । अन्यथा ज्ञानस्य स्वाविषयत्वेन संस्काराभावात् स्मरणं न स्यात् ।

**यत्तु** स्वव्यवहारे ज्ञानान्तरानपेक्षत्वमुक्तम् , तत्स्वप्रकाशत्वनिर्वाहकतया । प्रमाणं च स्वप्रकाशे प्रत्यक्षमेव ।

सर्वाः प्रतीतय इदमहं जानामीत्येवमाकाराः ज्ञातारं ज्ञानं ज्ञेयं चोल्लिखन्त्यो जायन्ते। तत्र आत्मा कर्तृत्वेन ज्ञेयं कर्मतया ज्ञानं क्रियात्वेन भासते । अतो ज्ञातृज्ञेयस्वविषयं ज्ञानमनुभूयत इति त्रिपुटीप्रत्यक्षवादिनः ।

ननु इदमिति व्यावसायः तदुत्तरमिदमहं जानामीत्यनुव्यवसायो मानस इति चेत्, न। स्वप्रकाशत्वेनोपपत्तौ ज्ञानान्तरकल्पने गौरवात् , परिशेषाच्च स्वप्रकाशत्वम्। परप्रकाशत्वे हि ज्ञानमेव न सिध्येत् मानाभावात् । न हि तत्र ज्ञातता लिङ्गम् । अतीतानागतयोस्तदभावात् । नापि मानसं प्रत्यक्षम् । अजिज्ञासितस्य मानसत्वे ज्ञानाविरामादनवस्थानात्, विषयान्तरासंचाराच्च । जिज्ञासितस्य ग्राह्यत्वे ज्ञानं न मानसं जिज्ञासाग्राह्यात्मधर्मत्वात् संस्कारवदित्यनुमानप्रतिरोधः । अत एव जिज्ञासां विनैव सुखादीनां मानसत्वम् ।

जिज्ञासापि ज्ञानसाध्येत्यनवस्था, धर्मिज्ञानेच्छादिभिर्ज्ञानस्य नाशाच्च न प्रत्यक्षत्वम्।

अथ ज्ञानं मानसप्रत्यक्षं प्रत्यक्षात्मगुणत्वात्, आत्मविशेषगुणत्वे सति क्षणमात्रस्थायित्वात् सुखवत्, ज्ञानं प्रत्यक्षजनकेन्द्रियसंनिकर्षाश्रयः प्रत्यक्षत्वात् सुखवदिति चेत्, न । मानसत्वेऽनवस्थानात् ।

अत एव चक्षुर्जन्यं ज्ञानं न चक्षुर्जन्यज्ञानविषयः प्रत्यक्षत्वात् रासनवत्, नैतज्ज्ञानविषयो वा, एतज्जनकेन्द्रियसंनिकर्षानाश्रयत्वात् गगनवत् । चक्षुः न चाक्षुषज्ञानग्राहकं बहिरिन्द्रियत्वात् रसनवदिति प्रतिपक्षानुमानमपास्तम् । परप्रकाशत्वेऽनवस्थया ज्ञानासिद्धौ आश्रयासिद्धेः । स्वप्रकाशत्वेन तत्सिद्धौ धर्मिग्राहकमानबाधात् ।

किं च स्वव्यवहारशक्तत्वं स्वविषयत्वं, तच्च स्वसंनिकर्षाजन्यत्वे स्वाजन्यत्वे च न विरुद्धम् । न च स्वव्यवहारे शक्तत्वस्याभाव एव साध्यः, अप्रयोजकत्वात्। स्वसंनिकर्षाजन्ये स्वाजन्ये व्यवहारशक्ते घटादौ व्यभिचाराच्च ।

अत एव स्वप्रकाशत्वेन पूर्वानुभवविषयता तत्तानुभूतमात्रविषये स्मरणे उत्सर्गतो भासते ज्ञानान्तरस्यानावश्यकत्वात् । स्वस्य स्वाजन्यत्वे कथं स्वकर्मतेति चेत्, न। अतीतानागतयोरिव स्वविषयत्वं न तु कर्मत्वम् । विषयत्वं चाभेदेऽपि । स्वव्यवहारशक्तत्वस्य ज्ञानस्वभावविशेषस्य वा विषयत्वात् । न चाधीकर्मतया शशश‍ृङ्गवदसत्त्वम् । तस्य कदाप्यप्रकाशात् । धीजन्यव्यवहारभागित्वं कर्मत्वं स्वप्रकाशेऽपि, तदन्यफलभागित्वं च घटेऽप्यसिद्धम्, ज्ञाततानिषेधात् । ज्ञानानपेक्षेन्द्रियसंनिकर्षजं ज्ञानं प्रत्यक्षम्, अतः सर्वं ज्ञानं ज्ञानानपेक्षात्ममनस्संनिकर्षजन्यत्वेन स्वात्मनि प्रत्यक्षम् । विशिष्टप्रत्यक्षं च न विशेषणज्ञानजन्यम्, निर्विकल्पकनिषेधात् ।

सविकल्पकत्वेन ज्ञानाजन्यज्ञानं वा प्रत्यक्षम् । तेन निर्विकल्पकजन्यं जातिविशिष्टज्ञानं प्रत्यक्षम्, न त्वसाधारणेन्द्रियादिकरणकम्, तेन विनापि अनुमित्यादौ स्वात्मप्रकाशात् । इन्द्रियादिकं तु अर्थप्रकाश एव हेतुः, तस्यैव तत्प्रतिबद्धहेतुजन्यत्वादिति

।

अत्रोच्यते । प्रत्यक्षं न स्वप्रकाशे प्रमाणम्, व्यवसायानामिदमहं जानामीत्याकारासिद्धेः । न चैवमनुभवविरोधः, अर्थनिश्चयेन प्रवृत्त्यादिदर्शनात् । व्यवसायस्यार्थविषयत्वमात्रमनुभूयते न तु स्वविषयत्वमपि, गौरवेण तस्य स्वविषयभानतया प्रवृत्त्यहेतुत्वात् । अनुभवोऽपीदं रजतमित्याद्येव।

न चैवमिदमहं जानामीत्यनुभवापलापे उपेक्षणीयता । व्यवसायोत्तरकालं तदुपगमात्, इदं रजतमित्यादिलौकिकानुभवात् व्यवसायस्य तदाकारतां निषेधामो न त्वनुव्यवसायस्य।

ननु भिन्नानुव्यवसायेऽनवस्थानात् व्यवसाय एवानुव्यवसाय इति चेत् , तर्हि परप्रकाशे बाधकात् स्वप्रकाशत्वसिद्धौ सर्वप्रतीतीनाम् इदमहं जानामीत्याकारतासिद्धिः। तथा च स्वप्रकाशत्वासिद्धौ सर्वप्रतीतीनामिदमहं जानामीत्याकारत्वमसिद्धमिति न सा प्रतीतिः स्वप्रकाशत्वे प्रमाणम् ।

अपि च क्रियायाः कृतेर्वा समवायित्वं कर्तृत्वम्, परसमवेतक्रियाफलशलित्वं करणव्यापारविषयत्वं वा कर्मत्वम्, धात्वर्थत्वमन्यद्वा क्रियात्वम्, इदमहं जानामीति व्यवसाये न भासते, तद्बोधकेन्द्रियसंनिकर्षाभावात् । किं तु इदंविषयकज्ञानत्वविशिष्टस्य ज्ञानस्य वैशिष्ट्यं आत्मनि भासते । न च स्वप्रकाशे व्यवसाये तादृशं स्वस्य वैशिष्ट्यं भासितुमर्हति, पूर्वं विशेषणस्य तस्याज्ञानात् । तस्मादिदमहं जानामीति न व्यवसायः, किंत्वनुव्यवसायः ।

स्यादेतत् । कर्तृत्वादिज्ञानवैशिष्ट्यमात्मनि मा ज्ञायि, व्यवहारस्य स्वविषयकज्ञानसाध्यत्वसिद्धौ तदेव ज्ञानं स्वविषयकं कल्प्यते लाघवात् । ज्ञानवित्तिवेद्य आत्मापि तद्विषय इत्यात्मविषयत्वं सर्ववित्तीनामिति चेत्, न । स्वजनकेन्द्रियसंनिकर्षानाश्रयत्वेन स्वस्य स्वाविषयत्वात्, विषयत्वनियामकेन्द्रियसंनिकर्षा-देरभावे स्वविषयत्वानुपपत्तेः, कारणं विना कार्यानुत्पादात्, प्रत्यक्षाजनकस्य

प्रत्यक्षविषयत्वानुपपतेश्च । आत्मधर्मप्रत्यासत्त्यनाश्रये प्रत्यक्षविषयताया जनकत्वव्याप्तत्वात्। ज्ञानस्य प्रत्यक्षत्वेन इन्द्रियसंनिकर्षाश्रयत्वात् मनस्संनिकर्षजन्यत्वेन मानसत्वम् ।

तदयं प्रयोगः -- विवादाध्यासितमिन्द्रियजन्यं ज्ञानं नैतज्ज्ञानविषयाश्रयः एतज्जनकेन्द्रियसंनिकर्षानाश्रयत्वात् एतदजनकत्वाद्वा असंनिकृष्टवत् । नैतज्ज्ञानविषयकं वा आत्मधर्मप्रत्यासत्त्यनाश्रयत्वे सति एतदजन्यत्वे च सति साक्षात्कारित्वात् । प्रत्यक्षविषयो ज्ञानं स्वप्रत्यक्षजनकेन्द्रियसंनिकर्षाश्रयः प्रत्यक्षविषयत्वादिति मनस्संनिकर्षग्राह्यम्। चाक्षुषं ज्ञानं न चक्षुर्जन्यज्ञानविषयः, चक्षुरसंनिकृष्टत्वात् घटवत् ।

ज्ञानं प्रमेयमेवेति व्याप्तिज्ञानं ज्ञानत्वप्रत्यासत्त्या स्वविषयम् । ईश्वरज्ञानमहेतुकत्वेन सर्वविषयत्वात् स्वप्रकाशम् ।

ननु परप्रकाशकत्वे ज्ञानमेव न सिध्येत् अनवस्थानादिति धर्मिग्राहकमानात् स्वप्रकाशत्वसिद्धौ अनन्यगतिकतया स्वस्यासंनिकृष्टस्यापि प्रत्यक्षविषयत्वम् ,अतो धर्मिग्राहकमानबाधितास्त्वदीयहेतव इति चेत्, न । वित्तेरवश्यवेद्यत्वाभावेनानवस्थाविगमात्। संयुक्तसमवायेन मनोवेद्यत्वाभावादपेक्षणीयान्तराभावाच्च उत्पन्नैव कुतो नावश्यवेद्येति चेत्, न । सुखादितद्बुद्ध्यादिसामग्र्या प्रतिबन्धात्, विषयान्तरसंचारदर्शनेन तस्या बलवत्त्वात् अनुद्भवादिति **केचित्** ।

योग्यात्मविशेषगुणत्वात् ज्ञानत्वात् ज्ञानं प्रत्यक्षमेवेति व्याप्ते: वित्तेरवश्यवेद्यत्वेन स्वप्रकाशत्वमिति चेत्, न । व्याप्तेरसिद्धेः, परप्रकाशकत्वेऽनवस्थानात् । स्वप्रकाशे कारणानुपपत्तेः संनिकृष्टमेव प्रत्यक्षं तद्विषयजन्यमेव प्रत्यक्षमिति व्याप्तेश्च । अन्यथा कारणं विना कार्यानुत्पत्तिव्याप्तेर्विनिगमकं कारणसत्त्वेऽपि प्रतिबन्धात् कार्यानुत्पादे कारणत्वमप्रत्यूहयम् । क्लृप्तकारणं विना कार्योत्पादे कारणताभङ्गः कार्यानुत्पादश्च ।

अपि च परप्रकाशेऽनवस्थानात् परिशेषानुमानेन ज्ञानस्य स्वप्रकाशत्वम् । तथा च स्वप्रकाशत्वानुमितेरपि स्वप्रकाशत्वमनुमित्यन्तरगम्यमेवं तस्यापीत्यनवस्था स्वप्रकाशत्वानु-

मितिपरम्परादद्वारा तवापि स्यात् । विषयान्तरसंचारस्य प्रतिबन्धकत्वं यावज्जिज्ञासं वा स्वप्रकाशत्वानुमितिरिति यदि, तुल्यं परप्रकाशत्वेऽपि ।

न च ज्ञानं स्वप्रकाशमित्यनुमित्या स्वप्रकाशत्वमपि सामान्यप्रत्यासत्त्या विषयीकृतमिति वाच्यम् । परतः पक्षेऽपि तुल्यत्वात्  त्वया तदनभ्युपगमाच्च ।

किं चानुमित्यादौ जातिसङ्करान्न (तव) प्रत्यक्षत्वम् । न च ज्ञानसापेक्षं मनो जनकमित्यनुमितिविषयवदात्मनि न तत्प्रत्यक्षम् । तस्य स्वविषयत्वे ज्ञानानपेक्षेति चेत्, न। ज्ञानं ज्ञानजन्यं, तच्च स्वविषये स्वात्मन्येकमेवेति कथं तदपेक्षं तदनपेक्षं च विरुद्धत्वात् । न च ज्ञानभिन्नविषयत्वं सापेक्षम्, तथात्वे बहिर्ज्ञानं प्रत्यक्षं न स्यात्। अथान्यस्यान्यविषयत्वे संनिकर्षादिर्नियामकः, स्वविषयत्वे किं तेन, अनतिप्रसङ्गात् संनिकर्षस्याननुगमाच्च । व्यवहारे शक्तत्वं विषयत्वमभेदे  संनिकर्षं विनापीति चेत्, न । अन्यत्र प्रत्यक्षमात्रे संनिकर्षस्य हेतुत्वात्, अन्यथाननुगमापत्तिः । अथ या वित्तिः न वेद्या सा प्रमाणाभावादसतीति तदधीनसत्त्वस्य विषयपर्यन्तस्यासत्त्वं स्यादिति चेत्, न । अविरललग्नतद्वित्तिवित्तिधारा नाभ्युपेयते । किं नाम केनचित्कदाचित्काचिद्वित्तिर्व्यवहार-स्मरणलिङ्गादिना प्रतीयत इति सर्वा प्रमाणसिद्धैवेत्यभ्युपगमात् ।

अथ स्यादेवं यदि घटोऽयं घटमहं जानामीत्यतोऽधिका घटवद्वित्तिधारावाहिविषयशतभारमन्थरा काचिद्वित्तिरस्मदादेरुत्पद्यमानानुभूयेत । न चैवम्, इति चेत् , न। अनुव्यवसायो विषयमात्रनिरूप्यः, न तु तद्विषयपरंपरानिरूप्यो गौरवात् । तथा च ज्ञानज्ञानत्वेन सर्वा वित्तिरस्मदादेरुत्पद्यमाना अनुभूयत एव । न चैवमनिर्मोक्षः । योगजधर्मप्रत्यासत्त्या सामान्यलक्षणया वा व्याप्तिज्ञानरूपस्याननुव्यवसाय-स्यापि स्वविषयत्वाभ्युपगमात् । न च तद्व्यवहारशक्तत्वं तद्विषयत्वम् । तद्विषयत्वेन तद्व्यवहारकारणत्वग्रहे सति तच्छक्तत्वज्ञानं, तच्छक्तत्वं च तद्विषयत्वमित्यन्योन्याश्रयात् कारणत्वग्रहं विना शक्तेरग्रहात्, त्वन्मतेऽपि रजतज्ञानस्य शुक्तिविषयत्वापत्तेश्च । रजतार्थिप्रवृत्तौ रजतज्ञानं हेतुः, न तु तदवच्छेदकमित्युक्तत्वात्। लाघवेन स्वविषये ज्ञानस्य

प्रवर्तकत्वम् सर्वैरेवाद्यप्रवृत्तौ तथावगमादिति चेत्, हन्तैवमन्यथाख्यातिरस्तु न तु अन्यथासिद्धरजतज्ञानस्याप्रवर्तकत्वमिति ।

एतेन यथा तद्गुणसंविज्ञानबहुव्रीहिसिद्धं कुटादिपदमशक्यमपि कुटं गणमादायैव प्रधानमन्यपदार्थं बोधयति तथा ज्ञानमविषयमप्यात्मानमादायैव स्वविषये व्यवहारं करोति संस्कारं च। स्वजन्यव्यवहारविषये ज्ञानस्य संस्कारजनकत्वात् । स्वजन्यव्यवहारविषयः स्वात्मा विषयश्चेति प्राचीनं गुरुमतमपास्तम् ।

अन्यत्र लाघवेन ज्ञानस्य स्वविषये व्यवहारसंस्कारजनकत्वकल्पनात् स्वविषये स्वात्मनि व्यवहारसंस्काराजनकत्वात् । व्यवहारसंस्कारयोः स्वविषयज्ञानसाध्यत्वेन स्वाविषयकज्ञानासाध्यत्वात् ।

ननु ज्ञानस्य मानसत्वे कथं जानामीति विशिष्टबुद्धिः ज्ञानत्वनिर्विकल्पकजन्यज्ञानक्षणे विशेष्याभावेन प्रत्यक्षानुत्पत्तेरिति चेत्, न । ज्ञाननाशक्षणे एव ज्ञाने ज्ञानत्वविशिष्टबुद्धिः विशेष्यस्य पूर्वक्षणसत्त्वात् । प्रत्यक्षे स्वसमयवर्तितया गौरवेण विशेष्यस्याहेतुत्वात् । जानामीति वर्तमानत्वेन स्थूल उपाधिर्भासते, न तु क्षणः, तस्यातीन्द्रियत्वात् । ततो ज्ञानविशिष्टबुद्धिरात्मनि विशेषणज्ञानस्य पूर्वसत्त्वात् । विशेषणं च न विशिष्टप्रत्ययहेतुः गौरवात्, किं तु तज्ज्ञानम्, आवश्यकत्वात् । अत एव तत्तां विनापि तद्बुद्धेः प्रत्यभिज्ञा।

यत्तु व्यवसायनाशक्षणोत्पन्नव्यवसायान्तरे ज्ञानत्वविशिष्टबुद्धिरिति । तन्न । तद्धेतोरभावात् । अनुमिनोमीत्यादावनुव्यवसाये अनुमितित्वाभावाच्च । यद्वा ज्ञानं ज्ञानत्वं च निर्विकल्पके भासते, ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने ज्ञानवैशिष्ट्यं चात्मनि भासते । विशेष्ये विशेषणं, विशेषणे विशेषणान्तरं च भासत इत्येव हि विशिष्टवैशिष्ट्यार्थः ।

वस्तुतस्तु ज्ञानमभाव इव विशिष्टज्ञानविषय एव, अनुव्यवसायस्य विषयरूपविशेषणविषयकव्यवसायसाध्यत्वेन विशिष्टज्ञानसामग्रीसत्त्वात् । ज्ञानत्वमपि तत्र भासते तज्ज्ञानसामग्रीसत्त्वात् । अंशे तत्सप्रकारकं निष्प्रकारकं चेति नरसिंहाकारम् । तत्रैव

विशिष्टज्ञाने ज्ञानत्ववैशिष्ट्यं भासते । अनुमिनोमीत्यादौ तु न तथा, अनुव्यवसायेऽनुमितित्वाभावादिति।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अनुव्यवसायवादः।।**

## अथ निर्विकल्पकवादः

तच्च प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति । तत्र नामजात्यादियोजनारहितं वैशिष्ट्यानवगाहि निष्प्रकारकं निर्विकल्पकम् । ननु ज्ञानत्वं सविकल्पकभिन्नवृत्ति इत्यत्र किं मानम् । न प्रत्यक्षम्, असिद्धेः, अतीन्द्रियत्वाभ्युपगमाच्च। न च व्यवहारः, तस्य सविकल्पकसाध्यत्वात् । नापीदं न विवेचितं पूर्वमधुना विवेचयामीत्यनुभवप्रमाणकावालोचनविकल्पौ, बहुविशेषणज्ञानाज्ञानाभ्यां तदुपपत्तेः ।

ननु गौरिति प्रत्यक्षं विशेषणज्ञानजन्यम् विशिष्टज्ञानत्वात् अनुमितिवदिति । अथ विशेषणविशेष्यज्ञानसामग्रीतः साकाङ्क्षोभयविषयमेकं विशिष्टज्ञानम् । तत्र प्रत्यक्षे योग्येन्द्रियसंनिकर्षात्, अनुमितौ पक्षधर्मताबलात् व्यापकत्वावच्छेदकप्रकारेण, शाब्दे योग्यतादिवशात् पदार्थतावच्छेदकरूपेणापूर्वमेव विशेषणं भासते, उपमितावप्येवमेवेति न क्वापि विशेषणज्ञानं जनकम् । न च प्रत्यभिज्ञायां तत्तानुभवस्तथा । तत्तानुभवेऽपि संस्कारस्यानुद्बोधात्, विलोपाद्वा प्रत्यभिज्ञानानुत्पादेन उद्बुद्धः संस्कार एव प्रत्यासत्तितया विशेषणज्ञानार्थमिन्द्रियसहकारी । सुरभि चन्दनमित्यादावपि विशेषणज्ञानार्थं तज्ज्ञानं प्रत्यासत्तिस्थानीयमिन्द्रियसहकारि । भ्रमो विशिष्टज्ञानमेव नास्तीति चेत्,

उच्यते। साध्यप्रसिद्धिपदार्थोपस्थितिवाच्यत्वज्ञानतत्तानुभवानामनुमित्यादिहेतुत्वम् । साध्यप्रसिद्ध्यादिकं विना अनुमित्यादेरसंभवात् । साध्यादिकं च विशेषणमिति तज्ज्ञानमनुमित्यादिहेतुः । यद्यपि अनुमित्यादिप्रत्येकं प्रति साध्यादिविशेषणज्ञानत्वेन न कारणता । तथापि विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन कारणता, बाधकाभावात्।

स्यादेतत् । वह्निमानित्यादिज्ञानं प्रति वह्निज्ञानस्य न विशेषणज्ञानत्वेन कारणता, द्रव्यत्वेन वह्निज्ञानेऽपि वह्निमानिति ज्ञानाभावात् । किं तु विशेषणतावच्छेदक-

प्रकारकज्ञानत्वेन, अतो न विशिष्टज्ञाने विशेषणज्ञानं हेतुः । विशेषणज्ञानत्वमपि तत्रास्तीति चेत्, न । तस्यातिप्रसक्तत्वात् अन्यथासिद्धेश्च । न च तादृशविशेषणज्ञानजन्यत्वं साध्यम्, बाधादिति।

तन्न । विशिष्टवैशिष्ट्यज्ञानं प्रति हि विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणमुभयसिद्धम् । अतो विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानं हेतुः । यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि बाधकं विना कार्यकारणभावनियमात्, अन्यथा सामान्यकार्योच्छेदः । न चातिप्रसङ्गः, विशेषसामग्रीविरहेण तत्तत्कार्यविशेषानुदयात् । न च परोक्षत्वमुपाधिः । प्रत्यभिज्ञायां साध्याव्यापकत्वात् । नापि विशिष्टविशेषणकत्वं, पक्षेतरत्वादिति ।

मैवम् । तवापि स्मृतिवत्पूर्वानुभवस्य संस्कारद्वारा जनकत्वात् सिद्धसाधनात् । न चाव्यवहितविशेषणज्ञानजन्यत्वं साध्यम्, अप्रयोजकत्वात् प्रत्यभिज्ञावत् स्मृत्यैवोपपत्तेर्वा। नापि तत एवाव्यवहितविशेषणानुभवजन्यत्वं साध्यम्, अप्रसिद्धेः प्रत्यभिज्ञानादौ व्यभिचाराच्च।

अथ तत्कालोत्पन्नरूपादिविशिष्टप्रत्यक्षे संस्काराभावेन स्मरणाभावात् पक्षधर्मताबलेन निर्विकल्पकसिद्धौ अन्यत्रापि सामग्रीतौल्यात्तत्सिद्धिरिति चेत्, न । प्रत्युत्पन्नविशेषणस्थले हि शुक्लत्वादिविशिष्टशुक्लवैशिष्ट्यबोधो वा अविशिष्टतद्विशिष्ट-बोधो वा, आद्ये शुक्लत्वादिस्मरणं प्रथमं, ततः प्रत्यक्षेण तद्विशिष्टशुक्लबोधः, ततः शुक्लत्वादिविशिष्टशुक्लादिवैशिष्ट्यबोधः द्रव्य इति किमनुपपन्नम्। शुक्लत्वादिजाति-स्मरणमेव वा सामान्यलक्षणया सकलरूपादिविषयमस्तु । द्वितीयेऽननुभवः । न हि शुक्लत्वादिप्रत्ययविलक्षणं शुक्लरूपादिविशिष्टबोधं कश्चिदनुभवति ।

अथ जागराद्यविशिष्टानुभवो विशेषणज्ञानजन्यो विशिष्टज्ञानत्वात् । न च तत्र संस्कारद्वारा पूर्वविशेषणानुभवः तज्जन्यविशेषणस्मरणं वा तत्र संभवति । उद्बोधकं विना संस्कारस्य स्मरणे विशिष्टबोधे वा सामर्थ्याभावादित्युद्बोधकं वक्तव्यम् । उद्बोधकं चान्यत्र

ज्ञानं दृष्टमिति तदेव वाच्यम् । न च तद्विशिष्टज्ञानमेव, तत्रापि विशेषणज्ञानापेक्षायामनवस्थापत्तेरित्यालोचनसिद्धिरिति । तन्न । सत्यपि ज्ञाने संस्कारानुद्बोधात् । यस्मात् फलं भवति स ज्ञानविशेषस्तथैति चेत्, न । अननुगतत्वात् । यदनन्तरं फलं दृश्यते तदेवाननुगतमप्युद्बोधकं कल्प्यते, फलबलादिति चेत्, तर्हि जागरकारणानन्तरं संस्कारोद्बोधोऽस्तीति तदेव कारणमस्तु, क्लृप्तत्वात् । अत एव संस्कारोद्बोधे न नियतो हेतुरिति ।

"सदृशादृष्टचिन्ताद्याः स्मृति(जीवस्य)(बीजस्य)बोधका' । इत्याहुः ।

एवं च प्रणिधानादिसूत्रमपि संगच्छते । अपि च विशिष्टज्ञानत्वादित्यत्र व्यवच्छेद्यमविशिष्टज्ञानम् । तच्चाप्रसिद्धम् । सिद्धौ वा व्यर्थमनुमानम् । ज्ञानत्वं च स्वतोऽसिद्धव्याप्तिकं निर्विकल्पके व्यभिचारादनवस्थापाताच्च ।

किं च विशिष्टज्ञानत्वं न तावत् वस्तुगत्या विशेषणविशेष्यविषयकज्ञानत्वम् , आलोचनेन व्यभिचारात् । नापि विशेषणत्वविषयकत्वम् । अतद्व्यावृत्तिबोध-जनकज्ञानविषयत्वस्य विशेषणत्वस्य तत्राप्रकाशात् । नापि वैशिष्ट्यविषयकज्ञानत्वम् । तथा सति गौरिति विकल्पे वैशिष्ट्यं विशेषणमित्यालोचनस्यापि तद्विषयत्वेन विशिष्टज्ञानत्वे अनवस्थापातादिति।

नापि सप्रकारकज्ञानत्वम्, प्रकारश्च विषयताविशेष इति वाच्यम् । ज्ञानविषयस्वरूपातिरिक्ताया विषयताया अभावात् । न च विशेषणज्ञानजन्यत्वं सप्रकारत्वम्। यद्विशेषणज्ञानजन्यं यत् स एव तत्र प्रकार इति गौरिति विकल्पे तस्यैव साध्यत्वात् , ईश्वरज्ञानस्य निष्प्रकारकत्वापाताच्च । नाप्यतद्व्यावृत्तिविषयत्वं विशिष्टज्ञानत्वम् । अपोहवादनिरासेन गौरिति विकल्पे तथात्वासिद्धेः । नाप्यतद्व्यावृत्तिबोधजनकत्वं तत् । आलोचनव्यावृत्तानुगतरूपमन्तरेण अतद्व्यावृत्तबोधजनकत्वस्य ग्रहीतुमशक्यत्वात् । न च गौरिति ज्ञानमेतदन्यसविकल्पकान्यज्ञानभिन्नं प्रमेयत्वात्, यद्वा चक्षुः

चाक्षुषसविकल्पकज्ञानातिरक्तज्ञानजनकम् इन्द्रियत्वादिति तत्सिद्धिः । अप्रयोजकत्वात्, उभयत्र सविकल्पकपदानन्तरं निर्विकल्पकादिपदप्रक्षेपेण तृतीयादिज्ञानसिद्धिप्रसङ्गाच्चेति ।

अत्रोच्यते । प्राथमिकं गौरिति प्रत्यक्षं ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिवत् । न च स्मरणं तत्र संभवति । तज्जन्मनि तेन गोत्वस्याननुभवात्।

अथ यथा बालस्याद्यप्रवृत्तिबलात् प्राग्भवीयसंस्काराद्वयाप्तिस्मरणं तथेहापि जन्मान्तरीयसंस्कारात् गोत्वस्मरणमस्तु, प्राथमिकविशिष्टज्ञानबलादिति चेत्, न । जीवनादृष्टेन तत्र संस्कारोद्बोधात्तथास्तु । इह तु न विलक्षणमुद्बोधकमस्ति । अतो गोत्वासंनिकर्षेऽपि गोत्वस्मरणप्रसङ्गः । य एव गोत्वेन्द्रियसंनिकर्षस्तव निर्विकल्पके हेतुः स एव संस्कारोद्बोधक इति चेत्, तर्हि अत्र क्लृप्तकारणभावात् गोत्वेन्द्रियसंनिकर्षात् गोत्वानुभव एव स्यात्, स्मरणसामग्रीतोऽनुभवसामग्र्याः बलवत्त्वात् । न च तद्विशिष्टज्ञानम्, पूर्वं। विशेषणज्ञानाभावादित्यर्थान्निर्विकल्पकम् । अत एव न तत्र ज्ञानत्वेन विशिष्टज्ञानत्वानुमानम्, कारणबाधेन बाधात् । यदि चानुभवसामग्रीतः स्मरणं तदा नित्यानां वैदिकार्थानां च स्मरणं स्यात्, न त्वनुभवः ।

न च गोत्वज्ञानं गोत्वज्ञानजन्यं जन्यज्ञानजन्यं जन्यविशेषणज्ञानजन्यं चेत्यन्यत्र दर्शनात् प्रथमं न गोत्वानुभव इति वाच्यम् । एकस्यैव जन्यजनकत्वानवच्छेदकत्वात् अनवस्थापाताच्च ।

ननु गौरित्यत्र गोत्ववैशिष्ट्यं गवि भासते । तथा च तद्विषयकं ज्ञानं स्यात्, तच्च निर्विकल्पकमिति चेत्, गोत्वं हि तत्र विशेषणम्, न तु तद्वैशिष्ट्यम् ।

ननु तथाभूतविशेषणधीजन्यविशिष्टज्ञाने विशेषणं स्वधर्मविशिष्टं कथं भासेत, पूर्वं तस्यानवगमात् । अवगमे वा तस्यापि विशेषणान्तरवतो विशेषणमिति अनवस्थेति चेत्, न। गौरिति विशिष्टज्ञाने विशिष्टस्य गोत्वस्याभानात् ।

अथ सर्वं विशेषणं विशेषणवदेव । गोत्वादावपि व्यक्त्यादेर्विशेषणत्वादिति चेत्, अस्तु तथा । किं तु विशेषणं विशेषणवदेव भासेतेति न नियमः । अन्यथा गौरिति ज्ञाने विशेषणतद्विशेषणानन्तपरंपराविषयत्वे विषयापर्यवसानप्रसङ्गः । क्वचिन्निर्विशेषणस्यापि भाने प्रथमतोऽपि तथा स्यादविशेषात् । न च विशिष्टज्ञानत्वादित्यत्र हेतोर्व्यर्थविशेषणत्वम्। येन विशेषणेन विना व्याप्तिर्ग्रहीतुं न शक्यते तस्यैव सार्थकत्वात् । व्यभिचारवारकस्यापि सार्थकत्वे एतदेव मूलम् । इहापि ज्ञानत्वविशेषणज्ञानजन्यत्वयोर्विशेषणं विना व्याप्तिः ग्रहीतुं न शक्यते अनवस्थानात् सामान्यतो व्यभिचारावगमात् ।

अत एव चक्षुस्तैजसत्वादिसाधने रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वादित्यादौ असिद्धिवारकमपि विशेषणं सार्थकम् । तेन विना रूपस्यैव व्यञ्जकत्वादित्यस्याप्रसिद्धेर्व्याप्त्यग्रहात्। विशेषणं विनापि यत्र व्याप्तिग्रहस्तत्र व्यर्थविशेषणत्वम्, यथा नीलधूमत्वशरीराजन्यत्वादौ ।

यस्य यत्र यः संबन्धः स एव तत्र तस्य वैशिष्ट्यम् । तेन हि स्वासंबद्धेभ्यो व्यावृत्तो बोध्यते । यथा दण्डी पुरुष इति ज्ञाने दण्डसंबन्धः पुरुषेऽवगत इति तेनायमदण्डव्यावृत्तो बोध्यते तथा गौरिति विकल्पेऽपि । तथा च विशेषणवद्विशेष्यज्ञानत्वं विशिष्टज्ञानत्वम् । एतदेवातव्द्यावृत्तबोधजनकतावच्छेदकम् ।

ननु दण्डपुरुषसंबन्धा इत्यत्रापि दण्डसंबन्धः पुरुषेऽवगत इति ततोऽप्यदण्डव्यावृत्तपुरुषबोधः स्यादिति चेत्, भवत्येव, दण्डसंबन्ध एव पुरुषे दण्डज्ञानं विना न ज्ञायत इति ब्रूमः । यत्र विशिष्टज्ञानसामग्री नास्ति तत्र निर्विकल्पकम्, ज्ञानकरणजन्ये सर्वत्र विशेषणज्ञानजन्यत्वान्न तदिति प्रत्यक्षमेवैतदिति ।

अत एवाभावे न निर्विकल्पकम् । तद्बुद्धौ प्रतियोग्यधिकरणज्ञानयोः कारणत्वेन तदुभयविशिष्टज्ञानसामग्रीनियमात् । यद्यभावे न निर्विकल्पकं, तदा घटाभाववद्भूतलमिति ज्ञानं न स्यात्, विशेषणज्ञानं विना तदभावात् । भावे वा न निर्विकल्पकसिद्धिः । विशिष्टज्ञानत्वस्य तत्रैव व्यभिचारादिति चेत्, न । प्रथमं भूतले घटो नास्तीति बुद्धिः । तत्र

भूतलं विशेषणम्, अभावो विशेष्यः । विशेष्यज्ञानं च न कारणम् । पश्चाद्भूतलविशेष्यकं घटाभाववदिति ज्ञानम् ।

ननु इन्द्रियसंबद्धविशेषणतया अभावो गृह्यत इत्युक्तम् । अतः कथं स विशेष्य इति चेत्, भूतलविशेषणतया स्वभावप्रत्यासत्त्या गृह्यत इति तदर्थः । न त्वभावस्य विशेषणतया भानमिति । अत एव वायौ रूपाभाव इति प्रतीतेश्चाक्षुषत्वमुक्तमाचार्यैः । अयोग्यविशेष्ये इन्द्रियस्यासामर्थ्यात् । ज्ञानत्वे च निर्विकल्पकं विषयविशिष्टत्वांशे सविकल्पकमपि । अनुव्यवसायस्य व्यवसायजन्यत्वेन नियमतः पूर्वं विषयरूपविशेषणभानात्तत्रैव ज्ञाने तदेव ज्ञानं निष्प्रकारकं सप्रकारकं चेति न विरुद्धम्, अंशभेदमादायाविरोधात्।

अत एव निर्विकल्पकत्वसविकल्पकत्वे न जाती, चाक्षुषत्वादिना संकरापत्तेः । गौरिति सविकल्पकमपि गोत्वांशे निर्विकल्पकमेव, तत्र प्रकाराभानात् ,भाने वा अनवस्था निर्विकल्पकासिद्धिश्च ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे निर्विकल्पकवादः।।**

## अथ विशेषणोपलक्षणवाद:

प्रकारश्च द्विविधः, विशेषणोपलक्षणभेदात् ।

ननु व्यावर्तकत्वाविशेषे कथं तयोर्भेदः । व्यावर्तकत्वे सति सत् विशेषणम्, असदुपलक्षणम्, यथा दण्डी पुरुषः कुरुणा क्षेत्रमिति चेत्, न । काकवद्देवदत्तगृहं, जटाभिस्तापसः इत्यादावुपरि भ्राम्यतः काकस्य जटादेरसत्त्वेऽप्यविशेषणत्वात् उपलक्षणत्वाच्च ।

एतेन व्यावृत्तिबोधकाले व्यावर्तकं सद्विशेषणम् , असदुपलक्षणम् । तेन काकादीनां व्यावृत्तिबोधसमये सतां विशेषणत्वमेव, व्यावृत्तिबोधसमयेऽसतामुपलक्षणत्वम्। अत एव काकैः जटाभिः कुरुणेत्यादावित्थंभूतलक्षणे तृतीयेति निरस्तम् ।

व्यावृत्तिबोधसमये सतोऽप्युपरि भ्रमतः काकादेरविशेषणत्वात् उपलक्षणत्वाच्च ।

नापि विशेष्यवृत्तित्वे सति प्रत्याय्यव्यावृत्तिसमानाधिकरणत्वे सति व्यावर्तकं विशेषणम् । यद्वा यत्र विशेष्यत्वावच्छेदेन व्यावृत्त्या वा यत्समानाधिकरणत्वेन प्रतीयते तत्र तद्विशेषणम् । विशेष्यत्वं च प्रत्याय्यव्यावृत्त्यधिकरणत्वमिति जटाभिस्तापस इत्यादौ जटादावतिप्रसङ्गात् । न हि तापसे न जटा वर्तते ।

नापि विशेष्यसमानविभक्तिकत्वं विशेषणत्वम् । काकवत् देवदत्तगृह-मित्यादावुपलक्षणेऽपि गतत्वात् । अनभिधानदशायामविशेषणत्वापाताच्च ।

अथ व्यावर्तकत्वे सति विशिष्टधीविषयत्वं विशेषणत्वम् । विशिष्टबुद्धिश्च न विशेषणत्वगोचरा गौरवात्, किंतु विशेषणविषया । विशेषणोपलक्षणसंदेहानुपपत्तेः।

अत एव चाक्षुषत्वादिविरोधः । उपलक्षणत्वे तूपलक्षितं संस्थानादि विशिष्टधीविषयो न काकवत्त्वम्, तदभावेऽपि तद्गृहप्रतीतेस्ताद्रूप्यात् । अन्यथा भ्रमत्वापत्तेः। न च शब्दोपस्थापितस्य कथं शाब्दज्ञानबहिर्भाव इति वाच्यम् । तथैव व्युत्पत्तेः । न हि गङ्गायां घोष इत्यत्र प्रवाहोऽपि तीरावच्छेदकतया भासते । किंतु तीरत्वेन तीरविशेष एव । अन्यथा अजहत्स्वार्थासाम्यात् । न चैवमुपलक्षणपदस्य लाक्षणिकत्वम्, अशक्यस्य संस्थानादेरुपस्थापनादिति वाच्यम् । उपलक्षणबुद्ध्युपस्थापित-कारणान्तरजन्यसंस्थानोपस्थित्या तदन्वये तात्पर्यादिति। मैवम् । तथा व्युत्पत्तेरसिद्धेः । न ह्युपलक्षणपदातिरिक्तमुपलक्ष्योपस्थापक-मस्तीत्युपलक्षणपदं स्वार्थमुपस्थाप्य, उपलक्ष्य-मुपस्थापयतीति लक्षणैव स्यात् । अन्यथा लक्षणोच्छेदः । घटो नास्तीत्यत्रोपलक्षणस्य प्रतियोगिनोऽभावधीविषयत्वात् नियतोपलक्ष्याभावाच्च ।

नापि व्यावर्तकत्वे सति क्रियान्वयि विशेषणम्, अन्यदुपलक्षणम् । क्रियाहीने सुभगोऽयं दण्डी महाबाहुरित्यादौ दण्डादेरविशेषणत्वापातात्, परंपरया उपलक्षणेऽपि क्रियान्वयित्वाच्च ।

अथ अतद्व्यावृत्तिर्वैशिष्ट्यम् । तथा च विशिष्टज्ञाने अतव्द्यावृत्तिर्विषयो न विशेषणमुपलक्षणं वा । तथा च विशिष्टधीकारणज्ञानविषयत्वे सति प्रत्याय्यव्यावृत्तिसमानाधिकरणं विशेषणमिति ।

तन्न । नीलमुत्पलमित्यादावनीलानुल्लेखे अतद्व्यावृत्त्यनुल्लेखात्, नीलं जानामीत्यनुव्यवसायविरोधात् अपोहापाताच्च ।

अथ व्यावर्तकं साक्षात्संबद्धं नीलादि, परंपरासंबद्धं गृहोपरि भ्रमत् काकादि, तत्र व्यावर्तनीयमधितिष्ठति यद्धि साक्षादेव तद्विशेषणम्, अतो विपरीतमन्यत् ।

दण्डी पुमानिति विशेषणम् अत्र दण्डः पुंसो, न जातिः अनुदण्डमसौ च तस्येति संबन्धिद्वयातिरिक्तसम्बन्धघटकाभावे सति संबन्ध एव साक्षात्संबन्धः । स च संयोगसमवायस्वरूपसंबन्धसाधारणो ज्ञाने विषयस्याधिकरणे अभावस्य संबन्धिनि समवायस्यास्तीति तेषामपि विशेषणत्वमिति शिवादित्यमिश्राः ।

तन्न । गौरनित्यो, रूपवान् चलति, रूपवति रस इत्यादौ जाते रूपस्य च साक्षात्संबन्धेऽप्युपलक्षणत्वात् । लोहितः स्फटिक इत्यादौ परंपरासंबन्धेऽपि लोहितत्वस्य विशेषणत्वात् ।

अथान्वयप्रतियोग्युपस्थापकतया अन्वितमुपलक्षणम्, साक्षादन्वितं विशेषणम् । काकादेः संस्थानाद्युपस्थापकतया उपयोगात्, अतथात्वे दण्डादिवद्विशेषणत्वमेवेति चेत्, न । उपलक्षणस्य लाक्षणिकत्वापत्तेः, प्रतियेगिनोऽभावे धर्मान्तरानुपनयाच्च ।

अथ व्यावृत्तिबुद्धिसमये विशेष्यसंबद्धं व्यवर्तकं विशेषणम्, तदानीं विशेष्यासंबद्धं व्यावर्तकमुपलक्षणम् । न च जटा यदा यत्रास्ति तदा तत्रोपलक्षणम् । अत एव तत्रैव तदेव संबन्धसमये विशेषणम्, असंबन्धसमये उपलक्षणमिति ।

तन्न । रूपवति घटे रस इत्यादौ रूपस्य विशेषणत्वप्रसङ्गात् । दण्ड्यासीदित्यादावतीते दण्डस्य अविशेषणत्वापाताच्च ।

एतेन यत्र यद्विशेष्यतावच्छेदकधर्मेण व्यावृत्त्या वा समानाधिकरणत्वेन प्रतीयते तत्र तद्विशेषणमित्यपि प्रत्युक्तम् ।

अत्रोच्यते । दण्डी पुरुष इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यत इति प्रत्याय्यव्यावृत्त्यधिकरणता पुरुषस्य दण्डेनावच्छिद्यते न पुरुषत्वेन, अतिव्याप्तेः । उपलक्षणे तु गृहतापसादिनिष्ठप्रत्याय्यव्यावृत्त्यधिकरणता न काकजटादिभिरवच्छिद्यते, तदभाववत्यपि व्यावृत्तिप्रतीतेः । किं तु संस्थानविशेषवत्वादिना ।

एवं च प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणम्, तदन्यव्यावर्तकमुपलक्षणम् । व्यावृत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिः। तदाहुराचार्याः- "सदसद्वा समानाधिकरणं व्यवच्छेदकं विशेषणम्, व्यधिकरणमुपलक्षणम्' इति । अस्यार्थः- स्वाधिकरणमात्रवृत्तिव्यावृत्तिबोधकत्वं, स्वावच्छिन्नाधिकरणताकव्यावृत्तिबोधकत्वं, स्वानधि-करणाधिकरणकव्यावृत्त्यबोधकत्वे सति व्यावृत्तिबोधकत्वं वेति । उपलक्षणं तु स्वानधिकरणेऽपि व्यावृतिं बोधयति।

अथवा विवक्षितान्वयप्रतियोगितावच्छेदकं विशेषणम् । दण्डिनमानयेत्यादौ दण्डस्तथा । तदनवच्छेदकमुपलक्षणम्, काकेन देवदत्तस्य गृहा इत्यादौ काको न गृहस्य देवदत्तान्वयप्रतियोगितावच्छेदकः, तद्विरहदशायामपि देवदत्तान्वयावगमात् । किं तु गृहविशेष एवोपलक्षणपरिचितः । अत एवान्वयाप्रतियोगित्वेऽपि नोपलक्षणवैयर्थ्यम्। यद्वा यदन्वितत्तया ज्ञात एव विशेष्ये तात्पर्यविषयेतरान्वयधीः तद्व्यवच्छेदकं विशेषणम्, अनेवंभूतं तदुपलक्षणम् । उपलक्षणानवच्छिन्नेऽप्युपलक्ष्ये तात्पर्यविषयीभूतान्वयबोधात्। अयमेव कार्यान्वयि विशेषणं तदनन्वय्युपलक्षणम् इत्यस्यार्थः, न तु तात्पर्यविषयीभूतविशेष्यान्वयबोधविषयत्वं विशिष्टज्ञानविषयत्वं वा, प्रतियोग्यभावबुद्धिविषय इति मते तदभावात् ।

यद्वा विशेष्यान्वयिना यस्यावश्यमन्वयः तदवच्छेदकं विशेषणम्, तदन्यदुपलक्षणमिति । तत्रोपलक्ष्यविशेष्यमात्रान्वयात् । यद्व्यावर्तकं विशेष्यान्वयिनान्वीयते तद्विशेषणम्, तदन्यदुपलक्षणमिति वा ।

यद्वा तात्पर्यविषयान्वयप्रतियोगी उद्देश्यान्वयप्रतियोगी वा धर्मो विशेषणं , तदन्यदुपलक्षणमित्यलं विस्तरेण ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे विशेषणोपलक्षणवादः।।**

## अथ सविकल्पकवादः

सविकल्पकं च विशिष्टज्ञानं यथा गौरयमिति । तच्च सामान्यादीनां परमार्थसत्त्वेनार्थजत्वादिन्द्रियजत्वाच्च प्रत्यक्षम् । क्वचित् संस्कारसहकारिवशेन तत्ताविशिष्टस्य इदन्ताविशिष्टाभेदोल्लेखी ऐन्द्रियको विकल्पः ।

नन्वेककार्यसहकारित्वमन्यत्र, प्रत्यभिज्ञानं तु नैकं ज्ञानम् तदंशे पारोक्ष्यस्य इदमंशे चापारोक्ष्यस्यानुभवेन विरुद्धधर्मसंसर्गात् । न चेदं यथार्थम् । अनेकदेशकालसंबन्धस्य एकत्र बाधात् । एककालादिसंसर्गतदभावव्यवच्छेदवत् तदविनाभूतकालान्तरादिसंबन्धव्यवच्छेदात्, तदयथार्थत्वे बहु विप्लवेतेति चेत्, न । पारोक्ष्यापारोक्ष्ययोरिहासिद्धेः, इन्द्रियजन्यत्वेनापरोक्षत्वनियमात्, तत्तांशस्य च स्मृत्युपनीतत्वात् इन्द्रियसंबद्धविशेषणता-प्रत्यासत्तेः । न चैककालसंबन्धः कालान्तरसंबन्धाभावाविनाभूतः, एकस्मिन् नानादिक्संबन्धस्य ज्ञानेऽनेकविषयत्वस्य च व्याघातापत्तेः । साक्षात्करोमीत्यनुव्यवसाये बाधकाभावाच्च ।

ननु केयं तत्ता, न तावदतीतसमयसंबन्धः, अनागतगोचरस्मृति-प्रत्यभिज्ञयोस्तत्तोल्लेखात्, प्रत्यक्षानुभूयमानघटादौ अतीतसमयावच्छेदानुमाने तत्ताधीव्यपदेशयोरभावात्, अतीतसमयसंबन्धावगमेऽपि सोऽयं न वेति संशयात्, स नायमिति विपर्ययात्, तदभावावगमेऽपि सोऽयमिति प्रतीतेः, अतीतसमयविशिष्टः स इति सहप्रयोगात्, काले तदभावाच्च । एतेन ज्ञातधर्मान्तरवैशिष्ट्यं तत्तेति निरस्तम् ।

न च तद्वृत्तिगुणादिकमेव तत्ता, तदवगमेऽपि तदनवगमात्, तदनवगमेऽपि तदवगमाच्च । नाप्यतीतज्ञानवैशिष्ट्यम्, परेण ज्ञात इति ज्ञानेऽपि स इति प्रयोगाभावात्।

नाप्येतज्जन्मातीतस्वज्ञानवैशिष्ट्यम् । तदवगमेऽपि तत्तासंशयविपर्ययदर्शनात्, अतीतज्ञानविशिष्टः स इति सहप्रयोगात्, अतीतानुभवविषयत्वस्य अनुभवाविषयत्वेन स्मृत्या तदुल्लेखानुपपत्तेश्च ।

यत्तु अतीतानुभवविषयत्वं तत्ता । तच्चानुभवाविषयत्वेन यदा ज्ञानान्तरेण गृह्याते तदा स घट इति स्मरणम्, नो चेत्, प्रमुष्टतत्ताकं घट इति ।

तन्न । अतीतानुभवविषयत्वस्यानुमितौ भानेऽपि स इति धीव्यपदेशयोरभावात्, अतीतानुभवविषयत्वनिश्चयेऽपि तत्तासंशयविपर्ययदर्शनात् सहप्रयोगानुपपत्तेः, ज्ञानान्तरेण अतीतानुभवविषयत्वग्रहे तत्तोल्लेखापत्तेश्च ।

अथातीतधर्मवैशिष्ट्यं तत्ता । स धर्मः क्वचित् समयः क्वचित् ज्ञानादिः । न चातीतधर्मविशिष्टः स इति सहप्रयोगानुपपत्तिः । धर्मविशेषमादाय तदुपपत्तेः । तदप्रतीतावपि स इति प्रतीतिरसिद्धैव । न चातीतधर्मविशिष्टप्रतीतावपि स न वेति संशयात्, स नायमिति विपर्ययाच्च नैवमिति वाच्यम् । निश्चितधर्र्मेतरधर्मविशेषविषयत्वेन तयोरुपपत्तेरिति चेत्,

मैवम् । यदि वस्तुगत्या योऽतीतो धर्मस्तद्वैशिष्ट्यं तत्ता, तदा अनुभवेऽपि तद्विषयत्वात्तत्तोल्लेखापत्तिः । नाप्यतीतत्वेन यो भासते धर्मस्तद्वैशिष्ट्यं, भासमानधर्मस्यातीतत्वेनानुभवाविषयत्वात् प्रत्युत वर्तमानत्वेनानुभवात् स्मृतौ तदुल्लेखानुपपत्तेश्च ।

न चानुभवानन्तरं यदा ज्ञानान्तरेणातीतधर्मवैशिष्ट्यभानं तदा स्मृतौ तत्तोल्लेखो नान्यदेति वाच्यम् । अतीतधर्मस्यानुमितौ तत्तोल्लेखापत्तेः । इदन्तापि न तन्मात्रवृत्तिगुणादिकम्, अनुमानादिना तदवगमेऽपि अयमिति व्यपदेशाभावात् । प्रत्यक्षेण तदवगमे अयमिति व्यपदेश इति चेत्, न । वाच्यस्य प्रमाणगोचरतया व्यपदेशस्य नियन्तुमशक्यत्वात् । गुणादावपि तन्निर्वचने अननुगमात् । न चैतद्व्यक्त्याश्रयत्वम्, इदमेतदोः पर्यायत्वात् । नापि प्रत्यक्षज्ञानगोचरत्वम् । अचाक्षुषत्वापत्तेः । अतीते तदनुमाने अयमिति बुद्धिव्यपदेशाभावात्, स्मृत्यापि तदुल्लेखापत्तेश्च ।

अत्र केचिदाहुः । तत्तेदन्ते स्मृत्यनुभवभासिन्यौ अखण्डे एवोपाधी क्लृप्तधर्मातिरेकिणौ । एवं चेदन्तासंस्कारेण इदन्तैव तत्तया स्मर्यते । न च तत्तायाः क्वचिदनारोपे कथमारोप इति वाच्यम् । प्रत्यभिज्ञायां तत्तांशे यथार्थत्वात् । इदन्तानुल्लेख्यनुभवप्रभवस्मरणे धर्मान्तरमेव तत्तया भासते । अत एवायं घट इति न स्मरणम्। अत एव सर्वा स्मृतिरयथार्था अयथार्थानुभवा च । हरिहराद्यनुचिन्तनं च कविकाव्यमूलज्ञानवत् मनोरथज्ञानवच्च साकाङ्क्षपदार्थज्ञानप्रभवमनुभवरूपमेवेति ।

तन्न । स्मृतेः पूर्वमिदन्तोपस्थितिं विना तत्र तत्तारोपासंभवात् । किं च तत्तांशेऽननुभूतगोचरत्वेन स्मृतेः संस्कारसीमालङ्घने इदन्ता तत्तया स्मर्यत इत्यत्र मानाभावात्। घट एव तत्तया स्मर्यत इत्यस्तु लाघवात् इति ।

अत्रोच्यते । अनुभवे कालो धर्मान्तरं वा यो वर्तमानत्वेन विषयः स एव स्मरणस्य, अनुभवस्मरणयोरेकविषयत्वेऽपि स्मरणे तत्र तच्छब्दप्रयोगः, संस्कारजज्ञानस्यैव तच्छब्दप्रयोगहेतुत्वात् ।

अत एव प्रत्यभिज्ञाने तत्र तच्छब्दप्रयोगः, प्रत्यक्षानुभवे तत्रैव इदंशब्दप्रयोगः न तु विषयकृतोऽनुभवस्मरणयोर्विशेषः । अत एवायं घट इत्यनुभवादयं घट इति न स्मरणम्, स घट इति स्मरणकारणं स घट इति नानुभवः ।

यद्वा अयं घट इत्यत्र यद्धर्मवैशिष्ट्यं भासते तस्यातीतत्वं तत्ता । तद्वैशिष्ट्यमननुभूतमपि स्मृतिविषयः । इदन्ताविशिष्टगोचरसंस्कारात् कथं तत्तास्मृतिरिति चेत्, न। स घट इति स्मृतिं प्रत्यनुभवस्य हेतुत्वनिर्वाहकतया संस्कारस्य तथैव कल्पनात् । अयं घट इति स्मृतेः स घट इत्यनुभवस्यादर्शनाच्च । समानविषयत्वेन स्मृतेरयं घट इति स्मृतिः न स घट इति नानुभवश्च स्यात् । न चैवं स्मृतिरननुभूततत्तांशेऽनुभवः स्यात् । संस्कारासाधारणकारणकत्वेन स्मृतित्वात् । सहप्रयोगश्च धर्मविशेषमादाय प्रतिविधेयः । अत एव संस्कारहेत्वनुभवप्रामाण्यपारतन्त्र्येण यथार्थत्वेऽपि स्मृतिरप्रमेति सर्वतन्त्रसिद्धान्तः ।

यद्वा नेयं यथार्था । तथा हि स्मृतिः स्वविषयवर्तमानत्वविषया अतीतानागतागोचरप्रतीतित्वात् प्रत्यभिज्ञावत् । प्रतीतित्वाद्वा घटोऽस्तीति प्रतीतिवत् । प्रतीतेः समयविशेषविषयत्वनियमात् ज्ञानसामग्रीमहिम्ना चाननुभूतेऽपि समयांशे स्मृतिः, न तत्र संस्कारव्यापारोऽन्यथासिद्धत्वात् ।

अत एव पाकरक्ते श्यामोऽयमिति धियोऽयथार्थत्वव्यवहारः लौकिकानां श्यामत्वस्य वर्तमानत्वेनावगमात् ।

एतेन श्यामधीस्तत्र यथार्थैव घटे कदाचित् तत्सत्त्वात् इदानीमयं श्याम इत्याकार एव नेत्यपास्तम् ।

अत एवातीतानागतवह्न्यगोचरत्वे विद्यमानधूमेन पर्वते वह्निरित्यनुमितेः वर्तमानवह्निविषयत्वादिदानीं वह्निनिश्चयेन वह्न्यर्थिप्रवृत्तिः । अन्यथा इदानीं तत्संदेहे प्रवृत्तिर्न स्यात् । यदा धूमस्तदा वह्निरिति व्याप्तावपि तदज्ञानदशायां प्रवृत्तेरन्यथानुपपत्तेः ।

यद्वास घट इति स्मृतौ तत्ताविशिष्टस्य वर्तमानता भासते । संस्कारस्य वर्तमानज्ञानसामग्रीसहितस्यैव हेतुत्वात्, सोऽयमिदानीमित्यादौ तथा कल्पनात्, गेहे स घट इति स्मरणान्निश्शङ्कप्रवृत्तेश्च । अन्यथा तत्ताविशिष्टस्य इदानीं संदेहे सा न स्यात् । न च वर्तमानत्वांशेऽननुभूतविषयत्वम् । वर्तमानत्वेनानागतवर्तमानस्य पूर्वमनुभवात् ।

एवं च स्मृतेस्तथाभूतस्य वर्तमानता विषयः, तत्र विशेष्यस्य विशेषणस्य वा वर्तमानत्वाभावात् स्मृतिरयथार्थैव । न च पूर्वं तथा आसीदर्थ इति तद्यथार्थत्वम्। पाकरक्ते श्यामोऽयमिति ज्ञानस्य यथार्थत्वप्रसङ्गात् ।

प्रमुष्टतत्तांशे च स्मरणे अविद्यमानधर्मावच्छेदो न भासते । तदाहुराचार्याः - "स्मृतेर्याथार्थ्यमपि कुतः' इति ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे सविकल्पकवादः।।**

**प्रत्यक्षखण्डश्च समाप्तः**

## अनुमानखण्डः

प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते। तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः। तत्करणमनुमानम्। तच्च लिङ्गपरामर्शो, न तु परामृश्यमानं लिङ्गमिति वक्ष्यते ।

अथानुमानं न प्रमाणम्, योग्योपाधीनां योग्यानुपलब्ध्या अभावनिश्चयेऽपि अयोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च। लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति ।

न । अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् एतद् वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्। तयोश्च परकीययोरप्रत्यक्षत्वात् । अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च ।

अपि चानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणतापत्तेः प्रामाण्यस्यानुमेयत्वात् स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः । व्याप्तिग्रहोपायश्च वक्ष्यते ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे अनुमिति निरूपणम्।।**

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः। न तावदव्यभिचरितत्वम् । तद्धि न साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्, सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्, साध्यवदन्यावृत्तित्वं वा; केवलान्वयिन्यभावात् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे व्याप्तिवादे व्याप्तिपञ्चकम्।**

**अथ सिंह-व्याघ्रोक्तव्याप्तिलक्षणे**

नापि साध्यासामानाधिकरण्यानधिकरणत्वं, साध्यवैयधिकरण्यानधिकरणत्वं वा। तदुभयमपि साध्यानधिकरणानधिकरणत्वम्। तच्च तत्र, यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सिंह-व्याघ्रोक्तव्याप्तिलक्षणे ।**

**अथ व्यधिकरणधर्मावच्छिन्ना भावप्रकरणम्।**

अथेदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् । न चैवं घट एव व्यभिचारः, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद् वृत्तित्वं हि व्यभिचारः । न च वाच्यत्वाभावस्तादृशो घट इति चेत्, तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः । तथा चाप्रसिद्धिः । प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः, तद् विशिष्टज्ञानस्याभावधीहेतुत्वात् । अन्यथा तन्निर्विकल्पकादपि घटो नास्तीति बुद्ध्यापत्तेः। गवि शशशृङ्गं नास्तीतिप्रततेरप्रसिद्धेः। शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे व्याप्तिवादे चतुर्दशलक्षणी।।**

**अथ पूर्वपक्षव्याप्तिप्रकरणम्।**

अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्ति: । केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेत् , न। साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं, साध्याधिकरणानधिकरणत्वं वा। केवलान्वयिनि, यत्किंचित्साध्याधिकरणानधिकरणे धूमे चाव्याप्ते:। नापि स्वसमानाधिकरणात्यन्ताभावा प्रतियोगिसाध्यसामानाधिकरण्यम् । पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्, द्रव्यत्वादेरव्याप्यवृत्त्यव्याप्यतापत्तेश्च। न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं देयम् । संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति, अधिकरणभेदेनाभावभेदाभावात्। नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः । मूले वृक्ष: कपिसंयोगवान्नेत्यबाधितप्रतीते: तदन्योन्याभावस्यापि तत्र सत्त्वात् । न चैवं भेदाभेद:, अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमात् । साधनवन्निष्ठान्योन्याभावाप्रतियोगि साध्यवद् यस्येति षष्ठ्यर्थर्व्याप्यव्यापकभावानिरूपणात्, साध्यसाधनयोर्व्याप्तिनिरूप्यत्वात्, वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च। विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात्। नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यम्। साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धे:। महानसादौ समवायितया वह्निवह्निमतोरत्यन्तान्योन्याभावयो: सत्त्वात् धूमादावप्युक्तलक्षणाभावाच्च।

अथानौपाधिक: सम्बन्धो व्याप्ति:। उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापक:। व्यापकत्वं तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । व्यभिचारे चावश्यमुपाधि:। प्रतियोगित्वं

न विरोधित्वं सहानवस्थाननियमलक्षणम्, गोत्वाश्वत्वयोरतथात्वात् अन्योन्याभावप्रतियोगिन्यसत्त्वाच्च । किं तु यथा अधिकरणाभावयो: स्वरूपविशेष: सम्बन्ध: तथा प्रतियोगित्वमनुयोगित्वमपि, अभावविरहात्मत्वं वेति चेत्,

यत्किंचित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ, प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मश्च सिद्ध्यसिद्धिभ्यां न निषेद्धुं शक्य: । यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वम्, यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेत्, न । व्यधिकरणत्वात्।

यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य, यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेत्, न । सोपाधेरपि तथात्वात् । तथा हि--साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनं तत् प्रत्येकमव्यापकं साध्यधूमस्य, द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तत् व्यापकं महानसीयवह्ने:।

नापि साध्यं यावद् व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वम्। साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात् । तच्च दूषितम् ।

नापि कात्स्न्येन सम्बन्धो व्याप्ति: । एकव्यक्तिके तदभावात् । नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात् । अत एव न कात्स्न्येन साध्येन सम्बन्धो व्याप्ति:, विषमव्याप्ते तदभावाच्च । न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्ध: । साधनाश्रयमहानसादौ सकले प्रत्येकं वह्ने राश्रितत्वाभावात्।

नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यम् । यावद्धर्मसामानाधिकरण्यं हि यावद्धर्माधिकरणाधिकरणत्वम्। तच्चाप्रसिद्धम्। साधनसमानाधिकरणसकलमहानसत्वाद् अधिकरणाप्रतीते: ।

नापि स्वाभाविक: सम्बन्धो व्याप्तिः । स्वभावजन्यत्वे तदाश्रितत्वादौ वा अव्याप्त्यतिव्याप्ते: ।

नाप्यविनाभाव: केवलान्वयिन्यभावात् ।

अथ सम्बन्धमात्रं व्याप्तिः । व्यभिचारिसम्बन्धस्यापि केनचित्सह व्याप्तित्वात् । धूमादिव्याप्तिस्तु विशिष्यैव वक्तव्येति ।

तन्न । लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात् । न च सम्बन्धमात्रं तथा, तद् बोधादनुमित्यनुत्पत्तेः ।

नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदम् । सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् । केवलान्वयिनि केवलान्वयिसंम्बन्धः व्यतिरेकिणि साध्यवदन्यावृत्तित्वम् व्याप्तिः। एतयोरनुमितिविशेषजनकत्वम् । अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका । न चातिप्रसङ्गः, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति **केचित्** ।

तदपि न । साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात् । न च सकलसाध्यवदन्यावृत्तित्वम्, वह्निमतां प्रत्येकं तथात्वात्। सर्वत्र लक्षणे साध्यत्वसाधनत्वतदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः । साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा । महानसीयवह्नौ तदभावात् । न च सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य, कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यम् । स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे पूर्वपक्षव्याप्तिप्रकरणम्।।**

## अथ सिद्धान्तव्याप्तिलक्षणम्

**अत्रोच्यते** ।

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सिद्धान्तव्याप्तिलक्षणम्।।**

## अथ सामान्याभावः

अन्यनिष्ठवह्नेः धूमवत्पर्वतवृत्त्यत्यन्ताभावप्रतियोगित्वेऽपि तत्प्रतियोगिता न वह्नित्वेनावच्छिद्यते, धूमवति वह्निर्नास्तीत्यप्रतीतेः । सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव । अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चावगते वायौ रूपं न वा, वायू रूपवान्न वेति संशयो न स्यात्। विशेषाभावकूटस्य निश्चितत्वात् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सामान्याभावः।।**

## अथ विशेषव्याप्तिः

यद् वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यं, यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्कत्वं वा । अन्यवृत्तिवह्नितद्वतो अन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वात् व्यधिकरणवह्निधूमयोर्न व्याप्तिः, किंतु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यम् । सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात्। धूमसम्बन्धिवह्निस्तद् व्याप्य एव। युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव । कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः ।

यद् वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणम् । कर्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव। न चान्योन्याभावस्याव्याप्यवृत्तित्वम् । अभेदस्याबाधितप्रत्यभिज्ञानात् । व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैव भातस्य षष्ठ्यर्थत्वम् । न चैवमननुगमो दोषाय। कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात् ।

अथ धूमवति वह्निह्रदौ न स्तो धूमवान् वह्निमद्ध्रदौ न भवतीति प्रतीतेः व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इति चेत् ,

न। तादृशाभावानभ्युपगमात्। अभ्युपगमे वा तत्र तदुभयं प्रतियोगि, न वह्निवह्निमन्तौ ।

अथ वा अनौपाधिकत्वं व्याप्तिः । तच्च यावत्स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यान्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम् । न ह्येवं सोपाधिः, तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगिन आद्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपाधेः साध्यव्यापकत्वात् । एतदेव यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्य-मनौपाधिकत्वं गीयते ।

यद् वा यावद्यत्समानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभाव-सामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वम् । सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन समं हेतोः सामानाधिकरण्यम्। उपाधेः साधनाव्यापकत्वात् ।

यद् वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथाहि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकम् । धूममात्रस्य वह्निसम्बन्धित्वात् । वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकम्, धूमासम्बन्धिनि गतत्वात् । न ह्यतिप्रसक्तमवच्छेदकं, संयोगादौ तथात्वादर्शनात् । किंतु वह्नावाद्र्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं, तादृशं च व्याप्यमेव ।

अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यम् । वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते । सोपाधौ तूपाधिना ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे विशेषव्याप्तिप्रकरणम् ।**

## अथ अत एव चतुष्टयप्रकरणम्

अत एव साधनतावच्छेदकभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति **वदन्ति** ।

अत एव च तत्र साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवम् । व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति। तदेव च साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं तत्रोपाधि:।

अत एव व्यभिचारे चावश्यमुपाधिरिति संगच्छते । अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारेण न तदनुमानम् । अप्रयोजकत्वात् ।

अत एव च तस्य साध्यसम्बन्धितावच्छेदकरूपलक्षणा व्याप्ति: साधनताभिमते चकास्तीति स्फटिके जपाकुसुमवदुपाधिरसावुच्यते।

लक्षणं तु साध्यसाधनसम्बन्धव्यापकत्वे सति साधनाव्यापकत्वम् । विषमव्याप्तस्तु नोपाधिपदवाच्य: प्रवृत्तिनिमित्ताभावात् । दूषकता च तस्य व्यभिचारोन्नायकतया। न च व्यभिचारोन्नायकत्वमेवोपाधित्वम्, अप्रयोजकसाध्यव्यापकव्यभिचारिणोऽप्युपाधित्वापत्तेरिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे अत एव चतुष्ट्यप्रकरणं समाप्तम् ।।**

## अथ व्याप्तिग्रहोपायप्रकरणम्

सेयं व्याप्तिर्न भूयोदर्शनगम्या । दर्शनानां प्रत्येकमहेतुत्वात् । आशुविनाशिनां क्रमिकाणां मेलकाभावात् । न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधीहेतव:, प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यम् । समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतु:। अत: कथं संस्कारेण व्याप्तिज्ञानं जन्येत । अन्यथा अतिप्रसङ्ग: ।

किं च सम्बन्धभूयोदर्शनं, भूयस्सु स्थानेषु दर्शनम्, भूयसां वा दर्शनं, भूयांसि वा दर्शनानि न तथा । एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात्। एकत्रैव धारावाहिके तद्धीप्रसङ्गात्, भूयस्त्वस्य त्रिचतुरादित्वेन अननुगमाच्च ।

अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् । तर्कसहकृतं तथेति चेत्, तर्हि सहचारदर्शनव्याभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु, आवश्यकत्वात् । किं भूयोदर्शनेन । न च तेन विना तर्क एव नावतरति । प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भवात् । न चैवमेवास्तु। तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात्। जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनकव्याप्तिज्ञानं तर्कं विनैव । अतो नानवस्थेति चेत्, तर्हि व्यभिचारात् सोऽपि न व्याप्तिग्रहे हेतुः । न चैतद्बुद्धाववान्तरजातिरस्ति। सामान्यप्रत्यासत्त्या सर्वोपसंहारादविनाभावग्रहः, सामान्यरूपता च न सकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेत्, न । सामान्यस्य हि प्रत्यासत्तित्वं लाघवात् , न तु सामान्यतया ज्ञातस्य । तदनभ्युपगमाच्च । न च काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यम्। द्वितीयादिदर्शनेऽपि शङ्कातादवस्थ्यात् ।

नन्वनौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः तद्देशकालतत्रावस्थितघटादीनामुपाधित्वशङ्कानिरासः कस्यचित् साधनव्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्वज्ञानेन स्यात् । तच्च भूयोदर्शनं विना नावतरतीति चेत्,

न । अयोग्योपाधिव्यतिरेकस्यानुमानाधीनज्ञानत्वेनानवस्थापातात्।

अथ साध्यसाधनसहचरितधर्मान्तराणाम् उपाधित्वसंशये न व्याप्तिग्रहः। अतस्तेषामनुपाधित्वज्ञानं भूयोदर्शनाधीनसाध्याव्यापकत्वज्ञानेसाध्या सतीत्येतदर्थं भूयोदर्शनापेक्षा। अत एव यावता दर्शनेन तन्निश्चयः तावद् भूयोदर्शनं हेतुरिति न वारसङ्ख्यानियमो, न वाननुगमः ।

यद्यपि चान्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वसंशयो नान्यव्याप्तिग्रहप्रतिबन्धकः, तथापि तदाहितव्यभिचारसंशयः प्रतिबन्धक इति तद्विधूननमावश्यकमिति चेत्, न । अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् । स च न भूयोदर्शनात्, नाप्यनुमानादित्युक्तम् । अपि च

भूयोदर्शनाहितसंस्कारो न बहिरिन्द्रियसहकारी, तधव्यापारं विनापि च सहचारादिज्ञानवतो व्याप्तिग्रहात् ।

नापि मनसः, इन्द्रियादिवत् भूयोदर्शनजन्यसंस्कारस्य तज्जन्यस्मरणस्य वा प्रमाणान्तरत्वापत्तेः । तस्मात् परिशेषात् सकृद्दर्शनगम्या सा । तथाहि--उपाध्यभावो व्याप्तिः। अभावश्च केवलाधिकरणं तत्कालसम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा । तच्च प्रथमदर्शनेनावगतमेव चक्षुरादिना । न चाधिकस्तदभावोऽस्ति । न च प्रतियोगिज्ञानमधिकरणादिज्ञानजनकम्, येनोपाधिज्ञानं विना तन्न स्यात् । एवमुपाध्यभावे ज्ञाते किंचिन्न ज्ञातुमवशिष्यते । उपाध्यभावव्यवहारस्तु तद्धियमपेक्षते, दीर्घत्वादिव्यवहार इवावधिज्ञानम् । न चैवं रासभसम्बन्धतुल्यवह्निधूमसम्बन्धज्ञानादेवानुमितिः स्यादिति वाच्यम्। उपाधिस्मरणे सति उपाधितधव्याप्येतरसकलतदुपलम्भकसमवधाने चोपाध्यनुपलम्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात् तव्द्यवहारहेतुत्वाच्च।

नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चयात् विशेषदर्शने सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत्, व्याप्तिज्ञानानन्तरं किं विद्यमान एवोपाधिर्मयोपाधित्वेन न ज्ञात इति शङ्कया गृहीतव्याप्तावपि संशयः । अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्का अपनीयते ।

यद्वा ज्ञानप्रामाण्यसंशयाद् व्याप्तिसंशयः, यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्प्रामाण्यसंशयाहितस्तत्संशयः, न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न वृत्तमिति कल्प्यते, तथेहाप्युपाध्यभावस्य व्याप्तित्वात्, तस्य च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वात् व्याप्तिग्राहकान्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात्तन्निश्चये प्रामाण्यसंशयादेव तत्संशयः ।

न चैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदः स्यादिति वाच्यम् । तत्र व्याप्तेरभावात् , प्रत्यक्षे विषयस्य हेतुत्वात् , क्वचिदसंसर्गाग्रहात् तथा व्यवहारो दोषमाहात्म्यात्। न चात्रापि तथा, आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमात् ।

**केचित्तु** साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्, साधनवन्निष्ठान्योन्याभावाप्रतिगोगिसाध्यवत्कत्वं वा व्याप्तिः । तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथममवगतमेव। महानसे योऽत्यन्ताभावोऽन्योन्याभावो वावगतः तस्य प्रतियोगी न वह्निर्न वा वह्निमानित्यनुभवात् । रासभे तथावगमेऽपि अग्रे स बाध्यत इति । तन्न । एवं हि तद्वह्नितद्धूमयोरेव व्याप्तिः स्यात्, न तु धूमत्ववह्नित्वावच्छेदेन । न च तदनुमानोपयोगि वह्नित्वं वह्निमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति ।

मैवम् । प्रकृतसाध्यव्यापकसाधनाव्यापको वा, साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धितावच्छेदकं विशेषणं वा उपाधिः । उभयथापि तदभावो न व्याप्तिः । सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः । किं तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वम् । तस्य च प्रथमं ज्ञातुमशक्यत्वात् । किं च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः, किं तु व्याप्तित्वेन । तच्चोपाध्यभावत्वम् । न चोपाधेरज्ञाने तदभावत्वेन ज्ञानं सम्भवति । विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य। न च नियमतः प्रथममुपाधिधीरस्ति । यच्चोक्तं - प्रतियोगिज्ञानं व्यवहारहेतुर्नाभावज्ञाने इति । अस्तु तावदेवम् । तथापि तदभावो मा व्यवहारि । उपाध्यभावज्ञानाधीनानुमितिः स्यादेवोपाधिज्ञानं विनापि । न चैवम् । वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनात् व्यभिचारसंशयात् प्रथमदर्शने न व्याप्तिनिश्चयः । अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात् । अन्यथा संशयोत्तरं क्वापि निश्चयो न स्यादिति चेत्, न। व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः। किं तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात् , न तु संशयसामग्रीतो निश्चयः इति।

किं च यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धक: । एवं भूयोदर्शनमपि संशायकम् तर्कस्त्वनवस्थाग्रस्त एवेति कथं व्याप्तिग्रह: ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद् वितीयखण्डे व्याप्तिग्रहोपायपूर्वपक्ष:।**

**अथ व्याप्तिग्रहोपायसिद्धान्त:।।**

अत्रोच्यते । व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम्। ज्ञानं निश्चयः शङ्का च । सा च क्वचिदुपाधिसन्देहात्, क्वचित् विशेषादर्शनसहितसाधारणधर्मदर्शनात्। तद्विरहश्च क्वचित् विपक्षबाधकतर्कात्, क्वचित् स्वतस्सिद्ध एव ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे व्याप्तिग्रहोपायसिद्धान्त:।**

**अथ तर्कप्रकरणम्**

तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत्, न । यावदाशङ्कं तर्कानुसरणात्। यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः ।

तथाहि-धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्य: स्यात् , नोत्पन्न: स्यात् इत्यत्र किं धूमोऽवह्नेरेव भविष्यति, क्वचिद्वह्निं विनापि भविष्यति, अहेतुक एव वोत्पत्स्यते इति शङ्का स्यात् । सर्वत्र स्वक्रियाव्याघात: स्यात् । यदि हि गृहीतान्वयव्यतिरेकं हेतुं विनापि कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्ने: तृप्त्यर्थं भोजनस्य परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमत: कथं कुर्यात्, तेन विनापि तत्सम्भवात् । तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्। शङ्कायां न नियतोपादानम्। नियतोपादाने च न शङ्का । तदिदमुक्तम्- **"तदेव ह्यशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति । न हि संभवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याशङ्क्यते"** चेति ।

एतेन व्याघातो विरोध: । स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तम्। स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात् । अत एव

**"व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् ।**

**व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः"।।**

इति **खण्डनकारमत**मप्यपास्तम् । न हि व्याघातः शङ्काश्रितः, किं तु स्वक्रियैव शङ्काप्रतिबन्धिकेति। न वा विशेषदर्शनात् क्वचिच्छङ्कानिवृत्तिरेवं स्यात् । न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः । न तु स स्वत एव प्रयोजकः ।

अत एव न तदाहितसंस्कारो मानान्तरम् । तर्कस्याप्रमात्वात् । तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः । तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात् ।

ननु सहचारदर्शनव्यभिचारादर्शनवत् व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेत् , न । स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् । सत्तर्कात् व्याप्तिप्रमा, तदाभासात् तदप्रमा, विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव ।

**अपरे तु** यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा, यत्र तु व्याप्तिस्मरणं हेतुस्तत्र न तर्कान्तरापेक्षेति नानवस्था । अस्ति च जातमात्राणा मिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणम्, तदानीं व्याप्त्यनुभावकाभावात् । तन्मूलानुभवमूला चाग्रेऽपि व्याप्तिस्मरणपरम्परेति ।

**यत्तु** अनादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति । **तन्न,** प्रमाणानुयोगेऽनुमान एव पर्यवसानात् । न च व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम् । अनुपपत्तेरप्यनुमानत्वात् ।

**अन्ये तु** विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति । **तदपि न**। तर्कस्याप्रमाणत्वात् । व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेत्, न । अनवस्थाभयेन तर्कं विना व्याघातात्। यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्।

**यत्तु** योग्यानामुपाधीनां योग्यानुपलब्ध्या अभावग्रहः । अयोग्यानां तु साध्याव्यापकत्वसाधनव्यापकत्वसाधनादभावग्रह इत्यनौपाधिकत्वं मनसा सुग्रहमिति।

**तत्तुच्छम्** । अनुमानेन तत्साधनेऽनवस्थानात्, प्रमाणान्तरस्याभावात्। ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत। अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत्, भ्रान्तोऽसि। नहि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे । साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपत्वाच्च।

अपि च करवह्निसंयोग: शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकम् । तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम। तस्माद् विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे तर्कप्रकरणम् ।।**

## अथ व्याप्त्यनुगमप्रकरणम्

उक्तव्याप्तिप्रकारेष्वन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुर्लाघवात् । अतो नाननुगम: अनौपाधिकत्वं तु तल्लक्षणम् । नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारवद्हेत्वाभासान्तरं स्यात्, न तु व्याप्त्यभावत्वेनासिद्धिरिति चेत् , तज्ज्ञानमुपजीव्यमपि न स्वतो दूषकम् । नह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबन्धकम्, अतिप्रसक्तेः । व्यभिचाराज्ञानस्य तद्हेतुत्वात्तद्बुद्धिस्तथा । न चानौपाधिकत्वज्ञानं व्याप्तिज्ञानहेतुरित्युक्तम् । तथा च व्यभिचारज्ञान द्वारा स दूषकः । एवं च परमुखनिरीक्षकतया सिद्धसाधनवन्न पृथक् । न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम् । साध्याभाववद् वृत्तित्वं हि व्यभिचारः । तदभावश्च नाव्यभिचार:, केवलान्वयिन्यभावात् । किं तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यम्। न चानयो: परस्परविरहत्वमिति।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे व्याप्त्यनुगमप्रकरणम् ।।**

## अथ सामान्यलक्षणाप्रकरणम्

व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमविषयकः । कथमन्यथा पर्वतीयधूमे व्याप्त्यग्रहे तस्मादनुमितिः । सा चेन्द्रियसम्बद्धविशेषणता अतिरिक्तैव वा। तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसंनिकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति **वदन्ति** । **तदपरे न मन्यन्ते** । तथा हि धूमत्वावच्छिन्ना व्याप्तिः संनिकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते । ततः स्मृता सा तृतीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते । ततोऽनुमितिः तदनभ्युपगमेऽपि सन्निकृष्टधूमविषये धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवः, तथैव व्याप्तिस्मरणम्, ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः । व्याप्त्यनुभवतत्स्मरणपक्षधर्मताज्ञानानामेकप्रकारकत्वेनानुमितिहेतुत्वात्। गवादिपदेष्वपि शक्त्यनुभव-तत्स्मरण-वाक्यार्थानुभवानामेकप्रकारकत्वेन हेतु-हेतुमद्भाव इत्यपूर्वे वक्ष्यते । तत्र योग्यतादिबलादपूर्वव्यक्तिलाभः। अनुमाने तु पक्षधर्मताबलात् धूमो वह्निव्याप्य इत्यनुभवो, न तु सर्वो धूमो वह्निव्याप्य इति, येन सर्वभानार्थं तत्स्वीकारः। अथ वह्निमानयमित्यनुमितिर्विशेषणज्ञानसाध्या विशिष्टज्ञानत्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा। क्वचित् धूमस्यापि व्यापकत्वादिति चेत्, न । विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यावश्यकत्वेन हेतुत्वात् । तच्च वृत्तमेव । न तु विशेषणज्ञानमपि तथा गौरवात् । गौरयमिति विशिष्टज्ञाने युगपद् विशेष्ये विशेषणे संनिकर्ष एव, कारणम् न तु निर्विकल्पकम्, मानाभावात् । विशिष्टज्ञानत्वमेव मानमिति चेन्न । दृष्टान्ताभावात् । दण्डी पुरुष इत्यत्र विशेषणधीजन्यत्वानभ्युपगमात्। विशिष्टवैशिष्ट्यज्ञानत्वात् । अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्वज्ञः स्यात् । तथा च परकीयज्ञानविषये घटत्वं न वेति संशयो न स्यात् प्रमेयत्वेन तदन्यतरनिश्चयात् । प्रमेयत्वेन घटं जानात्येव घटत्वं तस्य न जानातीति चेत् न । तत् किं घटत्वं न प्रमेयं येन तन्न जानीयात् । सकलघटवृत्तिधर्मस्य प्रमेयत्त्वेन तदज्ञानासम्भवात् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सामान्यलक्षणापूर्वपक्षः।**

## अथ सामान्यलक्षणासिद्धान्तः

उच्यते । यदि सामान्यलक्षणा नास्ति, तदा अनुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् । प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेन अज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते । **यत्तु** पाकादौ चिकीर्षा सुखादाविच्छा न स्यात् सिद्धे इच्छाविरहात् असिधस्ययस्याज्ञानात् । तस्मात्सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहायासिद्धे इच्छा भवतीत्यभ्युपेयम्। **तन्न**। प्रसिद्धस्याज्ञानेऽपि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिस्वाभाव्यादसिद्धे तयोरुत्पत्तेः। न चातिप्रसङ्गः । समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात्; न तु समानविषयत्वेनापि क्वचिदप्यकल्पनात्। समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्यावश्यकत्वेन गौरवाच्चेति परसिद्धान्तात्, । न च सर्वज्ञत्वे संशयो न स्यादिति दोषः। घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि । तच्च न वृत्तम् स्वसामग्रीविरहात् । अतो घटत्वादिसकलविशेषज्ञानेऽपि स घटो न वेति संशय इति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सामान्यलक्षणासिद्धान्तः।**

## अथोपाधिवादप्रकरणम्

उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते । तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः । अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः । अतो व्यापकत्वादिज्ञाने नान्योन्याश्रयः । यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । तत्प्रतियोगित्वं च अव्यापकत्वम् । प्रतियोगित्वं च तदधिकरणानधिकरणत्वमिति **वदन्ति** । **तन्न** । साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः । न च तयोरनुपाधित्वम् । दूषकताबीजसाम्यात् । मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य, प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति

पक्षेतरेऽतिव्याप्तिश्च (अतिव्याप्तेश्च)। न च व्यतिरेके पर्वततेतरान्यत्वादित्यत्र इतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः। बाधोन्नीतस्याप्यनुपाधितापत्तेः। न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण तत्सार्थ कत्वात्। वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत्, अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वम्, तच्च तत्राप्यस्ति । अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत । विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणम् । तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र पक्षस्यैव विपक्षत्वात् न तु पर्वतेतरत्वादेरिति चेत् न । न हि वस्तु विपक्षाव्यावर्तकविशेषणशून्यम्, सर्वत्र प्रमेयत्वादेस्सत्त्वात् । तत्रोपात्तेति विशेषणे सिद्ध्यसिद्धिव्याघातः । तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिः । अतो हेतोर्व्यभिचार एव । व्यभिचारे चावश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात् । तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्। अत एवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तम् । दूषणसमर्थत्वेन जातित्वाभावात् । एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्। उपाधित्वाभावेऽपि दूषणसमर्थत्वात् ।

अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणम् । पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकः, असाधारणत्वात्। न तु व्यभिचारोन्नायकतया दूषणम्। यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् । व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात् । तस्माद् यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौल्यादिति दूषकताबीजम् । सोऽयं सत्प्रतिपक्ष एवेति ।

मैवम् । एवं हि सत्प्रतिपक्षे उपाध्युद्भावनं न स्यात् , सप्रतिपक्षान्तरवत् । किं चैवं बोधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधारण्यात् । ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात् । न तु हेतुमतिपक्षे बाधे

पक्षेतरोपाधिनियमः, प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वे साध्ये अतेजस्त्वादेरुपाधित्वसम्भवादिति चेत् न । तेजोमात्रपक्षत्वे अतेजस्त्वं विना अन्यस्योपाधेरभावात् । किं च (अपि च) पर्वतावयववृत्त्यन्यत्वं पर्वतेतरद्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वतान्यत्वादिकमुपाधि: स्यादेव । व्यतिरेके असाधारण्याभावात् व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च । न चासाधारण्यम्, तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात्, तस्मादुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चय: । किं तूभयत्र व्यभिचारसंशय: । तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वम् । तच्च पक्षेतरेऽप्यस्ति । तदुक्तम् । उपाधेरेव व्यभिचारशङ्केति । भवतु वोक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधि: तथापि लक्षणमतिव्यापकम् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वम्। दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात्। तथा दूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च ।

अथ साध्यप्रयोजको धर्म उपाधि: । प्रयोजकत्वं च न न्यूनाधिकदेशवृत्ते: । तस्मिन् सत्यभवत: तेन विनापि भवत: तदप्रयोजकत्वात् । अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्गादिति चेत् न । दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितम् । तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकम्, नत्वधिकं व्यर्थत्वात् ।

अथोपाधिः (ननूपाधि:) स उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते, यथा जपाकुसुमं स्फटिकलौहित्ये उपाधि: । तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति, तेनासावुपाधिः। न च व्याप्यत्वमात्रेण दूषकत्वमिति साध्यव्यापकतापीष्यते । तथा च समव्याप्त एवोपाधिरिति चेत् तत् किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधिशब्दवाच्यत्वम्? तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ता भावाद्वा ? नाद्य: । तस्यापि व्यभिचाराद्युन्नायकत्वात्। नापर:, न हि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबिम्बजनके एवोपाधिपदप्रयोग:। लाभाद्युपाधिना कृतमित्यादौ लाभादावप्युपाधिपदप्रयोगात् । किं च न शास्त्रे

लौकिकव्यवहारार्थमुपाधिव्युत्पादनम्, किन्त्वनुमानदूषणार्थम् । तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तथै वोपाधिपदप्रयोगः ।

**अन्ये तु** यदभावो व्यभिचारविरोधी स उपाधिः । न च विषमव्याप्तस्याभावो व्यभिचारं विरुणाद्धि । तस्याभावेऽपि व्यभिचारात् । अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वम् , तद्व्याप्यं च गुणत्वम्। न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति । समव्याप्तिकस्य च व्यतिरेकस्तथा । न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत् तत् साध्यं व्यभिचरति। व्यभिचारे चान्ततःसाध्यमेवोपाधिः, अभेदेऽपि व्याप्यव्यापकत्वात् साधनाव्यापकत्वाच्चेति स्वीचक्रुः। **तन्न**। तवापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रम्, आवश्यकत्वात् लाघवाच्च, न साध्यव्यापकव्याप्यत्वमपि, भवतैव व्यभिचारस्य दर्शितत्वात् । न च साध्यव्याप्यव्याप्यत्वमेव अनौपाधिकत्वम् । साध्यव्याप्यमित्यत्रापि हि अनौपाधिकत्वं तदेव वाच्यम् । तथा चानवस्थेति । अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापकत्वे विशेषणं दत्तमेव । किं च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणम् । न तु यद्व्यतिरेके भवत्येवेत्येतद्गर्भम् । विरुद्धत्वादेरप्यदोषत्वापत्तेः । नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वनमुपाधित्वम् । साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् । शब्दोऽभिधेयः प्रमेयत्वादित्यत्र अश्रावणत्वस्योपाधित्वापत्तेश्च । शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्र अश्रावणत्वं व्यापकम्, पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् । आद्रेन्धनवत्त्वादावुपाधौ पक्षनियततादृदशधर्माभावाच्च । अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः, श्यामत्वे शाकपाकजत्वमुपाधिरिति । तन्न । पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्। जलं प्रमेयं रसवत्वादित्यत्र रसवत्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात् । सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गाच्च। किं च

पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचार: केवलसाध्यव्यतिरेको वा साधनीय: । तथा चार्थान्तरम् । केवलसाध्ये हि विवादो न तु विशिष्टे । अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचार: साध्य इति चेत् न । अप्राप्तकालत्वात् । प्रथमं साध्यव्यभिचार एवोद्भाव्यः तत्रासिद्धावुपाधिरिति चेत् तर्हि प्रकृतानुमाने नोपाधिः दूषणं स्यात् । किं च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः । स्यादेतत् । पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । पर्यवसितं साध्यं पक्षधर्मताबललभ्यम् । यथा शब्दोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् मेयत्वादित्यत्र पर्यवसितं यत् साध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः। यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः। तदुक्तं **"वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नियमयन् दूषकतबीजसाम्राज्यात्"** इति । अनेन पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकोपाधिः संगृह्यते तादृशसाध्यस्य पर्यवसितत्वादिति । तन्न । एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकम् अनित्यद्रव्या समवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निस्पर्शद्रव्यसमवेतत्वमुपाधि: स्यात् । भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यम् तस्य व्यापकं साधनाव्यापकं च । किं च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधि: । तदसिद्धौ च कस्य व्यापक: । न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिवादपूर्वपक्ष:**

**उपाधिवादसिद्धान्तः**

अत्रोच्यते । यद् व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधि: । लक्षणं तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्। यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसितं साध्यम् । स च धर्म: क्वचित्साधनमेव । क्वचित् द्रव्यत्वादि । क्वचिन्महानसत्वादि । तथा हि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य

व्यभिचारेण साधनस्य साध्यव्यभिचार: स्फुट एव । व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात् । साधनावच्छिन्नपक्षधर्मावच्छिन्न

साध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव । यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य, वायो: प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च । विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् । अत एव नार्थान्तरम् । विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचार: सिध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति, पक्षधर्मताबलात्। अन्यथा प्रतीतेरपर्यवसानात् । न च पक्षधर्मताबलात् प्रकृतसिद्धावर्थान्तरम् ।

यद्वा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वात् महत्त्ववत् । तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत् । अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । तच्चाभेदेऽपि।

यद्वा य: साधनव्यभिचारी साध्यव्यभिचारोन्नायक: स उपाधि: । तत्त्वं च साक्षात् परम्परया वेति नार्थान्तरम् ।

किंचार्थान्तरस्य पुरुषदोषतया आभासान्तरस्य तत्राभावात् उपाधिरेव भावत्वादिकं दोष: । न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वम्, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधि: स्यात्। केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् । न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः। तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात्। सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम्।

बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति। एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वम् । पक्षमात्रव्यावर्तकविशेषणवत्त्वात्। अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वम्, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वम्, मित्रातनयश्यामत्वे शाकपाकजत्वम्, जन्यानित्यत्वे

भावत्वमुपाधि:। तदुत्कर्षेण साध्योत्कर्षात्। अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्। तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च बहुधा व्याकुली स्यादिति चेत्, न । तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात्। यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वम्, व्यभिचारसंशयोपधायकत्वात्। यदा च तादृश्येक त्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितम् । पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वम्। अतो न संदिग्धोपाधिरपि सः ।

**यत्तु** पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि, ग्राहकसाम्यात् । तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्तितव्यम्। न चैवम्, तथा च पक्षेतर: साध्यव्यापकतासंशयेन सन्दिग्ध: कथं परं दूषयेदिति ।

**तन्न**। तथाहि साध्यव्यापकतापक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव।

ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति, तदा तदभावेनैव व्याप्तेरग्रह:। अथास्ति तदा साध्यव्याप्याव्यापकत्वेन उपाधि: साध्याव्यापकत्व निश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणम्। न च व्याप्त्यभावव्याप्यमुभयम्, अत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम् । उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेत् ,

न । सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वात् अवच्छेदकभेदेन तदुभयसम्बन्धो वाच्यः । तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्का

भावोपजीवनमन्तरेणोपाधिरावश्यकः (साध्यसम्बन्धितावच्छेदकं रूपं उपाधिरावश्यक:) तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावात् दूषकत्वम् ।

**अन्ये तु** यद् व्यावृत्त्या यस्य साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतावुपाधिः । स च धर्मो यस्याभावात्पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनवत्त्वम्। व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अत एव तत्र साध्यसाधनसंबन्धाभाव: पक्षे। एवं

भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोः सम्बन्धो निवर्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिध्यति । तथा वायावुद्भूतरूपवत्त्वं निवर्तमानं बहिद्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति । तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति । अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वम् । स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वा-दिति।

यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वम्। पक्षेतरोऽपि क्वचिदुपाधिः । तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम् । न च वह्निधूमसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् । आपाद्याप्रसिद्धेरिति ।

**तन्न** । अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यम्। तच्च न व्यतिरेकित्वम्, अतिप्रसङ्गात् । विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च ।

**केचित्तु** साधनव्यापकोऽप्युपाधिः क्वचित् यत्र पक्षावृत्तिर्हेतुः । यथा करका पृथिवी कठिनसंयोगादित्यत्रानुष्णाशीतस्पर्शवत्त्वम् । न च तत्र स्वरूपासिद्धिरेवदोषः। सर्वत्रोपाधेर्दूषणान्तरसंकरा**दित्याहुः**।

साध्यं च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात्। अनुमितिमात्रोच्छेदप्रसङ्गाच्च ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिसामान्यलक्षणम्।।**

## अथोपाधिविभागः

स चायं द्विविधः-- निश्चितः सन्दिग्धश्च । साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकतया निश्चितोपाधिः। यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम् । यत्र च साधनाव्यापकत्वसन्देहस्साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकतया सन्दिग्धोपाधिः। यथा मित्रातनयत्वेन

श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम् । न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम् । तत्र श्यामत्वस्योपाधित्वात्। उभयस्यापि साधनेऽर्थान्तरम्। श्यामत्वमात्रे हि विवादो न तूभयत्र। न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्री उपाधिः स्यात् । तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् । अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्थातव्यमित्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् । अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधि:। यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय **"सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्रे"**त्युक्तम्। यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादि:, यथा च शाकपाकजन्यत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे।

**यत्तु** उपाधिसन्देहो नोपाधिः न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति ।

**तन्न** । सन्दिग्धानैकान्तिकवत् व्यभिचारसंशयाधायकत्वेन दूषकत्वात् , उपाधेरिव व्यभिचारनिश्चयाधायकतया।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिविभाग:।।**

**अथोपाधेर्दूषकताबीजपूर्वपक्ष:**

इदानीमुपाधेर्दूषकताबीजं निरूप्यते। नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम् । तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम् । **"शतमप्यन्धानां न पश्यति"** इति न्यायात्, एकेनापि बहूनां प्रतिबन्धाच्च। व्याप्तिपक्षधर्मते हि बलम्, तच्च तुल्यमेव। न तु भूयस्त्वमपि, एकस्मादप्यनुमितिदर्शनात् (एकस्मादप्यनुमिते:) सन्दिग्धोपाधेरदूषकतापत्तेश्च, तदव्यतिरेकस्य पक्षे सन्दिग्धत्वात् ।

अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात् । व्यतिरेकेऽसाधारण्यात्। पक्षवृत्तिश्चोपाधिर्न स्यात्, यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वम्, अन्धकारो द्रव्यं

स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वम्, तदव्यतिरेकस्य पक्षावृत्तित्वात् । न च नायमुपाधिः, तल्लक्षणसत्त्वात्, अन्यथापि दूषकत्वसम्भवाच्च।

किंच साध्यव्याप्याव्यापकत्वेनोपाधेः साध्याव्यापकत्वे तदव्यतिरेकेण कथं सत्प्रतिपक्षः? न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः। नापि व्याप्तिविरहरूपतया। असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात्। नाप्यनौपाधिकत्वज्ञानस्य व्याप्तिधीहेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्तर्भावः। न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमित्युक्तम् । न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् । न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणम्, येन तत्प्रतिबन्धकं स्यात्, किंतु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा। नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयम्, तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयम् व्याप्तिग्राहकसाम्यात्। नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् । तस्मादुपाधिर्हेत्वाभासान्तरमिति।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिदूषकताबीजपूर्वपक्षः।।**

**अथोपाधिदूषकताबीजसिद्धान्तः**

उच्यते । आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्। यदि हि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता।

किं च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयो वाच्यः, तेन विना तेषामभावात् ।

तस्मादुपाधिनिश्चयात् व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम्।

यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम् । न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम् । उपाधिमात्रोच्छेदप्रसङ्गात्। सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत्। अवृत्तिगगनादौ साध्याव्यापकत्वात् । संयोगादौ हेतौ साधनव्यापकत्वाच्च।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिदूषकताबीजसिद्धान्त:।।**

## अथोपाध्याभासनिरूपणम्

अथोपाध्याभासा:। असाधारणविपर्ययो यथा अन्वव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम्। अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादि:। बाधितसाध्यविपर्ययो यथा वह्निरुष्णस्तेजस्त्वादित्यत्राकृतकत्वम्। पक्षाव्यापकविपर्ययो यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम्। अत्राणुव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धे:। पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्य: अनित्यवृत्तिगुणत्वात्, रसो नित्यो रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ। पूर्वसाधनताया: प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्। उपाधेर्नित्यदोषत्वाच्च। न हि यद्येन सोपाधिसम्बद्धं तत् तेनानुपाधित्वसम्बद्धं सम्भवति। न तु सत्प्रतिपक्षोच्छेद: पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम्। स्थापनाया यथाभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वात् । न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम्। अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृकत्वानुमाने नित्यत्वादि: । पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलहृयहृदान्यतरान्यत्वम् । पक्षेतरसाध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वम् । न चात्र व्यर्थविशेषणत्वं दूषणम्। तत्त्वेऽपि उपाधेराभासत्वात् । तत्तुल्यं च यथा अत्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे उपाधिवादः ।**

## अथ पक्षताप्रकरणम्

व्याप्त्यनन्तरं पक्षधर्मतानिरूप्यते। तत्र न तावत् संदिग्धसाध्यधर्मत्वं पक्षत्वम् । संदेहो हि न विशेषणम्, परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात्। नोपलक्षणम्, अव्यावर्तकतापत्तेः। नापि साधकबाधकप्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् । नाप्यभावद्वयं तथा । बाधकप्रमाणाभावस्य व्यर्थत्वात्। ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेन अनुमित्यनुत्पादात् । नापि साधकप्रमाणाभावः । **"श्रोतव्यो मन्तव्यः"** इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात् । प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् । एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च। **"मन्तव्यश्चोपपत्तिभिः"** इति स्मरणात् ।

अथ सिषाधयिषितसाध्यधर्मा धर्मी पक्षः । तथाहि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छया आत्मानुमानम् । अत एव **"प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः। न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः"** इति वाचस्पतिवचनयोरविरोधः, अनुमित्सातद्विरहाभ्यां तदुपपत्तेरिति चेत् न। सन्देहवत् परामर्शपूर्वं सिषाधयिषाया अप्यभावात्। योग्यतायाश्चानिरूपणात्। सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात्, स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेन अनपेक्षितानुमानदर्शनाच्चेति।

उच्यते। सिषाधयिषाविरहसहकृतसाधकप्रमाणभावो (मानाभावो) यत्रास्ति स पक्षः । तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः। यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वा उभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम् । यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वम्, तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे पक्षताप्रकरणम् ।।**

## अथ परामर्शप्रकरणम्

पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यतावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्मताज्ञानं तथा, लाघवात् परामर्शहेतुत्वेनावश्यकत्वाच्च। एवं धूमो वह्निव्याप्यो धूमवानश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु ।

न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवात् उपजीव्यत्वाच्चेति वाच्यम्। तस्यानुमितेः पूर्वमसिद्धौ युगपदुपस्थित्यभावात्। अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसंनिकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसंनिकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वसाधारणधर्मदर्शनात् व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्र्या वृत्तत्वादिति स एवानुमितिहेतुरिति चेत् न । प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात् अनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्यक्षम् । अन्यथा तवापि परामर्शानन्तरं तदनुव्यवसायो वा भवेन्नत्वनुमितिरेव। अथ वह्निव्याप्यो धूम इति स्मरतः पर्वतीयधूमेन्द्रियसंनिकर्षेण प्रथमत एव व्याप्तिधूमत्वयोर्वैशिष्ट्यं यत्र भासते विशेषणज्ञानस्य पूर्वं वृत्तत्वात् तत्र, यत्र वा आप्तवाक्यात् वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानहेतुत्वकल्पनात् अन्यत्रापि तथेति चेत् न । इन्द्रियासंनिकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात् तेन विना अनुमित्यनुत्पादापत्तेः, अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात् । न चानुमानादिना तत्र परामर्शः, अनवस्थानात् । अथ यथा सः देवदत्तो गौरो न वा, परमाणु गुरुत्वाधिकरणं न वेति संशयः बहिरस्वतन्त्रेणापि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्जन्यते, यथा वा निद्रासहकारेण बाह्यस्वप्नानुभवस्तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत् न। व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः। तदेव हि प्रमाणान्तरं यदसाधारणं सहकार्यासाद्य मनो बहिर्गोचरप्रमां जनयति, यथेन्द्रियादि । संशयस्वप्नौ तु न प्रेमे इति न निद्रादेः प्रमाणान्तरत्वम् । न च तवापि कथं स धूमो वह्निव्याप्य इति व्यवहारः, तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यम् । तत्र स्मृतधूमे धूमत्वेन वह्निव्याप्यत्वानुमानात् । न च त्वन्मते धूमत्वेन व्याप्यत्वानुभवः सम्भवति ।

अत एव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमानिति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा । अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेत् न । धूमो वह्निव्याप्य इति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात् । अन्यथा परामर्शोऽपि कुतो न स्यात्। संशयेन प्रतिबन्धादिति चेत् तुल्यम् । न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्तकत्वात् धूमसामान्ये संशयो मा भूत्, विशेषसंशयस्तु विशेषनिश्चयनिवर्तनीय इति धूमविशेषे संशयनिरासार्थं पृथक् व्याप्तिनिश्चयो वाच्य इति वाच्यम् । यत्र हि यद्व्यावर्तकधर्मदर्शनं तत्र न तत्संशयः, तच्च सामान्ये विशेषे वेति । वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव ।

ननु भावोऽभावो वा उभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यतावच्छेदक-योरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्यान्तरत्वस्य लिङ्गत्वाभावादिति चेत् न । भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य लिङ्गत्वात् । एवं धूमालोकान्यतरत्वमपि लिङ्गम् । अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत् तन्निश्चयसाध्यम् । तथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम्, अतो व्याप्याभेदज्ञानं तद्धेतुः सिद्ध्यतीति चेत् न । धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्मताज्ञाने सति विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानम्, किं त्वनुमितेरेव तत्रोत्पत्तिः तत्सामग्रीसत्त्वात् । अतो न व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम् येन व्याप्याभेदज्ञानं तद्धेतुः स्यात् । न च धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्मताज्ञाने इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिः, अतो विशिष्टज्ञानं तद्धेतुरिति वाच्यम् । धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमितिसद्भावादेव। अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति । अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः, परामर्शहेतुतया तस्यावश्यकत्वात् । अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः। न चैवं गौरवम्, तदा विशिष्टज्ञानानुपस्थितेः। न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम् । अभेदज्ञानस्याजनकत्वात्। त्वयापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च।

अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्मान्तरस्याभावात्, अत एव तस्य विलक्षणत्वादिति चेत् न। व्यक्तेरेव तत्र प्रकारत्वात् । न हि गौर्गोत्वमिति ज्ञानयोरविशेष: । अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात्, गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च। न चैवमनवस्था, तदितरवृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात् ।

**इति परामर्शपूर्वपक्षचिन्तामणि:।**

**अथ परामर्शसिद्धान्त:**

**अत्रोच्यते** । अयमालोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमिति: । न च धूमत्वेनालोकत्वेन वा तत्र निश्चय: । अथ तदन्यान्यत्वमेव तत्र लिङ्गम् । न च तदज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यम् । धूमालोकान्यान्यत्वज्ञानं विना तवापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेत् न। न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकम्, गौरवात्, व्यभिचारा वारकविशेषणवत्त्वाच्च । किं तु धूमत्वादिकं, तच्च तत्र संदिग्धमेव । ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात् । पुरुषस्तु तत्र नीलधूमवत्त्वादित्यत्रेवाधिकेन निगृह्यते न तु व्याप्यत्वासिद्ध्येति चेत् न।

तदन्यान्यत् धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यम् । न च वस्तुगत्या व्याप्यज्ञानादनुमितिः अतिप्रसङ्गात् । किं तु व्याप्यतावच्छेदकप्रकारकज्ञानात् । न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम् । न च तदन्यान्यत्वात् वह्निव्याप्यत्वमपि तत्र नानुमेयम्, व्यर्थविशेषणत्वादिति वाच्यम् । प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनात् व्याप्यत्वज्ञानं जनयति । विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रिय संनिकर्षतदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् । न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम् । अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् । तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न

तु साक्षादनुमितिहेतुरिति । किं च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा ।

अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकम् । तथा हि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्त्यवच्छेदिका, आश्रयभेदेन च व्याप्तिभेदादिति चेत्, न । सकलधूमादिवृत्तिव्याप्तौ मानाभावात् यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात् । अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत् पक्षधर्मे भासते तत्र लाघवात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम् । न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय । सप्रमाणकत्वात्, कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात् । न चासंनिकृष्टे धूमे तदभाव:, भवन्मतानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात् । यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशवत् इत्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभव:, अनुमानयो: प्रत्येकतदुभयसहचारविषयत्वेन व्याप्त्यग्राहकत्वात् । न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयम् । तत्रापि व्याप्तिग्राहकाभावात्। न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम् । इन्द्रियादे: संनिकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात् । सहकारिता च तदभावेऽपि भवति । बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे संसर्गानुभवस्य सकलजनसिद्धत्वात् । कथमन्यथा कविकाव्यादिकमिति।

स्यादेतत् । पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण । वह्नेरसंनिकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यास्योग्यत्वात् । न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूमविशेषे संस्कारात् स्मरणाद्वा उपनीतव्याप्याभेदग्रह: प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम् । एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे

पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमदभेदग्रहो वह्निमत्त्वसंसर्गग्रहो वास्तु, किमनुमानेन।

पृथग्वह्निमत्त्वस्मरणं तत्र नास्ति, किं तु व्याप्त्यवच्छेदकतयेति चेत्, न। वह्निमान्न वेति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात् । न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वम्, गौरवात् ।

अथ यो यत्र विशिष्य पूर्वमवगत: स तत्र संस्कारवशात् यथार्थप्रत्यक्षे भासते, यथा तत्ताप्रत्यभिज्ञाने । न च पर्वते विशिष्य पुरा वह्निरवगत: । यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानम्। अन्यथा अनुमितिरिति चेत्, तर्हि पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात् तद्गतव्याप्तिबोध: प्रत्यक्षेण।

न च सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत् पर्वतीयधूमे व्याप्त्यवगम:, वह्नेस्तु न प्रत्यक्षसामग्री संनिकर्षाभावादिति वाच्यम् । हेतुसाध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात् । न च पर्वते वह्निसाक्षात्कारः। न च पक्षधर्मस्य साध्यसामानाधिकरण्यविशेषो व्याप्ति: पक्षे साध्यग्रहं विनेत्युक्तम् ।

उच्यते । विशेषणज्ञानं तस्य विशेष्ये सम्बन्धः तयोरसंसर्गाग्रहो विशेषदर्शनं विशेषणविशेष्येन्द्रियसंनिकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्, अस्ति चात्रापि व्याप्तिस्मरणम्, स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वम् ।

एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसंनिकर्षश्च व्याप्तिविशिष्टज्ञानकारणम्। न च वह्निविशिष्टज्ञानसामग्री वह्नेरसंनिकर्षात् ।

**कश्चित्तु** धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वं गृहीतम् । तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात् । एवं च धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरिति **प्राह** ।

भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः । तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्तिव्युत्पादनमफलं स्यात्। दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानम् । न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यताग्रहः, मानाभवात्। तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः ।

**अन्ये तु** स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वम्, तत्सामानाधिकरण्यं च व्याप्यत्वम् । तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः । साध्यस्य पक्षधर्मव्यापकताज्ञानं च परामर्शः, न तु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षज्ञानं वा, गौरवात् ।

अत एव यो यो धूमवान् स सोऽग्निमान् इत्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते । अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् । दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भाव्यः ।

अथ पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि, तदा पर्वतीयधूमं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत्, तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम्। यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानम् ।

वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, न तु धूमसामानाधिकरण्यम् । व्याप्यत्वं तु सामानाधिकरण्यविशेष इति तवैवानुमितिरफला स्यात्।

न चैवं परामर्शस्य चाक्षुषत्वं न स्यात् व्यापकस्य विशेष्यस्येन्द्रियासंनिकर्षादिति वाच्यम् । इष्टत्वात् । असंनिकृष्टधूमादाविव मानस एव हि सर्वत्र परामर्शः । चक्षुरन्वयव्यतिरेकानुविधानं च पक्षवृत्तिधूमोपनयोपक्षीणम् ।

अथ जनकज्ञाने उपसर्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात् । न हि जनकज्ञाने उपसर्जनतयावगतं जन्यज्ञाने प्राधान्येन भासते, तथादर्शनात् । न चानुमितेस्तथात्वमसिद्धम्, पर्वतोऽयं वह्निमानित्यनुमितेर्लोकसिद्धत्वादिति चेत् न ।

पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात्। अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः । न हि कारणीभूतज्ञाने यत् विशेष्यतया भासते तत् कार्यीभूतेऽपि तथा । इह भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने तव च व्यभिचारात् । तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत् स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथाभूताम्, एवं ममापि तुल्यमिति ।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे परामर्शवाद:।**

**अथ लिङ्गकारणतावाद:**

एवं लिङ्गपरामर्श: कारणम्, न तु परामृश्यमानं लिङ्गम् । अथ परामर्शमात्रं न हेतु:, अपि तु लिङ्गपरामर्श: । तथा च लिङ्गमपि हेतु:, विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात् । न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धम्, परिचये विशेषणान्तराभावेन लिङ्गमेव विशेषकम् । तथा चानन्यथासिद्धत्वात् तदपि हेतु: । अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात् ।

अपि च धूमवान् वह्निमानिति धूमसमानकालवह्निविषया धूमविशेषणिका अनुमिति: ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽशाब्दविशिष्ट-भानत्वात्, दण्डी पुरुष इति विशिष्टप्रत्ययवत् ।

अत एव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभाननैयत्यं यथा दण्डी पुरुष इति प्रत्यक्षे, तेन धूमसमानकालीनवह्निसिद्धिः । अन्यथा तत्तद्धूमकालवृत्तिवह्न्यनुमानं न स्यात्, समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात् ।

किं च लिङ्गकरणत्वपक्षे परामर्श एव तद्व्यापार: । परामर्शस्य तु न व्यापारान्तरमस्ति, चरमकारणत्वादिति न तत् करणम् ।

अत्रोच्यते । अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतु:, व्यापारपूर्ववर्तितयोरभावात् ।

न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः तदा तस्यापरामर्शात्, परामर्शाविषयस्य कारणताग्राहकाभावात्। भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च । यदि च वर्तमानमेव तत्र लिङ्गं तदा वर्तमानवह्न्यनुमानोपपत्तिः।

अथ भावि भूतं वा धूमादि न लिङ्गम् । किं तु तत्प्रागभावस्तद्ध्वंसश्च वर्तमान एव, तयोरपि वह्निसमानदेशत्वादिति चेत् न। अतीतभाविदिनवृत्तितया निश्चितात् वर्तमानतया सन्दिग्धात् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे, तयो: संदिग्धत्वात्। नापि धूमः तस्यावर्तमानत्वात् ।

किं च भूतभाविवर्तमानत्वाविषयात् पर्वते धूम इति ज्ञानात् यत्रानुमानं तत्र का गतिः ? सर्वत्र प्रागभावाद्यन्यतमवत्वं धूमाद्यत्यन्ताभावाभाववत्त्वं वा लिङ्गमिति चेत् न । व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् । अन्यतमत्वाज्ञानेऽपि धूमज्ञानादनुमितिसत्त्वाच्च ।

अपि च धूमप्रागभावादि न लिङ्गम्, न वा तद्धीरनुमितिकारणम् । प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमादिज्ञानादेवानुमितिसम्भवाच्च । किं च लिङ्गं नानुमितिमात्रे हेतु: । लिङ्गं विनापि धूलीपटलाल्लिङ्गभ्रमेणानुमित्युत्पत्ते:। नापि लिङ्गं प्रमानुमितौ परामर्शोऽनुमितिमात्रे हेतु: । तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात् यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात् ।

अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वम् । तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेत् न । भाविना भूतेन वा यदा कदाचिद् विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा । धूमकालीनवह्न्यनुमानं च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव।

अथ वा धूमकाल: पक्षतावच्छेदकः । पक्षतावच्छेदकधर्मसमानाधिकरणं च पक्षधर्मताबलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः।

**यत्तु** व्यापाराभावान्न परामर्शः करणमिति (तत्) तथैव किं तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः । न च परामर्शस्य संस्कारो व्यापारः। परामर्शस्य चरमकारणत्वेन संस्कारोत्पादनसमयेऽनुमित्युत्पादनात् । नापि तर्कः । व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे लिङ्गकारणतावादः ।**

## अथ केवलान्वयिप्रकरणम्

तच्चानुमानं त्रिविधम् केवलान्वयिकेवलव्यतिरेक्यान्वयव्यतिरेकि भेदात् । तत्रासद्विपक्षं केवलान्वयि । तथा हि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः। अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् ।

अथ यथाकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाभिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् । एवं चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववत् इति चेत् न । व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात् । एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वेऽत्यन्ताभावाप्रतियोगित्वमेवकेवलान्वय। अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि। न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वं च नानेति वाच्यम् । अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः ।

अत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात् । अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात् । नाप्याश्रयनाशजन्यगुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम् । यत्र हि प्रतियोगिप्रागभावो वर्तते तत्र न तदत्यन्ताभावो वर्तते । तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्तते तत्र कथं नाशात्यन्ताभावो वर्तताम् । तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेत् न । पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वात् उत्तरकाले आश्रयस्यैवाभावात् ।

नाप्याकाशात्यन्ताभाव: केवलान्वयी । तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् । अभावात्यन्ताभावस्य भावत्वात् ।

अथाभावात्यन्ताभावो न प्रतियोगिरूपः, तथा सत्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेत् न । अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव, अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति ।

उच्यते । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि न स वृत्तिमान् इत्याकाशात्यन्ताभाव एव केवलान्वयी। तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि । वृत्तिमतोऽत्यन्ताभावस्याप्रतियोगित्वात् ।

ननु प्रमेयत्वं प्रमाविषयत्वम्, तच्च न केवलान्वयि, प्रमाया विषयत्वस्य चाननुगमादिति वाच्यम् । प्रमात्वमेव हि परम्परासम्बन्धात् घटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा । तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः ? प्रमेयत्वमत्र वर्तते न वेति संशयश्च न प्रमेयपक्षकः किंतु प्रमेयत्वपक्षको भिन्नविषयकः । प्रमेयत्वपक्षके चास्तित्वसाध्यस्यान्वयव्यतिरेकित्वम् । तथा च घट: प्रमेयो न वेति संशयो मृग्यते। स च नास्त्येव ।

अथ पक्ष: साध्यवान्न वा, पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव, **"तदस्यास्त्यस्मिन्" (पा.सू.5.2.94)** इति मतुपो विधानादिति चेत्, न। विशेषणविशेष्यभावभेदेनार्थभेदात् ।

मैवम् । य एव हि संशय: पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गम्, आवश्यकत्वात् लाघवाच्च । न तु समानविषयकत्वमपि तत्र तन्त्रम् , गौरवात्। प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयश्च घट: प्रमेय इति साध्यसिद्धिविरोधी भवत्येव । यद्वा संशययोग्यतैवानुमानाङ्गम्, संशयश्च तदानीं विनाशात्। न च सापि

साधकबाधकप्रमाणाभाव:, प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धस्तदभावासिद्धिरिति वाच्यम् । पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्येव साध्यसाधकत्वेन तदाभावस्यैव योग्यतात्वात् । प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय **इत्यन्ये** ।

नन्वेकरूपविकलमिदं कथं गमकम् ? तत्त्वे वा व्यतिरेकविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेत् न । अन्वयव्यतिरेकव्याप्त्योरन्यतर-निश्चयेनानुमित्यनुभवात्। युगपदुभयव्याप्त्युपस्थितौ विनिगमनाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना । व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते। अत्र तु विपक्षाभावेन शङ्कैव नोदेति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे केवलान्वयिप्रकरणम् ।**

**अथ केवलव्यतिरेकिप्रकरणम् ।**

केवलव्यतिरेकी त्वसत्सपक्षः । यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः । ननु व्यतिरेकि नानुमानम्, व्याप्तिपक्षधर्मताज्ञानस्य तद्धेतुत्वात् । अत्र च व्यतिरेकसहचारात्तत्र व्याप्तिरन्वयस्य न पक्षधर्मता । न च व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वं द्वयमनुमितिप्रयोजकमिति वाच्यम्। अननुगमात्। न चान्यतरत्वं तथा, एकप्रमाणपरिशेषापत्ते: । न च तृणारणिमणिन्यायेनानुमितिविशेषे तत्कारणत्वमिति वाच्यम्। व्यतिरेकिसाध्येऽनुमितित्वासिद्धे:, उभयसिद्धक्लृप्ततत्कारणस्याभावात् ।

न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यम् । गौरवात्। केवलान्वयिन्यभावाच्च ।

अथ साध्याभावव्यापकभावप्रतियोगित्वेन साध्यव्याप्यत्वमेवानुमीयते । एवं व्यतिरेकव्याप्त्या अन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते इति । तन्न। अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्ते: । अन्वयव्याप्त्यनुकूलतया च तदुपन्यासेऽन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वादिति ।

उच्यते । निरुपाधिव्यतिरेकसहचारेणान्वव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामाकत्वात् अन्वयव्यतिरेकिवत् । न चैवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितम्, नियतसामानाधिकरण्यरूपत्वात् व्याप्तेरिति चेत्, सत्यम्। गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अत **एवाचार्यः** पक्षतावच्छेदके न हेतुत्वमनुमेने । पृथिवीत्वमितरभेदव्याप्यमिति प्रतीतावपि सर्वा पृथिवी इतरभिन्नेति पृथिवीविशेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च।

यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः। साध्याभावव्यापकसाधना-भावाभावेन साधनेन पक्षे साध्याभावाभावस्य साध्यस्य साधनात् । व्यापकाभावेन व्याप्याभावावश्यम्भावात्।

अथैवं न साऽनुमितिः क्लृप्ततद्धेतुलिङ्गपरामर्शाभावात् , अन्यथाऽननुगम इति चेन्न । अनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वात्। न चैवमतिप्रसङ्गः, अनुमितिसामान्यसामग्र्या सत्यामप्यनुमितिविरहादनुमित्यनुत्पत्तेः, विशेषसामग्रीसापेक्षाया एव सामान्यसामग्र्या जनकत्वात्। अन्वयिव्यतिरेकिविशेषद्वयसामग्री च नास्त्येव।

ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमसिद्धं, तथा च न व्यतिरेकिनिरूपणं न वा पक्षत्वं न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं, तेषां साध्यज्ञानजन्यत्वात् ।

अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वं अनवगमे असाधारण्यम् । किञ्च इतरभेदो न स्वरूपं अधिकरणप्रतियोगिनोः पृथिवीजलाद्योरनुमानात् प्रागेव सिद्धेः नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगिमत्वम् , तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव। न च जलादिनिष्ठात्यन्ताभावप्रतियेगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यम् । जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात् । अन्योन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वादन्योन्याभावग्रहस्य, तथापि जलादिप्रतियोगिकान्योन्याभावस्य अप्रसिद्धिः। न च जलादिप्रत्येकान्योन्याभावः साध्यः, असाधारण्यप्रसङ्गात्।

अथ पृथिवी तेजोभिन्ना न वेति संशयेन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं प्रसिद्धं तदेव साध्यम्, एकविशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशिष्ट्यज्ञानत्वात्, एवञ्च संशयप्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम् । यद्वा पृथिवी जलादिभिन्ना न वेति प्रत्येकं त्रयोदशसंशयविषयाणां त्रयोदशान्योन्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेकादिनिरूपकः। न चैवं पृथिव्यामेव साध्यप्रस्द्धिर्व्यतिरेकिवैयर्थ्यम्, साध्यनिश्चयार्थ व्यतिरेकिप्रवृत्तेः। न चासाधारण्यम्, समुदितान्योन्याभावानां साध्यत्वे सपक्षाभावादिति चेन्न।

साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयो भवत्येव साध्यसन्देहे तद् व्यतिरेकसंशयस्य वज्रलेपत्वात्, तथा च संशयरूपा साध्यसिद्धिरिति शिष्यबन्धनम् , एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रतिपत्तिरूपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्वार्थप्रतिपादकात् साध्यप्रसिद्धिरिति परास्तम्। वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात् ।

न च तद्बुद्धौ वादिवाक्यजन्यत्वेनाप्रमाण्यसंशयात् निश्चयेऽपि संशय इति तन्निश्चयार्थं व्यतिरेकीति वाच्यम् । तर्हि संशयप्रसिद्धं साध्यम्, तस्य च न व्यतिरेकनिश्चयाकत्वमित्युक्तत्वात्, स्वार्थानुमाने तदभावाच्च ।

**केवलव्यतिरेकिसिद्धान्तः**

**उच्यते**। घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः घटो न जलादिरिति प्रतीतेः। नन्वयमन्योन्याभावो न प्रत्यक्षः अतीन्द्रियप्रतियोगिकाभावत्वात् परमाणुसंसर्गाभाववत्। योग्यानुपलब्धेरभावग्राहकत्वात् नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रतितेर्बाधकबलेन वायुर्वातीतिवल्लिङ्गग्रहोपक्षीणत्वादिति चेत्, न । यो ह्यनुपलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति न तु योग्यानुपलब्धिमात्रम्, अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् । अधिकरणे प्रतियोगिसत्वञ्च तर्कितं-यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येत न पिशाचानुपलम्भः स्यात् । न च पृथिवी जलाद्भिद्यते जलावृत्तिधर्मवत्त्वात् तेजोवत्, एवमन्येभ्योऽपि भेदसिद्धौ

द्वादशभिन्नेति विशेषणं दत्त्वा समवायभेदसाधनादन्वयिन एव पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यम् । जलादिभिन्ना सती समवायिभिन्नेति बुद्धावपि त्रयोदशभिन्नेति बुद्धेः व्यतिरेकिसाध्यत्वात् । न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनम्, सर्वा पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरभावात् । पक्षतावच्छेदकनानात्वे हि तत् , अत एवानित्ये वाङ्मनसे इत्यत्रानित्या वागिति बुद्धे: उद्देश्याया: सिद्धत्वादंशतः सिद्धसाधनम्, अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात् ।

न च घटः कथं पक्षः साध्यनिश्चयेन संशयसिषाधयिषयो: अभावादिति वाच्यम् । सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषाधयिषायाश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेषदर्शनं सिद्धिर्वा, अतस्तेन रुपेण संशयसिषाधयिषे न स्तः, पृथिवत्वेन तु भवत एव धूमवान् वह्निमानिति धूमवत्वेन वह्निनिश्चयेपि पर्वते वह्निसंशयवत् ।

यद्वा सर्वत्वेन रूपेण न पक्षता सर्वत्राविप्रतिपत्तेः। घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात्। तथाचैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने अर्थान्तरम,् किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेष्याननुगमात् । तर्हि पृथिवी इतरभिन्ना पृथिवीत्वात् घटवदित्यन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यतिरेकिणा , घटसाधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात् पक्षान्यत्वं हि तत्रातन्त्रम्। किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकम्। न च पृथिवीत्वाग्रहे पूर्वं गृहीतं यत्र साध्यं पश्चात् स्मर्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेक्यवतार इति वाच्यम्। हेतोरेव पक्षातावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायां इतरभेदसामानाधिकरण्य-ग्रहावश्यंभावादिति चेत्, सत्यम् ।

अन्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यात्। अन्वयाप्रतिसन्धानदशायां व्यतिरेक्युपन्यासस्यापर्यनुयोज्यत्वात्। तदुक्तम् "आस्तां तावदयं सुहृदुपदेशः, केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम्"।

अथवा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते । अत एवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावाः साध्या इति नान्वयित्वासाधारण्ये।

यद्वा जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववत् द्रव्यत्वात् तेजोवत् इत्यनुमानात् त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यम् । न चान्वयित्वमसाधारण्यं वा, पक्षादन्यत्र साध्याप्रसिद्धेः। वस्तुगत्या पृथिव्यामेव साध्यसिद्धेः किं व्यतिरेकिणेति चेत्, न। पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणं विना अप्रतीतेः। नन्वेवं पृथिवी जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभाववती द्रव्यत्वादिति पृथिवीभिन्नतद्भिन्नादिसिद्धिः स्यादिति चेत्, न । अप्रयोजकत्वात्। प्रकृते चानुभूयमानजलादिवैधर्म्यस्य पृथिवीत्वशब्दाश्रयत्वादेरतिरिक्तं विनानुपपत्तेः ।

नन्वितरभेदो यद्यन्योन्याभावस्तदा भावाद्भेदो न सिद्ध्येत् । अभावस्या-भावान्तराभावात् ।

यदि च तेन समं स्वरूपभेद एव साध्यः, तदाननुगमादनुमानाप्रवृत्तिः। भावोऽभावो वा न भवतीत्यबाधितप्रतीतिबलादभावस्यापि अन्योन्याभावोऽस्तीति **केचित्** । **तन्न** । अपसिद्धान्तात् । अनतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्चेति चेत्, न । इतराभावान्योन्याभावस्य साध्यत्वात् । न चैवमभावाद-विवेकतादवस्थ्यम् । तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा साध्यत्वात्।

**अन्ये तु** पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः जलत्वादि-प्रतियोगिकास्तावन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा । एते चाभावा जलत्वं न घटादौ घटादि जलात्यन्ताभाववदिति प्रत्यक्षादेः क्वचित्तत्तद्वैधर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः । तावतमभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत्, किमेतावता । न हि तावद्वैशिष्ट्यमत्र साध्यते । किं तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धा एव । तावद्वैशिष्ट्यधीस्तु फलम् । अन्यथा सिद्धसाधनात् । मिलितानामपि

साध्यत्वे नाप्रसिद्धिः। किञ्चिदेकधर्मावच्छेदो हि बलादिवन्मेलकार्थः, स न नासिद्धः । न च हेतोरसाधारण्यम् । तावदभावयोगीह्यत्र सपक्षो भवति, न तु तदेकदेशकतिपयाभाववान् । साध्यतायास्तावत्यपर्याप्तेः । यद्वा जलत्वात्यन्ताभावस्तेजस्त्वात्याभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटत्वात्यन्ताभाववत् । एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि तत्र साध्यमिति क्वाप्रसिद्धिः ।

किं चेतरे तावत् प्रसिद्धा एव । ते च भेदप्रतियोगिनो मेयत्वात् इतीतरभेदोऽपि सुग्रह एव ।

ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति प्रतिरोध इति चेत् न । इतरभेदनिषेधो हीतराभेदः न तु तेजः प्रभृत्यभेदो जल इति दृष्टान्तस्य साध्यवैकल्यात्। चतुर्दशाभेदानां चैकत्र विरोधेनासम्भवात् । चतुर्दशभेदानां चैकत्र वृत्तौ न विरोधः ।

**यत्तु** साध्यप्रसिद्धौ पृथिवीतरभिन्ना तत्साध्याधिकरणपृथिव्यन्यतरत्वात् तदधिकरणवत् पृथिव्यां तत्साध्यमन्वयिन एव सेत्स्यतीति । तन्न । अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात्। लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात्। एवं तर्हि पृथिवी जलं पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत् न। अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् । तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव।

ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्यवत्त्वाद्वेति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणम् नेराम्यं च न घटस्य प्रत्यक्षवेद्यं, तस्य तत्रासामर्थ्यात्। नानुमानगम्यं। ।

नैरात्म्याप्रतीतावन्वयिनोऽभावात् । सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तेः । अथेच्छा समवायिकारणजन्या कार्यत्वात्। तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्वं जीवच्छरीरे साध्यत इति चेत् यदि सात्मकत्वमात्मसंयोगवत्त्वम् तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यम्।

ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं, सात्मकत्वं, शरीरात्मसंयोगस्य ज्ञानकारणत्वात्, आत्ममनसोस्तथात्वेऽप्यकार्यत्वादिति चेत् न । शरीरादन्यत्रासिद्धेः । तत्र प्रसिद्धौ सिद्धसाधनात् । इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद् व्यतिरेकः शरीरे साध्यत इति चेत्, न । इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात् । अन्यथा असिद्धिव्यतिरेकाद्य निरूपणात् । अप्रसिद्धसाध्यसंसर्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत्, न । व्यतिरेकाद्य निरूपणादसाधारणधर्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितडित्थाद्यनुमानप्रसङ्ग इति ।

उच्यते । इच्छासमवायिकरणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति, नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत्। स चासमवायिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात् आत्मसंयोगमात्रस्येच्छाजनकत्वे सात्मकत्वं शरीरे साध्यते ।

यद्वा आत्मनीच्छाधारता महत्संयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगावच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्वं सात्मकत्वम् । अत एव ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं वा सात्मकत्वम् । स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् । घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानम्, इच्छादिविरहात् इच्छादि-प्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्याभाववति कारणाभावनियमात् ।

न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदिति अन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यम् । शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनानुपपत्तेः । उपायान्तरस्योपायान्तरादूषकत्वाच्च।

यद्वा चेष्टा संयोगासमवायिकारणिका संस्कारजन्यक्रियात्वदिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोग एवं (च) पर्यवस्यति प्रयत्नान्वयव्यतिरेकानुविधायित्वात् । एवं चेष्टाया: असमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यम्, चेष्टावत्त्वादिति हेतु: । चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्ध: । चेष्टाविरहात्तदसमवायिकारणसंयोगविरहोऽपि सुग्रह:।

यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सति आत्मविशेषगुणकारणभोगानाधिकरणावृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं तन्नैवं यथा घट:।

आत्मप्राणसंयोगः प्राणमनस्संयोगो वा शरीरप्राणसंयोगेनैवान्यथासिद्धो न कारणम् । भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवदिति तार्किकी रीतिः ।

अथेच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नेवं यथा अनाश्रितमष्टद्रव्याश्रितं चेति कथं व्यतिरेकी अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात् ।

स्यादेतत् । इच्छायाः द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ बाधानवतारदशायां विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्मदर्शनाद्वा तद्द्रव्यमष्टद्रव्यातिरिक्तं नवेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः ।

यद्वा इच्छा अष्टद्रव्यातिरिक्ताश्रिता न वेति संशयात् इच्छायाः अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । अथ वा द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वेति पूर्ववत् संशयात् अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धम् इच्छायाः साध्यते । संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं, साध्यज्ञानमात्रस्य

कारणत्वात् । न चैवं संशयादेव पक्षे साध्यसिद्धेव्यतिरेकिवैपर्थ्यम् । निश्चयार्थं तत्प्रवृत्तेरिति।

मैवम् । संशयेन साध्यप्रसिद्धावपि तव्द्यतिरेकनिश्चयासम्भवात् साध्यव्यतिरेकतद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशयावश्यम्भावात् ।

किं च संशयोपस्थितसाध्यस्य व्यतिरकिनिरूपणं न योग्यानुपलम्भात्, साध्यनिश्चयं विना योग्यानुपलम्भाभावात् । नापि व्यापकाभावात् साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात् । न च यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यात् अष्टानाश्रिता सती द्रव्याश्रिता न स्यात् रूपवदिति साध्यविपर्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्यं करोति । अत एवैतादृशसंशयोपस्थितकल्पितडित्थादि-साधनमप्यपास्तम् । तद्विपर्यये प्रतिकूलतर्काभावादिति वाच्यम् । साध्यनिश्चयं विना साध्यव्यतिरेकनिश्रयतन्मूलतर्कानवतारात् । अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कोदयस्तर्कोदये च तत्सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति।

उच्यते । इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारताभावे तदद्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नम् अष्टद्रव्यावृत्तिधर्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वाद्वा इत्यष्टद्रव्यातिरिक्तद्रव्यसिद्धौ इच्छायामष्टद्रव्यातिरिक्तद्रव्यवत्त्वम् अष्टद्रव्यातिरिक्त-द्रव्यवृत्तित्वं वा साध्यते । साध्यप्रसिद्धिर्द्रव्यत्वे इच्छाविशेष्यकाष्टद्रव्यातिरिक्त-द्रव्यवृत्तित्वप्रतीतेव्यतिरेकिसाध्यत्वात् ।

तथापीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वेना सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्ध्यैव दृष्टान्तप्रसिद्धेरन्वयी हेतुः स्यादिति चेत् न।

अन्वयव्याप्त्यप्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकिसम्भवात् । न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यम् । तद्धि साध्यतदभावोभयसाधकत्वेन

सत्प्रतिपक्षोत्थापकतया दोषावहम् । प्रकृते च न हेतोः साध्याभावसाधकत्वम् विपक्षे बाधकाभावात् साध्यसाधकत्वे तत्सत्त्वाच्च । अत एव यावदेकत्रानुकूलतर्को नावतरति तावदेव दशाविशेषेऽसाधारण्यं दोष इत्युक्तम् । सुवर्णतैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वात् इत्यादावपि तथा ।

अथाष्टद्रव्याधारत्वबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिध्यति पक्षधर्मताबलात् । प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात्। अत एवासर्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्यत्वेन ज्ञानजन्यत्वं सिध्यत् नित्यसर्वविषयत्वं ज्ञानस्यादायैव सिध्यतीति चेत्, न । बाधानन्तरमष्टद्रव्या-तिरिक्तद्रव्यविषयाप्यनुमितिः द्रव्याश्रितत्वप्रकारिका स्यात् । अनुमितेर्व्यापकतावच्छेदक-मात्रप्रकारकत्वनियमात् । न त्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका, तस्य पूर्वमप्रतीतत्वेन प्रकारत्वासम्भवादिति तत्प्रकारिकानुमितिर्व्यतिरेकिणैव। अनाद्यनन्तद्वयणुकादि-यावत्पक्षीकरणेऽनाद्यनन् ततावदुपादनगोचरापरोक्षज्ञानत्वमेव नित्यसर्वविषयकत्वम्, एतदन्यनित्यसर्वविषयत्वं व्यतिरेकिण एव सिध्यति। पक्षधर्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यसिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका, अतिप्रसङ्गात् ।

नन्वष्टद्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते तदा अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थ एव नोपपद्यते ।

सत्यम् । एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिध्यतु, तस्याष्टद्रव्यातिरेक्यं कुतः सिध्येत् ।

अथ सामान्याव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्य-द्रव्यवृत्तितैवेच्छादेः परिच्छिद्यते । ज्ञानान्तरोपस्थापितविशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ दर्शनादिति चेत् न । मानान्तरान्नियमेनानुपस्थितेः । ये चेच्छाश्रये

पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्य**प्याहु:**।

अथ व्यतिरेकी नानुमानं, सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेत् न । विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात् । **अन्ये तु** व्यतिरेकिण्यभाव एव साध्य:, स चाप्रसिद्ध एव सिध्यति । यस्याभावस्य व्यापको हेत्वभावो गृहीत: तस्याभाव: पक्षे व्यापकाभावाभावरूपेण हेतुना सिध्यति। व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात् । तथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र इतरस्य जलादेर्व्यापक: पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितरान्योन्याभावोऽप्रसिद्ध एव सिध्यति, प्रतियोगिज्ञानस्य वृत्तत्वात्, प्रत्यक्षेण भूतले घटाभाववत् ।

एवमन्यत्राप्यव्याप्यवृत्तीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपल्भात् । तथा चेच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभाव: सात्मकत्वं साध्यते ।

एवं प्रामाण्यसाध्यकव्यतिरेकिण्यपि व्यधिकरप्रकारावच्छिन्नत्वस्य व्यापक: समर्थप्रवृत्तिजनकत्वाभावोऽप्रमायां गृहीत: । अतो विवादाध्यासितानुभवे समर्थप्रवृत्तिजकत्वेन व्यधिकरणप्रकारवच्छिन्नत्वस्याभाव: सिध्यति । व्यधिकरणप्रकारावच्छिन्नत्वमेव प्रमात्वम्।

ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञनम्, विशेषणज्ञानजन्यत्वा-द्विशिष्टज्ञानस्येति चेत्,

न । पक्षे साध्यानुमितिसामग्रीसत्त्वात् पक्षविशेषणक: साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यकप्रत्ययवत् ।

तथापि साध्याभावव्यापकाभावाभावरूपहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतौपयिकम् । न च साध्यप्रसिद्धिं विना एतादृशप्रतिसन्धानं सम्भवति। न च

वस्तुगत्या यः साध्याभाव: तद्व्यापकाभावप्रतियोगिमत्तया ज्ञानं मृग्यत इति वाच्यम् । व्यतिरेक्यभासानुपपत्तेरिति चेत्, न ।

योऽभावो यस्य भावस्य व्यापकत्वेन गृहीत: तदभावाभावेन तस्य व्याप्यस्याभाव: पक्षे साध्यत इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात् । अयं च व्यतिरेकिप्रकार: स्वार्थ एव।

परं प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्य सम्भवादिति सर्वं समञ्जसम् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे केवलव्यतिरेकिप्रकरणम् ।**

## अथ अर्थापत्तिप्रकरणम्

व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरम् । तेनैव तदर्थसिद्धे: । स्यादेतत् ज्योतिश्शास्त्रात् तत्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतम् , चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चात् योग्यानुपलब्धा निश्चितो गृहाभावो जीवननियमग्राहकप्रमाणयोर्बलाबलानिरूपणात् बहिस्सत्त्वकल्पनं विना नियमद् वयविषयकं संशयं जनयित्वा जीवति न वेति संशयमापाद्य जीवनसंशयापनुत्तये जीवनोपपादकं बहि: सत्त्वं कल्पयतीति, यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीते: । तत्रान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभाव: तदुत्पादितनियमद्वयविषयकसंशयो वा करणम्, जीवनसंशय एव वा । करणे सव्यापारकत्वानियमात्। प्रमाण्योर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति **कश्चित्** । तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भवादर्थापत्तिर्मानान्तरम् ।

ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंशयादपि तदेककोटिनिर्वाहकल्पनापत्ति:। न च प्रमितसंशय: कल्पनाङ्गम् । जीवनस्य तदानीं प्रमितत्वे संशयाभावप्रसङ्गात् जीवित्वनिश्चयेऽनुमानदेव बहिस्सत्त्वनिश्चयाच्च। कदाचित् प्रमितत्वे च प्राक्प्रमितपुरुषत्वस्यान्तरा तत्संशये कल्पना स्यात् । किं च जीवनसंशयस्य मृतेऽपि दृष्टत्वान्न व्यभिचारेण बहि: सत्त्वगमकत्वमिति चेत् ,

न । यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात् । अत एव मृतजनिष्यमाणयोर्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिस्सत्त्वकल्पकः ।

गृहाभावश्च योग्यानुपलब्धिनिश्चितो न संशय इति । अथ जीवनियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमवगतम्, क्व तर्हि बहिस्सत्त्वकल्पना? विशेषदर्शनविरहात्। कल्पने वा प्रमितजीवननिर्वाहकबहिस्सत्त्ववत् गृहनियम-निर्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात्, जीवनमरणयो: संशयाविशेषात् । अथ तयोरेकं बलीयोऽपरमबलम्, तदैकेनापरस्य बाध एवेति न संशय: ।

तस्माद्यत्र शतवर्षजीवित्वमवधारितम् गृहाभावश्च निश्चित: तत्र बहिस्सत्त्वकल्पनं न तु जीवनसंशये । एवं च देवदत्तो बहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहि-सत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषणजीवित्वसंशये बहिस्सत्त्वकल्पना च नास्त्येव । किं च गृहाभावनिश्चय: प्रामाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिस्सत्त्वं कल्पयतीति न युक्तम्। न हि यत एव यत्संशय: स एव तन्निश्चयाय प्रभवति अतिप्रसङ्गात्। मैवम् ।

यथोक्तसामग्रीजनितसंशयवानेवं तर्कयति, योग्यानुपलब्धिगृहीतो गृहाभाव इति तन्निश्चय: सुदृढ: इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात्। तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां, नो वा बहिस्सत्वं कल्पयित्वा गृहनियमग्राहकम् । तत्र बहिस्सत्त्वकल्पने गृहनियमग्राहकमात्रबाधा। मरणकल्पने तु शतवर्षजीवी देवदत्त: शतवर्षजीवो गृह एवेति नियमद्वयस्यापि बाधा स्यात् । तदाह जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति ।

किं च अद्य जीवति श्वो जीविष्यतीत्यादिबहुतरक्षणलवमुहूर्तादि समयोपाधिनियतं जीवनमुपलब्धमिति तद्बाधे बहुतरव्याप्तिबाधः देवदत्ततदवयवगृहसत्त्व्याप्तिश्चाल्पा। तथाभावस्वरूपमरणापेक्षया बहिस्सत्त्वस्य भावस्य लघुत्वात्। यदि च गृहान्योन्याभावाश्रयबहि: पदार्थवृत्तिसंयोगाश्रयत्वं बहिरसत्त्वमिति तदपेक्षया मरणमेव लघु, तथापि मरणापेक्षया

जीवनमात्रं लघ्विति तदेव कल्पयितुमर्हम्। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि बहिस्सत्त्वज्ञानं भविष्यतीत्येतावत्तर्कसहकृतो यथोक्तसामग्रीप्रभवः संशयो बहिस्सत्त्वं कल्पयति ।

न च वाच्यं तर्काणां विपर्ययापर्यवसायित्वे आभासत्वम् ।

तत्पर्यवसाने च तदेवानुमानमेतत्तर्कसहायं बहिस्सत्त्वमनुमापयिष्यतीति । यतो लाघवगौरवतर्कणां विपर्ययापर्यवसायिनामेव प्रमाणसहकारित्वम्, अत एव प्रत्यक्षशब्दादवपि सहकारी सः । न च तस्यां दशायामेव प्रमाणान्तरमस्ति, ततोऽर्थापत्तिसहकारित्वं तर्कस्य ।

ननु स्वकारणाधीनस्वभावविशेषात् तर्कानुगृहीतयथोक्तसंशयस्य यदि बहिस्सत्वप्रमापकत्वं तदा मृते गृहस्थिते वा तादृशसंशयाद्यत्र बहिस्सत्त्वकल्पना सापि प्रमा स्यादिति चेत् न । यथा हि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशाक्तितिरोधानादैन्द्रियभ्रमः, तथा यथोक्तसंशयस्यापि दोषेण प्रमाशक्तितिरोधानादग्रहरूपभ्रमसंभवात्। परोक्षज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्वनियम इति चेत्, सत्यम्। प्रकृतेपि जीवनगृहाभावनियमग्राहकप्रमाणायोरन्यतराभासत्वेनाभासत्वसंभवात्। यद्वा दोषाभावसहकृतस्य यथोक्तसंशयस्य बहिस्सत्वप्रमापकत्वमिति।

उच्यते । अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वादिति सामान्यतो दृष्टादेव तर्कसहकृताद् गृहनियमग्राहकबाधे लिङ्गविशेषेण जीवित्वनिश्चयेऽनुमानात् बहिस्सत्त्वसिद्धिः। तथाहि-जीवनप्रमाणबाधे गृहनियमप्रमाणोत्थापितलिङ्गेनमरणानुमानात् प्रमाणत्वाभिमतयोदर्वयोरपि बाधा स्यात् । गृहनियमग्राहकमानबाधे च निष्परिपन्थिजीवनप्रमाणात् लिङ्गविशेषणजीवित्वनिश्चये बाध्यमिति जायमानानुमितिः परम्परामरणज्ञापकं विषयीकरोति, न तु बहिस्सत्त्वपरम्परासाधकं जीवनप्रमाणम् । तथा च सामान्यतो दृष्टादेव गृहनियमग्राहकबाधे जीवनप्रमाणाल्लिङ्गविशेषणजीवित्वनिश्चयेऽनुमानादेव बहिस्सत्त्व-ज्ञानमिति किमर्थापत्त्या?

ननु बहिस्सत्त्वज्ञानं विना जीवी गृह एवेत्यस्य ब्राह्मणापि बाधितुमशक्यत्वात् प्रथमं बहिस्सत्त्वज्ञानम्, न तु गृहनियमग्राहकबाधानन्तरं तत्, येन निष्परिपन्थिजीवनग्राहकाज्जीवित्वनिश्चयेऽनुमानं स्यात् । न प्राथमिकबहिस्सत्त्व-ज्ञानमर्थापत्तिं विना । न च गृहनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि बहिस्सत्त्वज्ञानमिति वाच्यम् । तर्कसहकारेणार्थापत्तेर्बलवत्त्वात् बहिस्सत्त्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेत् ।

न । तर्कसहकारेण सामान्यतो दृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात् । तस्माद्यथोक्त संशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव बहिस्सत्त्वज्ञानमित्यविवादम्।

तत्र कल्पनीय प्रमाणबाधे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात् । किं तु नियमग्राहकबाधद्वारा बहिस्सत्वपरम्परासाधके सामान्यतोदृष्टे लाघवात् । न च सामान्यतोदृष्टावतार एवात्र नास्तीति वाच्यम् । अनिर्धिरितैकबाधप्राप्तौ प्रत्येकबाधानुकूलकल्पनायां विनिगमकस्तर्को भवति। न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना।

किं च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रामाण्यसंशयो न स्यात्, न स्याच्च जीवनसंशयः द्वयोरपि जीवनमरणनिश्चायकत्वात् ।

अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्यवसितत्वात्तज्जनितनियमद्वयसंशयाहितजीवनसंशयानन्तरं तर्कावतारे बहिरस्तीति ज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्थापयतीति चेत्,

न । यदेव हि विरुद्धार्थग्राहकत्वं तर्कं विनाकृतमनिर्धारितेकाप्रामाण्यानुमिति-मजीजनत् तदेव तर्कसहकृतं पुनरनुसन्धीयमानं गृहनियमग्राहकप्रमाणमिति अनुमितिं बहिस्सत्त्वज्ञानानुकूलां जनयति, सहकारिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात् । न च

जीवनसंशयानन्तरं तदनुसन्धानमसिद्धम् । गृहनियमग्राहकस्य जीवनग्राहकत्वविरुद्धार्थ-ग्राहकत्वानुसन्धानं विना बहिस्सत्त्वकल्पनेऽप्यबाधप्रसङ्गात् ।

अथ यदि पर्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकम्, तदा इच्छा द्रव्याश्रिता कार्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादष्टद्रव्यवृत्तित्वबाधे व्यतिरेकिणा आत्मसिद्धिरिति भज्येत। अष्टद्रव्यवृत्तित्वबाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेत्,

न । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकि-साध्यत्वात् । व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च। अपि च देवत्तो जीवनमरणान्यतरप्रतियोगि प्राणित्वात् मद्वदिति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतीयोगित्वं विषयीकरोति । तथा च लिङ्गविशेषणानिश्चयात् अनुमानादेव बहिस्सत्त्वसिद्धिः ।

अथ लाघवसाचिव्यात् सामान्यतोदृष्टस्यापि विशेषविषयत्वात् नियमग्राहकप्रमाणोत्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्येवास्यापि सत्प्रतिपक्षत्वम्। एकेनापि भूयसामपि प्रतिबन्धसम्भवात् । न च तर्कात् समान्यतोदृष्टस्य बलवत्त्वम् । व्याप्तिपक्षधर्मते हि बलम् । तच्च तुल्यमेव ज्ञातम्, लाघवाख्यतर्कस्य विशेषमात्रपर्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्यत्वादिति चेत् ।

तर्हि पक्षधर्मताबलाद्विशेषसिद्धिः क्वापि न स्यात् । सर्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्यनसानेऽन्यसाधर्म्येण सत्प्रतिपक्षसम्भवात्। अप्रयोजकत्वान्न विपरीतसाधनमिति तुल्यम् । नियमग्राहकस्याप्रयोजकत्वात् । जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिश्शास्त्राद्यथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति।

तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषात् विशेषपरस्यानुमानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम् । न च प्रमाणविराधेनास्य तर्को न

सहकारीति वाच्यम् । तर्कानवतारे विशेषपरत्वाभावेनाविरोधात् । तदवतारे तदधिकबलत्वादेव। अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्तते ।

किं चैवमर्थापत्तावपि तद्विरोधेन न सहकारी स्यात् । यदुक्तं मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध इति। तत्र विशिष्टबाधो न विशेष्यबाधात्। मरणेऽपि जीवी गृह एवेत्यस्य विशेष्यास्याबाधात्। किन्तु विशेषणबाधात्। स च शतवर्षजीवित्वबाध एव। विशेषणाभावायत्तो विशिष्टभावोऽप्यस्तीति चेत् न । विशेष्यवति विशिष्टाभावस्य केवलविशेषणाभावात्मकत्वात्, विशिष्टस्यातिरिक्तस्यानभ्युपगमात् ।

अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव गृहे नास्तीति प्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति । तत्र जीवी गृह एवेत्यप्रमाणघटित प्रमाणद्वयविरोधज्ञानजनिताप्रमाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधोपपादकप्रमाणविरोधि बहिस्सत्वं कल्प्यते । यथोक्तसंशयस्यायमेव स्वाभावो यद्वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति । विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति ।

तत्तुच्छम्। अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात् । तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानमसिद्धम् । अतो न फलबलेन तथार्थापत्तिकल्पनम्।

किं च मृते गृहस्थिते बहिः स्थिते तादृशसंशयादेवबहिस्सत्त्वं गृहसत्त्वं मरणं च कल्प्येत । कस्यचित् क्वचित् वस्तुगत्या अप्रमाणत्वात् । अर्थापत्त्याभासश्चैवं न स्यात् ।

स्यादेतत् मा भूत् संशयः करणमर्थापत्तौ, अनुपपत्तिस्तु स्यात् । तथा हि जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति बहिस्सत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति धीरस्ति, तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम् । न च देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् घटवदित्यनुमानात् विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीति व्याप्तिप्रभावानुमानाद्वा बहिस्सत्त्वसिद्धेः किमर्थापत्त्येति वाच्यम्। हेतुसाध्ययोः

सहचाराज्ञानदशायामनुपपत्तिज्ञानेऽपि बहिस्सत्त्वज्ञानात्। सामान्यतो व्याप्तिश्चानुमाने उपसंहर्तुमशक्येति तदन्यदेशसिद्धिरर्थापत्त्यैव।

ननु जीविनो गृहसत्त्वमनुपपन्नं किं देवदत्तबहिरसत्त्वं विना उतबहिस्सत्त्वमात्रं विना । नाद्य: प्रथमं देवदत्तबहिस्सत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात्। प्रतीतौ वा किमर्थापत्त्या । अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रय: । तदुक्तम् **"यतोऽन्यत्वं तसिद्धेरग्रे तदसिद्धेः"** इति । नान्त्यः अन्यदीयबहिस्सत्त्वज्ञानं विनानुपपत्त्यभावात्। बहिस्सत्त्वमात्रसिद्धावपि देवदत्तबहिस्सत्वासिद्धेरिति चेत्,

न । सामान्येन हि विनानुपपत्तिज्ञानं कारणम् सामान्याकारेण विशेषज्ञानं फलम् । तथा हि जीवतो बहिस्सत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र बहिस्सत्त्वं कल्पयति नान्यत्र देवदत्तश्च तथेति सिद्धे देवदत्ते बहिस्सत्त्वं कल्प्यत इति देवदत्तबहिस्सत्त्वं पर्यवस्यति । न तु तेन रुपेण कल्पना न वा तेन विनानुपपत्तिज्ञानं कारणम् । यथा वह्निमात्रव्याप्ताद्धूमात् पर्वते वह्निसिद्धिर्न तु पर्वयतीयत्वेनैव धूमात्तत्सिद्धि: तेन रुपेण व्यापकत्वाग्राहात्।

अथ उपादकाभाववत्युपपाद्याभावानियमोऽनुपपत्तिर्नत्वभावमात्रम् अतिप्रसङ्गात् ।

एवं च व्यतिरेकव्याप्तिमत उपपाद्यात् व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धे: किमर्थापत्त्या । तथा हि देवदत्तो बहि: सन् जीवित्वे सति गृहासत्त्वात् यन्नैवं तन्नैवम् यथा मृतो गहस्थितो वा । न चान्यव्याप्त्या अन्यस्य गमकत्वेऽतिप्रसङ्ग: । साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात् । न चार्थापत्तौ स्वरुपसती व्याप्तिर्लिङ्गम्, नानुमान इति वाच्यम् । अनुपपत्तेर्ज्ञानं विना कल्पनानुदयात्, अर्थात्त्याभासानवकाशाच्च ।

मैवम् । अत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्मत्वमिति व्याप्तिधीजन्यमपि बहिस्सत्त्वज्ञानं नानुमिति:, तस्यां व्याप्तिपक्षधर्मताज्ञानजन्यतानियमात् । न च

साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्मस्य ज्ञानमनुमितिप्रयोजकमिहाप्यतीति वाच्यम् । केवलान्वयिनि तदसम्भवात्, तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च।

अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिद्दृश्यते । एवं चान्वयस्य व्यतिरेकस्योभयस्य वा सहचारात् व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम्। अत एव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्यव्यतिरेकी चेति चेत्-

अस्तु तावदेवम् । तथापि जीविदेवदत्ताभावो गृहे वर्तमानो न बहिस्सत्त्वे लिङ्गं देवदत्तावृत्तित्वात् । बहिस्सत्त्वगृहनिष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरुप-व्याप्त्यभावाच्च। उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरिसंनिहित-सवितृकत्वेनानुमानात् । नापि गृहनिष्ठाभावप्रतियोगित्वम् । तत्प्रतियेगित्वस्य देवदत्तधर्मतया तदसंनिकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात् । अत एव विशेष्यासंनिकर्षात् तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण। न च व्यतिरेकव्याप्तिगृहनिष्ठाभावयोर्ज्ञानं सहकार्यासाद्य मनसैव न जन्यत इति वाच्यम् । सहकारिण एव मानान्तरत्वप्रसङ्गात्।

अथ व्याप्तिज्ञानानन्तरं स्मर्यमाणधूमात् कथमनुमिति: उक्तन्यायेन तत्रापि लिङ्गपरामर्शाभावादिति चेत् न कथंचित् । कथं तर्हि वह्निज्ञानम् पक्षधर्मधूमस्मृतिसहितात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण । अत एव दृश्यमानो धूमो वह्निं विनानुपान्न इति यदा ज्ञायते तदार्थापत्तिरेव । यदा त्वनुपपतिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानम् । त्वयापि तत्र त्रिविधानुमानस्वीकारात् व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्तगृहाभावो बहिस्सत्वं कल्पयति ।

उच्यते । देवदत्तासंनिकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते । तथाहि गृहे देवदत्तस्याभाव इति प्रत्यक्षं देवदत्तं षष्ठ्यर्थं चाभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति । सम्बन्धज्ञानस्य संबन्धिद्वयविषयत्वात्, प्रतियोगिना सममभावस्य संबन्धान्तराभावात्। गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम् । न च देवदत्तविशेष्यकं बहिस्सत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं

नास्तीति वाच्यम् । पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात् ।

अथ वा अनितप्रसक्तसहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीय-लिङ्गपरामर्श: । यथा च न सहकारि मानान्तरं तथोपपादितमधस्तात् ।

ननु मयूर: पर्वतेतरे न नृत्यति, नृत्यति चेति ज्ञानानन्तरं पर्वते नृत्यतीति ज्ञानमस्ति। न च व्यतिरेकिणस्तत् सम्भवति । पर्वतनृत्याप्रसिद्धौ तेन विनानुपपत्तिप्रतिसन्धानमपि नेति कथमर्थापत्तिरपीति वाच्यम् । अधिकरणं विनानुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेनतरमधिकरणं कल्पयतीति चेत्।

न मयूरनृत्यं साधिकरणं नृत्यत्वादिति सामान्यतोदृष्टं प्रसिद्धाधिरणबाधसहकृतं प्रसिद्धेतरं पर्वतमधिकरणमादाय नृत्यज्ञानं जनयति ।

यद्वा पर्वतेतरे न नृत्यतीति शब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीति शब्दाज्जायमानं ज्ञानं पर्वतनृत्यं गोचरयति । प्रसिद्धविशेषबाधसहकृतसामान्यज्ञान-जनकप्रमाणस्य प्रसिद्धेतरं पर्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अत एवानित्यज्ञानाबाधनन्तरं क्षित्यादौ ज्ञानजन्यत्वं सिद्ध्यत् नित्यत्वमादाय **सिद्ध्यतीत्याचार्या:**।

यद्वा मयूरनृत्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्वतत्ववत् इत्यन्वयव्यतिरेकी ।

अथवा य: सम्भावितततदिरावृत्ति: सन् तदतिरिक्तवृत्तिर्न भवति स तद्वृत्तिर्भवतीति सामान्येन यत्तदर्थान्तर्भावेण व्याप्त्या नृत्यस्य पर्वतवृत्तित्वं सिद्ध्यति । एवं पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्रापि अप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिद्ध्यति ।

अथ यथा अभोजी पीन इत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भुङ्क्त इत्यत्रापि दिवाभोजनस्य बाधात् योग्यताघटकरात्रिभोजनस्य प्रतीतेः। अतो योग्यताघटकोपस्थितिं

विना अन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्त इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति । न चैवं लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तम् । शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते इति न्यायेन शब्दोपस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात् ।

एवं च श्रूयमाणशब्दस्यान्वयबोधकत्वं योग्यताघटकोपस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयति तत्र श्रुतार्थापत्तिः ।

द्वारमित्यादौ पिधेहीति शब्दकल्पनं श्रुतार्थापत्तिरेव । शब्दश्च यद्यपि श्रूयमाणो बाधितः, तथापि अभिप्रायस्थः कल्प्यते । यथा गुरुमते **"स्वर्गकामो यजेत"** इत्यत्र साक्षात्साधनताबाधे परम्पराघटकस्यानुपस्थित्या परंपरासाधनताज्ञानविरहः योग्यताज्ञाना-भावात् प्रसिद्धपदसामानाधिकरण्यानुपपत्तिरिति योग्यताज्ञानस्य परम्परासाधनताघटकमपूर्वं लिङादिवाच्यं कल्पयति, ततः स्वर्गसाधनं याग इति ज्ञानं जायते। अन्यथा अपूर्वमपि वाच्य न स्यादिति ।

उच्यते । बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता । अतो दिवा अभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वात् दिवा न भुङ्क्त इति शब्दाद्धीरुत्पद्यते न प्रतीत्यनुपपत्तिः । किं तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते । अत एवापूर्वमपि न वाच्यमिति वक्ष्यते । तस्मान्नार्थापत्तिरनुमानादतिरिच्यत

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे अर्थापत्तिप्रकरणम् ।।**

## अथ अवयवप्रकरणम्

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते । तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः । अत्रैव वाक्येऽतिव्याप्तेः । किंतु अनुमितिचरमकारणलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः । प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं

जन्यते । तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते । तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम् । अत एव वह्निव्याप्यधूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्ति: । तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात् ।

**यत्तु** संक्षेपत: परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति । **तन्न**। कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्ये आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते । अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्ति: । आकाङ्क्षाविरहस्तुल्य एव ।

**अन्ये तु** पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्धीजनकवाक्यत्वं न्यायत्वम् । एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशाब्दत्वमेव तत्तल्लक्षणमिति ।

**तन्न** । ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दूर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् । अन्यथा जातिसंकरप्रसङ्ग: ।

### प्रतिज्ञा

तत्र प्रतिज्ञा न साध्यनिर्देश:, साध्यपदेऽतिव्याप्ते: । किंतूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनान-तिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम्।

अन्यूनानातिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणम् । तेनोदाहरणादिव्युदास: । निगमनं च न परामर्शहेतु:, अबाधितासत्प्रतिपक्षत्वज्ञानजनकत्वात्। हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा, लिङ्गाविषयकलिङ्गिविषयकज्ञान-जनकन्यायावयववाक्यत्वं वा । इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात्।

प्रतिज्ञात्वं जातिः, अन्यूनानतिप्रसक्ततान्त्रिकव्यवहारादिति **केचित्** । **तन्न** । देवदत्तप्रभवत्वादिना जातिसंकरप्रसङ्गात् । प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं प्रतिज्ञेत्यपि न । तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात् ।

एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम् ।

ननु प्रतिज्ञा न साधनाङ्गम् । विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न । विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वा आकाङ्क्षायां शब्दानित्यत्वं साध्यम् । न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे । न च वादिवाक्येऽनुपस्थितमपि योग्यतयान्वेति । अतिप्रसङ्गात् । न च विप्रतिपत्तितः साध्योपस्थितिः । तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् ।

परविप्रतिपत्तिं समयबन्धं च विना स्थापनाया अभावात् । विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च । आवृत्तौ तु सैव प्रतिज्ञा । न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः । नाप्यवयवान्तरेणाक्षेपात्। साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात् । तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः ।

**अन्ये तु** शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः, तथापि प्रमाणमात्रे नाकाङ्क्षा, किंतु विशिष्टे । विशिष्टं तु विशेषणं साध्यमनभिधाय न शक्याभिधानम् । न च वस्तुतो यत् साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः । वादिद्वयमध्ये तदसम्भवात्। तस्मात् साध्याभिधानं विना न हेतोराकाङ्क्षा न वा अन्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति ।

**हेतुः**

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्ग-वचनमेवोचितम् । अन्यथा अनाकाङ्क्षिताभिधाने निग्रहापत्तेः । लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः ।

हेतुत्वं च अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयक-शाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम् । हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा, उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा, साध्याविषयकज्ञानजनक हेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा, प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञानजनक-हेतुविभक्तिमद्वाक्यत्वं वा । पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा ।

हेतुपदेन ज्ञानलक्षणात् । अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात्, तथैवाकाङ्क्षानिवृत्तेः । अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्ति

प्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं **हेतुत्वमित्यन्ये** । जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वम्, वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये **दुर्ग्रहादित्यपरे** ।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिम न्न्यायावयवत्वमन्वयिहेतुत्वम्। एतदेव व्यतिरेकव्याप्त्यभिधायकपद

प्रक्षेपाद्व्यतिरेकिहेतुत्वम् । अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथा-भूतावयवत्वमन्वयव्यतिरेकिहेतुत्वम् ।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि, अत्यन्ताभावाप्रतियोगि-साध्यसमानाधिकरणपक्षसपक्षसद्धेतुवचनं केवलान्वयि ।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधी-जनकप्रतीतान्वयसाध्य-साधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् । एतदेवा-प्रतीतान्वयसाध्यसाधनेतिविशेषणात् व्यतिरेकि हेतुलक्षणम् । कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति, मतुपो व्यर्थत्वात् ।

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकम् । विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति **केचित्** । **तन्न** । सतिसप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः । न ह्ययमर्थोऽस्मान्नावगम्यत इति ।।

**उदाहरणम्**

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनाय उदाहरणम्। तत्रानुमितिहेतुलिङ्गपरामर्श

परवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम्। सामान्यलक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधनाभाव-सम्बन्धबोधकत्वं च विशेषलक्षणद्वयम्।

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न । दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वात् । यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः ।

नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्। उपनयातिव्याप्तेः।

अतः उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेक-व्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वय**मित्यन्ये** ।

अत्र च व्यभिचारवारणाय **वीप्सामाहुः** । यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा । केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम् ।

वीप्सा च यत्पदे न तत्पदेऽपि। विरूपोपस्थितयोरपि तत्पदेन परामर्शात् बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः । यथा **"यद्यत्पापं प्रतिजहि"** इत्यत्र।

इदं च साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शित-व्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

## उपनय:

उदाहरणानन्तरं भवतु व्याप्ति: तथापि व्याप्तं किं पक्षे वर्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनय: ।

तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वम् उपनयत्वमिति सामान्यलक्षणम् । साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वं च विशेषलक्षणद्वयम्।

उदाहरणान्त एव प्रयोग इति न वाच्यम् । तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात् । तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात् । न च हेतुवचनादेव तदवगम: । तस्य को हेतुरित्याकाङ्क्षायामेव प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात् । वादिवाक्यादेवाक्षेप इति चेत् न । तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात्।

अन्यथा प्रतिज्ञामात्रादेव सर्वाक्षेपेऽवयवान्तरविलयात् । प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न । तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च । अन्यथा अवयवान्तरेऽप्येवं प्रसङ्गात् ।

## निगमनम्

उपनयानन्तरं निगमनम् । तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारण-व्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्मतयोश्चतुर्भिरेवावयवै: पर्याप्ते: किं तेनेति वाच्यम् । अबाधितासत्प्रतिपक्षत्वयोरलाभे चतुर्णामप्यपर्यवसानात्।

अथाभिधानभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेनावयवान्तराणां निराकाङ्क्षत्वम् । विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् । अन्यथा निगमनेनापि तदवारणात् । न हि तद्विशेषदर्शमनादृत्यैव तन्निवर्तकम् । सिद्धनिर्देशतया वारयतीति चेत्, न । स्वरूपमात्राभिधानात् ।

साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्च इति चेत्, न । व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्वाहात्।

अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य मानाभावादसिद्धेश्चेति किमर्थं बाधादिविरहो बोधनीय इति चेत् न । यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः ।

न चानन्वयः । तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात्पूर्वम् ।

**इह केचित्** -- यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथा इति सर्वनाम्ना सिद्धस्थल इव (विरोधादिवारणाय) विरोधिवारणाय युक्त **इत्याहुः** ।

**तन्न** । तथेति स्वरूपे प्रकारे सादृश्ये वा ? आद्ये तथा चायमिति प्रक्रान्तात् तथेति हेतुमानित्यर्थः स्यात्, तथा चानन्वयः । न हि हेतुमत्त्वादेव हेतुमानित्यन्वितम्। न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात् । अत एव न तृतीयोऽपि । अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्याभावात्। बहूनां च प्रक्रमे विशेष्यानन्वयात् । वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् ।

तस्मादित्यत्र विभक्त्यर्थानन्वयादेव नियमः। तस्मादनित्य इत्यभिधाने विशिष्य सिद्धतावगम्यते । पूर्वं साध्यतयोक्तस्य समर्थहेतुसंबन्धेन पुनरुत्कीर्तनात्। अन्यथा तद्वैयर्थ्यात् । संशयप्रयोजनादयस्तु अवयवलक्षणाभावादेव नावयवाः, किं तु न्यायाङ्गतया उपयुज्यन्त इति नाधिक्यम् । कण्टकोद्धारस्य च न सार्वत्रिकत्वम् , समयविशेषोपयोगित्वादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**अनुमानखण्डे अवयववादः समाप्तः।**

## अथ हेत्वाभासनिरूपणम्

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते । तत्रानुमितिकारणीभूताभावप्रतियेगियथार्थज्ञानविषयत्वम्, यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वम्। दशाविशेषे हेत्वोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात् तद्बुद्धेरप्यनुमिति-प्रतिबन्धकत्वम् ।

यद्यपि बाधसत्प्रतिपक्षयो: प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वं तथापि ज्ञायमानस्याभासस्यात्र लक्षणम् ।

यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते। अनुमितौ तूत्पत्तिरेव प्रतिबध्यते । ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिता: पञ्च ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे हेत्वाभाससामान्यनिरुक्ति: ।**

## अथ सव्यभिचारप्रकरणम्।

सव्यभिचारोऽपि त्रिविध: साधारणासाधारणानुपसंहारिभेदात् । तत्र सव्यभिचार: साध्यतदभावप्रसञ्जक इति न त्रितयसाधारणं लक्षणम् । एकस्योभयं प्रत्यसाधकत्वात् अनापादकत्वाच्च । नाप्युभयपक्षवृत्तित्वं उभयव्यावृत्तत्वं वा तत्त्वम्, अननुगमात् ।

अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमत: स:। विप्रतिपत्तिस्तु प्रत्येकं न तथा, न वा पक्षवृत्ति: । साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्ष एवोभयसाहचर्येण कोटिद्वयोपस्थापक:।

केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव। तदज्ञानं दोष: पुरुषस्य। अत एवासाधारणप्रकरणसमयोरनित्यदोषत्वम्। अन्यथा सद्धेतौ बाधादिज्ञाने हेत्वाभासाधिक्यापत्ति:। न च प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्य: शब्दाकाशान्यतरत्वादित्यत्र च साधारणेऽव्याप्ति:। तयो: साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेत् , न। एतदज्ञानेऽपि

साधारण्यादिप्रत्येकस्य ज्ञानात् उद्भावनाच्च स्वपरानुमितिप्रतिबन्धात् उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च ।

एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसंबन्धाव्यावृत्तिरनैकान्तिकः। सपक्षविपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वञ्चानुमितिविरोधि, तत्सम्बन्धः प्रत्येकमस्ति। विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव । उपाधेश्च न सङ्कर इति वक्ष्यत इति निरस्तम् ।

एतदज्ञाने ज्ञाने पि वा आवश्यकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषणत्वाच्च ।

अत एव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वम्, साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तम्। व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च ।

गगनमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसङ्कीर्णासाधारणाव्याप्तिरिति **कश्चित्** ।

नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वम् । व्यर्थविशेषणत्वात् अनुपसंहार्यव्याप्तेश्च। किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाभेदसाधनेऽनुपसंहार्ये अव्याप्तिः। पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः। साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः, वृत्तिमतो धर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात्।

नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाव-वन्मात्रवृत्तिभिन्नत्वम् । अनुपसंहार्यव्याप्तेः धूमादावतिव्याप्तेश्च, तस्य पक्षे साध्यवति वृत्तेः ।

नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसम्बन्धशून्यत्वम्, व्यर्थविशेषणत्वात् ।

एतेनानुगतं सर्वमेव लक्षणं प्रत्युक्तम्। प्रत्येकमेव दूषणत्वात् , उद्भावने वादिनिवृत्तेश्च ।

**इति सव्यभिचारपूर्वपक्षः ।**

**अथ सव्यभिचारसिद्धान्तः।**

उच्यते । उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम्। तच्च साधारणत्वादि ।

विरुद्धान्यपक्षवृत्तित्त्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिर्वा । तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात्, परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम् ।

यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वम्। तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः । न चैवमाधिक्ये विभागव्याघातः। स्वरूपसतानुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात् । न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोः, तदज्ञापकतयान्येषामुपसंग्रहः कुतो न कृत इति वाच्यम् । स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे सव्यभिचारः।**

**अथ साधारणप्रकरणम्।**

तत्र साधारणत्वं न साध्याभाववद्गामित्वम् । सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये, भूर्नित्या गन्धवत्त्वादित्यसाधारणे, संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः । अत एव न साध्यवत्तदन्यवृत्तित्वम्।

नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम्, साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात् ।

अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगतत्वमपि । अनुपसंहार्यो व्यावर्त्यः, अन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्, त्यज तर्हि तमधिकम्, क्लप्तेऽन्तर्भावात् ।

नापि सपक्षविपक्षगतत्वम्। व्यर्थविशेषणत्वात्। विरुद्धो व्यावर्त्यः इति चेत्, न । विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात् ।

अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वम्। तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये नातिप्रसङ्गः । न च व्यर्थविशेषणता। घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेत्, न । दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः ।

साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न। व्यर्थविशेषणत्वात् , एकव्यक्तिकसाध्ये तदभावाच्च । एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेपि विशेषणं व्यर्थमिति।

**इति साधारणपूर्वपक्षः।**

**अथ साधारणसिद्धान्तः।**

उच्यते । विपक्षवृत्तित्वं साधारणत्वम्, तन्मात्रस्य दूषकत्वात् । विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्। अन्यथा तस्य हेत्वाभासान्तरतापत्तेः। उपाधेरसङ्कर एव । सर्वमनित्यं मेयत्वादित्यनुपसंहारी, शब्दोऽनित्यः शब्दत्वात् , भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे साधारणप्रकरणम् ।**

**अथ असाधारणप्रकरणम्।**

सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । ननु सपक्षत्वं न साध्यवन्मात्रत्त्वम्, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवत्त्वम्, शब्दोऽनित्यः शब्दत्वादित्यादेः व्याप्तिधीदशायामप्यसाधारणतापत्तेः । न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेत्, न।

सर्वनिश्चित साध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात् । शब्दत्वानित्यत्व व्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः । न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात् । यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः

साधारण:, शब्दो नित्य: शब्दत्वादिति विरुद्ध:, शब्दोऽनित्य: शब्दत्वादित्यादि: सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक्। तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम् । अन्यथा पक्षत्वभङ्गप्रसङ्गात् ।

अथ सर्वसपक्षव्यावृत्तिरेव दोष: न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात् । प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात् । न च संशायकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यम् । व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारैव सपक्षव्यावृत्तिमात्रस्य दोषत्वात् ।

किञ्च शब्दोऽनित्य: शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यम्, न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च। न च न्यूनत्वे तदुपजीव्यम्। असाधारण्यव्यतिरेकेणापि तदुद्भावनात्। न च व्यतिरेकिप्रयोगे तदुपन्यास:। व्याप्तिपक्षधर्मतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात्, स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति ।

**इति असाधारणपूर्वपक्ष: ।।**

**अथ असाधारणसिद्धान्त:।**

उच्यते । शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभावञ्च साधयेत् अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोष:। सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेद: । असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यम्, साध्याभावोत्थापकत्वात्, न तु विपक्षव्यावृत्तत्वमपि, प्रतिकूलत्वात्, व्यर्थत्वाच्च ।

यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्दितया वा तदुद्भावनमपि। लक्षणन्तु सर्वसपक्षव्यावृत्तत्वम्, न तु विपक्षव्यावृत्तत्वमपि, व्यर्थविशेषणत्वात् । विरुद्धमप्यनेनोपाधिना असाधारणमेव । अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्ते: ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे असाधारणप्रकरणम्।**

## अथानुपसंहारिप्रकरणम्।

अनुपसंहार्यः नासत्सपक्षविपक्षः, सिद्ध्यसिद्धिविरोधात् । नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् । व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्गामित्वेन साधारणत्वात् । अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात्। सर्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा, साध्यप्रसिद्धौ तु साधारणमेव । न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वम्, व्यर्थविशेषणत्वात् । न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम् ।

नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्मावच्छिन्नपक्षकत्वम्। सर्वमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात् ।

अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्यः। यदि च पक्षे व्याप्तिग्रहः कथञ्चित्, तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानवच्च सद्धेतुरेवेति चेत् , न । तत्रैव सद्धेतावतिव्याप्तेः। सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः। असाधारणविरुद्धयोरतिव्याप्तेश्च । दूषकतायां व्यर्थविशेषणत्वाच्च । न च दूषकतानैकान्तिकत्वेन न प्रत्येकमिति वाच्यम् । अर्थगत्या व्यर्थविशेषणत्वात् ।

नापि विप्रतिपत्तिविषयमात्रवृत्तित्वम्। केवलान्वयिसाध्यके अव्याप्तेः, सर्वस्य पक्षत्वे मात्रार्थाभावादिति ।

**इति अनुपसंहारिपूर्वपक्षः।**

### अथ अनुपसंहारिसिद्धान्तः।

उच्यते । व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी। स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो

घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ साध्यसाधनसाहचर्याज्ञानात् तस्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्वस्येष्टत्वात्।

केवलान्वयिधर्मावच्छिन्नपक्षको वा। सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदकः निश्चितसाध्यवद्वृत्तित्वात्। विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्येव। व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणम्।

तदवगमेऽपि साधारणसङ्कर एव। एवं व्याप्यत्वासिद्धेर्ज्ञाने, तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः। घटाकाशोभयवृत्तिद्वित्वाश्रयत्वञ्च विरुद्धमेव । एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तम्, उपजीव्यत्वादिति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे अनुपसंहारिप्रकरणम्।**

## अथ विरुद्धप्रकरणम्

विरुद्धो न साध्याभावव्याप्यः, संयोगादिसाध्यके सद्धेतावतिव्याप्तेः । नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम्। इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगादिव्याप्येऽतिव्याप्तेः । किन्तु साध्यासमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा । साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणम्। तेनाभावे साध्येऽभावाभावस्य भावत्वेऽपि नाव्याप्तिः । अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावभिन्न एव वा । न च भावत्वेनैवोपपत्तौ किमधिकेनेति वाच्यम् । बाधकं विना अभावप्रतीतेः प्रमात्वात् । अन्यथा अत्यन्ताभावान्योन्याभावयोरप्रसिद्धिः ।

अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः। हेतुसत्त्वे साध्याभावसिद्धौ बाधः । न च प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनैवेति वाच्यम्। विशेषणवैयर्थ्यादिति चेत्, न । हेतोः पक्षे साध्याभावबाधानुपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात् ।

ननु साध्याभावसम्बन्धो व्यभिचार एव दोषो न तु तन्नियतत्वमपि, गौरवात् असाधकत्वे व्यर्थत्वाच्च । न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमकत्वभ्रमरूपायामशक्तौ विशेषोऽस्ति, येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता । न चानैकान्तिकसामान्यलक्षणे विपक्षवृत्तित्वं न विशेषणम्, असाधारणाद्यव्याप्तेः, साधारणन्तु सपक्षवृत्तित्वसहितमिति वाच्यम् ।

विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात् । न च विरुद्धं व्यावर्त्यम्, विपक्षगामित्वेनात्रैव तदन्तर्भावात्।

अथानैकान्तिके विपक्षसम्बन्धो न दूषकताबीजम् असाधारणाद्यव्याप्तेः । न च तत्रान्यदेव बीजम्, हेत्वाभासाधिक्यापत्तेरिति चेत्, अस्तु तावदेवम्। तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव ।

**अन्ये तु** विरुद्धलक्षणे न व्यर्थत्वम्, साधारणस्य व्यवच्छेद्यत्वात् । नाप्यसाधकतानुमितौ, एतस्यापि व्याप्यत्वात् । नीलधूमादौ च व्याप्तिरस्त्येवेति न स्वार्थानुमाने दोषः। परस्य तु व्यर्थत्वमधिकम् । न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति।

**तन्न** अर्थो हि लिङ्गम् । न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिः, गौरवादिति वक्ष्यते। न चार्थगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम्। आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति। हेतुद्वयोपन्यासे चाधिकम्, प्रथमेन द्वितीयस्य कृतकर्तव्यतया दुष्टबीजत्वात् । न च नीलधूमादित्यादौ विशिष्टकर्तव्यमन्येन केनापि कृतम्। धूमवत्त्वादित्यनेनैव कृतमिति चेत्, न। तथानुपन्यासात् । अन्यथा नीलानन्वयापत्तेः ।

**अपरे तु** साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः । अन्यथा पृथिव्यां मेयत्वेनेतरभेदानुमानं न विरुद्धं स्यात् , साध्याभावाव्याप्यत्वात् । न च तत्साधारणम् , सपक्षासत्त्वात् । न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि विरुद्धत्वादिति **प्राहुः** ।

**तन्न** । विपक्षगामित्वमात्रं दूषकताप्रयोजकमित्युक्तत्वात् । अत एव व्यभिचरितो व्यतिरेकी अनैकान्तिक एव । नापि साध्याभावसाधकत्वम् , तत्प्रमापकत्वं वा। साध्याभावसम्बन्धबुद्धिं विना तदज्ञानात् । नापि साध्यवदन्यत्वव्याप्यत्वम् , व्याप्यत्वविवेचने व्यर्थविशेषणत्वात्। नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम् , साध्याभावस्य हेतुव्यापकत्वप्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वात् ।

**।। इति विरुद्धपूर्वपक्ष:।।**

**अथ विरुद्धसिद्धान्त:**

उच्यते । साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम्। न च प्रतियोगिनोरनन्वये भासामान एव तदभावयोर्व्याप्तिग्रह: भिन्नग्राहकसामग्रीकत्वात् । अन्यथा व्यतिरेकिविलयापत्ते: ।

यद्वा वृत्तिमत: साध्यवदवृत्तित्वं साध्यवद्वृत्तित्वानधिकरणत्वं साध्यासमानाधिकरणधर्मत्वं साध्यवद्वृत्तित्वानधिकरणधर्मत्वं वा तत्वम् । न च व्यतिरेक्यतिव्याप्ति:। तत्र साध्याप्रसिद्ध्या तथा ज्ञानविरहात् । असाधारणे च संकर एव । अनेनापि रूपेण तस्य दोषत्वात् । न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वज्ञानमावश्यकम्, तेन विना साध्यवद्वृत्तित्वाज्ञानादिति वाच्यम् । उपजीव्यत्वेन भिन्नत्वात् । उपजीव्यत्वेऽपि साध्यवति न वर्तत इति ज्ञानं न स्वतो दूषकमिति चेत्, न । असहचारज्ञानस्य विरोधितया व्याप्तिग्रहप्रतिबन्धकत्वात् , व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत् ।

ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वम् , अयोग्यताज्ञानेन निश्चितानन्वयादिति चेत् , न । अयोग्यताज्ञानस्य विरुद्धत्वज्ञानेपजीवकत्वेेन तस्यैव दोषत्वात् बाधेऽप्येवम् ।

स चायं विधिसाधने त्रिविध: -- साक्षात्साध्याभावव्याप्यत्वात् साध्यव्यापकाभावव्याप्यत्वात् साध्यव्यापकविरुद्धोपलम्भात् । यथा धूमवानयं

योग्यधूमवत्तया अनुपलभ्यमानत्वात् निरग्निकत्वात् जलाशयत्वात् । न च सर्र्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम् । एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात्। न च धूमवानयं तदभाववत्त्वादिति त्रयाधिकम्, स्वसमानाधिकरणात्यन्ता-भावाप्रतियोगित्वं हि व्यापकत्वम् । तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तया अनुपलभ्यमानत्वादित्यनैकान्तिकमेव ।

निषेधसाधनेऽपि त्रिविधः -- प्रतियोग्युपलम्भात् साध्यव्यापकाभावोपलम्भात् साध्यव्यापकविरुद्धोपलम्भात्। यथा निरग्निकोऽयमग्निमत्त्वात् धूमाभावशून्यत्वात् धूमवत्त्वात् । सर्वश्चायं विशेषणद्वारापि । यथा कृष्णागुरुप्रभववह्निमानयं कटुकासुरभिपाण्डुरधूमवत्त्वात् । अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसङ्कीर्णः क्वचित्।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे विरुद्धप्रकरणम्।।

## अथ सत्प्रतिपक्षप्रकरणम्।

### सत्प्रतिपक्षपूर्वपक्षः।

सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वम्। परस्परप्रतिबन्धेनोभयोर-बोधकत्वात् । बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात्। नापि समानव्याप्ति-पक्षधर्मतावत्त्वम्। विरोधेनैकत्र तद्भङ्गनियमात् । नापि व्याप्तिपक्षधर्मतया ज्ञातत्वम्। विरोधिव्याप्तिपक्षधर्मविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्तश्रावणत्वादि-वैशिष्ट्याप्रसिद्ध्या आरोपयितुमशक्यत्वात् । न च साध्यव्याप्यस्य पक्षधर्मता पक्षधर्मस्य वा साध्यव्याप्यता आरोप्येति वाच्यम् । एकत्र तदुभयाभावात् विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात्। नाप्यनिर्धारितविशेषेण बोधितसाध्यविपर्ययकत्वम् , उभयोरबोधकत्वात् । विशेषश्च न व्याप्तिभङ्गारूपः, एकत्र तद्भङ्गनियमात् ।

**इति सत्प्रतिपक्षपूर्वपक्षः ।।**

**अथ सत्प्रतिपक्षसिद्धान्तः।**

उच्यते । साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्। बलञ्च व्याप्तिपक्षधर्मते । विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम् ।

स्थापनाया व्याप्तिपक्षधर्मत्वमुभयवादिसिद्धम् , वादिना तदभावानुपन्यासात्। द्वितीयस्य तु तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवावश्यं दोष **इत्येके** ।

**तन्न** । एकदा निरन्तरयोर्वा उभयोर्व्याप्तिपक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वात् । युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात् ।

अथ वस्तुनोऽद्व्यात्मकत्त्वेन व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः। न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम् । अविरोधेऽप्यनुमित्यविरोधात्, विरोधे तु व्याप्त्यादिभङ्गनियमादिति चेत्, न । प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात्।

ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः, किन्तु संशयः। निर्णये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेत्, न। उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इति उपजीव्यत्वेनास्य भिन्नत्वात् । दूषकताबीजन्तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वम्, न तु व्याप्तिपक्षधर्मताविरह एव, सद्धेतावपि सत्प्रतिपक्षत्वात्। एकत्र व्याप्तिभङ्गज्ञानद्वारा वास्य दूषकत्वम् । चक्षुरादेश्च नानुमानेन प्रतिरोधः तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् ।

नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रोच्छेदः। न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः, समानबलत्वे प्रतिरोध एव, अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाध एवेति वाच्यम् । अगृह्यमाणविशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः।

अनुमानात् पूर्वं पश्चाद्वा अनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात् । निरूपणे वानुमानवैयर्थ्यापत्ते:।

मैवम् । विरोधिवाक्यमात्रस्य समबलत्वाभावात् । उक्तं हि **"व्याप्तिपक्षधर्मते बलम्"** इति ।

प्रत्यक्षादेर्लिङ्गभावेनैवानुमितिप्रतिरोध:, कथायां तदुपन्यासानर्हत्वात् । **यत्तु** विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकताबीज**मिति** । **तन्न** । एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम्, तादृशञ्च न संशायकमिति। अनुमितिद्वयस्य प्रामाण्यं ग्राहकाप्रवृत्तिर्दूषकताबीज**मित्यन्ये**। **तन्न** । परस्परप्रतिबन्धेनानुमितेरेवानुत्पत्ते: ।

**रत्नकोषकारस्तु** सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमिति: संशयरूपा जन्यते । विरुद्धोभयज्ञानसामग्रया: संशयजनकत्वात् संशयद्वारा अस्य दूषकत्वम् । न च संशयरूपा नानुमिति: बाधस्येव विरोध्युपस्थितेरनुमितिसामग्रीविघटकत्वेनावघारणात् अन्यथा बाधेऽप्यनुमित्यापत्तेरिति वाच्यम् । अधिकबलतया बाधेन प्रतिबन्धात् तुल्यबलत्वादनुमिति: स्यादेव सामग्रीसत्त्वात् । साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य चक्षुरादे: । प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय: इति चेत्, न। प्रत्येकाद्धि ज्ञानुमुत्पद्यमानमर्थात् संशय: न तु प्रत्येकं संशयजनकत्व**मिति मेने** ।

**तन्न** । साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वात् , विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् ।

**निबन्धे** तु हेत्वाभासानां फलद्वारकं लक्षणम्। अनैकान्तिकानामन्वयाद्व्यतिरेकाद्वा कोट्प्युपस्थापकतया संशय: फलम्। विरुद्धस्य साध्यविपरीतस्य ज्ञानं अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव बाधेऽन्यतो विपरीतज्ञानं न तु हेत्वभिमतादे:। नित्यो घट: कार्यत्वादिति विरुद्धे बाधसङ्करेऽप्यदोष:। असिद्धेऽनैकान्तिकादि-चतुष्टयज्ञानान्यलिङ्गत्वज्ञानम्। बाधे पक्षधर्महेतौ व्याप्तिबाध:। प्रकरणसमे तु न

व्याप्तिपक्षधर्मताबाध: फलम्। नाप्यलिङ्गत्वज्ञानम्, व्याप्त्यादिबुद्धिसत्त्वात्। नापि विपरीतबुद्धि:, स्वसाध्यविपरीतेनानियमात् । नापि संशय:, प्रत्येकं कोटिद्वयानुपनयात् । किन्तु कथमत्र तत्त्वनिर्णय इति जिज्ञासा फलम्।

तथाच प्रकृतसाध्यहेत्वो: किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थिति: प्रकरणसम: । न ह्यनुपस्थिते प्रतिपक्षे एकस्माज्जिज्ञासा, किन्तु निर्णय एव ।

अथ ज्ञातुमिच्छा जिज्ञासा । सा च ज्ञानेष्टसाधनताज्ञानात् संशयाद्वेति कथं तेन विना विरोधिसाधनज्ञानमात्रादिति चेत्, न। असति प्रतिपक्षे न जिज्ञासा, सति तु सेत्यन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाजनकत्वात्। न चानैकान्तिकातिव्याप्ति: । तत्र हि संशयद्वारा साध्ये जिज्ञासा, अत्र तु हेतुसमीचीनत्व इति ।

ननु परामर्शयोरेकदानुत्पादात् कथं प्रतिरोध:। क्रमोत्पन्नयोरेकदा सत्वादिति चेत्, न । एकानन्तरमपरहेतुव्याप्ति-पक्षधर्मताज्ञानाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्वपरामर्शनाशात् । न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्परप्रतिबन्धात् परामर्शोत्पाद इति वाच्यम्। व्याप्त्यादिज्ञानचतुष्टयस्य यौगपद्याभावात् ।

**यत्तु** व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयो: परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरिति दूषकताबीज**मिति** । **तन्न** । व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्त्युद्भावनाच्चेति ।

मैवम् । हेतुद्वयसमूहालम्बनाद्युगपदुभयव्याप्तिस्मृतावुभयपरामर्शरूपं ज्ञानमुत्पद्यते। अत एकदा विरुद्धकार्यद्वयकरणान्नैकमपि कार्यमुत्पद्यते। तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादित:, परस्य तु वाद्युपन्यस्तन्यायोत्थापितप्रमाणावतारात् ।

अस्य च केवलान्वयिन्यपि सम्भव:। घटोऽभिधेय: प्रमेयत्वादित्यत्राभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि जात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात् घटान्योन्याभाववत् पटरूपवच्च । घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिक: घटवृत्तिनित्याभावत्वात्

घटनिष्ठान्योन्याभाववदिति विशेषादर्शनदशायां । न च पक्षैक्यमपि तन्त्रम्। विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वादिति ।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे सत्प्रतिपक्षप्रकरणम्।।**

## अथासिद्धिप्रकरणम्

### अथासिद्धिपूर्वपक्षः।

असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः प्रत्येकमननुगमात् । अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः। यद्यपि विशिष्टस्यान्यत्वे प्रेयेकाभावा-व्याप्तिरपसिद्धान्तश्च, अनन्यत्वे प्रत्येकाभाव एव स इत्यननुगमः तथाऽपि विशेषणावच्छिन्नप्रतियोगिको विशेष्याभावो विशेषण विशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेत्, न । विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने उद्भावने चानुमितिप्रतिबन्धो वादिनिवत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः। अन्यथा तेषां हेत्वाभासान्तरतापत्तेः। न च विशिष्टाभावधीद्वारा प्रत्येकाभावो दोषो न तु स्वत इति वाच्यम् । प्रत्येकाभावस्य स्वत एव दोषत्वसम्भवात् ।

वस्तुतो विशिष्टाभावो दोष एव न। प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात् । प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञान-मित्युपजीव्यत्वाद्, विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च । अत एव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्। व्यभिचारादाव-सिद्धत्वेऽप्युपजीव्यत्वेन प्राथम्यात्तदुद्भावने वादिनिवृत्तेश्च स स्वत एव दूषकः। तत्र व्याप्तिसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि। तस्य दुरूहत्वात् व्यभिचारेणैव तदन्वयाच्च।

यदि च व्यभिचारादिकमज्ञात्वाप्यसिद्धिबुद्धिः तथाप्युपधेयसङ्करेऽप्युपाधेरसङ्कर एवेति निरस्तम् । व्यर्थविशेषणत्वादेव।

एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धिरिति प्रत्युक्तम् । अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च ।

**यत्तु** व्याप्तिपक्षधर्मताप्रमितिविरहः आश्रयासिद्ध्यानुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमितिप्रमित्यापत्तेरिति । तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम् ।

वस्तुतस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्रसिद्ध्या तदभावो ज्ञातुमुद्भावयितुञ्चाशक्य एव। यत्किञ्चिद्व्याप्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतुसाधारणः। स्वप्रमितिविरहो यत्किञ्चित्प्रमितिविरहो वा सद्धेतावपि। सकलतत्प्रमितिविरहो दूर्निरूपः। व्यात्यभावादेव तद्ग्रहे स एव दोषः, उपजीव्यत्वात् ।

यदि च प्रमितिविरहः स्वरूपसन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्यादिभ्रमादनुमितिर्न स्यात्, न स्याच्च हेत्वाभासता, ज्ञानगर्भतल्लक्षणाभावात् । एतेन व्याप्तिप्रमितिपक्षधर्मता-प्रमितिविरहान्यतरत्वमसिद्धिः । अन्यतरत्वच्च तदन्यान्यत्वम्, तेनोभयविरहेऽपि नाव्याप्तिरिति निरस्तम् । व्यर्थविशेषणत्वादेव ।

स्यादेतत् । व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिः तदभावोऽसिद्धिः। अत एवाव्याप्तेऽपक्षधर्मे च तदारोपरूपा सिद्धिरित्यनुमितिः, न तु व्याप्तपक्षधर्मादपि तदनिश्चये । न चैवं हेतोरप्याभासत्वं तदाभासस्यापि हेतुत्वं स्यात् । दशाविशेषे इष्टत्वात्।

सेयं स्वरूपसती दूषिका, कारणाभावत्वात् । न च व्याप्त्यादिप्रत्येकनिश्चयाभाव एव दूषकः, आवश्यकत्वादिति वाच्यम्। विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्यानुत्पादकत्वादिति ।

मैवम् । एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात् । असिद्धेः स्वरूपसत्या एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावनात् । यदि च तस्मात् सिद्धिर्नोपपद्यत इति तस्योपजीव्यत्वम्, तदाश्रयासिद्ध्यादिज्ञानात् सिद्धिर्नेति स एव पृथग्दोषः स्यात् । असिद्धिश्च ज्ञाता परस्योद्भाव्येति स्वज्ञानार्थमुद्भावितासिद्धिनिर्वाहार्थञ्चाश्रयासिद्धिज्ञानमावश्यकम्। कथञ्च हेतुतदाभासविवेकः ? सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदाभासत्वात् । व्यभिचारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात् ।

अथ सुषुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः, सव्यभिचारादौ तथावधारणादित्यसिद्धिरज्ञातापि हेत्वाभासः । न चैवं हेत्वाभासाधिक्यं क्लृप्तान्तर्भावो वा, तेन रूपेण व्याप्त्यसिद्ध्यादेरेव संग्रहादिति चेत्, न। एवं सव्यभिचारादिरप्यसिद्धिः स्यादित्युक्तत्वात्। उपजीवनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक्

स्यात् । सुषप्त्यादावनुमित्यभावः कारणाभावात्। कार्यानुत्पादो हि न प्रतिबन्धमात्रात्, किन्तु कारणाभावादपि। असत्यपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः ।

अथानुमित्यनुत्पादो हेत्वाभासप्रत्युक्त एवेति चेत्, तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः। हेत्वाभासादेवानुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात्, सिद्धेरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात् ।

**अन्ये तु** गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वम् । तत्राधिकसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ । व्याप्तिपक्षधर्मता-विरहश्चासिद्धिः। तन्नियतौ च सव्यभिचारविरुद्धौ । न चानयोरप्यसिद्ध्यन्तर्भावः । व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्यैवेति ।

**तन्न** । अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति। तत्र चोक्तमेवान्यतरत्वञ्च न लक्षणम्, व्यर्थविशेषणत्वात् । हेत्वाभासान्तरबहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात् । तच्चाश्रयासिद्ध्यादिकमेवेति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे असिद्धिपूर्वपक्षः ।।**

**अथासिद्धिसिद्धान्तः**

उच्यते । आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्च प्रत्येकमेव दोषः। प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात् । न तु विशिष्टाभावः परामर्शविषयाभावो वा, व्यर्थविशेषणत्वात् । तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात् । अनुभवसिद्धे हि लक्षणम्, न तु लक्षणानुरोधेनानुभवकल्पना। परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा ।

अत एव **"ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते तदन्ये च यथायथं व्यभिचारादयः"** इति सिद्धान्तप्रवादोऽपि।

न चैवं साक्षात् प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि सङ्ग्रहे विभागव्याघातः । स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात् ।

अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः । सव्यभिचारादेरप्येवं रूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम्। उपधेयसङ्करेऽप्युपाधेरसङ्करात्

नन्वाश्रयाप्रसिद्ध्या कथमाश्रयासिद्धिरुद्भाव्या । न च शशीयतया गवि श्रृङ्गनिषेधवत् व्योमकमलमिति वाच्यम्। शशश्रृङ्गनिषेधो न गवीत्युक्तत्वादिति चेत्, व्योमकमलमिति निश्चितानन्वयत्वेनापार्थकम् । आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसङ्कीर्णा। व्याप्तिविरहश्च व्यर्थविशेषणादौ।

तदुक्तं- **"एकामसिद्धिं परिहरतो द्वितीयापत्ते"**रिति।

उपाधिस्तु न व्याप्तिविरहः। वह्निव्यापकधूमाव्यापकधर्मस्याप्रसिद्ध्या धूमे तद्विरहासिद्धेः, किन्तु यावत्स्व व्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः। साध्यव्यापकसाधनाव्यापकश्च धर्मान्तरं न तु तद्विरहः, अपि तु तन्नियतः। न चैवमुपजीव्यत्वेन उपाधिर्हेत्वाभासान्तरम्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात् । न हि साध्यव्यापकाव्याप्यत्वमनुमितिविरोधि। किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा। तदाह- **"उपाधाववश्यं व्यभिचारः, उपाधेरेव व्यभिचारशङ्के"**ति ।

अप्रयोजकान्यथासिद्धौ सोपाधी नासिद्धौ । प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतो दूषकावपि न हेत्वाभासौ, स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम्।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे असिद्धिसिद्धान्तः।।**

## अथ बाधपूर्वपक्षः

बाधो न साध्याभाववत्पक्षकत्वम्, पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा, पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते । अत एव साध्याभाववत्पक्षवृत्तित्वमपि न। असिद्धिसङ्कीर्णबाधाव्याप्तेश्च ।

किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वम्, प्रमितसाध्याभाववत्पक्षकत्वम्, पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति। विवक्षितविवेकेन साध्याभावादिप्रमैव

दोषः। सा च प्रमात्वेन ज्ञाता न स्वरूपसती, हेत्वाभासत्वात् । प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च।

अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञानेऽसिद्धिः संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च । न च पक्षभिन्ने व्यभिचारो दोषः। व्यर्थविशेषणत्वात् सर्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात् । न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकवत् पक्षे व्यभिचारसंशयादनुमानमात्रोच्छेदः इति पक्षे साध्यसन्देहोऽनुमानाङ्गमिति। व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संशयनिवृत्तेः । अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येत । न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञानमित्युपजीव्यत्वाद्बाधः पृथक्। पक्षे साध्याभावप्रतीतिरेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखिनीत्येकवित्तिवेद्यत्वेन नोपजीव्यत्वम् । अन्यथा बाधदशायां पक्षे हेतोरज्ञानदसिद्धिरेव ।

न चोद्भावितव्यभिचारनिर्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वम्, व्यभिचारोद्भावने परं कथन्तानावश्यकत्वात् । तत्त्वे वा तन्निर्वाह्यमेव दूषणं क्लृप्तत्वात् । वह्निरुष्णः कृतक इत्युद्भावनाद्वह्निरुष्ण इत्युद्भावने लाघवमिति बाधः पृथगिति **कश्चित्, तन्न**। पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषः तदा परं प्रत्यपि न स्यादविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात्।

अथोपनीतकाञ्चनमयत्वविशिष्टवह्न्यनुमितेः सल्लिङ्गजन्यायाः आभासत्त्वं हेत्वाभासाधीनम् । न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानम्, विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानात् । अत एव पक्षासिद्धिरपि न । अतः काञ्चनमयवह्न्यभावरूपाद्बाधात् अनुमानाभासत्वम्, व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्राभाव इति चेत्, न। वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात् । ज्ञानञ्च तस्य बाधस्येवानुमित्यनन्तरमेव। किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात्, विशिष्टस्य पूर्वमज्ञानात् । वह्नौ काञ्चनमयत्वांशे अनुमितेरभासत्वं, वह्नौ लिङ्गस्यासिद्धेः व्यभि-

चाराच्च । न चानुमितेर्विषयाभावाधीनप्रमात्वम्, किन्तु हेत्वाभासाधीनम् । यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभास: । न च साध्याभावो ज्ञात: प्रतिबन्धक: इति न स: हेत्वाभास: ।

वस्तुतस्तु उपनीतस्यानुमितौ भाने मानाभाव:, प्रत्यभिज्ञादौ च प्रतीतिबलेन तत्कल्पनम् । अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेद:। अपिचैवं परार्थानुमानेऽप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी। उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत्, तुल्यं स्वार्थानुमानेऽपि। अत एव यत्र सामान्यतो दृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे तत्प्रयुक्तं सामान्यतोदृष्टस्याप्याभासत्वमिति बाधस्यासाङ्कर्यात्। न च यदि विशेषविप्रतिपत्तौ सामान्यप्रतिज्ञा तदा अर्थान्तरम्, सामान्यविप्रतिपत्तौ तु नेतर बाधकापेक्षेति वाच्यम् । स्वार्थानुमान एवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम् अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात् ।

ननु पक्षे साध्याभावग्रहवत्साध्याभावव्याप्यग्रहोऽपि दूषको, विरोधित्वाविशेषात् । तथाच साध्याभावसम्बन्धो व्यभिचार: । साध्याभावव्याप्यसामानाधिकरण्यं बाध:, साध्याभावव्याप्यञ्च वह्नित्वादिकमेवेति चेत्, न। पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव ।

अथ पक्षे साध्याभावबुद्धिं विनैव सा, तर्हि हेतुसाध्याभावव्याप्ययोरगृह्यमाणविशेषयो: सत्प्रतिपक्षत्वम् । अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेत्, न। गमकतौपयिकरूपसाकल्यं हि बलम् तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वम्। गमकताबहिर्भूतञ्च न बलम् ।

अथ साध्याभावव्याप्यबुद्धेरन्यथासिद्धत्वं बलं तदा तत: साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव। पक्षे साध्याभावग्रहवदिति यदुक्तं तदप्यसिद्धम्। तस्य दोषत्वानभ्युपगमात्, अन्यथा हेत्वाभासान्तरतापत्ति:।

अथ हेतुत: साध्यसिद्धिसम्भावनायां व्यभिचारासिद्धे: बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरित्युपजीव्यत्वाद्बाध: पृथक् । अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहाद्व्यभिचारबुद्धि:, तस्याञ्च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रय इति चेत्, न । साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतयाऽदूषकत्वात् ।

तथापि व्यभिचारे साध्याभावप्रमा तन्त्रम्, तां विना तदभावादिति सैव दोष इति चेत्, सत्यम्, किन्तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका, क्लृप्तत्वात्, न तु स्वतन्त्रा। अत एव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं न तु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तम् । तस्य लघुत्वेऽप्यक्लृप्तत्वात्।

अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेत्, न तर्हि हेत्वाभास:, अनुमित्यसाधारणदोषस्य तत्वात्। मनोयोगाभववत् स्वरूपसत एव प्रतिबन्धकत्वात् । हेतुत्वाभिमतावृत्तित्वेनासाधकतालिङ्गत्वाभावाच्च। बाधितपक्षकत्वं लिङ्गमिति चेत्, न। अन्यत्र तथा दूषकत्वाकल्पनात्

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे बाधपूर्वपक्ष:।।**

## अथ बाधसिद्धान्त:।

उच्यते । पक्षे साध्याभावनिश्चय: साध्याभावज्ञानप्रमात्वनिश्चयात्। ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यम्। भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च । तथाचोपजीव्यत्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारो नान्यथेत्युभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोष:, उपजीव्यत्वात् ।

यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानुमितिविरोधी तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव वह्निम् । न च साध्याभावबुद्धिरेवागृह्यमाणविशेषा सत्प्रतिपक्षवत्

प्रतिबन्धिकेति वाच्यम् । रजते नेदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात् । वादिवाक्येन पक्षे साध्याभावज्ञानादनुमानोच्छेदप्रसङ्गाच्च ।

अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषो न तु तस्याः प्रमात्वज्ञानमपीति चेत्, तर्हि प्रमाया: अप्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात्, न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्ध: ।

ननूपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतो दूषकं क्लृप्तत्वात्, पक्षे साध्याभावनिश्चयं कुर्वत् व्यभिचारज्ञानद्वारेति चेत्, न । अत्र साध्याभावप्रमेति ज्ञानान्नियमत: साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात् शब्दादौ तथा दर्शनात् । साध्याभावप्रमाविषयवृत्तित्वस्य हेतुवृत्तित्वादसाधकत्वेन साध्याभावप्रमाया हेत्वाभासत्वम्। साधारण्येऽपि ज्ञायमानं सत् यदनुमितिं प्रतिबध्नाति तस्यैव हेत्वाभासत्वम् । न च साध्याभावप्रमात्रेति निश्चयदशायां पक्षे साध्याभावहेत्वोर्ज्ञानाहद्व्यभिचार इति वाच्यम्। प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन तद्दशायां तदभावात् । पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाध: पृथक् । प्रसिद्धाभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्, तर्ह्यसत्प्रसिद्धाभाववति सपक्षे व्यभिचारात् तमपि न साधयेत् । तदज्ञानात्तत्साधनेऽनुमितिरप्रमा स्यात् ।

अथ पक्षवृत्तेरन्य एव धूमादि: सपक्षे, तर्हि गोत्वपृथिवीत्वद्रव्यत्वादेरप्रसिद्धसास्नाद्यनुमानं न स्यात् सास्नादिप्रत्येकव्यभिचारात् । यदि च साध्यतावच्छेदकसास्नात्वादिसामान्यावच्छिन्नप्रतियोगिताकाभाववति न गोत्वादिकमिति न व्यभिचार:। तर्हि धूमेऽप्येवं व्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत्, यदि बाधो न दोष इति वयम् । साध्याभाववन्मात्रसहचारो न व्यभिचार:, साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादे:, द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात्। किन्तु

साध्यात्यन्ताभाववद्गामित्वम् । एवञ्च स्वप्रागभावध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम् ।

अथावच्छेद्ये सिद्धसाधनम्, अवच्छेदके हेत्वसिद्धि:। विशिष्टञ्च नान्यदिति चेत्, तर्हि प्रागभावध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात् । अथ यत्समयावच्छेदेन तत्र प्रागभाव: प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोग्रीति चेत्, तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनम्, किन्तु बाध एव । अन्यथा भावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्ग: एकवृत्तित्वात्। अवच्छेदकभेदेन वृत्तिरिहापि तुल्या। तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद: इति। असिद्धेरपि बाध एवोपजीव्य:।

न चैवमुपजीव्यत्वाद्बाधवत् सिद्धसाधनमपि पृथक् । उपजीव्यत्वेपि स्वतोऽदूषकत्वात् । न हि साध्यज्ञानं तद्बुद्धिविरोधि, धारावाहिकज्ञानोदयात् । नाप्यनुमितिविरोधि, अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात्। तदुक्तं --- **"प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका"** इति। श्रवणानन्तरं मननदर्शनाच्च। तस्मात् सिद्धिमात्रार्थिन: सिद्धौ न तदिच्छा । सिद्धिविशेषार्थिन: सास्तीति तस्यानुमितिरेव, एवञ्च सिषाधयिषितपक्षाविघटनद्वारा सिद्धसाधनं दूषणं न तु स्वत:।

नन्वभावधीरपि न भावधीप्रतिबन्धिका। नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात् । नचाभावप्रमा तथा, अपीत: शङ्ख: इति प्रमापयत एव पीतोऽयमिति भ्रमदर्शनादिति चेत्, न। विरोधिज्ञानं हि प्रतिबन्धकम् । प्रत्यक्षभ्रमस्य प्रत्यक्षप्रमा विरोधिनी सा च शङ्खादौ दोषात् नास्त्येव। अनुमितौ त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति।

स चायं दशविधः । धर्मिग्राहकमानबाधितं घटोऽव्यापक: सत्त्वादिति प्रत्यक्षेण, परमाणव: सावयवा मूर्तत्वादित्यनुमानेन, मेरु: पाषाणमय: पर्वतत्वादिति सुवर्णमयत्वबोधकागमेन, साध्यप्रतियोगिग्राहकबाधितम् वह्निरनुष्ण: कृतकत्वादिति प्रत्यक्षेण, शब्दोऽश्रावणो गुणत्वादित्यनुमानेन, गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन, साध्यग्राहकबाधितं---शुचि नरशिर: कपालं प्राण्यङ्गत्वादित्यत्रागमेन, हेतुग्राहकबाधितम्---

जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शवत्वात् तेजोवदिति प्रत्यक्षेण, मनो विभु ज्ञानसमवाय्याधारत्वादित्यनुमानेन, राजसूयं ब्राह्मणकर्तव्यं स्वर्गसाधनत्वादग्निष्टोमवदिति राजसूयकर्तव्यताबोधकागमेनेति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे बाधसिद्धान्तः।**

## अथ हेत्वाभासानामसाधकतासाधकत्वनिरूपणम्।

अथ हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वम्, जात्यादीनाञ्चासाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसदुत्तरत्त्वम् । अथ विरुद्धत्वादिज्ञानादेव स्वार्थानुमितेरिव परार्थानुमितेरपि प्रतिबन्धे किमसाधकतानुमानेन। यद्वचसि वाद्युक्तदूषणावगतिः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यमन्यथार्थान्तरत्वादिति चेत्, न।

द्वयं ह्युद्देश्यं परार्थानुमितिप्रतिबन्धः, स्थापनाया असाधकतासाधनत्वञ्च । तत्राद्यं दूषणमात्रज्ञानादेव, द्वितीयन्तु अलिङ्गत्वज्ञापनात्। प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वसम्भव इत्यभिप्रायेण वा असाधकतासाधनम्। नन्वेवं पञ्चावयप्रयोगापेक्षा स्यात्, अन्यथा न्यूनतापत्तिरिति चेत्, न । दूषणस्यासाधकताव्याप्यत्वमङ्गीकृत्य कथेति तत्पक्षधर्मताया एवोद्भाव्यत्वात्, अन्यथा अधिकत्वापत्तेः।

नन्वेवं कृतकत्वेनानित्यत्वानुमानेऽपि व्याप्तिर्नाभिधेया, उभयसिद्धत्वादिति चेत्, न । कथायां समयविषयतया दूषणे त्वसाधकताव्याप्त्युपस्थितेरावश्यकत्वात्, अन्यथा कथकत्वविरोधात् । नन्वेवं कृतकत्वेनानुमाने तद्व्याप्तिमनङ्गीकृत्यापि कथासम्भवात्, यस्तु कथारम्भे बाधस्यासाधकत्वव्याप्तिं नाङ्गीकरोति तं प्रति तद्दूषकत्वं प्रसाध्य पञ्चावयवप्रयोगः कर्तव्य एव ।

**यत्तु** दूषणे पक्षधर्मतामात्रमुद्भाव्यं तत्र, यत्र वादिनोस्तथा समयोऽन्यत्र तु पञ्चाववप्रयोग **एवेति** । **तन्न** । कथासम्प्रदायविरोधात् ।

अथासाधकत्वं न पक्षे साध्यप्रत्ययाजनकत्वम् । तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात् कदाचिदजनकत्वं सद्धेतावपि । नन्वेतत्काले साध्यविशिष्टपक्षज्ञानाजनकं तत्, न हि दूषणत्वज्ञानदशायां पक्षे भ्रमरूपाप्यनुमितिः, साध्यविशिष्टपक्षज्ञानञ्च हेतुत्वेन ज्ञानदशायां प्रसिद्धमिति चेत्, न । सद्धेतावसत्प्रतिपक्षतादशायमपि पूर्वकाले साध्यविशिष्ट-पक्षज्ञानाजनकत्वमस्तीत्यसाधकताप्रसङ्गात् ।

अथ पक्षे साध्यभ्रमजनकत्वं तत् । बाधविरुद्धयोरपि तत्त्वाज्ञानदशायां भ्रमजनकत्वादिति चेत्, न। सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात्, अज्ञाने साध्यप्रमाजनकत्वात् । नापि व्याप्तिपक्षधर्मतान्यतरराहित्यम्, सत्प्रतिपक्षासाधारणसद्धेतोरभावात् दशाविशेषे तस्य दोषत्वात् साध्याप्रसिद्धौ प्रकृतसाध्यव्याप्त्यप्रसिद्धेश्च । नाप्यनैकान्तिकाद्यन्यमत्वम् । यत्किञ्चिदनैकान्तिकत्व-स्यातिव्याप्तेः । प्रकृतसाध्यानैकान्तिकत्वस्याप्रसिद्धत्वेन केवलान्वयिसाधनेऽप्रसिद्धेः। अंशतः सिद्धसाधनात् साध्याविशेषाच्च ।

यत्तु एतत्कालीनैतत्पक्षीयत्वावच्छिन्नप्रतियोगिकैतत्साध्यप्रमाकरणत्वाभावः तत्तकालतत्तत्पक्षविषयसाध्यत्वाभिमतानित्यत्वादिप्रमाजनकत्वाभावो वाऽसाधकत्वम् । न च प्रतियोग्यप्रसिद्धिः, एतत्कालीनैत्पक्षीयत्वतत्तत्कालतत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियोगितावच्छेदकत्वा**दिति**। **तन्न** । सद्धेतोः सत्प्रतिपक्षत्वाज्ञानदशायामपि तादृशप्रमायामकरणभावेनासाधकतापत्तेः । नापि तृतीयलिङ्गपरामर्शस्याप्रमात्वं तत्, विरुद्धादौ परामर्शाभावात् सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च । नाप्यनुमितिहेतुभूताभावप्रतियोगिज्ञानविषयत्वं तत् । सद्धेतावपि कदाचित् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमितिप्रतिबन्धकत्वात् ।

अथानुमितिप्रतिबन्धकप्रमाविषयत्वमसाधकत्वम्, सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः। अनुमितिप्रतिबन्धकत्वञ्च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्शविघटनद्वारा तुल्यबलतया विषयतया वेति चेत्, न । सत्प्रतिपक्षयोर्विरुद्धयोर्वास्तवतुल्यबलत्वाभावेन

तद्भ्रमस्य प्रतिबन्धकत्वात् । न च तुल्यबलतया ज्ञायमानेन बोधित साध्यविपर्यकत्वज्ञानं प्रतिबन्धकम्, तच्च प्रमैवेति वाच्यम् । तुल्यबलताज्ञानमेव हि प्रतिबन्धकं न तु ज्ञायमानत्वज्ञानं गौरवादसिद्धेश्च ।

न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रतिबन्धिकेति वाच्यम् । अन्यतरत्वं तदतद्वृत्ति, न च तदतद्वृत्तिसामानाधिकरण्येन ज्ञायमानस्य दोषत्वम्, धर्ममात्रस्य व्यभिचारज्ञानादनुमित्युच्छेदापत्ते: अन्यतराङ्गवैकल्यज्ञानोपजीव्यस्य तुल्यबलत्वज्ञानस्यैव प्रतिबन्धकत्वाच्च। अन्यथा व्याप्यत्वासिद्ध्यन्तर्भावापत्तेः ।

अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वम्। तथा हीदमनैकान्तिकादिज्ञानमेतत्साध्यवत्तयैतत्पुरुषस्यैतत्कालीनैतत्पक्षकानुमितिप्रतिबन्धकम् एतदनैकान्तिकादिज्ञानत्वात् एतदन्यतज्ज्ञानवदिति चेत्, न । एतत्साध्यवत्तयैतत्पक्षकानुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येतत्कालीनैतत्पुरुषस्य तादृशानुमित्यप्रसिद्धेः । नापि समीचीनसाध्यविशिष्टपक्षविषयानुमित्यजनकत्वम् । बाधविरुद्धासिद्धेषु साध्यानधिकरणे पक्षे सत्यसाध्यप्रतीत्यप्रसिद्धे:, वह्निमति बाष्पे धूमभ्रमात् वह्न्यनुमिते: सत्यत्वाच्च । न चान्य एव वह्निस्तत्र भासते, मानाभावात्। तद्वह्ने: प्रत्यभिज्ञानात् एकव्यक्तिके तदसम्भवाच्च । न च सानुमितिर्लिङ्गविषयत्वेन भ्रम:। अनुमितौ लिङ्गभाने मानाभावात् ।

किञ्च भावोऽभावो वोभयथापि प्रमेयमिति सत्यानुमितौ भावत्वाभावत्ववति प्रमेयत्वज्ञाने एकत्र तयोरभावादसत्यानुमिति: स्यात् । न चान्यतरत्वं लिङ्गम्, तद्व्याप्तिमविदुषोऽप्यनुमितेर्व्यर्थविशेषणत्वाच्च । अथ साध्यव्याप्यत्वमेव तत्र तन्त्रम्, तत्र च बाधो नास्तीति चेत्, तर्हि कूटलिङ्गादनुमितौ वह्निव्याप्यवत्त्वमेव तन्त्रम्, वह्निव्याप्यञ्च किञ्चित्तत्रास्त्येव । अथ कूटलिङ्गे वह्निव्याप्याभेद प्रतीयते । वह्नौ कूटलिङ्गव्यापकाभेदोऽपि । अन्यथा कूटस्यैव वह्निव्याप्यत्वाप्रतीते: । एवञ्च कूटलिङ्गव्यापको वह्नित्वेन भासत इति वह्न्यनुमितिरसत्यैवेति चेत्, न ।

वह्निव्याप्यालोके धूमारोपात् यत्रानुमितिस्तत्रासिद्धिभेदेऽसत्यत्वाभावापत्तेः। आलोकव्यापके धूमव्यापकाभेदात् ।

अथ लिङ्गमनुमितिविषयो नियमतः पक्षधर्मताज्ञानविषयत्वात् व्याप्तिज्ञानविषयत्वात् नियमेनानुमितिहेतुविशेषणधीविषयत्वाच्च पर्वतत्ववत् साध्यवच्च। किञ्चैकविशेषणवत्वेन ज्ञाते विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्यानुमितिरिति धूमविशिष्ट एव वह्निवैशिष्ट्यानुमितिरिति। ननु अनुमितौ व्यापकत्वभानेऽनुमित्यविच्छेदः। न च फलीभूतज्ञानन्यूनविषयस्यैव परामर्शस्यानुमितिहेतुत्वम्, गौरवात् । विषयान्तरसञ्चारात् नानुमितिरित्यपि न। परामर्शस्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बलवत्त्वाच्चेति चेत्, न । सिद्धसाधनेन विच्छेदात् ।

यद्यप्येवं लिङ्गांशेऽप्रमात्वेऽपि साध्यप्रमात्वात् कथं तस्यासाधकत्वम्, तथाप्युक्तसाधकत्वमस्त्येवेति चेत्, अस्तु तावदेवं तथापि दैवात्तत्र धूमसत्त्वे कथं तंदेशेऽप्यसत्यता । अत एव आद्रेन्धनप्रभवो वह्निर्धूमव्यापको नान्यः । न च वह्नित्वेन व्यापकत्वादन्योऽपि तथा, तेन विनापि धूमसत्त्वात्, एवं बाष्पे धूमभ्रमाद् धूमव्यापको वह्निर्भासते। स च तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तम् । दैवाद्धूमसत्त्वे सत्यत्वादिति ।

उच्यते । स्वज्ञानदशायां पक्षे साध्यप्रत्ययाजनकत्वमसाधकत्वम्, तथाहि विरुद्धत्वादिज्ञानदशावर्तीदं पक्षे साध्यप्रत्ययाजनकम्, विरुद्धादित्वात्। पक्षविशेषणमहिम्ना तद्धशायां पक्षे साध्यप्रत्ययाजनकत्वं सिद्ध्यति। बाधितादावपि लिङ्गत्वभ्रमात् पक्षे साध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिः। यद्वा अनुमिति-प्रतिबन्धकतावच्छेदकरूपवत्त्वमसाधकत्वम्,
तथाहीदानीमिदमनुमितिप्रतिबन्धकतावच्छेदकरूपवदनैकान्तिकादित्वात् ज्ञानवत्। अनुमिति-प्रतिबन्धकतावच्छेदकञ्च रूपं ज्ञाने विषयतयानैकान्तिकादित्वमेव । न च साध्याविशेषः, उपाधिविशेषस्यानुमेयत्वात्, तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपपरत्वानुमानवत् ।

**अन्ये** त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्याप्यत्वासिद्धेऽनैकान्तिकत्वम् स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनुमितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वम्। न चैवमनैकान्तिकोऽसाधक इति सहप्रयोगानुपपत्तिः तत्राव्याप्यत्वस्यासाधकशब्दार्थत्वात् । असाधकताननुगमेपि च हेत्वाभासत्वमनुगतमेव, यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे हेत्वाभासानामसाधकतासाधकत्वनिरूपणम् ।**

## अथ ईश्वरानुमानम्

एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः। क्षित्यादौ कार्यत्वेन घटवत्सकर्तृकत्वानुमानात् । ननु क्षित्यादि प्रत्येकं न पक्षः, तस्य स्वशब्दोनाभि-धातुमशक्यत्वात्। नापि मिलितम्, एकरूपाभावात् । अत एव सकर्तृकत्वा-सकर्तृकत्वविचाराम्भकसंशयविषयः तथाभूतविवादविषयो वा न पक्षः। एकरूपाभावेन तयोस्तावत्ग्रहीतुमशक्यत्वात्। वादिनोर्निश्चितत्वेन संशयाभावात् । न च वाद्यनुमानयोस्तुल्यबलत्वेन मध्यस्थस्य संशयः। अनुमानाभ्यां तस्य संशयो मध्यस्थप्रश्नानन्तरञ्चानुमानमित्यन्योन्याश्रयात् । घटेऽपि कदाचित्तयोः सम्भवात्, प्रत्येकं संशये विवादास्पदत्वेनानुमानेऽर्थान्तरतापत्तेश्च।

न च शरीरापेक्षेण कर्त्रा यन्नकृतं शरीराजन्यं जन्यं वा पक्षः, जन्यात्मविशेषगुणशब्दफूत्कारसर्गाद्यकालीनवेद घटादिलिप्यादिसम्प्रदायानामीश्वरमात्रकर्तृकाणामसंग्रहात्, असिद्धेश्च । अदृष्टद्वारा शरीरिणोपि क्षित्यादिकर्तृत्वात्। नापि जन्यकृत्यजन्यं जन्यमुभयसिद्धकृतिजन्यान्यजन्यं वा पक्षः, क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् । नाप्यदृष्टजनककृत्यजन्यं जन्यकृतिसाक्षादजन्यं वा जन्यं पक्षः। ईश्वरकृतेरदृष्टजनकत्वेन क्षित्यादौ तदभावात् । घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण

सन्दिग्धानैकान्तिकत्वात् । न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यम् । हेतौ साध्याभाववद्गामित्वसंशयस्य दूषकत्वात् । स च साध्याभाववति हेतुसन्देहाद्धेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत् स्यात्, अनुमानमात्रोच्छेदकत्वेनेतरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकम्। तन्निश्चये च साध्यसन्देहवति साध्यानुमितिरेव, पक्षवत्सामग्रीसत्त्वात्, अत एवाङ्कुर: पक्षसम इति चेत्,

न। तस्यापक्षत्वेन हेतो: पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञान्तरापत्तिः। अनुमानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयान्नैकमप्यनुमानं स्यात् तत्रापि क्षित्यादौ सन्दिग्धानैकान्तात् क्षितेर्विवादविषयत्वे अङ्कुरे प्रथमं साध्यसाधनेऽर्थान्तराच्च । किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः। नापि सर्गाद्यकालीनं द्व्यणुकं पक्ष:, परम्प्रति सर्गाद्यसिद्धेः ।

किञ्च सकर्तृकत्वं न तावत्कृतिमत्सहभावः कृतिमज्जन्यत्वं वा। अस्मदादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञान-चिकीर्षाकृतिमज्जन्यत्वं तदिति चेत्, न। उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिना अर्थान्तरत्वम् । ज्ञानादिजन्यत्वमपि विवक्षितम्, न च घटोपादानगोचरापरोक्षज्ञानादीनां जनकत्वं सम्भवति, व्यभिचारादिति चेत्, न। क्षितिजनकादृष्टजनकज्ञानादीनामुपादानविषयत्वनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितम्, तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वम् स्वजनककृत्यव्यवहितोत्तरक्षणवर्तित्वं वा। घटदृष्टान्तस्य साध्यविकलतापत्ते:, घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गाच्च । न च शरीरक्रिया दृष्टान्त: इति वाच्यम् । घटेनानैकान्तिकत्वात् चेष्टात्वस्योपाधित्वाच्च ।

नापि क्षित्याद्युपादानगोचरत्वं विवक्षितम्, अप्रसिद्धेः । न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिपदसमभिव्यवहारे तत्तदुपादानबोधकत्वं चैत्रो मातृभक्त:

मैत्रवदिति वाच्यम्। शाब्दे हि बोधे तथा, न चात्र शब्दः प्रमाणम्, वादिनोरनाप्तत्वात् । अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धि:। तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तत्तदुपादानत्वेनैवोपस्थित्या सामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्येत । अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया प्रत्यासत्त्या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमता अस्मादादिना सिद्धसाधनम् । तेषां क्षित्यव्यवहितपूर्वसमयासत्त्वेऽपि तद्वत: सत्त्वात् अदृष्टद्वारा तेषामपि जनकत्वसम्भवात् ज्ञानादिसाक्षाज्जन्यत्वस्य च निरस्तत्वात् ।

अथ योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यजन्योपादान-गोचरापरोक्षज्ञानचिकीर्षाकृतिमदजन्यं जन्यं पक्ष: योगजधर्माजन्य सविकल्पका-जन्यसामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् । यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यमनातगोचर-साक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानादिमज्जन्यमिति साध्यम्। ज्ञानाव्य-वहितोत्तरसमयवर्तीच्छातदव्यवहितोत्तरसमयवर्तिकृतीनां जनकत्वं विवक्षितम्, न तु ज्ञानादीनां यौगपद्यम् पौर्वापर्यं वा । अतो न साध्याप्रसिद्धिर्न वा क्षित्यादौ बाध इति ।

मैवम् । योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्रसिद्धत्वेन पक्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेश्च । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धे: क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्याना-मदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् । न च तादृशसाक्षाज्जन्यत्वं विवक्षितम्। घटादिदृष्टान्ते तदसम्भवात्, दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च ।

ननु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वम् इतिरूपा, न तु यद्यत्कार्यं तत्तत्किञ्चिदुपादानाभिज्ञजन्यमिति ।

एवञ्च यत्र यत्र कार्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वमिति विशिष्य व्याप्त्या क्षित्यादौ कार्यत्वं क्षित्याद्युपादानाभिज्ञजन्यत्वमेव साधयति। अतो न सिद्धसाधनमिति चेत्, न। घटे पटे च कार्यत्वस्य व्याप्तिग्रह: किं प्रत्येकं घटोपादानाभिज्ञजन्यत्वेन, तत्तदुपादानाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा। आद्ये घटोपादानाभिज्ञजन्यत्वादौ कार्यत्वस्य व्यभिचार एव ।

द्वितीये त्वननुगततत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः। तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत्, न ।

अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अत एवेदानीं देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात्, विद्यमानत्वे सति यो यदा यत्र नास्ति स तदा तदतिरिक्ते देशेऽस्ति यथाहमेव बहिरसन् गृहमध्ये तिष्ठामीत्यत्र पक्षदृष्टान्त-साधारणयत्वतत्त्वयोरनुगतयोरभावान्नान्वयी, किन्तु व्यतिरेकीत्युक्तम् । तृतीये सिद्धसाधनमेव ।

अथ सर्गाद्यकालीनद्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यम् कार्यत्वात् घटवत् अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेत्, न । परम्प्रति सर्गाद्यसिद्धेः। ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् उदासीनसिद्धावप्रयोजकत्वाच्च ।

एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमानकालीनकृतिजन्यमिति निरस्तम् । द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकत्वाभ्यामजनकत्वात्। किञ्च कार्यत्वं न तावद्योगोपस्थितकृत्यर्हत्वम्, असिद्धे: । नापि पूर्वकालासत्त्वे सति उत्तरकालसम्बन्धित्वम्, तत्तत्पूर्वकालत्वस्याननुगतत्वात्, सकलपूर्वकालस्याप्रसिद्धे: । नापि कादाचित्कत्वम्, प्रागभावेनानैकान्तिकत्वात् । नापि प्रागभावप्रतियोगित्वम्, ध्वंसेनानैकान्तिकत्वात् । नापि सत्त्वे सति तत्त्वम्, सत्ताजातेः परम्प्रति असिद्धे:, स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् ।

**यत्त्वयं** घट: एतद्घटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् पटव**दित्यादि** । **तन्न** । विपक्षे बाधकाभावेनाप्रयोजकत्वात् । अन्यथा अयं घट:

एतद्घटजनकानित्यादृष्टातिरिक्तादृष्टजन्य: कार्यत्वादपरघटवत्। एतत्सुखदु:खसाक्षात्कारौ एतत्जनकानित्यसुखदुःखातिरिक्तसुखदुःखसाध्यौ सुखदु:खसाक्षात्कारत्वादित्यादिना नित्यधर्माधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घट: स्वजनकानित्यज्ञानाद्यतिरिक्तज्ञानाद्यजन्य: घटत्वात् अपरघटवदित्यादिना सत्प्रतिपक्षाच्च ।

**केचित्तु** दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनो निवेशयत: पुंसो मनःक्रियानुकूलो यत्न:। तथाच सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधार-कालाधारज्ञानजनकात्ममनोयोगजनिका मन:क्रिया तन्मनोगोचरप्रयत्नानाधारतन्मनोगोचर-प्रयत्नतद्व्याप्येतरसकलकारणाधारकालानन्तरकालानाधाराद्यसत्ताका तन्मन:क्रियात्वात् सम्मततन्मन: क्रियावत् । अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया **सिध्यतीत्याहु:** । **तन्न** । सर्गाद्यकाले ज्ञानजनकमनस्संयोगजनकक्रियायां मानाभाव: । पूर्वक्रिययैव संयोगसम्भवात् ईश्वरवादिनां तन्मनोगोचरप्रयत्नानाधार: कालोऽप्रसिद्ध एव । क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च। किञ्चैवं प्रयत्नानाधारकालानन्तरकालानाधारत्वम्, अर्थात् तत्सिद्धौ मानान्तरादीश्वरसिद्धौ अर्थान्तरत्वमिति।

**अत्रोच्यते** । अदृष्टद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानिस्वजनका दृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्न-विषयीभवदुपादानानि वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घट:, तथा चैतानि तस्मात्तथा । उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय तथैव निरुक्तस्य पक्षत्वनिर्देशे समूहालम्बनरूपैवानुमितिरुत्पद्यते । न च जन्यकृत्यजन्यत्वं तावदननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यम् । जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थिते:।

न च जन्यत्वविशेषणव्यावर्त्याप्रसिद्धिः, प्रमेयो घट इतिवदव्यावर्तकत्वेऽपि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात् । उक्तान्यामत्वमेव सकर्तृकत्वम् । अत एव

घटभोक्ता न घटकर्तेति व्यवह्रियते । एवञ्च शब्दफूत्कारादीनां पक्षतैव । ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तिकता, उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वेन तद्वत्तया तत्रापि चिकीर्षा । यद्वा पक्षे हेतौ च न समवेतत्त्वं विशेषणम्, तेन ध्वंसोऽपि पक्षः। साध्ये च उपादानपदं कारणमात्रपरम्, अनुपादेयमेव वा । जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितम्, तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपि इच्छाजन्यत्वाभावात् पक्षत्वम् । क्षितिरेव वा पक्षः । न चाङ्कुरे सन्दिग्धानैकान्तिकत्वम्, पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात् । न त्वनुमित्योरन्योऽन्यापेक्षत्वम्, येनान्योन्याश्रयः स्यात् ।

प्रतिज्ञाया अविषयत्वात् तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यम् । सिषाधयिषाविरहसहकृतसाधकप्रमाणाभाववति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात् । तच्च क्षितौ पञ्चावयवेन अङ्कुरे स्वत एवेति न कश्चिद्विशेषः । यदि च क्षितौ हेतुनिश्चयदशायां अङ्कुरस्य हेतुमत्तया न निश्चयस्तदा क्व सन्दिग्धानैकान्तिकत्वम् ।

अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयात् हेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्यते इति चेत्, तर्हि महानसेऽपि धूमे व्याप्तिग्रहो न स्यात् , भूतोऽपि वा बाध्यते । सन्दिग्धवह्निकपर्वतापर्वतधूमवतामेकधर्माभावेनापक्षत्वात् । तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः, किन्तु गुण एव । अन्यथानुमानमात्रमुच्छिद्येत। पक्षादन्यत्रतद्दूषणमिति यदुक्तं तत्र पक्षान्यत्वं सिषाधयिषितसाध्यान्यत्वं यदि , तदानपेक्षितानुमितिर्न स्यात् ।

अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितम् तदा अङ्कुरेऽपि तन्नास्ति ।

अथ प्रतिज्ञाविषयान्यत्वं तदा स्वार्थानुमित्युच्छेदः। नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात्सर्वविषयज्ञानसिद्धिः। साध्ये च ज्ञानेच्छा प्रयत्नानां विशेषणत्वेन

विशिष्टसाधनत्वं विवक्षितं तेन न तदुपलक्षितक्षेत्रज्ञेनार्थान्तरम्। सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मताबलेनाभिमतविशेषसिद्धिश्च।

नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायातु इत्यर्थान्तरम् । न च तेषां व्यभिचारात् क्षित्यादौ न कारणत्वमिति वाच्यम् । अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादिपूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्, न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः । परम्प्रति तदसिद्धेरिति चेत्, न । ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तदविषयत्वात् । अत एवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम् । तृतीयसाध्ये तु नार्थान्तरं क्षित्यादेर्घटाद्युपादानासमवेतत्वात् ।

ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यत्वमेवास्तु। तथाचेश्वरे न प्रत्यक्षं न वेच्छा प्रयत्नौ। तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षविशेषणम्, परम्प्रत्यसिद्धेरिति चेत्, न । द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादौ अकर्तृकत्वात् क्षित्यादौ सकर्तृकत्वनिर्वाहकं ज्ञानं सिध्यद्विलक्षणमेव सिध्यति । न चावयवविभागद्वारा क्षित्यादिषु जलक्षेपात्समुद्रादिषु हस्तक्षेपात्परमाणुद्वयसंयोगे च द्वणुकेष्वस्मदादिकर्तृकत्वादंशतः सिद्धसाधनमिति वाच्यम् । तत्रहि क्षितिनाशे अस्मदादीनां कर्तृत्वं न तु खण्डक्षितौ, अवस्थितसंयोगेभ्य एव तदुपपत्तेः । सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च । अत एव द्वयणुकेऽपि न कर्तृत्वम् जलक्षेपादधिकपरिमाणकसमुद्रादेः सपक्षत्वमेव घटस्येव ।

ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् , न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात् । न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् । आत्मसमवेतत्वस्योपाधित्वात्। घटः आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदितिवदप्रयोजकत्वाच्चेति चेत् । मैवम् । प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा

घटहेतुरतः प्रयत्नवत् आत्मापि हेतुः । न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम्, असमवायिकारणं विना कार्यानुत्पत्तेः । न चात्मसंयोगस्य कारणत्वेऽपि संयोगे परिचायकमात्रमात्मेति वाच्यम् । संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात् ।

आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकस्यासिद्धेर्नात्मसंयोगः कारणमिति चेत्, न। या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्वेगद्रव्यसंयोगजा क्रियेति व्याप्त्या तत्सिद्धेः। न च क्रियाया मूर्तमात्रसमवेतासमवायिकारणकत्वनियम इति वाच्यम्। कार्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशिष्याप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च।

**अन्ये तु** अनुकूलकृतिसमवायित्वं कर्तृत्वम्, न तु जनकत्वे सति गौरवात् । कर्तरि कारकव्यपदेशश्चाभियुक्तानां सविशेषणे हीति न्यायेन कृतिपर्यवसन्न एव। एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यम् तदाश्रयत्वमेवेश्वरस्य कर्तृत्वम्।

अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः, तच्च न प्रत्यक्षम् । चिकीर्षाविषये अनागते इन्द्रियासन्निकर्षात् । किन्तु अनुमितिरूपम्। तथाच साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वा दोष इति चेत्, न । सिद्धवृत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति सम्भवति । न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनतानुमितावप्यवयवस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः । अत एव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः । न चोपादानप्रत्यक्षं प्रवर्तकज्ञानोपक्षीणम्। अप्रत्यक्षे परमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽपि प्रवृत्त्यभावात् । प्रवृत्तिविषयस्य मृदङ्गादेः प्रत्यक्षत्वात् न शब्दफूत्कारादिना व्यभिचारः ।

न चाभिमतग्राहकेन्द्रियसंयोगार्थं मनसि प्रयत्नजन्यक्रियादर्शनाच्च व्यभिचारः। अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नात् नाडीक्रिया, ततः

स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि क्रिया न तु प्रयत्नात् । अत एव जलाद्यभ्यवहारमलोत्सर्गहेतुनाडीनामनाद्यभ्यासवासनावशात् अदृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरप्रयत्नः ।

नन्वेवं घटादावनुमितिजन्यत्वदर्शनादीश्वरे अनुमितिरपि सिद्ध्येत्। यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे, तथानुमितेर्लिङ्गजन्यत्वेपि सा तत्र नित्यैव, अनित्येन अनादिद्व्यणुकाद्यजननादिति चेत्, न । स्वसुखदुःखाभावादिसाधनतानुमितेर्हि हेतुत्वं घटादौ गृहीतम् । न च भगवति शरीरादृष्टाभावेन सुखमस्ति, अतो न क्षित्यादौ तस्य तथानुमितिर्यथार्था सम्भवति । न च तादृशानुमितेरनुमित्यन्तरस्य वानुमितित्वेन घटादौ प्रवृत्तिविषयप्रत्यक्षवद्धेतुत्वं गृहीतमिति नेश्वरे अनुमितिः ।

ननु द्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि भवेत्। द्वेषवतः संसारित्वेन भगवतोऽपि तथा त्वापत्तिरितिचेत्, न । न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति । प्रयोजनमन्तरेण प्रेक्षावतां दुःखैकफले कृतेरनुत्पत्तेः। किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात् । तथाचेष्टसाधनताज्ञानात् तत्रेच्छाऽस्त्येवेति सैव कृतिकारणं क्लृप्तत्वात्, द्वेषस्तु परम्परया तदुपक्षीणः। कुतस्तर्हि द्वेषसिद्धिः, शत्रुं द्वेष्मीत्यबाधितप्रत्ययात् । न चादृश्यस्य कर्तृरनुपलब्धिबाधः। अनुपलब्धिमात्रस्य बाधकत्वे अतीन्द्रियोच्छेदात् योग्यानुपलब्धेश्चासिद्धेः, परमात्मनोऽयोग्यत्वनियमात्। शशश्रृङ्गप्रतिबन्द्या च नादृश्यमात्रनिरासः। परमाण्वादिस्वीकारात् ।

नाप्ययोग्यकर्तृनिरासः, चेष्टया ज्ञानादिमतः परमात्मनोऽनुमानात् परम्प्रति तस्यायोग्यत्वात् । नापि श्रृङ्गे पशुत्ववदप्रयोजकम्, कर्तुः कार्यमात्रे कारणत्वावधारणात्, प्रतिबन्दिमात्रस्य चादूषणत्वात् । शशे पशुत्वेनायोग्यश्रृङ्गसिद्धिः कुतो नेति चेत्, न । अर्थान्तरत्वात्, विपक्षे बाधकाभावेन व्याप्त्यसिद्धेः । श्रृङ्गत्वस्य

योग्यसंस्थानविशेषव्यङ्ग्यत्वेनायोग्यस्य विरोधेन शङ्कितुमशक्यत्वात् । शशे श्रृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च ।

अथ कृतिकार्ययोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः। त्वन्मते व्यापककृतेः सत्त्वे तद्देशे समये वा कृतिमात्रव्यतिरेकानिरूपणात् । नित्यकृतेरन्वयोऽपि न गृहीतः वह्निमात्रव्यतिरेकोऽस्ति गृह्यते चेति, न चैवमाकाशात्मनोरप्रसिद्धिः, समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यम् । समवायिकारणत्वग्रहे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात्। किन्तु यत्समवायि तत्र कार्यम्, यन्न समवायि तत्र नेत्यन्योऽन्याभावमादाय कार्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात्, समवायित्वेन तयोरन्योऽन्याभावोऽस्ति गृह्यते च । यद्वा भावकार्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति। यथा हि यद्यद्वह्नेरन्वये धूमो गृहीतस्तत्तद्व्यतिरेके धूममात्रव्यतिरेकग्रहात् वह्निधूममात्रयोर्व्याप्तिग्रहः न तु पर्वतीयवह्नेरन्वय व्यतिरेकग्रहात् । न चान्यान्वयव्यतिरेकाभ्यां अन्यव्याप्तिग्रहे अतिप्रसङ्गः इति वाच्यम् । यद्विशेषयोरन्वय व्यतिरेकग्रहस्तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात्, स च वह्निधूमव्याप्तिग्रहः उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव वा भवति। तथेहापि कृतिविशेषकार्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकमन्तरेण कृतिकार्यमात्रयोर्व्याप्तिग्रहे उपायः, न तु पक्षधर्मताबललभ्यविशेषान्वयव्यतिरेकग्रहः अनुमानमात्रोच्छेदप्रसङ्गात् ।

एतेन

**"कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः**

**कर्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति।**

**दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्ता समाश्रीयते**

**तत्त्यागेऽपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणमिति"**।। निरस्तम् ।

ननु यदि कर्तृमात्रव्याप्तिग्रहाददृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमात् अदृश्यजाठरीयवह्निसिद्धिरपि स्यात् । न स्यात् । अदृश्यवह्नेर्धूमानुत्पत्तेर्दृश्यस्यैव तत्र हेतुत्वात् । ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेक:। किन्तु एकैकव्यतिरेकात् । तथाच व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धि:, साध्याभावव्यापकाभावप्रतियोगिन: एव साध्यगमकत्वादिति चेत्, न । यत एकैकव्यतिरेकात्कार्यव्यतिरेक:, अत एव कार्यत्वादेरेकैकं सिध्यत् त्रयमपि सिध्यति । आर्थस्तु समाजः ।

स्यादेतत् । अशरीर: नित्यज्ञानादिमान् सर्वज्ञ: कर्ता पक्षे विवक्षितो, घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारदर्शनाद्विशेषविरुद्धत्वमिति चेत्, न । हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषकत्वात्। अन्यथानुमानमात्रोच्छेदप्रसङ्गात् । न चानित्यज्ञानासर्वज्ञशरीरिकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति, येन विपरीतसाधने विरुद्धत्वं स्यात् । तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते । अङ्कुरादौ योग्यानुपलम्भेन शरीरकर्तृकत्वाभावात् ।

अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्तोपनेय:, पक्षधर्मतया च नित्यज्ञानादिमान् । तथाचोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानं विशेषविरोधादिति चेत्, न। अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यग्रहात्, ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेश्च पक्षधर्मताबललभ्यविशेषाविरोधात्, केवलाया व्याप्ते: पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गात् । तथाच निरपेक्षतादशायां विशेषानुपस्थानादेव न विरोधज्ञानम्, सापेक्षतादशायान्तु सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधज्ञानाभावाच्च। लिङ्गविशेषेण साध्यविशेषेण विरोधे च विशेषविरोध:, यथा चन्दनप्रभववह्निमानयम् असुरभिधूमवत्त्वादिति।

ननु ज्ञानत्वनित्यत्वयो: कर्तृत्वाशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिरिति चेत्, न । उपसंहारस्थानस्याभावात् ।

तथाहि ईश्वरे तद्बुद्धौ चाशरीरत्वकर्तृत्वे बुद्धित्वनित्यत्वे चोपसंह्रियमाणे विरुद्धे । न तु स्वाश्रयस्थिते, उभयोच्छेदप्रसङ्गात् । न चेश्वरस्तद्बुद्धिर्वोपस्थिता, उपस्थितौ वा धर्मग्राहकमानेन तयोर्विरोधापहारात्। अनुपस्थिते च तद्द्वये विरोधज्ञानमकिञ्चत्करमेव, अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि चोपस्थिते विरोधोपसंहारात्। बुद्धित्वनित्यत्वयोः कर्तृत्वाशरीरत्वयोरनधिगमेऽपि ईश्वरे अशरीरकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अत एव नित्यत्वावयवत्योर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादि-कन्तर्कितमिति चेत्, न। तर्कस्य प्रसञ्जनस्य संशयस्य चाज्ञातेऽसम्भवात् ।

स्यादेतत्। घटादौ कृतिसाध्यता हस्तादिव्यापारद्वारैव गृहीता न तु साक्षात् । न च पितापुत्रयोरेकघटसाधनत्वमिव प्रयत्नहस्तादिव्यापारयोः साक्षात्साधनत्वं वाच्यमिति वाच्यम्।

घटार्थं हस्तव्यापारवत्कुलालसमीपस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः। न च हस्तादिव्यापारवत्ता अशरीरस्य सम्भवति । अन्यादृशी च कृतिसाध्यता न दृष्टा । शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्तुरपि बाध एव । अन्यथा त्वदनुमानादेव क्षेत्रज्ञ एव कर्तानुमीयते बुद्ध्यादिमत्परात्मनो योग्यानुपलब्धिबाधाभावात्। शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् स बाधित इति चेत् । तर्हि कर्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्ये कर्तृत्वाधारणत् तद्बाधे कर्तृमात्रबाधोऽपि । एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एव उपाधिः। एवं ज्ञानेच्छयोरपि इच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति ।

उच्यते । जन्यमात्रे हस्तादिव्यापारजनककृतित्वेन न जनकत्वम्, चेष्टायां कृत्यादौ च व्यभिचारात् । किन्तु घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरव्यापारद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत्, न । चेष्टेतरकार्यमात्रे

शरीरव्यापारजनककृतित्वेन न जनकत्वम्, क्षित्यादौ व्यभिचारात्, किन्तु तद्विशेषघटादावित्युक्तत्वात् ।

न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् , हस्तादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यम् । घटे कृतिवत् हस्तादिव्यापारस्यापि हेतुत्वात् । यदुक्तं क्षेत्रज्ञ एव कुतो नानुमीयते इति । तत्र हस्तादिव्यापारकृतिमान् यदि क्षेत्रज्ञोऽभिमतस्तदा हस्तादिव्यापारकृतिमान् क्षेत्रज्ञोऽभिमतस्तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् ।

अथ हस्तादिव्यापाररहितकृतिमानभिमतस्तदोमित्युच्यते। स एव भगवानीश्वरः । अत एव सहभावनिरूपकत्वे नियतपूर्ववर्त्तित्वं कारणत्वम् । समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात् । अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वकाले कार्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् । न च कृते: सहभावनिरूपकत्वं स्वतः, कार्यसमये अभावात्। तथाच तत्परिचायितव्यापारद्वारा तस्या: सहभावनिरुपकत्वम्। अत: शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलाया: इत्यपास्तम् ।

समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात्। तेन तेषामभावे विनाशक्षणे च न कार्यम् ।

अन्यथा प्रतिव्यक्ति कार्यसहभावनिरूपणे कार्येत्पत्ते: प्राक् सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चयेन क्वापि प्रवृत्तिर्न स्यादिति तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सहभावेनापि व्यवच्छेद्यम्। अत: स्वरूपयोग्यतारूपा कारणता तत्रापि । कार्याभावस्तु सहकारिविरहात् । अन्यथा निमित्तानां प्रत्येकं कार्यसहभावनिरूपकत्वेन जनकत्वे गौरवम्। प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गाच्च। अन्यथा उत्पन्नोऽपि घट: पुनरुत्पद्येत सामग्रीसत्त्वात् ।

न च स एव तत्र प्रतिबन्धक:। अभावान्तरस्य तत्राकारणत्वेन कारणीभूताभाव-प्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात् ।

न चैका सामग्री एकदैकमेव कार्यं जनयति स्वभावादिति वाच्यम् । सामग्रीतद्विरहस्य कार्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्यस्य, तदभावे कार्याभावस्य वज्रलेपायितत्वात् ।

स्यादेतत्। कर्ता शरीर्येव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव इच्छा कृतिद्वारैव हेतुरित्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधान्नाशरीरनित्यज्ञानादिकर्तृसिद्धिः। अत एव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे । न चाप्रयोजकत्वम्, निरुपाधित्वेन शङ्काकलङ्कानवतारात् । कार्यत्वसकर्तृकत्वयोरपि यदि निरुपाधित्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोस्तु । न च कार्यत्वं पक्षधर्मताबलात् बलीयः, कर्ता शरीर्येवेत्यादौ तु तन्नास्तीति वाच्यम् । ज्ञानमनित्यमिति व्याप्तेरेव क्षित्यादौ ज्ञानजन्यत्वविरोधित्वात् ।

एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव । अविरोधे तु द्वयमपि स्यात्। तथाच क्षित्यादौ शरीरर्यनित्यज्ञानपर्यवसाने विरोध एव स्यात्।

किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेस्तदव्यावर्तकतया नोपाधित्वनिश्चयः तत्संशयो वा। कार्यत्वसकर्तृकत्वव्याप्तिग्रहदशायां शरीरव्यापारा-व्यभिचारादुपाधेर्निश्चयः संशयो वास्तीति ।

तन्न । ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः । विपक्षबाधकाभावेनाप्रयोजकत्वात् । निरुपाधिसहचारदर्शनव्यभिचारा दर्शनादेव व्याप्तिग्रहः, निरुपाधित्वेन वा विपक्षे बाधकमिति चेत्, न। अवयवो महानेव तेज उद्भूतरूपमेवेत्यादिव्याप्तिग्रहात् परमाणुनयनादेरसिद्धिप्रसङ्गात्।

अथ द्रव्यचाक्षुषे अनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रिसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादि सिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यम् । विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे, तर्हि ज्ञानादिकार्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात्

पक्षधर्मताग्रहसहितान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः । अन्यथा साध्यं पक्षातिरिक्त एवेत्यादिनिरुपाधिसहचारात् व्याप्तिग्रहे सकलानुमानोच्छेदः।

वयन्तु ब्रूमः । पक्षधर्मताबलान्नित्यं ज्ञानं सिद्ध्यत् बुद्धिरनित्यैरेवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यते। अस्मदापि बुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात्। बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषे नित्यत्वबुद्धिरिति चेत्, न। बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च। अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात् । बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतः कथं तत्र नित्यवृत्तित्वावगम इति चेत्, न। उभयसिद्धनित्यावृत्तित्वावगमेऽप्यतिरिक्त-नित्यवृत्तित्वावगतौ विरोधाभावात्। बुद्धित्वमनित्यत्वव्याप्यमवगतं नानित्यत्वाभाववति ज्ञातव्यमिति चेत्, न । अनित्यत्वव्याप्यत्वमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव । एतेन कर्ता शरीर्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति निरस्तम् ।

ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकम्, किन्तु घटत्वादिकमेव, तेनैव रूपेणान्वयव्यतिरेकग्रहादावश्यकत्वाच्च । अननुगतमपि जन्यतावच्छेदकम्, वह्निजन्यतायां धूमत्वादिवत् ।

अथ घटत्वादिवज्जन्यत्वमवच्छेदकम् । न हि विशेषोऽस्तीति सामान्यमप्रयोजकम् । तथाच वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् । तस्माद् यद्विशेषयो: कार्य कारणभावस्तत्सामान्ययोरपि बाधकं विना तथात्वनियम इति चेत्, न ।

तत्र बाधकाभावात् । अत्र च ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तौ बाधात् । तुल्यत्वे वा व्याप्तिसंशयाधायकत्वात् । न च कार्यकारणभावमूलकत्वेन कार्यत्वसकर्तृकत्व-व्याप्तिर्बलीयसीति वाच्यम् । विरोधिप्रत्यक्षेण कार्यकारणभावस्यैवासिद्धेः ।

एतेन धूमादौ वह्निजन्यतावच्छेदकमनुगतं न सम्भवति। इह तु जन्यत्वमनुगतमस्ति। अतो बाधकं विना न मुच्यते इति निरस्तम् ।

ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्मव्याप्तिपर्यवसायित्वेन बाधकत्वादिति ।

मैवम् । निरुपाधित्वेन सहचारावसायस्य साधकं बाधकञ्च विना साधारण्येन व्याप्तिसंशयाधायकत्वात् । अन्यथा साध्यं पक्षातिरिक्ते एव सुखं दुःखसम्भिन्नमेवेत्यादिव्याप्तिग्रहस्य कार्यकारणभावग्राहकबाधकत्वे तत्संशयाधायकत्वे वा कार्यात्कारणानुमानोच्छेदे निरीहं जगज्जायेत । तस्माद् यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोः कार्यकारणभावो बलवता बाधकेनापनीयते। न चात्र तदस्ति । विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्।

नव्यास्तु कार्यं कर्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्रुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धानं न तु तां विना, प्रतियोग्यनुपस्थितौ विरोधानिरूपणात्। तथाचोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव । अत एव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं विरोधप्रतियोगिसिद्ध्यसिद्धिपराहतत्वादिति।

स्यादेतत् । अस्तु शरीरजन्यत्वमुपाधि: । न च पक्षेतरत्ववत् पक्षमात्रव्यावर्तकविशेषणवत्त्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्य-व्यापकत्वानिश्चयाच्च नोपाधित्वमिति वाच्यम् । चेष्टेतरकार्येषु शरीरव्यापारद्वारैव कर्तु: कारणत्वात् शरीरसहकृतस्यैव स्वकार्ये कारणत्वाच्च । न हि शरीरविनाकृत: कर्ता शरीरक्रियां चेष्टां घटादिकं वा जनयति। न च यत्सहकृतं यज्जनकं तेन विना तज्जनकम्। अतोऽर्थाच्छरीरजन्यमेव कर्तृजन्यमिति साध्यव्यापकत्वनिश्चयात् । पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम् । अत एव बाधोन्नीतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्, रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः । विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात् ।

न च साधनविशेषितत्वमपि। जन्यत्वं हि प्रागभावप्रतियोगित्वम्। शरीरजन्यत्वञ्च शरीरकारणवत्वम्। अन्यानिरुक्ते: इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीते: तदर्थकत्वकल्पनादिति विधौ वक्ष्यते ।

अत एव शरीरकर्तृकत्वमुपाधि: शरीरसहकृतस्यैव कर्तु: कारणत्वात् । व्याप्यं व्यापककोटावनिवेश्यत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरकर्तृकत्व सकर्तृकत्वयोर्न व्याप्तिग्रह: इति चेत् , न। विशिष्टाविशष्टभेदेन व्याप्यव्यापकभावाविरोधात् । अत एव जन्यत्वेन कारणजन्यत्वमनुमीयते इति ।

मैवम्। कर्तुर्हि शरीरसहकारिता किं घटादौ कर्तव्ये  कार्यमात्रे वा स्वकार्ये वा। आद्ये कर्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्तु: कार्यमात्रकरणे। द्वितीये च कार्यमात्रं कर्तृजन्यमिति न त्वया स्वीक्रियते। स्वीकारे वा शरीराजन्यमपि कार्यं कर्तृजन्यमिति साध्याव्यापकत्वम् । तृतीये तु स्वजन्यत्वं न स्वजन्यतावच्छेदकम्, आत्माश्रयात् । तथापि यत्र सकर्तृकत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वम्, तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेत्, न ।

लाघवेन बाधकं विना कर्तृजन्यत्वे सति जन्यत्वमवच्छेदकम्, न तु शरीरजन्यत्वं गौरवात्। तथाच शरीरजन्यत्वं न सकर्तृकत्वव्यापकम्। घटादौ त्वार्थ: समाजः। घटत्वेन शरीरजन्यत्वनियमात् । न तु व्यापकत्वप्रयुक्तः। मानाभावात् शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजलत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कर्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात्। साक्षात्प्रयत्नाधिष्टेयजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरकर्तृकत्वमपि नोपाधि: । जन्यमात्रे कर्तु: शरीरसहकारिताविरहात् ।

अथ यद्विशेषयो: कार्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि । तथा च कर्तृविशेषशरीरजन्यविशेषयो: कार्यकारणभावनियमात् कर्तृमात्रशरीरजन्यमात्रयोरपि तथाभाव:। तथाच शरीरजन्यत्वं कर्तृजन्यतावच्छेजकमिति भवत्युपाधि: ।

न चैवं घटत्ववच्छरीरजन्यत्वं सकर्तृकत्वव्याप्यं न तु व्यापकमपीति वाच्यम् । उभयसिद्धसकलसकर्तृकवृत्तित्वेन साध्यव्यापकतानिर्णयात् । जन्यत्वेऽपि सकर्तृकत्वव्याप्यत्वग्राहकमस्तीति चेत्, तर्हि उभयत्र व्याप्तिग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्धोपाधिर्व्याप्यत्वासिद्धिर्वा । हेतुव्याप्यतासंशयाधायक एव हि सन्दिग्धोपाधि:। स च साध्यव्यापकत्वे साधनाव्याप्कत्वे वोभयत्र वा संशयात् ।

न च वाच्यम् शरीरजन्यत्वसकर्तृकत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात्तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययो:। हेतुसाध्ययोरन्वयव्यतिरेकज्ञानञ्च शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति। यतो न कर्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रह:, कर्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयो: अन्वयव्यतिरेकेण कार्यकारणभावेन वा सामान्ययोस्तथात्वग्रह:, तौ च तुल्यावेवेति चेत्,

उच्यते । अस्तु तावद्घटत्ववज्जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वम्, ग्राहकतौल्यात् विनिगमनाभावात् विरोधाभावाच्च। सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुत:? घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात्। उभयसिद्धसकर्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेत्, न। शरीरजन्यत्वविनिवेद्यत्वे न तुल्यन्यायेन च प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वस्य सकृर्तृकत्वव्यापकत्वानवगमात् । अत एव न सन्दिग्धोपाधित्वम् ।

ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकम् बाधकाभावात् । न च लाघवात् घटत्वादिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्ते:। एवं शरीरजन्यत्वस्य व्याप्यं सकृर्तकत्वं वह्नेर्धूम इव वेति भवत्युपाधिः ।

किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यत्वनिश्चय इति चेत्, तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य

शरीरजन्यत्वावच्छेदकत्वं ग्रहीतव्यम्। घटे च घटत्ववज्जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतम्। अतो जन्यमात्रे कर्तृजन्यत्वात् न शरीरजन्यत्वे तदवच्छेदकत्वम्। प्रथमगृहीतोपजीव्यविरोधात् । अत एव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि ।

एतेनानणुत्वक्षित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः, जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षोऽस्त्विति चेत्, न । अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात्। स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकमतो भिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभाव: । अत एव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तम् । तस्य प्रसिद्धाभावविषयकत्वेना-प्रसिद्धाभावाविषयकत्वात्। व्यक्तिसाधकस्य च विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात्, अन्यथानुमानवैयर्थ्यात्।

कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत्साध्यं तदभावो मया साध्यत इति चेत्, कर्तृजन्यत्वमनुगतमपि पक्षधर्मताबलेनाप्रसिद्धं कर्तारमदाय पर्यवस्यति। तदभावस्तु प्रसिद्धस्य कर्तुरभावमादाय सिद्ध्यति नाप्रसिद्धस्य । अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च कर्तृव्यक्तिघटितत्वात् । अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । न चैवं सत्प्रतिपक्षोच्छेदप्रसङ्ग: । तस्य गोत्वाद्येकभावाभावसाधकविषयत्वात् ।

एतेन "ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिजातित्वात् स्मृतित्ववत्', "ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत्', "आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवत्' इत्याद्यपास्तम् । प्रसिद्धे नित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वादप्रयोजकत्वाच्च।

किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम् । अदृष्टद्वारा तज्जन्यत्वात् । न चादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतु:। ज्ञाने जन्यत्वविशेषणस्याव्यावर्तकत्वेन व्यर्थत्वात्। न

च स्थापनायां पक्षविशेषणेऽप्ययं दोषः। प्रमेयो घट इतिवत्तदुपरक्तबुद्धेरुद्देश्यत्वात् । अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वम्, लाघवेनाजन्यत्वस्यैव व्याप्तत्वात् । न च निष्प्रयोजनविशेषणवत्त्वमसिद्धम्, व्याप्तिग्रहोपयुक्तविशेषणवत् पक्षधर्मतौपयिकविशेषण-स्यापि सप्रयोजनत्वात्। व्यभिचारवारकस्यापि सार्थकत्वे अनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इति चेत्, न। निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात्। तत्रापि व्यक्तिविशिष्टे व्याप्तिग्रह इति चेत्, न । स्वतो व्यावृत्तगोत्वस्याव्यभिचारात्। अन्यथान्योन्याश्रयात् । अपिच व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इत्यप्रयोजकम्, सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात्। व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रह इति चेत्, न । प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात् ।

अथ तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वं विवक्षितम्, न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेत्, न । विरोधात्, न हि तत्रोपात्तं तेन शून्यञ्चेति सम्भवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गम्, प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेत्, न । धूमस्याव्याप्यत्वापत्तेः, व्यभिचारात् तद्विषयत्वेनानुमित्यकारणत्वात् । अथैकमवच्छेदकम्, अपरत्र व्याप्तिः। यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थः। तत्र विशेष्यतावच्छेदकस्य व्याप्त्यनवच्छेदकत्वेन विशेषणस्य तदवच्छेदकत्वमिति नियमात्। एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेष्यमात्रे सा। तथाच स्वरूपासिद्धिस्तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेत्, न। अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात्। न च विशेष्यत्वमुपाधिः, साधनव्यापकत्वात्।

किञ्च सौरभविशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात्, निर्धूमोऽयमाद्रेन्धनप्रभववह्निरहितत्वात् इत्यादावपि कारणविशेषाभावेन कार्यविशेषाभावानुमानं

न स्यात् । वह्निरहितत्वादिकञ्चोपाधिर्भवेत् । व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वञ्च हेत्वभावव्याप्यं न स्यात्। द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात्। रूपादिषु मध्ये गन्धस्यैव व्यञ्चकत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकाराच्च। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् । तथाच स्थापनानुमाने उपादानगोचरापरोक्षज्ञान-चिकीर्षाकृतिमज्जन्यता, धूमेनाद्रेन्धनप्रभववह्निः घटत्वेन शरीरजन्यत्वादिकं नानुमीयेत ।

यत्तु स्वजन्यान्योऽन्याभावापेक्षया शरीरजन्यान्योन्याभावस्याल्पत्वात् । तेषामेव व्याप्यत्वमिति विपरीतमेव लाघव**मिति**। **तन्न**। विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शवत्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूममात्रस्याव्याप्यत्वप्रसङ्ग: । किञ्च त्वन्नये वह्न्यन्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यादेकत्वात्। प्रमेयत्वाद्यनन्तधर्मविशिष्टस्य व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यास: ।

अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यताभावत्वेन शीघ्रं व्याप्तिग्रहो न तु शरीरजन्याभावत्वेन, विलम्बितप्रतीतिकत्वात् । यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेत्, न । एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वसकर्तृकत्वव्याप्यतया न गृह्येत, शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात् । यदि च सामान्यविशेषाभावाद्विरोधाभावेनोभयस्यापि व्याप्यता, तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्। किञ्च शरीरजन्यत्वं विशिष्टतदभावमपि विशिनष्टि, न तु साक्षात् । तथाच शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थविशेषणता । न चात्र विशिष्टाभावो विशेष्याभाव एव, क्षित्यादावजन्यतापत्तेः।

अत एव स्थापनायां शरीरजन्यत्वमुपाधिः, साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात् । व्यर्थविशेषणेऽधिकं निग्रहस्थानमिति चेत्, न । हेतुद्वयोपन्यासे ह्यधिकम्। इह तु विशिष्टमेकमेव हेतुरिति विरुद्धस्थले उक्तमिति ।

उच्यते । नीलधूमादौ व्याप्तिरस्त्येव। अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् । नीलत्वमपि न व्याप्यतावच्छेदकम्। गौरवात् । किन्तु धूमत्वमेव, दण्डत्वेन कारणत्वे रूपमिव। धूमत्वञ्च न नीलिम्नि, किन्तु तदाश्रये धूम इति न नीलधूमस्य हेतुत्वम्। नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम् । उपलक्षणत्वे च धूमादेवानुमितिः । किञ्च व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। न चैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वान्नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात्, अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यम्। तदभावेऽपि नीलधूम-प्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादिति दिक् । एवं शरीराजन्यत्वेऽपि न शरीरमवच्छेदकम्, गौरवात् । येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात् ।

अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धत्वेन रूपादिषु मध्य इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकमपि विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्वनिश्चयः । व्यापके च न व्यर्थविशेषणता, विशिष्टस्य कारणत्वेन व्यापकत्वात् । परिशेषव्यतिरेकिणि विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वभावव्याप्यत्वम्। यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न। यथा कार्यस्यद्विकर्तृकत्वेनापि शरीरजन्यत्वाभावोऽखण्डो हेतुः।

यदि हि शरीरजन्यत्वं सकृर्तृकत्वप्रयोजकं स्यात्तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात्, न चैवम् । किन्तु जन्यत्वं लाघवात्तथा। तथाचाजन्यत्वमेवोपाधिः, साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् । सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्त्यभावेन तदभावयोरपि व्याप्त्यभाव इति व्याप्यत्वासिद्धत्वाच्च । अत एव शरीरजन्यत्वाभावस्या-कर्तृकत्वव्याप्यत्वात्तदभावयोरपि व्याप्यव्यापकभाव इति निरस्तम्। शरीरजन्यत्वस्य

सकर्तृकत्वाप्रयोजकत्वात् । न चाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः, सत्प्रतिपक्षोच्छेदप्रसङ्गादिति वाच्यम् । स्थापनायाः यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात् । यथा शब्दोऽनित्यो गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यनेन सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः, जलपरमाणुरूपे साध्याव्यापकत्वात् । न चैवमनैकान्तिकत्वमेव तत्रोद्भाव्यम् । सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावनानर्हत्वात् । किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति सत्त्वस्य, सत्त्वे सत्युत्पत्तिमत्त्वस्य वा हेतुत्वे एषामन्यतमव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः। अत एवाजन्यत्वस्य नोपाधित्वम्, ध्वंसे साध्याव्यापकत्वादिति न दोषः ।

अन्ये तु यन्निष्ठा यन्निरूपिता च व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम्। अकर्तृकत्वनिरूपिताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं क्लृप्तमिति न शरीरजन्यत्वमवच्छेदकम्, धूमे नीलधूमत्वमिव। अतिगौरवेण शरीरजन्यत्वमप्रतियोगितया च जन्यत्वं नावच्छेदकमिति व्याप्यतावच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः । व्यभिचाराभावात् तथेति चेत्, न । क्षित्यादावेव व्यभिचारात्। अन्यथा क्षित्यादिकं नादृष्टहेतुकं शरीरजन्यत्वाभावादित्याद्यपि स्यात् ।

नन्वस्तु तावदशरीरनित्यज्ञानादिकत्रनुमितिः, तथापि सानुमितिरयथार्था , अशरीरे कर्तृत्वज्ञानत्वात्, ज्ञानेच्छाप्रयत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात्। घटः कर्ता घटज्ञानादिकं नित्यं व्योम सकर्तृकमिति ज्ञानवदिति साध्यम्। न चोपजीव्यबाधः, अनुमितिर्हि उपजीव्या ।

नन्वस्तु तद्यथार्थत्वमपीति चेत्, न । कर्तृकार्ययोर्निरुपाधिकार्यकारणाभावेन एतस्याप्रयोजकत्वात्। अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः ।

किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यम्, न तु कार्यम् । तथाच दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा । नाद्यः, अन्योन्याश्रयात्, उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव च तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्यः, असिद्धेः । तर्कापरिशुद्धिस्तु न दूषणम् । यदि ईश्वरः कर्ता स्यात् शरीरि स्यात्, इष्टसाधनताज्ञानवान् स्यात्, प्रयोजनवान् स्यात्, अनित्यज्ञानवान् स्यात्, क्षित्यादि यदि सकर्तृकं स्यात् शरीरिकर्तृकं स्याद् इत्यादितर्काणां विपर्यये आश्रयासिद्धिव्यर्थविशेषणत्वादिना विपर्ययापर्यवसानेनाभासत्वात्।

ननु क्षित्यादावेककर्तृसिद्धिः कुतः ? एककर्तृकत्वेन व्याप्त्यभावात् । न च लाघवात्, तस्याप्रमाणत्वात् । सकर्तृकत्वप्रमाणादेव लाघवसहकृतात् तत्सिद्धिरिति चेत्, न। तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च । न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितिबिलम्बो येन तत्सहकारि स्यात् । नापि लघ्वनुमितौ, अन्योऽन्याश्रयात् । नापि व्यक्त्यनुमितौ, धूमेन वह्न्यानुमितौ एकद्विहस्तादिसंशयाभावापत्तेः । साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेवैककर्तृसिद्धिरिति चेत्, न। एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानात्वसिद्धिरित्यस्यापि सुवचनत्वात्।

अथ यमर्थमनालम्बमानानुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मताबलात्सिध्यति, न त्वधिकमपि। तथाच द्वितीयं कर्तारमविषयीकुर्वत्यपि कर्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते । एकस्तु कर्ता सिध्यति तदविषयत्वे कर्तृविषयतैव न स्यात्, एकविषयत्वाभावे नानाविषयत्वस्याप्यभावात्। तद्घटितत्वात्तस्येति चेदेवं तर्हि कत्रेकत्वमपि न विषयः स्यात्। एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात्। वस्तुगत्यैकः सिध्यति न त्वकेत्वेनेति चेत्, न। एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यत्वात्। तथाचेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते । यत्र प्रमाणे लघु-गुरुविषयता सम्भवति तत्र लाधवसहकारिता। कारणताकार्यताव्याप्यतादिग्राहके प्रत्यक्षे, प्रवृत्तिनिमित्तग्राहके उपमाने, शब्दशक्तिग्राहकानुमाने, तथाविधप्रमाणमात्रे च सकलतान्त्रिकैः सहकारित्वकल्पनात् । एवं

लाघवमेव गौरवमिति ज्ञानानन्तरं बाधकम् विना लघूनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात् । तत्रापि लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात् सोऽयं विचारमारभते, लाघवञ्च तदङ्गं नाङ्गीकुरुते इति महत्साहसम् ।

नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात् । नचेष्टापत्तिः, अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेत् , न। तत्रापि लाघवेन कर्त्रैक्यमेव सिद्ध्यति । तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेव एककर्तृकतानुमानं तत्र बाध्यते। न चैवं क्षित्यादिकर्तर्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयो दुरुच्छेदः। एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात् । न चैकत्वसाधकाभाव एव बाधकः । अनुमितेरेव लाघवसहकारेण एकत्वसाधकत्वात् ।

अन्ये तु क्षितिकर्ता अङ्कुरकत्रभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यभेदानुमानादेककर्तृसिद्धिः । न च क्षितिकर्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः। अनित्यज्ञानानामाश्रयत्वस्योपाधिकत्वा**दित्याहुः** । अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम् । तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्मताबलादिति चेत्, व्यापकतयावगतस्य पक्षसम्बन्धमात्रं पक्षधर्माद्धेतोः सिध्यति। तथाच पक्षे तदुपादानगोचरज्ञानमात्रं सिध्येत्। न तु नित्यसर्वविषयज्ञानम्, तेन रूपेण व्यापकत्वाग्रहात् । न च येन विनानुपपत्तिः सोऽपि विषयः, व्यतिरेकिविलयापत्तेः ।

**तत्र प्राञ्च**ः। यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं न विषयीकरोति स पक्षधर्मताबलात्सिध्यतीत्यनुपपत्तिमूलकोऽन्वयी, प्रतीतानुपपत्त्या च व्यतिरेकी। तदिहानादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते। अनादितैव च नित्यता।

सर्वमुक्तावपि तत्सत्त्वम्, अनादिभावत्वात् । पक्षतदुपादानविषयतैव च सर्वविषयता। लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिध्यति, न तु नित्यानित्यज्ञानानीति।

**नव्यास्तु** अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यन्नित्यमेव सिध्यति, अनित्ये बाधादिति ।

**वाचस्पतिमिश्रास्तु** लाघवादेकज्ञानसिद्धौ उत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः । नियतविषयता च ज्ञानस्य कारणाधीना। कारणञ्च नित्यज्ञानान्निवर्तमानं नियतविषयतामादाय निवर्तत इति सर्वविषयत्वसिद्धिरिति ।

षट्पदार्थीप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थीगोचरसाक्षात्कारत्वेन वा सार्वज्ञ्यम् । घटाकाशसंयोगादिकं प्रति ईश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति **केचित्** ।

ननु घटादीनां कथमीश्वरकर्तृकत्वं भवति । घटईश्वरकर्तृकः कार्यत्वात् क्षितिवदित्यनुमानादिति चेत्, न । घटस्य द्विकर्तृकतया तद् दृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः। तथाच घटवत् क्षितिः क्षितिवद् घट इतीश्वरानन्त्यम् । कार्ये कर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत्, तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति । मैवम् । ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणता, कुलालादिज्ञानतुल्यत्वात्।

**तदाहुराचार्याः । "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् , न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः"** इति।

**"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते"** इत्या**द्यागमाच्चा**यमर्थोऽध्यवसेयः।

अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् । भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत्, न । रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः, अभ्रान्तस्य तथात्वात् । इदं रजतमिति ज्ञाने रजतत्वं प्रकारः, तेन स भ्रमः । ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति स न भ्रमः । अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति ।

स्यादेतत् । प्रयोजनं विना कथमीश्वरः प्रवर्तते ? सुखस्याभावात्, अधर्माभावेन निर्दुःखत्वात् । करुणया प्रवर्तत इति चेत् तर्हि परसुखदुःखप्रहाणे प्रयोजने । तथाच स्वर्गिणमेव सृजेन्न नारकिणम् । धर्माधर्मपरतन्त्रत्वात्तदनुरूपं फलं प्रापयतीति चेत्, तर्हि आवश्यकत्वात् कर्मनिमित्तमेव जगद्वैचित्र्यमस्तु किमीश्वरेणानपेक्षितकीटादिज्ञानवता। कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्याताम्, ज्ञानादीनां नित्यत्वात्। किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यत्वापत्तौ संसारितापत्तिरिति।

न । ईश्वरानभ्युपगमे विचारस्याश्रयासिद्धत्वात् । तमभ्युपगम्य पृच्छसि चेत्, तदाकर्णय जगत एव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात्। वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्रीसमवहिता ईश्वरज्ञानादयो यदा भवन्ति तदा क्षित्यादिकं करोतीति व्यवहारः। सर्गप्रलयासाधारणक्रमिकादृष्टादिसामग्रीसमवहितत्वमेव तदिच्छायाः चिकीषासञ्जिहीर्षात्वे । न चैवं किं तज्ज्ञानादिनेति वाच्यम्। क्षित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वात्, सुखादिशब्दयोरात्माकाशादिवत् ।

नन्वशरीरात्कथं वेदघटादिशब्दव्यवहारसम्प्रदायः। उच्यते, सर्गादावदृष्टोपगृहीतभूतभेदान्मीनशरीरोत्पत्तौ अदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीनकलेवरकण्ठताल्वादिक्रिया तज्जन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितात् चेष्टोत्पत्तौ सकलघटानुकूलव्यापाराद्घटोत्पत्तिः। एवं प्रयोज्यवृद्धप्रयोजकवृद्धभावादिमच्छरीरश्च - विच्छेदेन अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः। ततः तद्दर्शी बालो व्युत्पद्यते। सोऽयं भूतावेशन्यायः ।

**यत्तु** यथा लिप्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नतत्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेश्वराभिप्रायस्थो वेदः साक्षात्कृत्यानूद्यते। ततोऽग्रिमसम्प्रदायः। स एव च कायव्यूहं कृत्वा घटादिवाग्व्यवहारं प्रवर्तयतीति मतम् ।

**तन्न**। प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात् । तेषामेव क्षित्यादिकर्तृत्वसम्भवेनेश्वराननुमानाच्च ।

**एतेन** सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्तारः सन्त्विति **परास्तम्** । सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद्वा । नाद्यः, तदसम्भवात्। नान्त्यः अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानुमानाल्लाघव-सहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः ।

अथेश्वरज्ञानमूलकशब्दशाक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणत्वग्रहो भ्रमः स्यात्, तदीयज्ञानस्य नित्यत्वात् । तथाच तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशाब्दज्ञानं भ्रमः स्यात् । भ्रमपरम्परामूलकत्वात्। अनित्यसर्वज्ञमूलकशाब्दग्रहे च नायं दोष इति चेत्, न । व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तं इति ज्ञानस्य यथार्थत्वात्, विषयाबाधात्। न च भ्रममूलत्वेनास्य भ्रमत्वमनुमेयम् । तदंशे व्यधिकरणप्रकाराभावेन बाधात् । बाधितविषयत्वस्योपाधित्वाच्च । अत एव घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठित-दारुपुत्रकस्य घटानयनव्यवहारदर्शनात् बालो घटपदे व्युत्पद्यते । तन्मूलकशाब्दज्ञानमपि न भ्रमः, तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात्। किमयं प्रयोज्यश्चेतनव्यवहारात् व्युत्पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वादिति।

"विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतो हस्त उत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रै
दुर्यावा भूमी जनयन्देव एक:" ।।

इत्यादि श्रुतय:

"उत्तम: पुरुषस्त्वन्य: परमात्मेत्युदाहृत: ।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर:" ।।

इत्यादि स्मृतयश्च बह्व्य: मानत्वेनानुसन्धेया: ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे ईश्वरवाद:।।**

## अथ शक्तिवाद:

स्यादेतत् । ईश्वरवत् कार्येणैव शक्तिरप्यनुमीयते। तथाहि यादृशादेव करतलानलसंयोगाद्दाहो दृष्टस्तादृशादेव प्रतिबन्धके सति न जायते। अतो यदभावात्कार्याभावस्तदभ्युपेयं वह्न्यादौ, तेन विना तदभावायत्तदाहाभावानुपपत्तेरिति व्यतिरेकमुखेन शक्तिसिद्धिः । न चादृष्टवैगुण्यम्, दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात्। अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्राम्येत् ।

अथादृष्टविलम्बादपि विलम्बो यथा वन्ध्यास्त्रीसम्प्रयोगे, परमाणुकर्मणि, अध्ययनतुल्यत्वेऽपि एकत्र फलाभावे चेति चेत्, न। अदृष्टविलम्बो हि न तन्नाशानुत्पादौ, मण्यपसारणानन्तरं दाहाभावप्रसङ्गात् । किञ्च नियमतो मणिसद्भावे कार्याभावस्तदभावे कार्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम् । अन्यथा कदाचिन्मण्याद्यभावेऽपि तदभावात् कार्यं न स्यात् । वन्ध्यासम्प्रयोगे तु दृष्टव्यभिचारादादृष्टविलम्बादेव विलम्बः । अदृष्टञ्च क्वचित् साक्षाज्जनकम् । अन्यथा परम्परया हेतुरपि न स्यात् । न च समप्रज्ञयोः समञ्च निरन्तरमभ्यस्तयोरेकः प्रगल्भो नापर इति दृश्यते । न च सर्वोत्पत्तिमतामदृष्टं निमित्तकारणम् । अगम्यागमनादिसाध्ये सुखे व्यभिचारात् । तद्धि नाधर्मात्सुखवत् । नापि धर्मात् । तेन हि अगम्यागमनमुत्पाद्य, सुखमुत्पादनीयम्। तथाचागम्यागमनकारणत्वेन न स धर्मः । श्येनापूर्ववन्निषिद्धफलकत्वेनानर्थकत्वात् । दाहप्रतिकूलादृष्टादेव दाहाभाव इति चेत्, न । तस्योत्तेजकाभावसहकृतमण्यजन्यत्वे तत्रादाहार्थिनोऽप्रवृत्तिप्रसङ्गात्। तज्जन्यत्वेऽपि तदुत्पादकादेव दाहाभाव इति किमदृष्टेना, प्रथमोपस्थिततत्वात् उपजीव्यत्वाच्च। प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात्। अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्यात्राप्यन्वयः स्यात् । अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्तेः। प्रतिपक्षसन्निधापकादृष्टस्यैव

प्रतिबन्धकत्वे सति मण्यप्रयोगेऽपि दाहानापत्तिः, अग्रिमकाले एव सन्निधिदर्शनेन तदसिद्ध्यभावात्।

अस्तु तर्हि उत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम् । एवं केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टाभावोऽनुगतो हेतुः। प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम् । तच्च मण्याद्यभावत्वेन, न तु प्रतिबन्धकाभावत्वेन इति नान्योन्याश्रय: । अत एव प्रतिबन्धकत्वाभिमतमण्यादीनाम् अभावकूट एव कारणम् । तेन मणिसद्भावे मन्त्राद्यभावे च न कार्यम् । अनतिरिक्ताभाववादिमते च व्यवहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम् । न चाभावो न कारणम्, भाववत्तद्ग्राहकतौल्यात् । दृष्टञ्च कुड्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताकरणस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्ये जनकत्वमिति **प्राञ्चः** ।

मैवम् । विशिष्टं हि नार्थान्तरम्, येन तदभावोऽनुगतः स्यात्। किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचिद्विशेष्यमण्यभावः क्वचिदुत्तेजकाभावरूपविशेषणाभावः क्वचिदुभयं कारणमिति व्यभिचारेण नैकमपि हेतु: स्यात्।

स्यादेतत् । प्रतियोगिभेदादिवत्प्रतियोगितावच्छेदकविशेषणभेदादप्यभावो भिद्यते। अन्यथा पृथिव्यादित्रयप्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात् । एवञ्च यथा केवलदण्डसद्भावे दण्डपुरुषसद्भावे द्वयाभावे च विशेषणविशेष्योभयविरहप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः, तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे उभयाभावे च केवलप्रतिबन्धकाभावो विशेष्यविशेषणोभयाभावव्यापकोऽनुगत एव दाहाकारणमस्तु ।

अथ विशेषणाद्यभावैरेव केवलपुरुषाद्यभावव्यवहार: एकशक्तिमत्त्वादिति चेत्, न । अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात् । शक्तेश्चातीन्द्रियत्वात्।

अथोत्तेजकप्रयोगकाले मणे: कोऽभाव: ? न तावत्प्राक्प्रध्वंसाभावौ, तयोः प्रतियोग्यसमानकालत्वात् । न च श्यामोऽयमासीदित्यत्र यथा श्यामध्वंसप्रयुक्तः

श्यामघटत्वेन पक्वघटस्य ध्वंस एव न तु घटत्वेन तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभाववत्त्वेन मणेः ध्वंस एवेति वाच्यम् । ध्वंसस्यानन्तत्वेन उत्तेजकापनयेऽपि दाहप्रसङ्गात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत्, न । यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशवान्, अन्यथा अबाधितकेवलपुरुषृभाव-तदभावव्यवहारयोरुपपादयितुमशक्यत्वात् । तथोत्तेजकोपनयापनयश्रृङ्खलायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः तुल्यन्यायत्वात् ।

यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नान्तर्भवति, तदा तुरीय एव संसर्गाभावोस्तु। न हि क्लृप्तविशेषबाधे सामान्यबाधः, विशेषान्तरमादायापि तस्य सम्भवात् । अन्यथा क्लृप्तानादिसंसर्गाभावादिवैधर्म्येण ध्वंसोऽपि न सिध्येत्। व्यवहारान्यथानुपपत्तिश्च तुल्यैव। सोऽयमस्माकं सगोत्रकलहो न तु शक्तिवादः । अस्तु वा ध्वंस एवासौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् । न चैवं विनाशित्वेन प्रागभाव एव सः। परिभाषाया अपर्यनुयोज्यत्वात् । यद्वा अत्यन्ताभाव एवासौ। तस्य नित्यत्वेऽपि कादाचित्काप्रतीतिकार्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात् । प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभावे उभयाभावश्च, तदैव विशिष्टात्यन्ताभावसत्वादिति।

तन्न । यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंस: स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्यादिति क्षणभङ्गापत्ति:। किञ्च विद्यमानस्य विनष्टत्वेनाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः। श्यामोऽयमासीत्, केवलोऽयमासीत्पुरुष इत्यादौ सविशेषणे हीति न्यायेन विशेष्यवति श्यामकैवल्यादिध्वंस एव प्रतीयते । ध्वंस्तस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः ।

एतेन उत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्योत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तम्। विद्यमानध्वंसस्य च ध्वंसाभावात् । न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम्।

उत्पन्नाभावस्य विनष्टप्रतीतिहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः । तथा हि स एव क्वचिद्विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमित्यननुगमस्तदवस्थ एव । विशेषणविशेष्याभावयोः प्रत्यासत्तित्वावच्छेदकानुगतधर्माभावात् ।

अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति, तयोः सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्, तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु, कृतं तदुपजीविनातिरिक्तविशिष्टाभावेन ।

अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनयने उत्तेजकाभाव-व्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः। तत्तदुत्तेजकाभावविशिष्टमणेरथावकूटस्य जनकत्वादिति चेत् । न । तत्तदुत्तेजकाभावानां अननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः । उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्ग एव ।

अथ विशेषणविशेष्याभावयोर्विशिष्टविरेधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टम्, यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेत्, न ।

सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः। तथाच विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तिः, तदभावस्य तत्त्वात् । न चोभयाभावाभाव उभयं विशिष्टम्। एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावात् विशिष्टाभावव्यवहारो न स्यात्। नाऽपि परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा। विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात्तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात् ।

एतेन अन्यदपि विशिष्टव्यवहारविरोधित्वादिनानुगतत्वमपास्तम् । केनाप्यनुगतेन रूपेण विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावाभावस्य

विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः । तदभावाभावस्य तत्त्वादित्युक्तत्वात्। तस्माद्विशेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति ।

अत्रोच्यते। विशेषणविशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहारः इति, घटतदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम्। न हि तयोरसम्बन्धे विशिष्टव्यवहारः, न वा तदभावे सति न विशिष्टाभावव्यवहारः । यस्य यत्र यः सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम्। स च सम्बन्धाभावो विशेषणाभावात् विशेष्याभावादुभयाभावात् सर्वत्राविशिष्ट एकः तेषां व्यापकोऽनुगतविशिष्टाभाव-व्यहारादिकारणम् । इह दण्डीपुरुषो नास्तीत्यत्र तथा दर्शनात्। अत एव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे उभयाभावे च कैवल्यपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषाभावव्यवहारः । एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणम्। स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति। सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः ।

नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणभावयोरतिरिक्तसम्बन्धाभावादिति चेत्, न । तदभावोऽपि स्वरूपसम्बन्धस्याभावात् सर्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः । तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धः तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकञ्च दाहकारणम्। तथाचोभयाभावे उत्तेजकासत्वे परं दाहः स्यात्, उत्तेजकवति प्रतिबन्धके दाहो न स्यादिति चेत्, न । अधिकरणाभावावेव स्वरूपसम्बन्धः, तयोर्घटवद्भूतलचत्त्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः। किन्तूपश्लिष्टस्वभावत्वम् । तच्च सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वम् । न च घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्यय-जननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात्। तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः। अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः । तादृशस्वरूपसम्बन्धाभावश्च

प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव । यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी, तस्यादण्डत्वाभावात् । किन्तु तदन्यः। तस्याभावो दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः ।

तदुक्तं **"न हि दण्डिनि सत्यदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैवेति युक्तम्'**।

अन्यथा तत्रान्येषामिति पदस्य व्यर्थतापत्तेः। तथा केवलप्रतिबन्धकाभावे उत्तेजकसहकृतः प्रतिबन्धको न प्रतियोगी तस्य केवलत्वाभावात् । किन्तु तदन्यः। तदन्यस्य च केवलप्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे वा विशिष्ट एवेति नाननुगमः । उत्तेजकापनये च केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवतीति ।

ननु न प्रतिबन्धकाभावः कारणम् । एकदण्डान्वये घटोत्पत्तिवत्प्रतिबन्धकसत्त्वेऽपि प्रतिबन्धकान्तराभावेऽपि कार्यानुदयात् । न हि यावत्कारणतावच्छेदकावच्छिन्नं तावदन्वयेऽपि कार्यमिति चेत्, न । प्रतिबन्धकाभावत्वेन न कारणत्वमन्योऽन्याश्रयात् किन्तु मण्याद्यभावत्वेनेत्युक्तत्वात् । तत्त्वेऽपि वा घटे दण्डसलिलादिवत्प्रतिबन्धकाभावकूटस्य दाहहेतुत्वात्। यद्वा प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एवाभावः कारणम् । स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्योदयः । प्रतिबन्धकस्य च संसर्गाभावो हेतुः। तेन तत्सत्त्वे तदन्योऽन्याभावेऽपि न कार्यम् । अन्वयव्यतिरेकाभ्यां व्याप्तिकारणत्वयोर्ग्रहे संसर्गाभावस्य त्वयापि हेतुत्वाङ्गीकारात्। अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्यकारणव्याप्यव्यापकभावे व्याघातात्।

किञ्च तवापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योऽन्याभावमादाय शक्तिसत्त्वप्रसङ्गः । न च स दुर्वचः, न वा प्रागभावादित्वेनाननुगमव्यभिचारौ,

प्रतियोग्यधिकरणयो: संसर्गमारोप्य यो निषेधः स संसर्गाभावः । भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते, किन्तु तादात्म्यम् ।

वयन्तु ब्रूम:। यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संर्गाभावः। यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभाव: । भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् । घटत्वमेव च घटतादात्म्यम् । आरोपस्य हेतुत्वे किं मानमिति चेत्, मा भूत्तावदन्यत्, नेदमिह नेदमिदं इत्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति।

ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन् सत्यपि कार्याभावात् । न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा। मणेः स्वावयववृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात्। अत एव न तत्प्रागभावप्रध्वंसौ हेतू, तयोः करादौ अवृत्तेः गुणकर्मादेश्च प्रतिबध्यत्वानापत्तेश्च। तस्य जन्यधर्मानाश्रयत्वेन तत्र तयोरभावात्। न चान्य: संसर्गाभावोऽस्तीति चेत्, न । संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य सति प्रतिबन्धकेऽभावात् । स च समयविशेषावच्छेदेन संसर्गितया अत्यन्ताभाव एव, तथैवान्वयव्यतिरेकावधारणात् ।

अथैवं प्रध्वंसप्रागभावस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपपत्तौ न तयोः सिद्धि:। अत्यन्ताभावो ह्यव्याप्यवृत्तिः । तस्य चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित्काल इति चेत्, न । तत्र विद्यमानताविरोधित्वेनैव कपाले न घट इतिप्रतीतिवैलक्षण्यात् । न त्वेवं भूतले घटाभावप्रतीतिः ।

**अन्ये तु** भविष्यति घटो घटो नष्ट इति विलक्षणप्रतीत्योरत्यन्ताभावेनैकेन समर्थयितुमशक्यत्वात् अन्य एवायं संसर्गाभाव **इत्यप्याहुः** ।

एतेन विशेषणाभावविशेष्याभावतदुभयाभावघटितं सामग्रीत्रयमेवास्तु हेतुः, दाहे च जातित्रयकल्पनमिति प्रत्युक्तम् । अनुगतहेतुसत्त्वात् दाहवैजात्यस्य योग्यानुपलम्भबाधितत्वाच्च। व्यक्तियोग्यतयैव जातियोग्यत्वेन योग्ये अयोग्यजात्यभावात् ।

ननु प्रहरं मा दहेत्यादौ सावधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात् । न च सङ्कल्पविषयकालविशेष एव तत्र प्रतिबन्धकः, सङ्कल्पनाशे समयस्य स्वतोऽविशेषात्। न च उद्देश्यत्वमेव तत्र विशेषः, तस्य विनाशात् । न चोद्देश्यध्वंसोऽपि हेतुः, तस्य यामादूर्ध्वमपि सत्त्वात् । न च मन्त्रपाठजनितमदृष्टमेव तत्र प्रतिबन्धकम्, तत्कालदाहाप्राप्तिकफलनाश्यत्वेन नाग्रे दाहप्रतिबन्ध इति वाच्यम् । प्रतिबन्धकमन्त्रपाठस्यानिषिद्धत्वेनाविहितत्वेन चादृष्टाजनकत्वात्, तदाचारस्य विगीतत्वेन श्रुत्याद्यननुमापकत्वादिति चेत्।

मैवम् । उद्देश्यत्वज्ञानाहितसंस्कारविषयकालस्य प्रतिबन्धकत्वात्। ननु प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वेन शक्तिमनपकुर्वतां मन्त्रादीनां न प्रतिबन्धकत्वम्, अतः शक्तिसिद्धिः । न च कार्यानुत्पाद एव प्रतिबन्धः, तज्जनकत्वमेव प्रतिबन्धकत्वमिति वाच्यम्। कार्यानुत्पादो हि तत्र न तत्प्रागभावो न वा तदुत्तरकालसम्बन्धः, तस्य मन्त्राद्यजन्यत्वादिति चेत्, न । मन्त्रादीनामप्रतिबन्धकत्वात् । तत्प्रयोक्तारस्तु प्रतिबन्धकाः। ते च किञ्चित्करा एव । मन्त्रादौ च कार्ये कारणोपचारात् स्वार्थिककन्प्रत्ययाद्वा तथा व्यपदेशः । प्रतिबन्धश्च सामग्रीविरहः। मन्त्राद्यभावघटितसामग्रीविरहश्च मन्त्रादिरेव, तदभावाभावस्य तत्त्वात् ।

नव्यास्तु न प्रतिबन्धकाभावः कारणम्, न वा शक्तिः। किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणम् दण्डत्ववत्, आकाशादौ त्वेकव्यक्तिके न यथा कारणत्वम्, क्वचित्प्रतिबन्धेऽप्यन्यत्र शब्दोत्पत्तेः। किन्तु भेर्यादेः तथा कारणत्वमिति तत्प्रतिबन्धे न शब्दोत्पत्ति**रित्याहुः**।

**तन्न**। वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्येनोभयस्यापि कारणत्वात्, न त्वेकमेवावच्छेदकम् , विनिगमकाभावात् । किञ्च यस्मिन् सत्यपि यदभावात्कार्याभावः तस्य कारणत्वमायाति न तु तदवच्छेदकत्वम् । न हि कार्यायोगव्यवच्छेदः कारणत्वम्, किन्तु नियतपूर्वसत्त्वम्। तच्च सहकारिविरहप्रयुक्तकार्याभावेऽप्यक्षतम् । अन्यथा चक्रसहितदण्डत्वेन

कारणत्वे सहकार्युच्छेदः । यस्य यद्धर्ममवगम्यैव नियतपूर्वसत्त्वमगम्यते तस्य तदवच्छेदकं दण्डत्वमिव । सहकारी तु न तथा ।

ननु मा भूदर्थापत्तिः शक्तौ मानम्। अनुमानन्तु स्यात्। तथा हि स्थिरोऽवयवी जनकदशाविशिष्टो वह्निरजनकदशाव्यावृत्तभावभूतधर्मवान् जनकत्वात् कुण्ठकुठारात्तीक्ष्णकुठारवत् दाह्यासंयुक्तवह्नेः दाह्यासंयुक्तवह्निवच्च प्रतिबन्धकसत्त्वे संयोगादेरजनकदशावर्तित्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मसिद्धिः । यद्यपि शक्तेर्भावहेतुजन्यत्वेन नाजनकदशाव्यावृत्तत्वम्, तथाप्युक्तविशिष्टायास्तथात्वम् ।

यद्वा धर्मेऽतीन्द्रियत्वं विशेषणम् । न च दृष्टान्तासिद्धिः, तुल्याधारत्वेऽपि लोहविशेषघटितकुठारे विलक्षणच्छिदाक्रियारूपकार्यबलादतीन्द्रियतीक्षणत्वसिद्धिः ।

अथवा तथाभूत एव वह्निः कार्यानुकूलातीन्द्रियाद्विष्ठधर्मसमवायी जनकत्वात् आत्मवत् । अतीन्द्रियत्वञ्च यद्यपि न साक्षात्काराविषयत्वम्, अनित्यसाक्षात्काराविषयत्वम्, योगजधर्माद्यजन्यसाक्षात्काराविषयत्वं वा, परं स्वं वा प्रत्यसिद्धेः। संयोगादिपञ्चकजन्य-ज्ञानाविषयत्वमैन्द्रियकाणामपि। तथापि संयोगाद्यन्यतरप्रत्यासतिजन्यसाक्षात्काराविषत्व-मुभयवादिसिद्धम्। अन्यतरत्वञ्च तदन्यान्यत्वम् । न चाभावातीन्द्रियत्वम्, तस्यासिद्धेः। न च वह्नौ स्थितिस्थापके नार्थान्तरम् । तत्र तदभावात् क्रियाया वेगेनादृष्टवदात्मसंयोगेन वेगोत्पत्तेः। न चात्मत्वं नित्यत्वं वोपाधिः। स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात् ।

यद्वा पिण्डीभूतो वह्निः दाहानुकूलाद्विष्ठातीन्द्रियभावभूतधर्मवान् दाहजनकत्वादात्मवत् । न चात्मत्वमुपाधिः, अदृष्टत्वस्य दाहानुकूलत्वेनादृष्टे साध्याव्यापकत्वात्। अथवा करवह्निसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी जनकत्वादात्मवत् द्व्यणुकवच्च । न चात्मत्वं द्रव्यत्वं वोपाधिः, द्व्यणुकैकत्वस्पर्शादौ साध्याव्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकलदाहहेतुसमवहितो दाहाजनको वह्निः जनकदशावृत्तिकार्यानुकूलभावभूतधर्मशून्योऽजनकत्वात् कुण्ठकुठारवत् ।

यद्वा तथाभूतो वह्निर्दाहजनकदशावृत्तिदाहानुकूलभावभूतधर्मशून्यः दाहाजनकत्वात् दाह्यासंयुक्तवह्निवत् । अनुकूलत्वञ्च कार्याभावप्रयोजकाभावप्रतियोगित्वं कारणतदवच्छेदकसाधारणं, दृढदण्डत्वेन कारणत्वे दृढत्वाभावादपि कार्याभावदर्शनादिति ।

उच्यते। साध्यं विनापि उभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भवात् विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वम् । यदिच सहचारदर्शन व्यभिचारा-दर्शनोपाध्यनुपलम्भमात्रादेव व्याप्तिग्रहः तदा शक्तिसिद्ध्यनन्तरं तेनैव हेतुना साध्ये शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्मसिद्धिः। एवं तत्तदतिरिक्त-प्रक्षेपात् तेनैव हेतुतानन्ततादृशधर्मसिद्धिप्रसङ्गः । द्वितीयादितादृशधर्मसिद्धिं विनापि प्रथमानुमितशक्त्यैव जनकत्वाद्युपपत्तेर्न तादृशानन्तधर्मसिद्धिरिति चेत्, हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या । यद्धीश्वरानन्त्यवत् न शक्त्यानन्त्यमित्युक्तम्, तदबोधात् । कार्यमात्रे हि कर्तृत्वेन कारणत्वं न त्वीश्वरत्वेन द्विकर्तृकत्वादिना वा,गैरवात् , घटे त्वार्थः समाजः ।

एवमजनकदशाव्यावृतत्वेनैव प्रयोजकत्वम्, न तु भावभूतत्वेनेति, गौरवात् । अपि च भावकार्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या । एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था । किञ्च प्रथमानुमानेऽजनकत्वं न स्वरूपायोग्यत्वम् । वह्नौ कुठारे च तदभावात्, किन्तु कार्यानुपधानम् ।

तथा च तदनुपधानदशायमपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधो दृष्टान्तासिद्धिश्च । लोहविशेषाणामेव सातिशयाच्छिदाजनकत्वमिति नातीन्द्रियतैक्ष्ण्यसिद्धिः। अग्रिमचतुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः, तुल्ययोगक्षेमत्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्। अपि च जनकत्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकी। न च जनकत्वाभावस्य शक्तावेव प्रसिद्धिः । अन्योन्याश्रयात् । न च गुरुवचनपरम्परात एव वाक्यार्थतया तत्सिद्धिः, त्वन्नये सिद्धार्थस्याप्रमाणत्वात् । न च

परार्धसङ्ख्यायां साध्यजनकत्वव्यतिरेकयोः प्रसिद्धिः। अप्रत्यक्षाया: शब्दैकवेद्याया: तस्या: प्रत्यक्षेण साध्य हेतुव्यतिरेकयोर्ग्रहीतुमशक्यत्वात्।

एतेन पण्डापूर्वेऽपि तत्सिद्धिरपास्ता ।

स्यादेतत् । तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्वमुपेयम्, एकजातीयकार्ये एकजातीयकारणत्वनियमात् । वह्न्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेत्, न । वह्निजातीयस्याकस्मिकतापत्तेः। कारणगतैकरूपमपहाय कार्यगतबहुतररूपकल्पने गौरवात् । तृणारणिमणिप्रभववह्निषु अवान्तरजातेरनुपलम्भबाधित्वाच्च। यत्र च तत्तदिन्धनप्रयोज्यं प्रदीपदारुदहनादौ वैजात्यमनुभूयते तत्र कारणेष्वेकशक्तिमत्त्वमपि नास्ति । किञ्च गोमयवृश्चिकप्रभववृश्चिकादिषु वैजात्यकल्पने तत्प्रभववृश्चिकेष्वपि वैजात्यं कल्प्यमेवं तत्प्रभवतत्प्रभवेष्वपीति वैजात्यानन्त्यम् , विजातीयकारणानां विजातीयकार्यजनकत्वनियमात्। न च तयोर्नैको वृश्चिकः । बुद्धिव्यपदेशयोरविशेषात्।

यदि विजातीयेष्वेककार्यशक्तिसमवायान्न कार्यविशेषात्कारणविशेषः तदभावात्तदभावः क्वाप्यनुमीयेत, तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवादिति चेत्, वह्निवृश्चिकादावेवमेतत् निरूपितनियतवह्न्यादिकारणकधूमादौ कुतो न तदनुमानम् । अन्यथा कार्यवैजात्येऽपि तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे । तृणादिप्रभवत्वग्रहानन्तरं वह्न्यवान्तरजातिग्रहवत् वह्नितदजन्यजन्यत्वज्ञानानन्तरं धूमावान्तरजातिग्रहो भविष्यतीत्यप्याशङ्क्येत। बाधकं विना धूमत्वेन वह्निकार्यतेति चेत्, तर्हि बाधकं विना धूमं प्रति बह्नित्वेन कारणतेत्यपि तुल्यम्।

**यत्तु** तृणत्वेन कारणत्वग्रहस्योपजीव्यत्वात्तद्रक्षार्थं वह्नौ जातिविशेष एव कल्प्यते इति, **तन्न**। वह्नित्वेन कार्यत्वग्रहात्तद्रक्षार्थं तृणादौ शक्तिकल्पनौचित्यात् । यथा चान्वयव्यतिरेकाभ्यां तृणफूत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वम्, तथैव कार्यदर्शनात् । एवं तृणारणिमणिफूत्कारनिर्मन्थनतरणिकिरणानां वह्न्यनुकूलशक्तिमत्वेन कारणत्वेऽपि फूत्कारेण

तृणादेव निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युत्पत्तिः, न तु मणिफूत्कारादिभ्यः, मणिफूत्कारशक्त्योः परस्परसहकारित्वविरहात् ।

**यत्तु** तृणफूत्कारादिस्तोमत्रये विशिष्टे शक्तिरिति। **तन्न**। तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति ।

**उच्यते**। तृणरणिमणिफूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्तिभावहेतुजनितानन्त-शक्तिस्वीकारे गौरवम् । तावदनन्तव्यक्तिजन्यानन्तवह्निव्यक्तिषु जातिकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः, गोमयवृश्चिकप्रभव-वृश्चिकयोरीषन्नीलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् । तृणजन्यनानावह्नि-व्यक्तिषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्तानुगतबुद्धिरस्ति जातिविषया । तृणजन्यत्वेनोपाधिना सेति चेत्, न । बाधकं विनानुगतबुद्धेस्तद्व्यङ्ग्य जातिविषयत्वनियमात्। न च गोमयवृश्चिकप्रभववृश्चिकपरम्परायामननुगतजात्यापत्तिः, गोमयजन्यवृश्चिकप्रभववृश्चिकेषु वृश्चिकप्रभवत्वजातेः सत्त्वात् । वह्निमात्रे च दाहस्पर्शवानवयवस्तत्संयोगः पवनादिश्च कारणानि। न च तृणादिकं विनापि तदुत्पत्तिप्रसङ्गः, विशेषसामग्रीमादायैव सामान्यसामग्र्याः जनकत्वात् ।

ननु तृणारणिमणीनां वह्नौ कारणत्वग्रहे शक्तिवैजात्ययोरन्यतरकल्पनम्। तद्ग्रहश्च नान्वयव्यतिरेकाभ्याम्, व्यभिचारात् । अथारणिमण्यभाववति स्तोमविशेषे तृणं विना वह्निव्यतिरेकः तृणान्वये वह्निरित्यन्वयव्यतिरेकाभ्यां तत्रैव स्तोमे तदितरसकलहेतुसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादिकारणताग्रह इति चेत्, न। तृणं विनापि वह्निरिति ज्ञाने सति वह्निनियतपूर्ववर्त्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वग्रह इति चेत्, न । व्यभिचारेण वह्नौ तृणजन्यत्वाग्रहे तदजन्यत्वस्याप्यग्रहात्, वह्निमात्रस्यैव तदजन्यत्वाच्च । न च मण्यजन्यत्वेन तृणजन्यत्वग्रहः, अन्योऽन्याश्रयात् ।

**यत्तु** यत्र कारणताग्राहकं नास्ति तत्र व्यभिचारस्तद्ग्रहपरिपन्थीति । **तन्न** । अबाधितनियतपूर्ववर्त्तित्वाभावग्रहे तद्ग्रहस्यासम्भवात् , अभावप्रमायां भावज्ञानानुदयादिति।

उच्यते । उक्तग्राहकैर्वह्निनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य, तृणनिष्ठकारणतानिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वा अकार्याकारणव्यावृत्तं रूपं परिच्छिद्यते। न तु तृणत्वेन कारणत्वं वह्नित्वेन कार्यत्वं वा। तच्चोभयथापि सम्भवति। वह्नित्वेन कार्यतया तदनुकूलशक्तिमत्वेन च तृणादीनां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्यतया वा । तत्र विनिगमकमुक्तमेव ।

अथ तृणारणिमणीनामभावत्रये न कार्यम्, अभावत्रयाभावे कार्यमिति अन्वयव्यतिरेकाभ्यामभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः। अभावाभावस्य भावपर्यवसन्नत्वादिति चेत्, अभावत्रयाभावः किं तृणादिप्रत्येकव्यापकोऽन्य एव उत तृणादिप्रत्येकमेव। आद्ये अभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे । द्वितीये तृणस्य नारणिमण्यभावाभावत्वं तदुभयत्वापत्तेः ।

एतेनाभावत्रये न कार्यं तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वग्रह इति परास्तम् ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे सहजशक्तिवाद:।।**

## अथ आधेयशक्तिवाद:

स्यादेतत्, मा भूत्सहजशक्तिराधेयशक्तिस्तु स्यादेव। तथाहि **"व्रीहीन् प्रोक्षती"**त्यत्र कालान्तरकार्यानुकूलोऽतीन्द्रियोऽतिशयः प्रोक्षणजन्योऽस्तीत्युभयवादिसिद्धम् । स व्रीहिसमवेतो न वेति संशये व्रीहिनिष्ठ एव वाच्यः । कथमन्यथा प्रोक्षितानामेव तेषां कालान्तरेऽवघातादौ विनियोग:, न च मन्त्रादिसहकृतत्वमेव व्रीहिषु विशेषः, तेषां चिरध्वस्तत्वात् ।

ननु कथं प्रोक्षितस्यैवावघातादावन्यः, **"व्रीहीनवहन्ति"** इति श्रुतेस्तन्मात्रान्वयेऽप्युपपत्तेः । अथ **"व्रीहिभिर्यजेत" "व्रीहीन् प्रोक्षति" "व्रीहीनवहन्ति"**

**"पुरोडाशैर्यजेते"**त्यत्र यथा पुरोडाशे प्रकृत्यपेक्षायामवहतव्रीहीणामवयवानुवृत्तिद्वारान्वयः । प्रोक्षणे च यागार्थमुपात्तव्रीहिणां तथावघाते व्रीह्याकाङ्क्षायां प्रोक्षितानामेवान्वयः, बाधकं विना शब्दानां सन्निहितविशेषपरत्वनियमात्। व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति न्यायात्। अन्यथा प्रकरणादिसन्निहितत्यागे तदन्यसन्निधिकल्पने गौरवमिति चेत्, न ।

तर्ह्येकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो न तु प्रोक्षणविशिष्टे । यत्र रूपं तत्र रस इतिवत्। तथाच प्रोक्षणस्य शब्देन कालान्तरकार्यजनकत्वाबोधात्, कथं तन्निर्वाहार्थमतिशयकल्पनम् । **"प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते"** इति वाक्यशेषात् प्रोक्षणविशिष्टस्य अवघाते कारणतावबोध: इति चेत्, अस्तु तावदेवम्, तथापि प्रोक्षिता इत्यत्र भूते क्तानुशासनादतीतप्रोक्षणे व्रीहाववघातान्वयः। तथाचावघाते प्रोक्षणध्वंसः कारणं न तु प्रोक्षणमिति चेत्।

मैवम् । प्रोक्षणमवघातजनकम् प्रमाणतस्तदर्थमुपादीयमानत्वात्, अवघाते व्रीहिवत्। न चासिद्धिः, अप्रोक्षितेऽवघाताभावदवश्यमवघातार्थं प्रोक्षणोपादानात् । न च व्यापारं विना तथा सम्भवति। न च प्रोक्षणध्वंस एव व्यापारः । प्रतियोगिनोऽहेतुत्वापातात् । अन्यथा यागादावपि तथा स्यात् । फलस्य च नियतसमयोत्पत्तिकत्वमपूर्ववत् स्वभावादेव भविष्यति। न च प्रोक्षणोपलक्षिताः व्रीहयस्तथा, निरन्वयध्वस्तत्वेनोपलक्षणस्याहेतुत्वात्। कुरूणां क्षेत्रमित्यत्र तु कुरुज्ञानस्येतरव्यावृत्तक्षेत्रस्रग्वव्यवहारजनकत्वं न तु कुरोः । अन्यथा यागोपलक्षितो यज्वैव स्वर्गं फलिष्यति, किमपूर्वेण । न च देवदत्ताद्यशरीरं देवदत्तविशेषणगुणजन्यं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निर्मिस्रग्वदिति तत्सिद्धिः।

जन्मान्तरीयैरदृष्टजनकत्वाभिमतैर्ज्ञानेच्छाप्रयत्नैः सिद्धसाधनात्। तस्मात्प्रोक्षणादयो भावभूतमतिशयं जनयन्त एव कालान्तरभाविकार्यजनकाः प्रमाणतस्तदर्थमुपादीयमानत्वात् यागचिकित्सावत्। स चातिशयो लाघवात् फलसमानाधिकरण इति व्रीहिनिष्ठ एव। तेन तत्समवहितत्वं व्रीहेः साक्षात्सम्बन्धात् पुरुषनिष्ठत्वेन च व्रीहीणां साक्षात्सम्बन्धाभावात्

परम्परासम्बन्धे गौरवात् न साक्षाद्व्रीहिसमवहितत्वं स्यात् । किञ्च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तदनुकूलमतिशयं जनयति यागचिकित्से ।

अथ प्रोक्षणं पुरुषसमवेतातिशयजनकं कालान्तरभाविकार्यजनकत्वे सति विहितत्वात् यागवत्, अन्यथा विधिविरोधादिति चेत्, न । कृषिचिकित्सादिना व्यभिचारात्, अप्रयोजकत्वाच्च। तेन विनापि विधिसम्भवात् । स च प्रतिव्रीहि नानैव । न चैवमेकव्रीहिनाशे फलानुदयस्तावत्संस्कारणामभावादिति वाच्यम् । संस्कारत्वेन प्रयोजकत्वे किञ्चित्समवधानेऽपि दण्डादिवत्कार्यसम्भवात् ।

अस्तु वा सकलव्रीहिनिष्ठ एक एव । न चैकव्रीहिनाशे तन्नाशापत्तिः, किञ्चिदाश्रयनाशस्य वृक्षादाविवकार्यानाशकत्वादिति ।

उच्यते । अतिशयग्राहकमानाल्लाघवसहकृतात् स एक एव सिध्यति न नाना, पुरुषनिष्ठश्च। तथा हि प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति कालान्तरभाविकार्यजनकतया विहितत्वात् यागतदङ्गवत्। कृष्यादौ दृष्टद्वारसम्भवात् न व्यभिचारो न वा अप्रयोजकत्वम्। यागदानहोमादितदङ्गानामपूर्वजनकत्वे दृष्टद्वाराभावे सति कालान्तरभाविकार्यजनकतया विहितत्वस्यैव प्रयोजकत्वादन्यस्याननुगमात् । न च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तदनुकूलं फलं जनयतीति नियमः, शत्रुवधमुद्दिश्य प्रवर्तिते श्येनयागादौ व्यभिचारात्, विपक्षे बाधकाभावाच्च ।

न च यदुद्देशेन यत् क्रियते न तत् तत्र भाविकार्यानुकूलातिशयजनकमिति व्याप्तिः। हविस्त्यागादिभिर्व्यभिचारात् ।

ननु प्रोक्षितव्रीहिणा अदृष्टस्य जनितत्वात् बर्हिष इव न तस्य पुनरुपयोगान्तरं स्यात्, विनियुक्तविनियोगविरोधात् । उपयोगे वा तज्जातीयान्तरमप्युपादीयेताविशेषात्। न । **"व्रीहीनवहन्ती"**त्यत्रोक्तन्यायेन प्रोक्षितस्यैव व्रीहेरन्वयात् । विधेर्दुर्लङ्घ्यत्वात् यथा **"बर्हिस्तृणाति" "बर्हिषि हविरासादयति"** इत्यत्र। यद्वा विचित्राः संस्काराः। केचिदुद्देश्यसहकारिण एवाग्रिमकार्यकारिणः । यथाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तः

तदपेक्ष एव तत्सम्बद्धस्यैव दुःखं जनयति, तथा प्रोक्षणसंस्कारा अपि उद्देश्यव्रीहिसहकृता एवाग्रिमकार्यकर्तारः।

यथा कारीरिजनितसंस्काराधारपुरुषसंयोगाज्जलमुचामदृष्टसमवधानं तथा प्रोक्षणजन्यादृष्टवदात्मसंयोगात् व्रीहीणामुत्तरक्रियाविशेषाः। कर्तृकर्मसाधनवैगुण्यात् फलाभावस्तुल्य एव। आगामिकत्वात् चाण्डालादिस्पर्शस्याहवनीयादिसंस्कारनाशकत्व-श्रुतेर्व्यधिकरणस्याप्यपूर्वनाशकत्वम्। धर्मनाशे कर्मनाशापारगमनवत् निषिद्धकीर्तनवच्च।

किञ्च प्रोक्षणजन्यातिशयो व्रीहिनिष्ठो न नाना। आत्मवृत्तेरेकस्मादप्युक्तन्यायेन कार्योपपत्तेः । नाप्येकः, एकद्वित्राश्रयनाशानां प्रत्येकमननुगमेन कार्यनाशे आश्रयमात्रनाशस्य जनकत्वादेव व्रीहिनाशेन तन्नाशादपरप्रोक्षितव्रीहीणामनन्वयापत्तेः । अथ **"व्रीहिन् प्रोक्षती"**तीप्सिततमद्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं व्रीहेरेवावगम्यते। न चापूर्वस्य व्रीहिवृत्तित्वम्, साक्षात्सम्बन्धस्यैवौत्सर्गिकत्वादिति चेत्, न । धात्वर्थतावच्छेदकसंयोगेन व्रीहिकर्मतोपपत्तेः । न च संयोगावच्छिन्न एव व्यापारविशेषः प्रोक्षणार्थः। तथाच कथं प्रोक्षणैकदेशस्य प्रोक्षणसाध्यतयान्वय इति वाच्यम् । संयोगस्योपलक्षणत्वेनापदार्थत्वात् । अन्यथा ग्रामं गच्छतीत्यादौ का गतिः? का वा **"सक्तून् प्रोक्षतीत्यादौ"** । तत्राधेयशक्त्यभावात्।

किञ्च घटं साक्षात्करोतीत्यादौ क्रियाजन्यसंस्कारादीनां घटवृत्तित्वात् संस्कारस्य स्वरूपसम्बन्धेन घटवृत्तित्वम् । वह्निमनुमिनोतीत्यादिवत् प्रयोगसाधुरेव वा द्वितीयेति यदि तदा प्रकृतेऽपि तथास्तु ।

अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वे प्रयोजकम् । भोगादिना तन्नाशेऽपि पूज्यत्वात्, तत्सत्त्वेऽपि चाण्डालादिस्पर्शेनापूज्यत्वात्। अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च । न च प्रतिष्ठाध्वंसस्तथा, तत एव उपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेश्च । तस्मात्प्रतिष्ठाजन्या अस्पृश्यस्पर्शादिनाश्या प्रतिमादिनिष्ठा शक्तिरभ्युपेया इति चेत्,

प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते, स्वसादृश्यदर्शिनश्चित्रादौ इव ज्ञानस्य नाशेऽपि संस्कारसत्त्वात् । अस्पृश्यस्पर्शादिना च तन्नाशः । अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्यास्पृश्यस्पर्शादिविरहसहकृतस्य तथात्वम् **"प्रतिष्ठितं पूजये"**दिति विधिबलात्तत्तत्प्रतिसन्धानस्यावश्यकत्वादिति **प्राञ्चः**।

**नव्यास्तु** प्रतिष्ठाविधिनैव तवाधेयशक्तिवदपूर्वान्तरं जन्यते, तददृष्टवदात्मसंयोगाश्रस्य पूज्यत्वम् अस्पृश्यस्पर्शेन तन्नाशे चापूज्यत्व**मित्याहु**:।

वयन्तु ब्रूम:। **"प्रतिष्ठितं पूजये"**दिति विधिवाक्येन प्रतिष्ठाया: कारणत्वं न बोध्यते। किन्तु भूतार्थे क्तानुशासनादतीतप्रतिष्ठायां पूज्यत्वं बोध्यते। तथाच प्रतिष्ठाध्वंस: प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिकालसंसर्गाभावसहित: पूज्यत्वप्रयोजक: । स च प्रागभावोऽत्यन्ताभावश्च क्वचित्। कामिनीचरणाभिघातदोहदादिभिर-शोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिसिद्धि: । समयविशेषावच्छिन्नचरणदोहदादि-संयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्याकृष्टभागान्तरजनितवृक्षादेव वा तदुपपत्ते:। कालान्तरे पुष्पाद्युत्कर्षाद् वृक्षावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात्।

नापि ताम्रकांस्यादौ अस्तु भस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्ति:, तत्संयोगध्वंसस्य संयोगसमानकालीनास्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् ।

भस्मादिसंयोगजनित: कांस्याद्युपभोगकर्तृनिष्ठ: संस्कार एव **शुद्धिरित्यन्ये**।

अभिमन्त्रितपय:पल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यथाद्यपनायक: तत्तन्मन्त्रदेवतासन्निधिरेव वा । कलमबीजादीनामापरमाण्वन्तभङ्गे तत्र चावान्तरजातेरभावे नियतकलमजातीयादिसिद्धिरपि परमाणुपाकजविशेषादेव । कार्यवृत्तिरूपादिसजातीयस्य पूर्वरूपविजातीयस्य परमाणौ पाकजरूपादेरुभयसिद्धत्वात् ।

यथा हि कलमबीजं यवादेर्जात्या व्यावर्तते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माघकर्षणादिजनितात्परमाणुपाकपरम्पराविशेषादेवहैमन्तिकसस्योत्पत्ति: ।

एतेन लाक्षारसावसेकादयो: व्याख्याता: । निमित्तविशेषजनितपाक-जाततत्फलविशेष:, यथा हारीतमांसं हरिन्द्रानलसाधितमुपयोगात्सद्यो व्यापादयति नान्यथा साधितमित्यादि। यत्र च तोयतेजोवायुषु न पाकजो विशेष: तत्रोद्भवानुद्भव-द्रवत्वकठिनत्वादयो विशेषास्तदुपनायकादृष्टविशेषादेव । तुलादौ चाधिवासादिपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञत्वसहिता प्राचीनधर्माधर्मफले तज्जयभङ्गौ जनयति । यद्वा अहं निष्पाप: पापवान्वेति तुलाधिरूढाभिशस्तज्ञानविशेषसहिता सा तथा।

तदाहु:- **"तांस्तु देवा: प्रपश्यन्ति स्वश्चैवान्तरपूरुष:"** इति ।

अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्यतया धर्माधर्मौ जन्येते, ताभ्याञ्च जयपराजयौ। सत्यासत्यप्रतिज्ञाभिशस्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधिनिषेधात् । **"अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदसत्यप्रतिज्ञो न तुलामरोहेत्"** इति श्रुतेरुन्नयनात् । यद्वा तया देवतासन्निधिः क्रियते, ताश्च कर्मानुरूपं लिङ्गमभिव्यञ्चयन्ति।।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे आधेयशक्तिवाद:।।**

## कारणतावाद:

कस्तर्हिशक्तिपदार्थ:, कारणत्वम् । तच्च स्वस्वव्याप्येतरसकलसम्पत्तौ कार्याभावव्यापकाभावप्रतियोगित्वम् । अथ वा यत्र कार्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणम्। बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते, इतरसमवधाने सति बीजादङ्कुरसम्भवात् । कि यद्वा अन्यासमवधानावच्छिन्नकार्यानुत्पत्तिव्याप्यत्वं कारणत्वम्। रासभादे: स्वत एव कार्याभावव्याप्यता, अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात् । अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वम् ।

अन्यथासिद्धत्वञ्च त्रिधा, येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते , यथा घटं प्रति दण्डरूपस्य । अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते , यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य । अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वम्। यथा गन्धवति गन्धानुत्पादात् गन्धं प्रति तत्प्रागभावस्य

नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति, न त्ववगम्यमाने । यत्र जन्यस्य पूर्ववर्तित्वे अवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः।

यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगमः तत्र तद्द्वारा तस्य जनकत्वमेव, सति तु जायते, तज्जातीयं प्रति तदनन्यथासिद्धम् ।

अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये । तन्न । ईश्वरतद्-बुद्ध्यादीनामसंग्रहात् । तद्व्यतिरेकस्य तत्समवधानव्यतिरेकस्य वा अभावात् । कार्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वा अनन्यथासिद्धत्वम् ।

नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावान्नित्यं संशयः । न च साधकाभावस्य बाधकत्वम्, बाधकाभावस्यापि साधकत्वादिति चेत्, न। साधकाभावेन वह्नावन्यत्र सिद्ध।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे शक्तिवादः।।**

## मुक्तिवादः

परमप्रयोजनमनुमानस्यापवर्गः । **"आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यः"** इति श्रुतेः। स च समानाधिकरणदुःखप्रागभावा-सहवृत्तिदुःखध्वंसः।

ननु नासौ पुरुषार्थः अतीतदुःखध्वंसस्य सिद्धत्वात्, अनागतदुःखस्य ध्वंसयितुमशक्यत्वात्, वर्तमानस्य पुरुषप्रयत्नं विनैव विरोधिगुणनाश्यत्वात् । अतीतदुःखवत् हेतूच्छेदे पुरुषव्यापारः प्रायश्चित्तवदिति चेत्, न । तत्किं हेतूच्छेदस्य सुखदुःखाभावेतरत्वेन स्वतोऽपुरुषार्थत्वादनागतानुत्पादमुद्दिश्य क्रियमाणत्वाच्च। यथा तत्र दुःखानुत्पादः पुरुषार्थः तथा इहापि इति विवक्षितम् ।

अथानुत्पादस्य प्रागभावत्वेनासाध्यत्वात् फलान्तरस्याभावच्चानन्यगतिकतया कण्टकनाशवत् दुःखसाधननाश एव स्वतः पुरुषार्थस्तथेहापीति वा। उभयथापि दुःखध्वंसस्यापुरुषार्थत्वमेव। न च तयोरपि पुरुषार्थत्वमिति वक्ष्यते ।

मैवम् । दुःखान्तरध्वंसस्यायत्नसाध्यत्वेऽपि तादृशदुःखध्वंसस्य मिथ्या-ज्ञानोच्छेदद्वारा पुरुषप्रयत्नाधीनतत्त्वज्ञानसाध्यत्वात्। तथाहि तत्त्वज्ञानात्सवासनमिथ्या-ज्ञानाभावे दोषानुत्पत्तौ प्रवृत्यभावेऽदृष्टानुत्पत्तौ जन्माभावे तादृशदुःखध्वंसो भवति।

अथ चरमदुःखे उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव भविष्यति तदनुत्पादे च तत्त्वज्ञानादपि न स्यादिति चेत्, न । प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात्तुल्यवदुभयोरपि कारणत्वात्, तेन विना तद्नुत्पत्तेः । अत एव शुकस्य तत्त्वज्ञानमुत्पन्नमिति तस्य तद्ध्वंस उत्पन्नो नास्मदादीनाम् तत्र दुःखं नोत्पन्नमिति तेन सः ध्वंसोनास्मदादीनामिति चेत्। अनादौ संसारे तत्कुतो नोत्पन्नम्, स्वकारणाभावादिति चेत्, न ।

अन्वयव्यतिरेकानुविधायिनस्तत्त्वज्ञानादन्यस्यान्विष्यमाणस्याभावात् । मुक्तौ स ध्वंसोऽस्त्येव, तस्मिन् सति मुक्तिरस्त्येवेति स मुक्त्युत्पादकोत्पाद्य इति सर्ववाद्युपगतम् । मुक्तिः सा अन्या वा ।

नन्वेवं ध्वंसार्थं दुःखमुपादेयं तदनुत्पाद्यध्वंसानुत्पादादिति चेत्, सत्यम्। पुरुषार्थहेतुत्वेन लोके दुःखतत्साधनयोरपि उपादानदर्शनात् अनागतकुम्भनाशार्थं मुद्गरादौ प्रवृत्तिदर्शनादनागतदुःखध्वंसार्थमपि प्रवृत्तिः । चरमदुःखध्वंसो न दुःखध्वंसत्वेनोद्देश्यः अयत्नसिद्धदुःखान्तरध्वंसवदपुरुषार्थत्वादिति चेत्, न । समानाधिकरणदुःखप्रागभावा-सहवृत्तिदुःखध्वंसत्वेन तस्योद्देश्यत्वात् दुःखासम्भिन्नसुखवत् तस्य च पुरुषप्रयत्नसाध्यत्वमेवेत्युक्तम् ।

एतेन दुःखध्वंसत्वमेव मोक्षत्वम्, तत्तदात्मयावद्दुःखध्वंससम्वलनदशायन्तु तथा व्यपदेशः । प्रतिपुरुषं दुःखध्वंसस्तोमस्य व्यक्तिस्थानीयत्वात् तेजोभावे सम्वलिते अन्धतमसपदप्रयोगवत्। यथा सम्वलित एव द्वाविति बुद्धिव्यपदेशौ । प्रवृत्तिरपि सम्वलनार्थमित्यपास्तम् । मिलितानामसाध्यत्वात्, मेलकस्यानतिरिक्तत्वेऽतिप्रसङ्गात्, अतिरिक्तत्वे जन्यस्य ध्वंसावृत्तेः अजन्यस्य पुरुषार्थत्वाभावात् साध्यतया संवलने भोगावश्यं भावात्। अन्धतमसादौ तथा सम्वल एव प्रयोगात् ।

एतेन संस्काराजनकभोगविषयदुःखध्वंसः संस्काराजनकानुभवध्वंसो वा मुक्तिः, न चातिव्याप्तिः। जनकत्वस्याजनयत्यपि भावादिति निरस्तम् । अपुरुषार्थत्वात्।

**अन्ये तु** दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मोक्षः। लोकेऽहि कण्टकादिनाशस्य वैदिके प्रायश्चित्तादौ पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वात् । अथाहिकण्टकादि पापं वा नाश्यताम् तेन तज्जन्यं दुःखं न भवतीति दुःखानुत्पादमुद्दिश्य प्रवृत्तेर्दुःखानुत्पाद एव प्रयोजनम्, न तु दुःखसाधनाभावः सुखदुःखाभावेतरत्वादिति चेत् , न। दुःखानुत्पादस्य प्रागभावत्वेनानादितया असाध्यत्वात् । न च तत्पालनं साध्यम् । पालनं हि न तत्स्वरूपम्, तस्यासाध्यत्वात् । नोत्तरसमयसम्बन्धः, अभावे सम्बन्धिद्वयातिरिक्तस्य तस्य अप्रामाणिकत्वात् अनभ्युपगमाच्च । नापि सम्बन्धिद्वयस्वरूपं साध्यम्, प्रागभावस्यापि असाध्यत्वात् । समयतदुपाध्योश्च प्रयत्नं विनैव सिद्धेः ।

अथ दुःखे द्वेषाद्यथा तद्भावे इच्छा तथा दुःखसाधने द्वेषात् तदभावेऽपि इच्छा तया तत्साधने प्रवृत्तिरिति चेत्, न । यदिच्छया यत्साधने यस्य प्रवृत्तिस्तस्यैव तत्प्रयोजनत्वमिति दुःखसाधनाभावस्यैव प्रयोजनत्वात् । अथ चिकिर्षायोनिप्रयत्ने प्रयोजनज्ञानापेक्षा, तेन विनोपाये चिकीर्षाविरहात् न तु द्वेषयोनियत्ने । अनिष्टसाधनताज्ञानादहिकण्टकादौ द्वेषो, द्वेषात् तन्नाशानुकूलो यत्न उत्पद्यते। अयमेव हि द्वेषस्वभावो यत्प्रतिबन्धकं विना स्वविषयनाशानुकूलं यत्नमुत्पादयति, अन्यथा प्रयत्नद्वैविध्यानुपपत्तेः। अत एव फलं विनैवोत्कटक्रोधान्धानां आत्मघाते प्रवृत्तिरिति चेत्, न । प्रयोजनमनुद्दिश्य द्वेषमात्रात् दुःखैकफलके प्रेक्षावतां प्रयत्नानुत्पादात् क्रोधान्धानामपि तात्कालिकः फलाभिमानोऽस्त्येव। उत्कटरागान्धानामिव परदारादावपि प्रवृत्तेरिति ।

**तन्न** । दुःखं मे मा भूदित्युद्दिश्य प्रायश्चित्तादौ प्रवृत्तेर्दुःखानुत्पादस्यैव प्रयोजनत्वात् । न च प्रागभावस्यासाध्यत्वम्, दुःखसाधनविघटनद्वारा तस्यापि कृतिसाध्यत्वात्। दुःखसाधनसमवधानदशायां कृतौ सत्यां दुःखसाधननाशे सत्यग्रिमसमये प्रागभावस्वरूपमस्ति तेन विना नास्तीत्यन्वयव्यतिरेकयोस्तत्र सत्त्वात् । घटेऽपि कृतौ सत्यामग्रिमक्षणे तत्सत्त्वम्,

तया विना नेत्येव कृतिसाध्यत्वम्, न तु प्रागसतोऽग्रिमक्षणे सत्त्वमुत्पत्तिः गौरवात् । कृतिं विना न यत्स्वरूपं तत्कृतिसाध्यम्, तत्प्रागभावस्वरूपन्तु न तथेति चेत्, न । कृतिध्वंसेऽपि घटसत्त्वेनाग्रिमक्षणे इत्यावश्यकत्वात्। अत एव योगवत्क्षेमस्याप्यनागतानिष्टानुत्पादजनकस्य परीक्षकप्रवृत्तिविषयत्वमिति वक्ष्यते निषेधापूर्वप्रस्तावे ।

ननु प्रायश्चित्तनाश्यपापजन्यदुःखस्य प्रागभावो यद्यस्ति तदा दुःखमावश्यकम् तस्य प्रतियोगिजनकत्वनियमात् । नास्ति चेत् तर्हि तदभावादेव दुःखानुत्पाद इत्युभयथापि प्रायश्चित्तमफलम्। तस्माद् दुःखसाधनध्वंसमुखेन प्रागभावस्य साध्यतेति तत्रैव कृतिसाध्यत्वपर्यवसानाद् दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादार्थितयेति तत्र प्रागभावसत्त्वासत्त्वविचारो वायसदर्शनविचारवत् ।

अथ तदापि प्रागभावस्यासत्त्वे तदभावात् पापं न दुःखसाधनमिति न तन्नाशार्थं प्रवर्तते । तस्य सत्त्वे च पापमादायैव तस्य दुःखोत्पादकत्वनियमात् प्रायश्चित्ते सत्यपि गलेपादिकया पापावस्थानमिति न ततः पापनाश इति चेत् , न । प्रागभावस्यासत्त्वेऽपि दुःखसाधनजातीयनाशस्य पुरुषार्थत्वात् सत्त्वेऽपि पापान्तरमादायापि तस्य दुःखजनकत्वसम्भवात् प्रायश्चित्तात्पापनाशः स्यादेवेति प्रागभावसत्त्वासत्त्वसन्देहेऽपि प्रायश्चित्तादौ प्रवृत्तिरप्रत्यूहैवेति।

उच्यते । तत्र दुःखप्रागभावोऽस्त्येव, तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात् । स च पापनाशद्वारा प्रायश्चित्तसाध्य इति प्रागभावसत्वेपि न निष्फलं प्रायश्चित्तम्। तेन प्रागभावेन दुःखमवश्यं जननीयमिति चेत् सत्यम् किन्तु पापान्तरमासाद्य । न चैवं प्रायश्चित्तमफलम्। दुःखानुत्पादेन तस्य सफलत्वात् । न च दुःखानुत्पादस्यापि दुःखानुत्पादान्तरमेव फलम्, तच्च तत्र नास्तीत्यफलत्वम्। स्वरूपसत एव तस्य पुरुषार्थत्वात् अनवस्थानाच्च । अतोऽनेन पापेन दुःखं मे मा भूदिति विद्यमानपापनाशार्थं प्रायश्चित्ते प्रवृत्तिः।

एतेन चीर्णप्रायश्चित्ते दुःखप्रागभावो नास्त्येव। अन्यथा तस्य प्रतियोगिनाश्यत्वेनानिर्मोक्षप्रसङ्गात्। न च प्रायश्चित्तवैफल्यम्, न वा भगवतो दुःखमयकर्मोपदेशकत्वेनानाप्तत्वम्। तस्य पापध्वंसेनैव सफलत्वात्, प्रागभावानिश्चयेऽपि नरकसाधनपापनिश्चयात् तन्नाशार्थं प्रवृत्तिरित्यपास्तम् । दुःखसाधनध्वंसस्य स्वतोऽपुरुषार्थत्वात् । पापान्तरेण तत्प्रतियोगिजनने तन्नाशात्। तस्माद्दुःखं मे मा भूदित्युद्दिश्य तत्साधनध्वंसार्थं प्रवृत्तिरिति दुःखानुत्पाद एव पुरुषार्थो न तु दुःखसाधनध्वंस इति स्थितम् ।

अपि च न तावद् दुःखमयसंसारबीजमिथ्याज्ञानस्य ध्वंसो मुक्तिः। तत्त्वज्ञानात् तन्नाशेऽपि शरीरधर्मादिसत्त्वदशायां मुक्तिप्रसङ्गात् । नापि शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंसः। अचीर्णप्रायश्चित्तकर्मणां भोगैकनाश्यत्वेन तत्त्वज्ञानानाश्यत्वात्, भोगद्वारा तन्नाशस्य चापुरुषार्थत्वादिति ।

**अपरे तु** दुःखात्यन्ताभावो मुक्तिः। यद्यपि परदुःखात्यन्ताभावः स्वतः सिद्ध एव। स्वदुःखात्यन्ताभावः स्वात्मन्यसम्भवी, घटादावतिप्रसक्तोऽसाध्यश्च । तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखात्यन्ताभावसम्बन्धः, स च साध्य एव । न चैवमावश्यकत्वेन स एव मुक्तिः। तस्य स्वतोऽपुरुषार्थत्वेन दुःखाभावमुद्दिश्य तत्र प्रवृत्तेः। **"दुःखेनात्यन्तं विमुक्तश्चरती"**त्यत्रात्यन्ताभावत्वेन मुक्तिश्रवणाच्च । यद्यपि दुःखसाधनध्वंसो न पुरुषार्थः, अत्यन्ताभावश्च न साध्यस्तथापि विशिष्टस्य पुरुषार्थत्वं विशेषणसाध्यत्वेन विशिष्टसाध्यत्वञ्च। अहिकण्टकादिनाशस्यापि तत्तद्व्यक्तिसाध्यदुःखात्यन्ताभावमुद्दिश्य तत्सम्बन्धत्वेनैव साध्यतेति ।

**तन्न** । अधर्मादिदुःखसाधनध्वंसस्य न मुक्तिनिर्वाहकत्वं इत्युक्तत्वात् । किञ्च नानागतस्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः साध्यः, मुक्तस्यानागतस्ववृत्तिदुःखस्यानभ्युपगमात्। अभ्युपगमे वा अमुक्तत्वापातात्, अत्यन्ताभावसम्बन्धविरोधाच्च । नाप्युत्पन्नस्य स्ववृत्तिदुःखस्य, तद्वृत्तेस्तत्रात्यन्ता-

भावसम्बन्धविरोधात् । तदभावस्य स्वतः सिद्धत्वात्  अतीतदुःखाभावस्यानुद्देश्यत्वाच्च। नापि परकीयदुःखात्यन्ताभावसम्बन्धः, तस्य स्वतःसिद्धत्वात्।

अपि च दुःखसाधनध्वंसस्य नात्यन्ताभावसम्बन्धत्वे मानमस्ति । दुःखसाधनध्वंसादावस्य दुःखस्यात्यन्ताभाव इति बुद्धिव्यपदेशौ स्त इति चेत्, न । तस्य समानाधिकरणदुःखासमानकालदुःखाभावविषयत्वेनाप्युपपत्तौ अतिरिक्तसम्बन्धाविषयत्वात्।

एतेन सर्वदुःखप्रागभावसंसर्गाभावो मुक्तिः। घटादेश्च न मुक्तत्वम् । दुःखसाधनध्वंसविशेषितैतद्योगिनो मुक्तपदार्थत्वात्, तथैव व्यवहारात्, योगरूढिभ्यां पङ्कजादिपदवाच्यत्ववदिति निरस्तम् । प्रागभावसंसर्गाभावस्य स्वतोऽनुद्देश्यत्वात् प्रत्युतात्यन्ताभावस्यासाध्यत्वेन ध्वंसरूपत्वेन तस्य दुःखरूपतया हेयत्वात् ।

**प्राभाकरास्तु** आत्यन्तिकदुःखप्रागभावो मुक्तिः । न च तस्यानादित्वेन अपुरुषार्थत्वम्। कदाचित् कृत्यनपेक्षत्वेऽपि प्रतियोगिजनकाधर्मनाशमुखेन तस्य कृतिसाध्यत्वात्। कृत्यधीनतत्त्वज्ञानादधर्मनाशे सत्यग्रिमसमये दुःखप्रागभावस्वरूपन्नास्ति। तया विना अधर्मेण दुःखाजननान्न तत्प्रागभावस्वरूपमस्तीति। घटवत् कृतिसाध्यत्वात् । व्यवस्थापितञ्च त्वया प्रागभावस्य कृतिसाध्यत्वमहिकण्टकादिनाशप्रायश्चित्त-क्षेमार्थिप्रवृत्तिस्थले। न चैवं युगपदधर्मध्वंस एव मुक्तिः, प्रागभावस्यानादितया विवक्षितविवेकेन तत्रैव कृतिसाध्यत्वपर्यवसानादिति वाच्यम् ।

अधर्मध्वंसस्य स्वतोऽपुरुषार्थत्वात् । दुःखानुत्पादहेतुत्वेनैव तस्य प्रयोजनता वाच्या। सा च कथमसाध्यत्वे प्रागभावस्य स्यादिति । अत एव **"दुःखजन्मे"**त्यादिसूत्रमपि संगच्छते । अन्यथा मिथ्याज्ञानाद्यनुत्पादानां दुःखानुत्पादाहेतुत्वेनासङ्गतं स्यादित्यास्थिषतेति ।

**तदतिस्थवीयः**। तथा ह्यस्तु प्रागभावस्य साध्यत्वं तथापि तस्य प्रतियोगिजनकत्वनियमान्मुक्तस्यापि दुःखोत्पादप्रसङ्गः। अधर्मशरीरादिसहकारिविरहान्न दुःखोत्पादप्रसङ्ग इति चेत्, तर्हि उत्तरावधिविधुरत्वेनानादेरत्यन्ताभावत्वापत्तौ प्रागभावत्वव्याकोपः प्रतियोगिजनकनाश्यजातीयत्वेन तत्र प्रागभावत्वव्यपदेशो वस्तुतो नित्य

एव स इति चेत्, न । नित्यत्वेनात्यन्ताभावरूपतया प्रागाभावान्यत्वेन नाश्यजातीयत्वाभावात् प्रतियोगिजनकनाशमुखेन तस्यासाध्यत्वाच्च ।

**अपि च** मुक्तेः प्रागभावस्य समानाधिकरणं भावि दुःखं न प्रतियोगि, तस्याभावात्। भावे वा अमुक्तत्वापातात् । नापि समानाधिकरणमतीतं वर्तमानञ्च, तत्प्रागभावस्य विनष्टत्वात् । नापि व्यधिकरणम्, अन्यवृत्तिदुःखस्यान्यत्रात्यन्ताभावेन प्रागभावाभावात्, तस्य प्रतियोगिसमानदेशत्वात्। न च दुःखमात्रं प्रतियोगि, स्वपरावृत्तेर्दुःखमात्रस्याप्रामणिकत्वात् । तस्यात्यन्तासतो नित्यनिवृत्तत्वेन तन्निवृत्तये प्रेक्षावत्प्रवृत्त्यनुपपत्तेः । अहिकण्टकादिनाशप्रायश्चित्तादिसाध्यदुःखप्रागभावस्य कलञ्जभक्षणप्रागभावस्य च समानाधिकरणमेव भावि दुःखं भक्षणञ्च प्रतियोगि।

ननु दुःखाभावो न पुरुषार्थः, सुखस्यापि हानेः तुल्यायव्ययत्वात् । न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम्। आवश्यकत्वेन दुःखस्यैव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात् । अन्यथा दुःखाननुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेत्, न। सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनात् दुःखाभावस्य स्वत एव पुरुषार्थत्वात्। न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखहानार्थं प्रवर्तते । वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थत्वापत्तेः ।

अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकम् । तस्मादविवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य **"शिरो मदीयं यदि याति यातु"** कृत्वा परदारादिषु प्रवर्तमाना **"वरं वृन्दावने रम्ये"** इत्यादि वदन्तो नात्राधिकरिणः।

**ये च** विवेकिनोऽस्मिन् संसारकान्तारे कियन्ति दुःखदुर्द्दिनानि, कियती सुखखद्योतिकेती कुपितफणिफणामण्डलच्छायाप्रतिममिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते, कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् ।

अथ

"दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।

न हि मूर्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः" ।।

पुरुषार्थत्वे सुखवत् ज्ञायमानत्वनियमात् । न च मुक्तिज्ञानं सम्भवतीति चेत् , न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः, किन्तु दुःखं मे मा भूदित्युद्दिश्येत्यतो दुःखस्याभाव एव पुरुषार्थः, तस्य ज्ञानञ्च स्वकारणाधीनम्, न तु पुरुषार्थतोपयोगि। सुखी स्यामित्युद्दिश्य प्रवर्तते न तु सुखं जानीयमिति सुखमेव तथास्तु, न तु तदवगमः, तस्यावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च ।

किञ्च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्तमाना दृश्यन्ते । न च मरणे तस्य ज्ञानमस्ति। न ते विवेकिन इति चेत्, न । पुरुषार्थत्वे विवेकानुपयोगात् । किञ्च चरमदुःखानुभवेऽनागतदुःखध्वंसोऽपि विषयः। तथाचाग्रिमक्षणे तदुपरमः। तद्विषयकत्वञ्च विनश्यदवस्थं ज्ञानमस्तीति वर्तमानमप्यचिरमनुभूयते। ज्ञानसमये मुक्तिलक्षणस्य सत्त्वात् न ज्ञानं मुक्तिविरोधि । प्रमाणन्तु, दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्मत्वात् सन्ततित्वाद्वा एतत्प्रदीपवत्। सन्ततित्वञ्च नानाकालीनकार्यमात्रवृत्तिधर्मत्वम्। एवं सुखत्वादावपि साध्यम्। तेन सकलोच्छेदे मोक्षेः । न चाप्रयोजकत्वम्, सन्तत्युच्छेदे मूलोच्छेदस्य प्रयोजकत्वात् । प्रकृते च मिथ्याज्ञानस्य संसारमूलस्य श्रवणादिक्रमेणोत्पन्नतत्त्वज्ञानात् निवृत्तिः सम्भवत्येव।

**"आत्मा ज्ञातव्यो न स पुनरावर्तते"** इति श्रुतिश्च प्रमाणम्। रात्रिसत्रन्योनार्थवादोपनीतापुनरावृत्तेः अधिकारिविशेषणत्वात् । सः आत्मज्ञः, न पुनरावर्तते -- न पुनः शरीरी भवतीत्यर्थः । **"आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यः"** इत्युपक्रम्य **"दुःखेनात्यन्तं विमुक्तश्चरति"** इति श्रुतिश्च मानम् ।

**आचार्यास्तु।**

**"अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत:"** इति श्रुतिस्तत्र प्रमाणम् । वावसन्तमिति यङ्लुकि । तेन संसारितादशायां क्षणमात्रमशरीरत्वेन नान्यथासिद्धिः ।

ननु द्वन्द्वस्वरसेन मिलितसुखदुःखोभयनिषेधः प्रतीयते। स तु नित्यवत्प्राप्त एव। एकैकनिषेधे च वाक्यभेदापत्तिः । न च मुक्तौ प्रमाणमिति चेत्, न । द्वित्वेनैकेन रूपेणोपस्थितयो: प्रत्येकं निषेधान्वयेऽपि वाक्यभेदाभावात्। धवखदिरौ छिन्धीत्यत्र प्रत्येकं छिदान्वय इव । न हि तत्र मिलितच्छिदा। अपि च न प्रियाप्रियरूपं किञ्चिदस्तीति मिलितनिषेधो अप्येकैकान्वये प्रत्येकाभावे वा भवेत्। तत्रैकान्वयस्याशरीरे अयोग्यत्वात् प्रत्येकाभाव एव पर्यवस्यति। अत एव सर्वमुक्तिरपि। सर्वदुःखसन्ततिपक्षीकरणे तत्सिद्धेः। अन्यथा मुक्तिरपि न स्यात् । तत्रैव व्यभिचारात् ।

यदि चोभयात्मान एव केचित्, तदा तच्छङ्कया मोक्षार्थं न कश्चित् प्रवर्तेत । शमदमभोगानभिष्वङ्गादिमुक्तिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तिरिति चेत् , न। संसारित्वेन मुक्तियोग्यत्वात् न तु तद्विशेषणशमादिमत्त्वेन । सामान्ये बाधके सत्येव योग्यताया: विशेषनिष्ठत्वात् । किञ्च शमादयः श्रुतौ सहकारितया बोधिता: न तु योग्यतया। तत्त्वेऽपि संसारित्वेन तेऽपि साधनीया:। शमादिकमपि हि कार्यम्, तत्रापि संसारित्वेनैव योग्यता, सामान्ये बाधकाभावात् ।

न च नित्यसुखाभिव्यक्तिर्मुक्ति:। सा हि न नित्या, मुक्तसंसारिणोरविशेषप्रसङ्गात्। नोत्पाद्या, तद्धेतुशरीराद्यभावात्, ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात्। न च संसारिदशायां तद्धेतु:, सामान्ये बाधकाभावात् । अत एव स्वर्गादौ शरीरकल्पना । किञ्च तज्जनकं न तावदात्ममनोयोग:, तस्यादृष्टादिनिरपेक्षस्याजनकत्वात्। विषयमात्रपेक्षणे तु संसारिदशायामपि तदभिव्यक्तिप्रसङ्ग: । नापि योगजो धर्मः सहकारी, तस्योत्पन्नभावत्वेन विनाशित्वेऽपवर्गनिवृत्त्यापत्तेः । न च तज्जन्याभिव्यक्तिरनन्ता, तस्या अप्यत एव नाशात् ।

अथ तत्त्वज्ञानात्सवासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयाद्दुःखसाधनशरीरादिनाश एव तत्र हेतुः । अत एव तस्यानन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेत्, न । शरीरं विना तदनुत्पत्तेः। तस्य तद्धेतुत्वे मानाभावाच्च । न च मोक्षार्थिप्रवृत्तिरेव तत्र मानम्, दुःखहानार्थितयापि तदुत्पत्तेः । न च नित्ये सुखे मानमस्ति । **"नित्यं विज्ञानमानन्दं ब्रह्म"** आनन्दं ब्राह्मणो रूपं तच्च मोक्षे प्रतिष्ठितं" इत्यादिश्रुतिर्मानं इति चेन्न उपजननापयवतोः ज्ञानसुखयोः अहं जानामि अहं सुखी इति भिन्नत्वेन अनुभूयमानयोः ब्रह्माभेदबोधने प्रत्यक्षबाधात् ।

अथ सुखस्य ब्राह्माभेदबोधनादेवायोग्यता अनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत् । न तु नित्ये सुखे सिद्धे तदभेदबोधनम्, येनान्योन्याश्रयः। यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं ब्रह्म बोध्यते । न च वाक्यभेदः, वाक्यैकवाक्यत्वादिति चेत्, न । आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात्। सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् तदननुभवे वा आत्मनोऽपि अनुभवो न स्यात् ।

अथात्माभिन्नं नित्यसुखमनुभूयत एव। सुखत्वं तु तत्र नानुभूयत इति चेत्, न। सुखानुभवसामग्रया एव सुखत्वानुभावकत्वात् । तस्मादानन्दं ब्राह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनान्दवत्त्वं बोध्यम्, तेनाभेदः। अन्यथा नपुंसकलिङ्गत्वानुपपत्तेः ।

एतेन ब्राह्माद्वैतसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्मा अपवर्गे वर्तत इति **वेदान्तिमतमपास्तम्** । स्वप्रकाशसुखात्मकब्रह्मणो नित्यत्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात्, पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च । अविधा निवृत्तिः प्रत्यनसाध्येति चेत्, अविधा यदि मिथ्याज्ञानं अर्थान्तरं वा, उभयथापि सुखदुःखाभावतत्साधनेतरत्वेन ।

**त्रिदण्डिनस्तु** आनन्दमयपरमात्मनि जीवात्मलयो मोक्षः, लयश्च लिङ्गशरीरापगमः। लिङ्गशरीरञ्च एकादशेन्द्रियाणि पञ्चमहाभूतानि सूक्ष्ममात्रया सम्भूयावस्थितानि जीवात्मनि

सुखदुःखावच्छेदका**नीत्याहु**: । **तन्न** । लिङ्गशरीरध्वंसस्य स्वतो दुःखसाधनाभावतया अपुरुषार्थत्वात् । न चोपाधिशरीरनाशे औपाधिकजीवनाशो लयः, स्वनाशस्यापुरुषार्थत्वात्। ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः, भेदाभेदस्य च विरोधेनाभावात् ।

नाप्यनुपप्लवा चित्सन्ततिरपवर्गः। आवश्यकत्वेनानुपप्लवस्य दुःखाभावस्य पुरुषार्थत्वेन चित्सन्ततेरपरुषार्थत्वात् । शरीरादिकारणं विना चित्सन्ततेरनुत्पादाच्च। न हि चित्तमात्रं तत्सामग्री, शरीरादिवैयर्थ्यापत्तेः। नापि दुःखहेतुत्वेनात्मनो हानमेव मुक्तिः, सुखदुःखाभावेतरत्वेनापुरुषार्थत्वात् । ज्ञानरूपात्महानस्यायत्नसिद्धेः अतिरिक्तहानस्याशक्यत्वात्।

**यत्तु** योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तेः, कारणवशादात्यन्तिकदुःखाभावरूपां मुक्तिमासादयतीति **मतम्** । **तन्न** । परममुक्तेरपुरुषार्थत्वापत्तेः, विरक्तस्य मोक्षेऽधिकारात् सुखोद्देशेनाप्रवृत्तेश्च । मोक्षे च सर्वाश्रमिणामधिकारः। आश्रमचतुष्टयमुपक्रम्य **"सः ब्रह्मसंस्थोऽमृतत्वमेति"** इति श्रुतेः, सङ्कोचे कारणाभावात्। आकाङ्क्षाया अविशेषेणानन्तर्यस्याप्रयोजकत्वात् । कथं तर्हि **"मोक्षाश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तितः"** इति प्रव्रज्यां **मोक्षाश्रममाहुः**। गृहस्थस्य च पुत्रदारादिसङ्गो दुर्वार इत्यसाधारण्येन तथोपदेशात्, **"तत्त्वज्ञाननिष्ठो गृहस्थोऽपि मुच्यते"** इत्यागमाच्च ।

एवं स्थिते मोक्षमुपक्रम्य **"आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यः"** इति श्रुतिः, श्रुतिभ्यः च शरीरादिभिन्नं आत्मानमवधार्य शास्त्रेण पदार्थान् विविच्य तद्बोधितोपपत्तिभिस्तस्य स्थिरीकरणरूपं मननं विदधाति । न च शब्दोपपत्तिजन्यतत्त्वज्ञानात् साक्षात्कारिसंसारबीजसवासनमिथ्याज्ञाननिवृत्तिः। दिङ्मोहादौ तथानुपलब्धेः। अतः श्रुतिस्मृत्युपदिष्टयोगविधिना चिरनिरन्तरादारसेवितनिदिध्यासनजन्ययोगजधर्मादात्मतत्त्वसाक्षात्कारं संसारबीजसवासनमिथ्याज्ञाननिहननसमर्थमासाद्य दोषाभावत्प्रवृत्त्यादेरभावे अनागतधर्मानुत्पादेऽनादिभवसञ्चितकर्मणां भोगेन क्षयादपवृज्यते ।

उपदेशमात्राच्छरीरभिन्नात्मावगमेऽप्यन्यपरत्वशङ्कया सङ्कासूकस्य नाश्रद्धामलक्षालनमिति मननमावश्यकम् ।

तथाच "मन्तव्यश्चोपपत्तिभिरिति' श्रुतिरेवोपपत्तिबोधकस्य शास्त्रस्यापवर्गहेतुत्वं बोधयति। मननस्य तदेकसाध्यत्वात् । एवञ्च शमदमब्राह्मचर्याद्युपबृंहितया-वन्नित्यनैमित्तिकसन्ध्योपासनादिकर्मसहितात् तत्त्वज्ञानान्मुक्तिः।

स्यादेतत् ज्ञानकर्मणोर्न समप्राधान्येन समुच्चयः । कर्मणां स्ववाक्यात् फलान्तरार्थत्वेन श्रुतत्वान्मोक्षार्थकल्पनाविरोधात् तत्त्वज्ञानस्य कर्मनैरपेक्ष्येण मुक्तिहेतुत्वप्रतीतेश्च। नाप्यङ्गाङ्गिभावेन। तथा हि न कर्म सन्निपत्योपकारकम्, तत्त्वज्ञानशरीरानिर्वाहकत्वात्। नापि प्रयाजादिवदारादुपकारकम्, स्ववाक्यत एव कर्मणां प्रयोजनलाभेन फलवत्सन्निधावफलत्वाभावात् । उपपत्तिविरुद्धश्च ज्ञानकर्मसमुच्चयः । काम्यनिषिद्धयोस्त्यागात्। नाप्यसङ्कल्पितफलवत्काम्यकर्मसमुच्चय:। चतुर्थाश्रमविधि-विरोधात्। अत एव न यावन्नित्यनैमिक्तकसमुच्चयोऽपि। नापि यत्याश्रमविहितेन कर्मणा, तत्त्वज्ञाने सति गृहस्थस्यापि मुक्तेः ।

**"ज्ञानं प्रधानं न तु कर्महीनं**

**कर्मप्रधानं न तु बुद्धिहीनम्।**

**तस्मात्तयोरेव भवेत्प्रसिद्धि:**

**नत्वेकपक्षो विहग: प्रयाति।।"**

**"न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रिय: ।**

**श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते" ।। इति स्मृतेः ।**

न चाननुगतमपि साधनम्, स्वर्गवदपवर्गे प्रकारभेदाभावात् । न चापवर्गार्थिकर्तव्यतया कर्माणि विहितानि, येन तत्समुच्चयः स्यात्। तस्मात् **"सन्न्यस्य सर्वकर्माणि"** इति स्मृतेः सर्वकर्मसन्न्यास:, ज्ञानमात्राच्च मोक्ष इति ।

मैवम् । स्वस्वाश्रमविहितेन कर्मणा ज्ञानस्य समप्राधान्येन समुच्चयात् ज्ञानकर्मणोस्तुल्यत्वेन मुक्त्यर्थत्वाभिधानात् ।

**तथाच श्रीमद्भगवद्गीता--**

**"स्वे स्वे कर्मण्यभिरत: संसिद्धिं लभते नर: ।**

**स्वकर्मण तमभ्यर्य सिद्धिं विन्दति मानव:" ।।**

**श्रीविष्णुपुराणे--**

**"तस्मातत्प्राप्तये यत्न: कर्तव्य: पण्डितैर्नरै: ।**

**तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते।।"**

**हारीत:--**

**"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गति: ।**

**तथैव ज्ञानकर्मभ्यां प्राप्यते ब्राहम शाश्तम् "।।**

**श्रुतिश्च---**

**"सत्येन लभ्यस्तपसा हयेष आत्मा सम्यग्ज्ञानेन ब्रहमचर्येण च"** इति ।

**एतन्मूलकमेव---**

**"परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणम् ।**

**कायक्लेशभयाच्चैव कर्म नेच्छन्तिअपण्डिता:"।।**

न च फलान्तरार्थत्वेन श्रुतस्य कर्मणः फलान्तरार्थत्वमनुपपन्नम्, तथा वाक्यस्वरसात् ज्ञानतुल्यताप्रतीतेः । तत्तत्फलजनकत्वेऽपि हि कर्मणं शब्द एव मानम्, एवमन्यत्रापि । भवतु वा आरादुपकारितया अङ्गाङ्गिभावेन समुच्चयः। स प्रयाजादिवदपूर्वद्वारैव ।

**यत्तु जडभरतोपाख्याने--**

**"न पपाठ गुरुप्रोक्तां कृतोपनयन: श्रुतिम् ।**

**न ददर्श च कर्माणि शास्त्राणि जगृहे न च"।।** इति

तद्योगिधर्मसङ्गत्यागार्थं जातिस्मरत्वेन न शिक्षितानीत्येवंपरं वा ।

**तदुक्तम्--**

**"जज्ञे जातिस्मरो द्विजः।**

**सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित् "।।** इति ।

**अत्र केचित्**। अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनस्तत्प्रतिबन्धकाधर्मनिवृत्तिद्वारा प्रायश्चित्तवदारादुपकारकं कर्म, सन्निपत्योपकारकन्तु तत्त्वज्ञानम् । उत्पन्नतत्त्वज्ञानस्य तु अन्तरा लब्धवृष्टेः कारीरिसमाप्तिवदारब्धाश्रमपरिपालनं लोकसंग्रहार्थम् । यद्यपि लोकसंग्रहो न प्रयोजनम्, सुखदुःखाभावतत्साधनेतरत्वात्। तथाप्यकरणे लोकानां **न च** विगानान्निद्यत्वेन यज्ज्ञानं तत्परिहारार्थं तत्कर्मसाध्यदुःखोत्पादनेनाधर्मक्षयार्थञ्चेति ।

**तन्न** । तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणां ह्यपूर्वद्वारा जनकत्वम्, दुरितध्वंसकल्पनातो लघुत्वात् । तस्मात् यानि कर्माणि उपनीतमात्रकर्तव्यत्वेन विहितानि सन्ध्योपासनादीनि तानि मोक्षार्थिभिरप्यवश्यं कर्तव्यानि । तत्परित्यागस्य प्रत्यवायहेतुत्वेनाशास्त्रीयत्वात्, सङ्कोचे मानाभावात् । निषिद्धानि काम्यानि च बन्धहेतुत्वान्मुक्तिपरिपन्थीनीति त्यज्यन्ते । धनमूलानि च धनत्यागादेव त्यज्यन्ते । सोऽयं **"संन्यस्य सर्वकर्माणी"**त्यस्यार्थः। अयमेव हि सन्न्यासपदार्थः।

**तथा च श्रीमद्भगवद्गीता-**

**"काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदः ।**

**नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते।**

**मोहातस्य परित्यागस्तामसः परिकीर्तितः"** ।। इति

तत्त्वज्ञानं धर्मद्वारा मुक्तिसाधनम्, विहितत्वेन धर्मजनकत्वादिति धर्मस्यैव प्राधान्यम् । स च धर्मो मुक्त्यैव फलेन नाश्यत इति **केचित् । तन्न ।** मिथ्याज्ञाननिवृत्त्या दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाशात् । अन्यथा भेषजादिष्वपि तथा स्यात् । एवञ्च तत्रैव विहितत्वस्य व्यभिचारः ।

**अत्र वदन्ति** । संसारकारणोच्छेदक्रमेण कार्योच्छेदान्मोक्षः, एवञ्च तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः । तत्र न तस्य कर्मसहकारित्वम् । मिथ्याज्ञानोन्मूलने कर्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात् कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते, साक्षात्तस्याश्रुतेः । तत्त्वज्ञानवतश्चाधिकारे नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः। अन्यथा भोगार्थं विहितनिषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः।

ननु तत्तत्तीर्थदानमहास्नानकाशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वं श्रूयते, तत्कथं तत्त्वज्ञानमेव तद्धेतुः । न च तेषां तत्त्वज्ञानमेव व्यापारः, अनुपदं तत्त्वज्ञानानुत्पादाददृष्टद्वारा तद्धेतुत्वं वाच्यम् । तथाचापवर्गकारणमेवदृष्टं कल्प्यतां लाघवात् । न च तत्त्वज्ञानप्रतिबन्धकाधर्मनाश एव तेषां व्यापारः, प्रतिबन्धकदुरितध्वंसतोऽपूर्वस्य लघुत्वात् ।

अथ तत्तत्कर्मणामननुगमात् कथं मुक्तिरनुगता, दुःखध्वंसे प्रकाराभावादिति चेत् . न । गुणनाशे समवाय्यसमवायिनाश विरोधिगुणानां नाशकत्वनियमात् । तत्तन्नाशविशेषे तु तत्तद्धेतुरिति चेत्, तर्हि तत्तद्दुःखध्वंसे तत्तत्कर्मणामपि तथात्वमस्तु, तवापि तत्त्वज्ञाने तत्प्रतिबन्धकदुरितध्वंसे चाननुगतानामेव तत्तत्कर्मणां जनकत्वम्, मुमुक्षुमुद्दिश्य विहितत्वं वानुगतमस्तीति चेत्, न ।

ज्ञानकर्मणोर्निरपेक्षकारणताश्रवणत् व्रीहियववद्विकल्प एव । निरपेक्षैकसाधनावरुद्धेऽपरसाधनान्वयो न विकल्पमन्तरेण सम्भवति। आकाङ्क्षाविरहादिति न्यायात् । साहित्यबोधकं विनैकं प्रत्यनेकस्य हेतुता यत्र शब्देन बोध्यते तत्र विकल्पेनान्वयो यथा व्रीहियवयोरिति व्युत्पत्तेर्वा ।

वस्तुतस्तु दृढभूमिसवासनमिथ्याज्ञानोन्मूलनं विना न मोक्ष इत्युभयसिद्धम्, तादृशमिथ्याज्ञाननाशे चान्वयव्यतिरेकाभ्यां तत्त्वज्ञानकारणत्वमवधारितमतो न तेन विना स इति तत्रापि तत्त्वज्ञानमावश्यकम् । यद्यपि मिथ्याज्ञाननाशे विरोधिगुणस्यैव हेतुत्वम्, तथापि

मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंसस्य तदेकसाध्यत्वम् । **"आत्मा ज्ञातव्यो न स पुनरावर्तते"** इति श्रुतेर्मोक्षं प्रति तत्त्वज्ञानस्य हेतुत्वावधारणात्। **"तमेव विदित्वाऽतिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय"** इति श्रुत्या तत्त्वज्ञानं विना न मोक्ष:। किन्तु तस्मिन्सत्येवेति प्रतिपादनाच्च । अन्यथा स्वर्गादौ न शरीरादय: कल्प्येरन् । कर्मणां तत्त्वज्ञानद्वारापि मुक्तिजनकत्वसम्भवात् । प्रमाणवतो गौरवञ्च न दोषाय। कर्मणां तत्त्वज्ञानविशेष एव जनकत्वम्। अतो न तत्राननुगमो दोषाय । वाराणसीमरणस्य तत्त्वज्ञानफलजनकत्वमागमादेवावगम्यते। तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्ति अनन्यथासिद्धशब्दबलात् । न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वम्, पापनाशफलश्रवणात् ।

अत एव न ब्राह्महत्यादीनां प्रायश्चित्तदुःखमेव फलम्, नरकफलश्रुतिविरोधात् प्रायश्चित्तविधिवैयर्थ्याच्च, दुःखैकफलत्वेन तत्राप्रवृत्ते: । नापि कर्मान्तराधिकार एव फलम्, महापातकातिरिक्तेऽनधिकाराभावात्। अन्यथा यत्किञ्चित्पापवतोऽकृत प्रायश्चित्तत्वेनान-धिकारापत्ते:। प्राणान्तिके तदभावाच्च।

**श्रूयते हि --**

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशया: ।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि"** ।। इति

**स्मृतिरपि--**

**"ज्ञानाग्नि: सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन"** इति ।

**"नाभुक्तं क्षीयते कर्म"**त्यत्र च प्रायश्चित्तादिस्मृतित: सङ्कोचस्यावश्यकत्वेन शब्दबोधितनाशकानाश्यकर्मपरत्वम्, लाघवात्। न तु तत्तदन्यकर्मपरत्वम्, गौरवात्। पापपुण्यक्षयहेतूनां बहुतरत्वात् । ज्ञानस्य नाशकत्वं शब्दबोध्यमित्युक्तम् ।

अथ भस्मसात्पदस्य लाक्षणिकत्वेन यथा वह्नेः परम्परया भस्म तथा ज्ञानात्कर्मक्षय इत्यर्थः । तथाच नाभुक्तं क्षीयते कर्मेति स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह, अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते। ज्ञाननाश्यत्वञ्च भोगद्वारापि सम्भवतीत्यबाधे सम्भवति बाधकल्पना नेति चेत्, न ।

कमणो भोगनाश्यत्वे ज्ञानस्यानाशकत्वात् । न हि भोगस्तत्त्वज्ञानव्यापारः, तथाऽश्रवणात्, तेन विनापि कर्मण एव तदुपपत्तेश्च। कर्मणो भोगनाश्यत्वे तत्त्वज्ञानानुपयोगात् ।

**यत्तु** नाभुक्तमिति स्मृतिविरोधेन क्षीयन्ते इत्यादि श्रुतेरन्यथा वर्णनम्। **तन्न** । स्मृतेः प्रत्यक्षवेदबाधितत्वेन विरुद्धार्थकवेदाननुमापकत्वात् । वामदेवसौभरिप्रभृतीनां कायव्यूहश्रवणात्तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षय इति चेत् , न। तपः प्रभावादेव तत्त्वज्ञानानुत्पादेपि कायव्यूहसम्भवात् । भोगजननार्थञ्च कर्मभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः। यौगपद्यञ्च कायानां तज्जनककर्मस्वभावात् तपः प्रभावाद्वा । न च ज्ञानं भोगद्वारा कर्मनाशकं इत्युक्तम् ।

एतेनागमयोः परस्परविरोधात् अनिर्णये विमतिपदं कर्म भोगनाश्यं प्रायश्चित्ताद्यनाश्यत्वे सति कर्मत्वात् भुक्तभुज्यमानकर्मवदित्यनुमानान्निर्णय इत्यपास्तम्। ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाप्रयोजकत्वात् श्रुतिबाधितत्वाच्च । शब्दबोधितनाशकानाश्यत्व-स्योपाधित्वाच्च। अकृतप्रधानेन कृतप्रधानेन चाङ्गापूर्वेण व्यभिचाराच्च । तस्य प्रधानयागादिनाश्यत्वात् । न च तस्यापि यागस्येव स्वर्गफलकत्वमिति तन्नाश्यत्वमेव अधिकृताधिकारेऽपि स्वर्गकामस्याधिकारात्, अन्यथा निष्फलेऽप्रवृत्तेरिति वाच्यम् । स्वर्गफलत्वेऽङ्गत्वविरोधात् । प्रवृत्तिश्च फलवद्यागार्थितया । तदुक्तम् **"प्रधाने रागादङ्गे वैधी"**ति ।

ननु **"तावदेवास्य चिरं यावन्न विमोक्षः अथ सम्पत्स्यते कैवल्येन"** इति श्रुतेः तावदेवास्योत्पन्नतत्त्वज्ञानस्य चिरं विलम्बः यावन्नोत्पन्नकर्मणो विमोक्षः। अथ सम्पत्स्यते

कैवल्येनेत्यत्र भोगेन क्षययित्वा इति शेष: । न च शेषे मानाभाव:। सत्यपि विज्ञाने कर्मावस्थाने क्लृप्तसामर्थ्यस्य भोगस्यैव नाशकत्वेनाक्षेपकत्वादिति चेत्, न ।

तत्वज्ञाने सति तत्वज्ञानदशायां न मोक्ष:, किन्तु तदग्रिमक्षण इत्यार्थत्वेनाप्युपपत्ते: ।

**यत्तु** अकृतप्रधानङ्गापूर्वाभिप्रायमेतत् "ज्ञानाग्रि: सर्वकर्माणी"त्यादि, तेषां कार्याणां नाशकान्तराभा**वादिति** । **तन्न** । प्रधानार्थितया क्लृप्तानां तदभावे तत्सामग्र्यसिद्धे:, तत्सत्त्वेऽपि सर्वकर्मपदस्य कर्मान्तरपरिग्राहकस्य सङ्कोचे मानाभावात्। यदपि भस्मसात्करणादिना फलाजनकत्वमुच्यते, तत्वज्ञानात् कृतमपि विहितं कर्म न फलायेति। तथाच श्रुति:, **"तद्यथा पुष्करपलाशेनाप: शिलष्यन्ते"** इत्यादि । **तदपि** न । न हि भस्मसात्करणं क्षयश्चानुत्पत्तिरुच्यते । न च लक्षणा । मुख्ये बाधकाभावात् ।

उच्यते। कर्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्मनाशकत्वम्, भोगस्य तत्वज्ञानव्यापारत्वात् । न च भोगमात्रस्यैव कर्मनाशे सामर्थ्यात्तत्वज्ञानव्यभिचार:, कर्मप्रागभावासहवृत्तिकर्मनाशे युगपत्कर्मभोगे वाऽव्यभिचारात् । अत एवानुमानेना-गमबाधाप्रयोजकत्वेन च श्रुतिवाक्यशेषे मानाभाव:। उत्पन्नतत्वज्ञानस्याप-वर्गविलम्बोपपादनार्थं उक्तरीत्या भोगस्यैवाक्षेपादिति, तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धं कारणमनुमानमिति विविक्तम् इति।।

**इति श्रीमहामहोपाध्यायश्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानाख्यद्वितीयखण्डे ईश्वरानुमानम्।।**

**समाप्तञ्च द्वितीयमनुमानखण्डम् ।।**

## उपमानखण्ड:

अथोपमानं निरूप्यते । तत्र सादृश्यप्रमाकरणमुपमानमिति **केचित्** । सादृश्यञ्च पदार्थान्तरम् । तथाहि - सादृश्यव्यवहारादबाधितादस्ति सादृश्यम्। तच्च न प्रतिपदार्थमेकम्,

सर्वस्य सर्वसदृशत्वापत्ते: सुसदृशमन्दसदृशव्यवहारस्य तदेकत्वेऽनुपपत्तेश्च । न च व्यञ्जकभूय:सामान्याल्पत्वभूयस्त्वाभ्यां तद्धीरिति वाच्यम्। बहुभिरल्पैश्च व्यज्यमानघटादौ ह्रासवृद्ध्योरदर्शनात् व्यञ्जकाभिमतादेव व्यवहारसिद्धौ अतिरिक्तासिद्धेश्च । नापि संयोगवत् व्यासज्यवृत्यनेकम्, गोत्वोपलक्षितसादृश्याश्रयत्वात्, गवयवत् गोरपि सुसदृशत्वप्रसङ्गात्, गोरसन्निकर्षे संयोगवदप्रत्यक्षत्वप्रसङ्गाच्च । प्रत्यक्षत्वे वा गवयनिरूपित-सादृश्यस्यैकवित्तिवेद्यत्वेन गोनिष्ठतया चाक्षुषत्वप्रसङ्ग:, किन्तु प्रत्याश्रयं भिन्नम् ।

न चैकैकस्य व्यभिचारादनुगतरूपाभावाच्च अनुगतप्रत्यय: सादृश्यपदव्युत्पत्तिश्च न स्यादिति वाच्यम् । अनुगताकारवित्तिवेद्यसादृश्यत्वसामान्यात् सप्तपदार्थातिरिक्तत्वाद्वा जातिवदन्त्यविशेषवच्च स्वलक्षणाद्वा तयोरुपपत्ते:।

तच्च न द्रव्यं गुण: कर्म वा गुणकर्मवृत्तित्वात्। न च सदृशाश्रयत्वादेव तत्र व्यवहार:, आश्रयवैसादृश्येऽपि तत्र तत्प्रतीते: । अत एव नाश्रयसादृश्यासंसर्गाग्रहात् स: बाधकाभावात् अविशेषेण वैपरीत्यसम्भवाच्च। नापि सामान्यम्, तद्धि न सर्ववृत्त्येकम्, अनभ्युपगमात् सुसदृशमन्दसदृशव्यवहारानुपपत्तेश्च ।

अथ विजातीयत्वे सत्यवयवगुणकर्मवृत्तिभूय:सामान्यं तत्, अत एव दूरस्थे प्रतियोगिनि भूय:सामान्याज्ञानान्न तथा सादृश्यप्रत्यय: वनं प्रासादा इतिवत् बहुत्वस्य समुदायत्वस्य वैकल्यत्वादेकं सादृश्यमिति धीप्रयोगौ। अन्यथा वनाद्यपि अर्थान्तरं स्यात् । सामान्यस्य बहुत्वाल्पत्वाभ्यां सुसदृशमन्दसदृशव्यवहार:।

**तदुच्यते --**

**सामान्यान्येव भूयांसि गुणावयवकर्मणाम् ।**

**भिन्नप्रधानसामान्यव्यक्तं सादृश्यमिष्यते ।।** इति ।

न, साजात्येऽप्यरविन्ददवयवत् सजातीयावयवादिशून्ये गुणादौ जातौ च सदृशप्रत्ययात् विसदृशयो: करभरासभयोस्तत्सत्त्वाच्च । नापि धर्म्यन्तरे

धर्म्यन्तरवृत्तिधर्मबाहुल्यम्, असाधारणधर्मशून्यत्वे सति तद्गतभूयोधर्मवत्त्वं वा, स्वनिष्ठात्यन्ताभावप्रतियोगिधर्मसमानाधिकरणभूयोधर्मवत्त्वं वा, त्रिचतु:पञ्चादिभेदेन भूयस्त्वस्याननुगमात् । न च कपिञ्जलवत् त्रित्वपर्यवसन्नम्, विसदृशयोरपि हस्तिमशकयो: सादृश्यप्रसङ्गात् ।

**तदुक्तम् --**

**एवं जातिगुणद्रव्यक्रियाशक्तिषु धर्मत: ।**

**एकैकद्वित्रिसाधर्म्यभेदादेकत्र चित्रता ।।** इति ।।

अथ व्यावर्तकधर्मापेक्षया तद्गतधर्मबाहुल्यं सादृश्यम् । बाहुल्यञ्च त्रिचतुरादिष्वनुगतम् । हस्तिमशकयोस्तु बहु व्यावर्तकम् । साधारणन्त्वल्पम्। एत एव किञ्चिद्भेदाधिष्ठानं सादृश्यमुच्यते इति चेत्, न । व्यावर्तकसमसङ्ख्येनाल्पेनागणितेनापि धर्मेण सादृश्यव्यवहारात् । किञ्च सामान्यान्याश्रयभेदेनाभिन्नानि भवन्ति। सादृश्यन्तु भिन्नम् । सामान्यं निष्प्रतियोगिकं तदनिरूप्यञ्च । सादृश्यन्तु सप्रतियोगिकं तद्धीव्यङ्ग्यञ्च।

अथ भेदे सति तद्गतभूय:सामान्यवत्त्वं सादृश्यम्। भेदश्च प्रत्याश्रयमन्य: सप्रतियोगिकश्चेति चेत्, तर्हि सादृश्यस्य भेदघटितत्वेन सावधित्वे तस्मात् सदृश इति स्यात्, न तु तेन तस्य वा सदृश इति स्यात् । न च सादृश्यस्यापि सप्रतियोगिकत्वेन तस्मात् सदृश इति स्यात् । सावधौ हि तथा प्रतीतिप्रयोगौ न तु प्रतियोगिनि, अभावेऽपि घटादिति प्रतीतिप्रसङ्गात् ।

अपि च तद्धर्मवत्त्वं यदि सादृश्यं तदा तत्तद्भिन्नतयो: सङ्कर:स्यात् । तद्धर्मवत्ता हि तत्ता तदन्या च तद्वत्ता। यदि च तत्रैव तद्वत्ता, तदा तदेव तद्वदिति स्यात् । तथाच तद्धर्मवत्ताप्रत्यभिज्ञानवत् सोऽयमिति स्यात्, न तु तद्वदयमिति । एवं तद्वत्तैव हि तत्तेति गवयेऽपि गोबुद्धिव्यपदेशौ स्याताम्, गोगतसामान्ययोगित्वेन गोवत्तत्ताश्रयत्वात् न विशेष: प्रत्यक्षत्वात् । न समवाय: वृत्तिमत्त्वात् इत्यधिकं सादृश्यम्।

यत्तु सादृश्यं भावोऽभावो वा, भावोऽपि सगुणं निर्गुणं वा, निर्गुणमप्याश्रितमनाश्रितं वा, आश्रितमपि सामान्यवन्नि:सामान्यं वा, सामान्यवत्त्वे स्पन्दोऽस्पन्दो वा, निर्गुणं नि:सामान्यमाश्रितमेकाश्रितमनेकाश्रितं वा इति यथायथं सप्तपदार्थान्तर्गतमिति ।

**तन्न** ।

व्यवहारानुपपत्त्या तद्बहिर्भावात् । अन्यथा एतादृशविकल्पेन सामान्यविशेषसमवायानामपि द्रव्यादित्रयसाधर्म्यात् तत्तदन्तर्भाव: स्यादिति ।

उच्यते । असाधारणान्यतद्गतभूयोधर्मवत्त्वं तत्सादृश्यम् । यज्जात्यादिसाधारणं भेदाघटिततया च निरवधि तद्गतबहुधर्मवत्त्वं तन्निरूप्यमिति इतरनिरूप्यत्वमेव तस्य सप्रतियोगिकत्वम् । तवापि सादृश्ये तदेव सप्रतियोगिकत्वम्, न तु भेददीर्घादिवत्सावधित्वम्, तस्मात् सदृश इति प्रत्ययापत्ते: । बहुत्वञ्च त्रिचतुरादिसाधारणमिति नाननुगम: । न चातिप्रसङ्ग:, हस्तिमशकयोरपि प्राणित्वसुखित्वदु:खित्वादिना सादृश्यात् । अत एव वैसादृश्येऽपि आह्लादजनकत्वादिना चन्द्र इव मुखं पुष्ट्यादिना महिषीव गौरिति बह्वल्पतद्गतधर्मवत्त्वेन सुसदृशत्वमन्दसदृशत्वम् ।

अत एव गवये गोसादृश्यं पृष्ट: तद्धर्मवत्त्वमेव विवेचयति । वराहं गावोऽनुधावन्तीत्यत्र गोसादृश्यं वराहेऽप्युक्तम् । तद्धर्मवत्त्वेनोपमानोपमेयव्यवहार: काव्यादौ। साध्यसाधनवत्तामात्रेण दृष्टान्ते पक्षसादृश्यवाचकवति प्रयोग: परीक्षकाणाम् । न चैते गौणा:, मुख्ये बाधकाभावात् । तस्मात् केनचिद्धर्मेण कस्यचित् क्वचित् सादृश्यवत्त्वमननुगतमस्ति।

किञ्च यादृशबहुतद्धर्मवत्त्वज्ञानं सादृश्यव्यञ्जकं तदेव तद्व्यवहारनियामकमस्तु, किमधिकेन । अन्यथा त्रिचतुरादित्वे तु व्यञ्जकमपि बहुधर्मवत्त्वमननुगतं स्यात् । व्यञ्जकमननुगतमपि वह्नौ प्रत्यक्षादिवदिति चेत्, न । तत्राभिव्यक्तीनां वैजात्यात् धूमालोकादौ वह्निव्याप्यत्वमेवानुगतम् । अत्रापि तद्व्याप्यत्वमस्तीति चेत्, तर्हि यादृशं तद्व्याप्यत्वं तदेव तद्व्यवहारनिमित्तम् । न च तद्गतबहुधर्मवत्त्वं न

व्यञ्जकमेवानुभवविरोधात् तद्गतभूयोधर्मस्य बह्वल्पत्वज्ञानं विना सुसदृशमन्दसदृशत्वज्ञानाभावाच्च।

अथ तद्गतबहुधर्मवत्त्वं न सप्रतियोगिकम्। सादृश्यन्तु न तथेति व्यवहर्तव्यसाधकमिति चेत्, न। सादृश्यवत्तस्यापि सप्रतियोगिकत्वात् ।

**यत्तु** तत्तातद्वत्तयोः सङ्करः स्यादिति, **तन्न** । तत्रैव तद्धर्मवत्ता तदभेदो वा तत्ता। सा च सोऽयमिति प्रत्यक्षज्ञाने भासते । भेदे भासमाने तदन्यस्मिन् तद्धर्मवत्ता, तद्वत्ता यतो भवति तद्वदयं न तु स इति तयोर्भेदात् ।

नन्वेवं व्यक्त्यन्तरे गोत्वग्रहे तद्गोवदियमिति स्यान्न त्वियमपि गौरिति चेत्, न। गोत्वमात्रस्य तदन्यव्यक्तिवृत्तित्वसमुच्चयात् एकत्र नानासम्बन्धानवगमात्। तद्गोवृत्तिबहुधर्मज्ञाने भवत्येव तद्गोवदियमिति । तथाप्ययमपि शृङ्गादिमानिति समुच्चयधीः स्यात्, न तु गोसदृश इति चेत्, न । एकत्रोभयसम्बन्धः समुच्चयः अन्यगतभूयोधर्मवत्त्वमन्यत्र सादृश्यमिति विवेकात् ।

नवीनास्तु विलक्षणसुखद्वये इतरसकलव्यावृत्तं सादृश्यमनुभूयते न तु तदुभयमात्रवृत्तिजातिरस्ति, तदुभयाभावे जातेरनाश्रयत्वेनानित्यत्वप्रसङ्गात्। नापि जन्यं धर्मान्तरमस्तीत्यधिकं सादृश्यमुपेयम्, तवापि समानधर्मवत्त्वं व्यञ्जकं विना कथं तत्र सादृश्याभिव्यक्तिरिति चेत्, न। प्रतीतिबलात् द्रव्ये तथा, गुणादौ तु व्यभिचारात्। अत एव न व्यञ्जकेनान्यथासिद्धिः, तदभावेऽपि सादृश्यानुभवादिति ।

तत्तुच्छम् । विलक्षणं सुखद्वयं न सुखमात्रहेतुजन्यम्, सुखान्तरस्यापि तादृशत्वापत्तेः, किन्तु विलक्षणादृष्टजन्यम्। तच्चादृष्टं विहिततद्धेतुक्रियाविशेषानुष्ठाना-दन्येषामप्यस्तीति तेषामपि तादृशानि सुखानि भवन्तीति तेषु कारणविशेषप्रयोज्या विलक्षणजातिरस्ति । तस्मात् जीवानामानन्त्यात् अनादिनिधनत्वादुत्पन्नानागतविजातीयं न सुखमस्ति। एवं दुःखादिकार्यान्तरेऽपि । न ह्यनुत्पन्नजातीयमनुत्पत्स्यमानजातीयं वा

कार्यमस्ति । यच्च व्यक्तिनाशे जातेरनित्यत्वमापादितम्, तदपि न। नाशकाभावात् । अत एव द्वयोरपि तदवस्थानम् ।

अपि चैकत्र प्रतियोगिभेदेन सादृश्यं भिन्नम्, न त्वेकम्, सुसदृशमन्दसदृशव्यवहारात् । तथाच योग्यत्वादेकग्रहे सर्वग्रहप्रसङ्गः । प्रतियोगिगत-भूयोधर्मज्ञानस्य व्यञ्जकस्य क्रमात् क्रमे तदेव व्यवहारनिमित्तमित्युक्तम् ।

किञ्चैवं वैसादृश्यमपि स्यात् । न च सादृश्याभावः, तद्वैपरीत्यस्यापि सम्भवात् । सादृश्याभावत्वेनैव प्रतीतिः विशब्दस्य निषेधार्थकत्वात् इति चेत्, तर्हि गौरिव महिषीत्यत्र पावनत्वक्षीरवत्त्वादिना विवक्षितसादृश्यानाश्रये गवये वैसादृश्यं न स्यात् । न हि तत्र गोसादृश्यं तदभावश्च । तस्मात् साधर्म्यवैधर्म्ये सादृश्यवैसादृश्ये ।

यत्तु तद्वृत्त्यनेकधर्मवत्त्वं सादृश्यम्।

**तेनाभेदेऽपि**

**गगनं गगनाकारं सागरः सागरोपमः ।**

**रामरावणयोर्युद्धं रामरावणयोरिव।।**

इत्यादौ सादृश्यम् ।

न चैवं गोरपि गोसदृशत्वे गवयपदाभिधेयत्वापत्तिः । तत्र सादृश्यपदस्य विशेषे तात्पर्यात्। अन्यथा महिषेऽतिप्रसङ्ग इति ।

तन्न । तस्य तेन वा सदृश इति प्रयोगात् । न चाभेदे सम्बन्धः सहार्थो वा सम्भवति । गगनं गगनाकारमित्यादौ तु गगनाद्येव एतादृशधर्मवत् नान्यदित्यत्र तात्पर्यम् ।

यद्वा स्थानान्तरीयगगनसागरयोरुपमानत्वम्। तयोर्युद्धविशेषे तयोरेव युद्धान्तरमुपमानमिति ।

नन्वयं देवदत्तस्तदन्यो वा भवतु तत्सदृशस्तावदयमिति भेदाभेदसंशयेऽपि सादृश्यनिश्चयात् अतिरिक्तं सादृश्यमस्त्विति चेत्, न । देवदत्तधर्ममात्राभिप्रायेण एकदेशे सादृश्यपदप्रयोगात् । कथमन्यथा स एवायं न तु तत्सदृश इति, तत्सदृशोऽयं न तु स इति

प्रतीतिप्रयोगौ । न चात्र सदृशपदं भेदमात्रपरमिति युक्तम्, मुख्ये सम्भवति लक्षणाया अयोगात् । तस्मान्न पदार्थान्तरं सादृश्यमिति ।

स्यादेतत् । मा भूत् पदार्थान्तरम् । तथापि प्रत्यक्षाच्छब्दाद्वा गवये गोसादृश्यज्ञानात् गवयसदृशो गौरितिज्ञानमुपमितिः । न चैतत्प्रत्यक्षम्, असन्निहित-विशेष्यकत्वात्। नानुमानम्, लिङ्गाभावात् । न च गवयगतं सादृश्यं लिङ्गम्, अपक्षधर्मत्वात्।

अथ सदृशद्वयान्तरदर्शने यो यद्गतसादृश्यप्रतियोगी स तत्सदृश इति प्रत्यक्षेण व्याप्तिग्रहे सति गवयगतसादृश्यप्रतियोगित्वात् गौर्गवयसदृश इत्यनुमितिरिति चेत्, न । व्याप्तिग्रहं विनैव प्रथममपि प्रत्यक्षाच्छब्दाद्वा गोसदृशं गवयं ज्ञात्वा गवि गवयसादृश्यज्ञानोदयात् ।

किञ्च गवि गवयसादृश्यं न साध्यम्, प्रथमतस्तदप्रतीतेः, गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षम्, विशेष्यस्यासन्निकर्षादिति नानुमितिगम्यम् तल्लिङ्गस्यापि तद्गतत्वेनाप्रत्यक्षस्य लिङ्गान्तरगम्यत्वेनानवस्थानात् । न च गौरेतद्गवयसदृशः गवयगतभूयोऽवयवादिसामान्यवत्त्वात् गवयान्तरवदिति रामम् । गवयान्तराज्ञानेऽपि गवि गवयसदृशत्वप्रत्ययात् । अत एव गवि गवयगतगोसादृश्यं गोगतगवयसादृश्यं विनानुपपद्यमानं तत्कल्पयति। न हि गोसदृशो गवय एतद्विसदृशो गौरिति वाच्यमिति निरस्तम् । गवयनिरूपितगोसादृश्यप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात्। किञ्च तवार्थापत्तिरर्यतिरेक्यनुमानम्। न च गवयगतसादृश्यप्रतियोगित्वं गवि प्रत्यक्षादिना ज्ञातुं शक्यमित्युक्तम् ।

नन्वेवं करभे गोवैधर्म्यज्ञानात् गवि करभवैधर्म्यज्ञानमपि मानान्तरात् स्यादिति चेत्, न । गवि करभवैधर्म्यं यदि करभवृत्तिधर्माभाववत्त्वं तदा स्मृते गवि प्रागस्तितावदनुपलब्धेः गम्यमेव । अथ करभावृत्तिधर्मवत्त्वं तदा गोधर्मा गवि गृहीता एव इदानीं स्मृतगोधर्माणां करभेऽभावमात्रमधिकं गम्यम्। तच्च प्रत्यक्षादेव । अथ

तत्प्रतियोगिकैतन्निष्ठसादृश्ये भासमाने समानसंवित्संवेद्यतया एतत्प्रतियोगिकतन्निष्ठसादृश्यं वैधर्म्यञ्च ज्ञातमेवेति चेत्, न । विशेषणविशेष्यप्रतियोगिभेदेन समानसंवित्संवेद्यत्वासिद्धेः एतत्सदृश एतद्विधर्मा स इत्येतद्विशेष्यकप्रत्ययानुदयाच्च, तद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात्।

ननु प्रत्यक्षे विशेष्यसन्निकर्षो हेतुर्न तु यावद्विशेष्यसन्निकर्षः, गौरवात् । अन्यथा अतीतानागतवर्तमानव्याप्यविशेष्यकव्याप्तिप्रत्यक्षं न स्यादिति चेत्, न। अतीतानागतविशेष्ये सामान्यलक्षणाया: सत्त्वात् ।

अथ गवयसादृश्यं गवि गवयगतशृङ्गित्वादिसामान्यवत्त्वम् । तच्च गवये गोसादृश्ये भासमाने गवि भातमेव । यद्वा गोगतशृङ्गित्वादेर्गवयगतत्वं गवये गोसादृश्यम् । एवं तस्यैव गवयगतस्य गोगतत्वं गवि सादृश्यम् । तच्चेन्द्रियेणैव ज्ञातं सामान्यस्यैकत्वेनेन्द्रियसन्निकृष्टत्वात् अयं स इति विपरीतप्रत्यभिज्ञायामिवेति चेत्, सत्यं,

गोविशेष्यकगवयगतशृङ्गित्वादिज्ञानं नेन्द्रियजन्यं गोरसन्निकर्षात्। तस्मादेतत्सदृश एतद्विधर्मा एतस्माद्दीर्घ: स इति ज्ञानं नानुमानात् विशेष्यासन्निकर्षे तद्गतबहुलिङ्गाज्ञानात्। एवञ्च सप्रतियोगिकपदार्थज्ञाने तत्प्रतियोगिकपदार्थज्ञानमुपमानम्। **तदाहु:--** प्रत्यक्षादिकं विनार्थादर्थान्तरज्ञानं पूर्वेषामुपमानात् ।

विगर्हितमेतत् । तथाहि --परस्परसदृशं हस्त्यादिकं प्रत्यक्षम्। अतो यो यत्सादृश्यप्रतियोगी स तत्सदृश इति सामान्यतो व्याप्तिज्ञाने सति गौर्गवयसदृश: तत्सादृश्यप्रतियोगित्वात्, यथा भ्रातुर्भगिनी । गवयगतसादृश्यप्रतियोगित्वञ्च गोर्गवयगतसादृश्यवित्तिवेद्यमेव सादृश्ये गो: प्रतियोगित्वेनैव ज्ञानात् । अन्यथा सादृश्ये गोरनन्वयापत्ते: । यत्तद्भ्यां सामान्यतो व्याप्तिग्रहं विना एतत्सदृश: स इति फलासिद्धे:। यत्तद्भ्यां व्याप्तिग्रहेऽस्माकं व्यतिरेकी परेषामर्थापत्तिरित्यन्यदेतत्, सादृश्यस्योभयवृत्तिधर्मस्य किञ्चिद्विशेष्यसन्निकर्षात् प्रत्यक्षेण भानं यावद्विशेष्यसन्निकर्षस्याप्रयोजकत्वात् । अन्यथा

अयं स इति भ्रान्तविपरीतप्रत्यभिज्ञायां का गतिः । मनसैव चैतन्निष्ठसादृश्यप्रतियोगित्वग्रहः। प्रत्यक्षविशेष्यकत्वं परामर्शे न प्रयोजकमित्युक्तम् ।

कीदृशगवय इति जिज्ञासायां यथा गौस्तथा गवय इति श्रुतोत्तरस्य तथाभूते पिण्डे दृष्टे तथायमित्यतिदेशवाक्यार्थानुसन्धाने अयं गवयशब्दवाच्य इति मतिरुपमानफलम् । न चेयं वाक्यमात्रात्, अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात् । नापि प्रत्यक्षमात्रात्, अश्रुतवाक्यस्यापि प्रसङ्गात् । नापि तयोः समाहारात् । स हि प्रमाणसमाहारो वा फलसमाहारो वा । आद्ये प्रमाणत्वे सति समाहारः समाहृतयोर्वा प्रामाण्यम् । नाद्यः, फलानेकत्वे समाहारानुपपत्तेः तस्य परस्परसहकारिरूपत्वात् । नान्त्यः, वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् । वाक्यतदर्थयोः स्मृतिद्वारोपनयेऽपि समयपरिच्छेदासिद्धेः।

फलसमाहारे च तदन्तर्भावे शब्दानुमानयोरपि प्रत्यक्षत्वप्रसङ्गः । तत् किं तत्फलस्य प्रमाणबहिर्भाव एव अन्तर्भावे वा कियती सा मतिः, तत्तदसाधारणेन्द्रियादिसाहित्यम् अस्ति, तर्हि सादृश्यज्ञानेऽपि विस्फारितस्य चक्षुषो व्यापारः अस्मिन् सति तस्यानुपयोगात् उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यार्थस्मृतिमतः कालान्तरेऽपि तदनुसन्धानबलात् समयपरिच्छेदोत्पत्तेः । तस्मादागमप्रत्यक्षाभ्यामन्यदेवे-दमागमस्मृतिसहितं सादृश्यज्ञानमुपमानप्रमाणमिति **जरन्नैयायिका जयन्तप्रभृतयः** ।

तन्न । वैधर्म्याव्याप्तेः । यदोदीच्येन क्रमेण कं निर्गत्योक्तं धिक्करभमतिदीर्घग्रीवं प्रलम्बचपलौष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पशूनामिति तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गत्वा तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति । तत्र किं मानम् ? न तावदुपमानम् । सादृश्याभावात् । न च प्रमाणान्तरं सम्भवति।

उच्यते । न तावदनुगतं शक्यतावच्छेदकमुपलक्षणं वा विना प्रत्यभिज्ञानतः शरीरैकत्ववादिनां शरीरविशेषे चैत्रादिपदवदध्यक्षत्वेन शृङ्गग्राहकतया गवयादिपदशक्तिग्रहः, गवयान्तरेऽपि भावात् । नाप्यनध्यक्षे गत्यन्तरोपस्थिते परिभाषातः आकाशदिपदवत् । अत एवाध्यक्षत्वाच्च उपलक्षणस्य च शक्तौ बहिर्भावाभावात् तद्वदेव । नापि योगनिर्वचनात्

पाचकादिपदवत् । अन्यथा पचिक्रियानुपहिते पचतीति न प्रयोग: स्यात् । अतस्तदनुगुणज्ञानादियोगिनि शक्ति: । अवच्छेदकतया तूपलक्षणेऽपीति योगात्। नाप्युपस्थितनिमित्तसङ्कोचनात्, स्वर्गादिपदवत् तदभावात् । अत: गन्धाद्युपलक्षितेन पृथिवीत्वेन निमित्तेन पृथिव्यादिपदवत् सादृश्याद्युपलक्षिते गवयत्वादौ गवयादिपदानां शक्तिरिति तु परमार्थत: । अन्यथा फलस्याभासत्वे मानत्वविरोधात् । न च पूर्वं गवयत्वमुपस्थितम्, उपस्थापकाभावात् । न च गवयपदादेव तदुपस्थिति:, अन्योन्याश्रयात् ।

अथ वाक्यादेवानेन समय: परिच्छिन्न: केवलमग्रेऽप्यभिजानाति योगेनेदृशो गवयपदवाच्यत्वेनावगत: सोऽयमिति नोपमानस्य विषय इति चेत्, न। न हि सादृश्यमेव निमित्तम् । अप्रतीतानामव्यवहारप्रसङ्गात् गौरवाच्च । नापि गवयत्वम्, तदनुपस्थिते: । अत एव नोभयम्, स्वयं प्रतीतसमसङ्क्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्ते:। गवयत्वे ह्ययं व्युत्पन्न:, न गोसादृश्ये, निमित्तस्य गवयत्वस्य प्रतीते: ।

ननु यद्यपि तद्वाक्यं समयपरिच्छेदपूर्वं नाजीजनत्, तथापि तदेव वाक्यं स्मृतं सत् प्रवृत्तिनिमित्तं परिच्छेत्स्यति अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्यवसित: कालान्तरे । न च वाक्यार्थस्येवास्य प्रागेव बोधितत्वात् पर्यवसितमिति वाच्यम् । गो: सादृश्योपलक्षणत्वनिमित्तत्वयो: सन्देहात्, पश्चात् गवयत्वेऽवगते तर्कलाघवसहकारात् सादृश्यस्योपलक्षणत्वे निश्चिते गङ्गायां घोष इत्यत्रेवान्वयबोधो भविष्यतीति चेत्, न । उपलक्षणनिमित्तत्वसन्देहेऽपि यो गोसदृश: स गवयपदवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ मानान्तरोपनीतानपेक्षणात् रक्तारक्तसन्देहेऽपि पटो भवतीति वाक्यवत् । अन्यथा पर्यवसितेऽपि वाक्ये मानान्तरसहकारात् तदन्वयबुद्धौ वाक्यभेदापत्ते: । गङ्गायां घोष इत्यत्र तु पदार्थ एवान्वयायोग्य इति युक्तं तत्र मानान्तरापेक्षणम् । यदि च प्रतीतसंसर्गबलायातोऽप्यर्थो वाक्यस्यैव तदा वाक्यभेदापत्ति: ।

अथ तात्पर्यानुपपत्त्या यष्टी: प्रवेशयेतिवत् तल्लक्षणास्तु । गवयपदव्युत्पन्नं प्रति तद्बुद्धेरुत्पत्तये वाक्यमाप्तेनोक्तम्। तच्च न प्रवृत्तिनिमित्तोपादानं विना । न च गोसादृश्यं

तथेति तात्पर्यतो गोसादृश्यपदेन गोसमानाधिकरणं गवयत्वमुपलक्षितं कल्प्यते न तु यथा धूमोऽस्तीत्यत्र वह्नौ तात्पर्यमनुमानेन निर्वहतीति न लक्षणा । न चात्र प्रमाणान्तरमस्तीति येन तन्निर्वाह्यम्, उपमानस्यासिद्धे: । अन्यथा अन्योन्याश्रयात् । न च वाक्ये न लक्षणा तस्या: पदधर्मत्वादिति वाच्यम्। एकपद एव लक्षणा पदान्तरन्तु नियामकमित्यस्य वक्ष्यमाणत्वात् ।

अथ गवयत्वेन लक्षणया तदुपस्थितावपि व्यक्तिवाच्यता न ज्ञायेत तच्छब्दादिति विशिष्टवाच्यताग्राहकमानान्तरमवश्यं स्वीकरणीयम् । न च यन्निष्ठो धर्मो यत्पदवाच्य: सोऽपि तद्वाच्य इति नियम:, जातिपदे व्यभिचारादिति चेत्, न। प्रवृत्तिनिमित्तवद्वाच्यत्वबोधतात्पर्यकत्वेन ज्ञातातिदेशवाक्ये गवयत्वविशिष्टव्यक्तेरेव लक्षणत: । अथ यदि गवयत्वे साक्षात् तात्पर्यं गोसदृशपदस्य गृहीतम्, तदा लक्षणा। न च साक्षात् तात्पर्यमवधृतम् । अन्यथा धूमोऽस्तीत्यत्रापि साम्यादिति चेत्, न। उपस्थापकान्तराभावे तात्पर्यस्यैव साक्षात् तात्पर्यरूपत्वात् । न चोपमानमेव तथा । अन्योन्याश्रयात् ।

मैवम् । यत्र प्रवृत्तिनिमित्तविषयबोधने न तात्पर्यं यो गोसदृश: स गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं तत्राप्युक्तसामग्रीत: समयपरिच्छित्तिर्भवत्येव। न च तत्र व्युत्पित्सुव्युत्पत्तये प्रवृत्तिनिमित्तविशेषे तात्पर्यं यदनुपपत्तिर्लक्षणाबीजं स्यात् ।

अपि च धिक्करभमतिदीर्घग्रीवमित्यादिवाक्यस्य करभनिन्दातात्पर्यकस्य प्रवृत्तिनिमित्तपरत्वाभावेऽपि तादृशपिण्डमनुभवत: स्मरतश्च वाक्यार्थमयं करभशब्दवाच्य इति भवति मति: । न च तत्र प्रवृत्तिनिमित्तविशेषे तात्पर्यमस्ति लक्षणाया बीजम्, निन्दापरत्वात् ।

किञ्च सर्वत्रान्वयानुपपत्तिरेव लक्षणाबीजम् । यष्टी: प्रवेशयेत्यादावपि प्रकरणादिना पुरस्कारादिप्रयोजनकत्वं प्रवेशनस्यावगतम् । तादृशे च प्रवेशनादौ यष्ट्यादेरनन्वयात् । तात्पर्यानुपपत्तेरपि तात्पर्यमज्ञात्वा ज्ञातुमशक्यत्वेन तदर्थं प्रकारणादेरवश्योपजीव्यत्वात् । अथ प्रकरणादेरननुगम:। तात्पर्यव्याप्यत्वेन तदनुगमे तात्पर्यानुपपत्तिरेव तद्बीजमस्तु लाघवादिति

चेत्, न । धूमादिवदननुगतस्यापि व्याप्यत्वाविरोधात् । तस्मात् गवयशब्दः कस्यचिद्वाचकः शिष्टैः प्रयुक्तत्वादिति सामान्यतो निश्चितेऽपि गवयत्वविशिष्टो धर्मी गवयपदवाच्य इति लाघवान्निर्णेयम् । तच्च प्रमाणसहकारि। न च तस्यां दशायां प्रमाणान्तरमस्ति। अतो यत्प्रमाणसहकारि तत्प्रमाणान्तरमास्थेयम् ।

अथास्त्वनुमानम्। तथाहि--गवयशब्दो गवयत्वविशिष्टधर्मिवाचकः असति वृत्यन्तरे वृद्धैः प्रयुज्यमानत्वात् गवि गोशब्दवदिति चेत्, न। गवयत्वविशिष्टो यो धर्मी तस्य वाचकत्वग्रहेऽपि गवयत्वस्य प्रवृत्तिनिमित्तत्वासिद्धेः । न च शक्तिमज्ञात्वा वृत्यन्तरं क्वापि अवधारयितुं शक्यते । सामानाधिकरण्यमात्रस्य निमित्तोपलक्षणतासाधारणत्वात् ।

अथ गोसादृश्यस्य प्रवृत्तिनिमित्ततायां गौरवावतारे नोपमानस्यावतारः । तथा च तर्केण इतराप्रवृत्तिनिमित्तत्वे निश्चिते गवयपदं गवयत्वप्रवृत्तिनिमित्तकं इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति चेत् , न। तर्कस्यानिश्चायकत्वात् । न चायं तर्को व्याप्तिग्रहमूलकः येन विपर्ययानुमानादर्थसिद्धिः।

अथ गवयपदं सप्रवृत्तिनिमित्तकमिति सामान्यतो दृष्टमेव तर्कसहकृतं गवयपदस्येतराप्रवृत्तिनिमित्तकत्वं परिच्छिनत्ति, न तु मानान्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति चेत्, न। इदं सप्रवृत्तिनिमित्तकम् अन्यच्च न प्रवृत्तिनिमित्तमिति बुद्धावपि गवयत्वप्रवृत्तिनिमित्तकं गवयपदमिति मानान्तरं विना अप्रतीतेः, अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात् ।

अथ यथा इच्छायां सामान्यतो दृष्टेन विशेषबाधकसहकृतेन अष्टद्रव्यानाश्रयत्वं प्रतीयते, अन्यथा विशेषबाधकानां द्रव्यव्यतिरेकविषयकत्वेनाष्टद्रव्यानाश्रयत्वं केन ग्राह्यम् ; तथा अत्रापि गौरवाख्यतर्कसहकृतसामान्यतोदृष्टादितराप्रवृत्तिनिमित्तकत्वे ज्ञाते पश्चात् स व्यतिरेकी स्यात् कल्प्यप्रमाणान्तरापेक्षया क्लृप्तप्रमाणसहकारित्वस्य युक्तत्वादिति चेत्, न।

इच्छायामेकैकबाधसहकृतापरबाधकैरेव तावद्द्रव्यविशिष्टवैशिष्ट्यादष्टद्रव्यानाश्रयत्व-परिच्छेदात् न तु सामान्यतोदृष्टेन विशेषणद्वयोः परिच्छित्यैव विशिष्टवैशिष्ट्यबोधनिर्वाहात्

तर्कानवतारदशायां तस्य परिच्छेदकत्वाच्च । न च व्याप्तिपरमिदं वाक्यं यो गोसदृश: स गवयपदार्थ इति वाक्यादवगतव्याप्तेरनुमित्युदयादयं गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावगतपिण्डवदिति वाच्यम्। न हि गोसदृशं ज्ञात्वा अनेन पृष्ट: स किंशब्दवाच्य इति। किन्तु सामान्यतो गवयपदार्थमवगत्य स कीदृगिति । तथाच यद्योगप्राथम्याभ्यां तस्यैव व्याप्यत्वम् । तत: किं तेन ।

अथ लक्षणपरमिदं वाक्यम् । किंलक्ष्यकोऽसाविति प्रश्नार्थ:। एवञ्च वाच्य इति प्रयोक्तव्यपरम्, असौ गवय इति व्यवहर्तव्य: गोसदृशत्वात्, यस्तु न तथा नासौ गोसदृश: यथा हस्तीति चेत्, न । न हि हस्त्यादीनां विलक्षणत्वे प्रमाणमस्ति, सर्वप्रयोगस्य दुर्ज्ञेयत्वात् । कतिपयव्यवहारस्यानैकान्तिकत्वात्। न च कीदृक् किंलिङ्गक इति प्रश्नार्थ: । न ह्यनेन लिङ्गमज्ञात्वा गवयपदस्य वाचकत्वं कस्यचिच्च तद्व्याप्यत्वं नावगतम्, येन तदर्थं प्रश्न: । प्रवृत्तिनिमित्तविशेषलिङ्गे प्रश्न: गवयपदं येन निमित्तेन वर्तते तस्य किं लिङ्गमित्यर्थ: इति चेत्, न हि तदनुमानमेवेत्यनेन निश्चितं यत इति स्यात् । ज्ञानहेतुमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेत्, न ।

अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत्, वनं गतो द्रक्ष्यसीति । तस्मान्निमित्तभेदे एवायं प्रश्न: कीदृग्गवय: केन निमित्तेन गवयपदं प्रवर्तते, गवयत्वस्य साक्षादुपदर्शयितुमशक्यत्वात्। पृष्ट: स तदुपलक्षकं सादृश्यमाचष्टे। पश्चाच्च दृष्टेऽपि पिण्डेऽतिदेशवाक्यार्थं स्मरतस्तर्कसहकारात् गवयत्वविशिष्टो धर्मी गवयशब्दवाच्य इति प्रवृत्तिनिमित्तविशेषपरिच्छित्तिरुपमानफलम् ।

अथ गौरवेण अन्यानिमित्तकत्वे सति सनिमित्तकत्वादिति व्यतिरेकिण एव गवयत्वप्रवृत्तिनिमित्तकत्वधीरिति चेत्, न। व्याप्त्यमूलकतया गौरवस्य तद्विपर्ययस्य वा अप्रमाणत्वात् तत्राप्रमाणे सहकारितामात्रेण अन्यनिमित्तत्वशङ्कायां कथमुपमानमिति चेत्, न। गौरवसहकृतोपमानादेवान्यानिमित्तकत्वे सति सनिमित्तकत्वपरिच्छेदात्। अस्तु गौरवसहकृतात् सनिमित्तकत्वमानादेव गवयत्वनिमित्तकत्वसिद्धि: । न चैवम्, व्यतिरेक्युच्छेदात् ।

कार्यत्वे पर्यवसिते बाधकानन्तरं व्यतिरेक्युदयात् । यत्र च प्रथमं व्यतिरेकाभावः तत्र कार्यत्वादेव फलम्। अन्यानिमित्तकत्वं सनिमित्तकत्वञ्चेति बुद्धावपि गवयत्वनिमित्तकं गवयपदमिति बुद्धेरसिद्धेरुक्तत्वात्। किञ्च अत्र व्यवहारेण प्रवृत्तिविशेषे पदशक्तिग्रहो न तु तन्निमित्ते तेनाप्रतिबन्धात्, न गौरवातिव्याप्त्यादिनेतरनिरासे गोत्वादेर्निमित्तत्वग्रहः, गौरवादेरतर्कत्वात् अप्रमाणत्वाच्च । तस्मात् व्यक्तौ शक्तिग्रह एव लाघवादिसाहित्येन इतरानिमित्तकत्वे सति गोत्वादिनिमित्तकत्वमवधारयति।

सर्वत्र तदेवोपमानफलमिति **कश्चित् । तन्न ।** शक्तिग्राहकमेव लाघवादिसहकृतं निमित्तमप्यवधारयति, यथा क्षित्यादौ कर्तुरेकताम् ।

अथैवं भिन्नकर्तृकेषु लाघवात् कार्यमेककर्तृतां बोधयेत् । बोधयत्येव। पश्चात् बाधकेन त्यज्यते इति चेत्, न । बाधितविषयत्वेनाभासत्वात् अलघुनि लघुज्ञानस्य अयथार्थत्वेन तज्जन्यानुमितेराभासत्वाच्च । न चोपमितिरेव इतरव्युत्पत्तिः, अन्यथा तदनिरुक्तेरिति वाच्यम्। व्युत्पत्तेः शब्दसहकारित्वे मानान्तरत्वे व्याघातात्। व्युत्पत्तिस्तु यां बुद्धिमासाद्य पदार्थविशेषबोधः सा ।

**अन्ये तु** यत्तदादिपदानामनुगतैकरूपाभावेनैकत्रैव शक्तिग्रहात् अन्यत्रापीति पदान्तरव्यवहारः पदान्तरवैधर्म्यात्, न प्रमाणान्तरमुपमानमिति । **तन्न** । बुद्धिस्थत्वादिनोपलक्षणेन साधारणेन शक्तिग्रहात् बुद्धिविशेषादेव विशेषपर्यवसानम्। तथैव व्यवहारात् । अन्यथा मानान्तरेऽपि दोषः । न ह्यनुगतरूपप्रतीतावेव तत्र शक्तिग्रहः ।

**यत्तु** मात्रादिपदानां जनकस्त्रीत्वादिना शक्तिग्रहे कथं मैत्रमात्रादिलाभः । न च समभिव्याहारविशेषादिति वाच्यम्। पदार्थो हि पदार्थान्तरमन्वेति, जनकस्त्रीत्वञ्च न तथेति कथं मैत्रादिना जनकत्वान्वय इति मानान्तरमिति, **तन्न** । जनकत्वस्य जन्यसापेक्षत्वेन योग्यत्वादिना मैत्रेणान्वयात् ।

लक्षणन्तु उपमितिकरणत्वम् । उपमितित्वञ्च जातिः । न चासिद्धिः। कारणविशेषे कार्यवैजात्यमावश्यकमिति कारणव्यङ्ग्यत्वात् ।

यद्वा नियतधर्मसमानाधिकरणशब्दप्रवृत्तिनिमित्तज्ञानमुपमितिः । प्रकारतया शब्दशक्तिविषयत्वं निमित्तत्वम् । अगृहीतसमयकसंज्ञया वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तप्रकारतापरिच्छेदो वा, किञ्चिद्वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तप्रकारता-परिच्छेदो वा । गोविसदृशो न गवय इत्यत्रापि परम्परया तत्र तात्पर्यमस्त्येवेति सर्वमवदातम्।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ तृतीयः उपमानखण्डः समाप्तः।**

## शब्दखण्डः

अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्।

ननु शब्दो न प्रमाणम्। तथाहि--करणविशेषः प्रमाणम्। करणञ्च तत् यस्मिन् सति क्रिया भवत्येव। न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणम्। न च शब्दो न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातः, अस्याप्रामाण्येऽपि एतदुत्थाप्यमानाविसंवादादिति चेत्, न। आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वेन तथाभूतात् प्रमोत्पत्तेरावश्यकत्वात्। अतथाभूतत्वे च फलाजनकत्वस्य करणान्तरसाम्यात्।

तथापि शब्दो न प्रमाणान्तरं पदार्थसंसर्गस्यानुमानादेव सिद्धेः। तथाहि--गामभ्याज दण्डेनेति पदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेतिवत्। योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् तत्परसन्निधिमत्त्वाद्वेति न हेतुः। संसृष्टो हि योऽर्थस्तत्परत्वं तत्परसन्निधिमत्त्वं वा असिद्धं, संसर्गस्य प्रागप्रतीतेः। संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारकप्रतीतिपरसन्निधिमत्त्वं वामहेतुः, अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारि। संसर्गस्य बहुप्रकारकत्वेऽपि नानभिमतसंसर्गसिद्धिः तस्य तात्पर्याविषयत्वात्। अन्यथा शब्दादप्यभिमतान्वयबोधो न स्यात्। अत एव विशेषणविशेष्यभाववदर्थकानि तद्बोधपूर्वकाणि वेति न साध्यम्।

**यत्तु** स्मारितार्थसंसर्गवन्तीति साध्यम्। मत्वर्थश्च लिङ्गतया ज्ञापकत्वम्। न चान्योन्याश्रय:, पूर्वपूर्वानुमितिहेतुत्वेन अनादित्वात्। **तन्न**। ज्ञापकत्वमात्रेणार्थासिद्धे:। प्रमापकत्वे तेनैव व्यभिचारात्। ज्ञानावच्छेदकतया च संसर्गसिद्धि: ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात्। संसर्गे च सम्बन्धिन एव विशेषकत्वात्। पक्षधर्मताबलात् व्यापकत्वेनागृहीतस्यापि संसर्गविशेषस्य सिद्धि:।

अथैवं भ्रान्तिज्ञानमपि भ्रम: स्यात्। न चेष्टापत्ति:, ईश्वरस्यापि भ्रान्तत्वापत्ते:। इदं रजतमिति भ्रमादिव शुक्तौ रजतज्ञानवानयमिति भ्रमस्य ज्ञानात् भ्रान्तिज्ञप्रवृत्त्यापत्तेश्च। **यत्तु** भ्रमविषयविषयकत्वेन न भ्रमत्वं भ्रमविषयाणां सिद्ध्यसिद्धिपराहतत्वात् इति, तत्र वक्ष्याम:। मैवम्, असद्विषयकत्वेन न भ्रमत्वं भ्रमविषयाणां सत्त्वात्। किन्तु व्यधिकरणप्रकारकत्वेन। न च भ्रमस्य ज्ञाने व्यधिकरणं प्रकार:, रजतत्वप्रकारकत्वस्य भ्रमेऽपि सत्त्वात् । अन्यथा भ्रान्त्युच्छेद: प्रमाणाभावात्।

ननु प्रतारकवाक्ये व्यभिचार: विशेषदर्शनेन तत्र संसर्गज्ञानाभावात्। न च संसर्गमप्रतीत्य वाक्यरचना न सम्भवतीत्याहार्यं तस्य संसर्गज्ञानं सम्भवतीति वाच्यम्। तावत्पदज्ञानादेव शुकस्येव वाक्यरचनोपपत्ते:। अन्यत्रापि तस्यैव तन्त्रत्वादिति चेत्, न। एतद्वाक्यमेतस्य पदार्थसंसर्गं बोधयिष्यतीत्याशयेन वाक्यप्रयोगात् तस्यापि संसर्गज्ञानात् योग्यताविरहाच्च। अत एव विसम्वादिवाक्ये शुकवदुच्चरिते न व्यभिचार: । शब्दात् संसर्गप्रत्ययस्तु योग्यताभ्रमात्।

अथ संसर्गज्ञानं विना शुकस्यान्यस्य वा सम्वादिवाक्ये भ्रान्तप्रतारकवाक्ये च व्यभिचार: कथं वा तत्र संसर्गप्रमा वक्तृज्ञानानुमानासम्भवादिति चेत्, न। यदि तत्र संसर्गप्रमा तदा वेदतुल्यतेत्युक्तम्। आकाङ्क्षा योग्यता आसत्तिश्च ज्ञातोपयुज्यते। अन्यथा शाब्दभ्रमानुपपत्तेरिति।

उच्यते। अर्थज्ञानं प्रवर्तकम्। न तु तज्ज्ञानज्ञानम्, गौरवात् व्यभिचाराच्च। अतो रजतज्ञानवानयमिति ज्ञानं न प्रवर्तकम् । किन्त्विदं रजतमिति ज्ञानम्। इदमपि ज्ञानं

रजतविषयकमिति चेत् , सत्यम्। न तु रजतत्वप्रकारकं प्रवर्तकञ्च तथा। अन्यथा भ्रान्तस्येव भ्रान्तिज्ञस्यापि प्रवृत्तिप्रसङ्ग: तदुभयसङ्करापत्तिश्च । एतेन लक्षणाद्यनुरोधात्तात्पर्यग्रहो वाक्यार्थधीहेतु:। तात्पर्यञ्च पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वम्। तथाच तद्ग्राहकानुमानादेव तात्पर्यज्ञानावच्छेदकतया संसर्गसिद्धिरित्यपास्तम्। किञ्च व्यापकतावच्छेदकप्रकारिका अनुमिति:। अत: स्मारितपदार्थसंसर्गज्ञानपूर्वकाणीत्यनुमिति: स्यात्, न तु रजतज्ञानपूर्वकाणीति । तस्मात् प्रवर्तकं ज्ञानं शब्दादेव। अत एव प्रवृत्त्यर्थमनुवादकता शब्दस्येत्यपास्तम्। शाब्दानुमित्योर्भिन्नप्रकारकत्वात् एकविषयत्वाभावेन अननुवादकत्वात् तस्यैव प्रमाणत्वात्।

नन्वेते पदार्थास्तात्पर्यविषयमिथ:संसर्गवन्त: आकाङ्क्षादिमत्पदस्मारितत्वात् योग्यतासत्तिमत्वे सति संसर्गपरपदस्मारितत्वाद्वा। अनाप्तोक्ते योग्यताविरहात् न व्यभिचार:। तत्र बाधकसत्त्वात्, तज्जन्यज्ञानस्य भ्रमत्वात् एकाकारवाक्यस्यापि बाधकसत्त्वासत्त्वाभ्यां योग्यायोग्यत्वात्।

अथ प्रतिपत्तुर्जिज्ञासां प्रति योग्यता। सा च श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावरूपाकाङ्क्षा। बाधकप्रमाविरहो योग्यता। अव्यवहितसंसर्ग-प्रतियोगिज्ञानमासत्ति:। ताश्च स्वरूपसत्यो हेतवो न तु ज्ञाता:, गौरवात् । तद्बोधं विनाऽन्वयानुभवे विलम्बाभावात् संसर्गनिरूप्यत्वेन प्रथमं दुरवधारणत्वाच्चेति न तानि लिङ्गविशेषणानीति चेत्, न। योग्यतादिशून्यत्वेऽपि तदभिमानेन संसर्गप्रत्ययात्। अन्यथा शाब्दाभासोच्छेदप्रसङ्ग:। राजा पुत्रमाकाङ्क्षति पुरुषं वेति संशये विपर्यये च वाक्यार्थधीप्रतिबन्धाच्च। योग्यतायाश्च संशयसाधारणं ज्ञानमात्रं हेतु:। स्वपरबाधकप्रमाविरह: क्वचित् निश्चीयतेऽपि। यथेह घटो नास्तीत्यत्र स्वयोग्यानुपलब्ध्या घटाभावनिश्चयेनान्यस्यापि घटप्रमाविरहो निश्चीयते। क्वचित् बाधकप्रमामात्रविरहसंशयेऽप्यन्वयबोध: बाधसंशयस्यादूषणत्वात्। किञ्च तवापि योग्यतादिकं प्रामाण्ये प्रयोजकम्। आप्तोक्तत्वत्य तथात्वे गौरवात् । अनाप्तोक्तेऽपि संवादेन

प्रामाण्याच्च। एवञ्च ज्ञायमानकरणे प्रामाण्यप्रयोजकतया ज्ञानमावश्यकमिति तासां ज्ञानं हेतु:। तच्च समभिव्याहारविशेषादिनेति।

मैवम् । यत्र विमलं जलं इत्यश्रुत्वैव नद्या: कच्छे महिषश्चरतीति शृणोति तत्राकाङ्क्षादिकमस्ति। न च नदीकच्छयो: संसर्ग इति, व्यभिचारात्। अत एव न तन्मात्रं प्रयोजकं प्रामाण्ये। अथ यावत्समभिव्याहृतेत्यपि लिङ्गविशेषणं कतिपयपदस्मारिणस्तु संसर्गप्रत्ययो लिङ्गाभिमानादिति चेत्, न। तत्सन्देहेऽपि वाक्यार्थावगमात्। तत्र संसर्गभ्रान्तिरिति चेत्, न। अन्यकारणाभावेन पदमेव भ्रान्तिजनकम्। तथाचादुष्टं सत्तदेवाभ्रान्तिं जनयत् केन वारणीयम्। असंसर्गाग्रहस्तत्रेति चेत्, न। संसर्गे बाधकाभावात्।

अथाप्तोक्तत्वं लिङ्गविशेषणम्। तदेव वा लिङ्गम्। न च नदीकच्छयो: संसर्गे आप्तोक्तत्वम्। आप्तोक्तत्वञ्च प्रामाण्ये तन्त्रमिति तद्वत्तया ज्ञायमानस्य हेतुत्वेन तत्र ज्ञानमावश्यकं व्याप्तिमत्तया ज्ञातस्येव लिङ्गस्य। तदवगमश्च लोके भ्रमाद्यमूलकतया महाजनपरिग्रहेण वेदे स्मृतौ चेति चेत्, न। यत्र कुत्रचिदाप्तत्वमनाप्तस्यापि। सर्वत्राप्तत्वमप्रमितम्। भ्रान्ते: पुरुषधर्मत्वात् । प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वञ्चाप्तत्वं प्रथमं दुर्ग्रहम्, भ्रमाद्यमूलकत्वस्य प्रवृत्तिसंवादादेश्च तद्ग्राहकस्याज्ञानात् । प्रवृत्तिश्च सन्देहादपि। किञ्च प्रकृतसंसर्गे अयमभ्रान्तो यथार्थज्ञानवान्वेति संसर्गमप्रतीत्य ज्ञातुमशक्यं वाक्यार्थस्यापूर्वत्वात्।

वयन्तु ब्रूम:--बाधकप्रमाणाभावो योग्यता सा च न लिङ्गविशेषणं बाधकप्रमाणमात्रविरहस्य सर्वत्र निश्चेतुमशक्यत्वात् । तत्संशयेऽपि शब्दादन्वयबोधाच्च । शब्दप्रामाण्ये तु योग्यताया: संशयनिश्चयसाधारणं ज्ञानमात्रं प्रयोजकमिति शब्द: प्रमाणमिति।

**जरन्मीमांसकास्तु** लोके वक्तृज्ञानानुमानात्तदुपजीविसंसर्गानुमानाद्वा वाक्यार्थसिद्धौ शब्दस्यानुवादकत्वम्। वेदे तु तदभावात् स्वातन्त्र्येण प्रामाण्यमिति वदन्ति। तन्न। वेदे क्लृप्तसामग्रीतो लोकेऽपि संसर्गप्रत्ययादन्यथानुवादकतापि न स्यात् लिङ्गस्य पूर्वत्वेऽपि व्याप्तिस्मृतिविलम्बेन तद्विलम्बात्। अनाप्तोक्तौ व्यभिचारात् वेदतुल्यापि सामग्री न

निश्चायिकेति चेत्, न। चक्षुरादेस्तथात्वेन तच्छङ्कायामपि प्रमापकत्वात्। ज्ञायमानं करणं सन्देहे न निश्चायकं लिङ्गवदिति चेत्, न ।

संशयो हि न वाक्ये तस्य निश्चयात्, न तज्जन्यज्ञानप्रामाण्ये तस्य तदुत्तरकालीनत्वात्, नाप्तोक्तत्वे तन्निश्चयस्यानङ्गत्वात्। ननु लोके आप्तोक्तत्वसन्देहे वाक्यार्थधीर्नेति तन्निश्चयो हेतुः । तथाच वाक्यार्थगोचरयथार्थज्ञानजन्यत्वग्राहकात् तदुपजीविनोऽनुमानात् वाक्यार्थधीरिति चेत्, न । वेदे तद्रहितस्यापि सामर्थ्यावधारणात् तदनिश्चयेऽपि वेदानुकारेण पठ्यमानमन्वादिवाक्येऽपौरुषेयत्वाभिमानिनोगौडमीमांसकस्यार्थ-निश्चयात्। न चासौ भ्रान्तिः, बाधकाभावात् पौरुषेयत्वनिश्चयदशायामपि तस्य तथात्वात्।

न चासंसर्गाग्रहमात्रं तत्, अर्थस्य तथाभावेऽपि असंसर्गाग्रहत्वे संसर्गोच्छेदापत्तेः। न चाप्तोक्तत्वनिश्चयरूपकारणबाधात् संसर्गज्ञानबाधः, व्यभिचारेण हेतुतायामेव बाधात् लौकिकत्वेन ज्ञाते तदङ्गमिति चेत्, न। मानाभावात् वाक्यार्थस्यापूर्वत्वेन लिङ्गाभावेन तद्ग्रहासम्भवात्।

ननु अनाप्तोक्तत्वशङ्काव्युदासोऽङ्गं स च वेदेऽपौरुषेयत्वनिश्चयात् लोके चाप्तोक्तत्वावधारणादिति चेत्, न। तस्याशक्यत्वात्। यदि चापौरुषेयत्वनिश्चये सत्येव वेदादर्थप्रत्ययः तदा दोषवत्पुरुषाप्रणीतत्वे सत्याकाङ्क्षादिमत्पदस्मारितत्वेन वेदे पदार्थसंसर्गसिद्धिरस्त्विति वेदोऽप्यनुवादकः स्यात्। तदुक्तं,

**"व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।**

**अन्विता इति निर्णीते वेदस्यापि न तत्कुतः"** ।। न चैवं शब्दस्य प्रमाणत्वमपि, अनुमानादेव वाक्यार्थप्रमोत्पत्तेरिति।

**प्राभाकरास्तु** व्यभिचारिशब्दव्यावृत्तमव्यभिचार्यनुगतप्रमाप्रयोजकमुपेयं यदभावाद-नाप्तोक्तवाक्यादप्रमा अन्यथा कार्यवैचित्र्यं न स्यात् , तत्र ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यत्वात् प्रमाहेतुत्वाद्वा व्याप्तिवच्छब्दशक्तिवच्चेति, अन्यथा शब्दाभासोच्छेदप्रसङ्गः। न चाप्तोक्तत्वं तथा, संवादात् प्रमाणे शुकोदीरिते

भ्रान्तप्रतारकसंवादिवाक्ये वेदे च तदभावादाप्तोक्तत्वानुमाने व्यभिचारिव्यावृत्त-लिङ्गाभावाच्च। भावे वा तद्वत एव शब्दस्य प्रत्यायकत्वात्।

एतेनाप्रमाहेतुत्वं न भ्रम-प्रमाद-विप्रलिप्सा-करणापाटवानां परस्परं व्यभिचारात् मिलितस्याव्यापकत्वात्। किन्त्वाप्तोक्तत्वाभावस्याप्रमाहेतुत्वं तदभावश्चाप्तोक्तत्वं प्रमाहेतुरित्यपास्तं। आप्तोक्तत्वस्य प्रथमं लिङ्गाभावेन ज्ञातुमशक्यत्वात्।

अत एव व्यभिचारशङ्काविरहो हेतु: स च लोके भ्रमादिमूलेत्याप्तोक्तत्वानुमाना-दुच्छिद्यते, वेदे चापौरुषेयत्वनिश्चयेनेति निरस्तम्। अभिमतवाक्यार्थस्यापूर्वत्वेन साध्याप्रसिद्धे: । वेदे सदोषपुरुषाप्रणीतपदस्मारितत्वेन संसर्गसिद्धेरनुवादकतापतेश्च। नापि दोषाभाव: भ्रान्तप्रतारकवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे तदभावात्। दोषाभावस्य हेतुत्वात् तत्र वाक्यं मूकमेव व्यवहारस्तु प्रत्यक्षादिति चेत्, न।

अनुभवापलापापातात्, तद्धेतुत्वे विवादात् वेदेऽप्यनुवादकतापत्तेश्च।

किञ्च दोषाभावस्य प्रमाहेतुत्वेऽप्रमायां दोष: कारणं तस्य च प्रत्येकं हेतुत्वे व्यभिचार: मिलितस्य तत्वे एकस्मादप्रमा न स्यात् भ्रमादीनां प्रत्येकं दोषत्वेऽननुगम: मिलितस्य तु तत्वे एकस्मादप्रमानुदयप्रसङ्ग:। तस्मात् लाघवात् यथार्थतात्पर्यकत्वं शाब्दप्रमाप्रयोजकं तत्र यथार्थवाक्यार्थप्रतीतिप्रयोजकत्वं लोकवेदसाधारणं तदभावादप्रमा स एव दोष:, न हि जात्यैव कश्चिद्दोष:, तद्विघातकत्वाच्च भ्रमादीनां दोषत्वं। अतएव भ्रान्तप्रतारकवाक्यं शुकादिवाक्यञ्च प्रमाणं संवादात्। अतएवान्यघटाभिप्रायेण गेहे घटोऽस्तीत्युक्ते यत्र घटान्तरं दृष्ट्वा तमानयति तत्रान्यपरत्वाच्छब्दो न प्रमाणं व्यवहारस्तु प्रत्यक्षादेव । यष्टी: प्रवेशयेति च मुख्यार्थबोधे न प्रमाणं यत्पर: शब्द: स शब्दार्थ इति न्यायात्। तच्च तात्पर्यं ज्ञातमुपयुज्यते । ज्ञायमानकरणे ज्ञानोपयोगि-व्यभिचारिवैलक्षण्याद्व्याप्तिवच्छक्तिवच्च, अन्यथा अन्यपरादन्यान्वयबोधो न स्यात् इति शब्दाभासोच्छेदप्रसङ्ग:, तद्भ्रमाच्च शाब्दभ्रम:।

अतएव यष्टी: प्रवेशयेत्यत्र लक्षणा नानार्थे विनिगमना च तयोस्तात्पर्यग्रहमूलकत्वात्। यदि च यत्र वास्तवं तात्पर्यं तं शब्दो बोधयति तदा लक्षणायां मुख्यार्थान्वयानुपपत्त्युपयोगो न स्यात्। अतएव पचतीत्युक्तेऽन्योक्तेन स्वयं स्मृतेन वा कलायपदेनोपस्थिते कलायं पचतीत्यन्वयबोधो न भवति तात्पर्यानिश्चयात्। न च तात्पर्यग्राहकस्य प्रकरणादे: प्राथम्यादावश्यकत्वाच्च शब्दसहकारिता न तु तात्पर्यग्रहस्येति वाच्यम्। तेषामननुगतत्वेन परस्परव्यभिचारादहेतुत्वात् तात्पर्यग्राहकतात्वननुगतानामपि व्याप्यत्वात् धूमादीनामिव। तच्च तात्पर्यम् वेदे न्यायगम्यं, यत्र न्यायात् तात्पर्यमवघार्यते स एव वेदार्थ:, लोके च न केवलं न्यायानुसारि तात्पर्यं इति न न्यायगम्यं किन्तु पुमभिप्रायनियन्त्रितं, न्यायाविषयेऽपि पुरुषेच्छाविषये प्रतीतिजनकत्वात् पुंवचसाम्।

वक्ता च परकीयवाक्यार्थज्ञानोत्पादनेच्छया वाक्यमुच्चारयति सा चेच्छा यदि वक्तुर्यथार्थवाक्यार्थज्ञानपूर्विका भवति तदैव परं तदुच्चारणस्य पुमभिप्रेतयथार्थ-वाक्यार्थज्ञानपरत्वं यथार्थज्ञानेच्छाव्याप्यं निर्वहतीति वक्तुर्यथार्थवाक्यार्थज्ञानवत्तामविज्ञाय यथार्थप्रतीतिपरत्वं ज्ञातुं न शक्यत इति प्रथममाप्तवाक्याद्वक्तृज्ञानानुमानपूर्वकमर्थतथात्व-मनुसन्धाय यथार्थतात्पर्यनिश्चय:। अनुमानञ्चेदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यत्वादिति। ततो भ्रमादिनिरासे सति परिशेषाद्वाक्यार्थज्ञानानुमानं, अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात् अहमिव, न त्वाप्तत्वात् साध्याविशेषात्। तत एते पदार्था यथोचितसंसर्गवन्त: यथार्थज्ञानविषयत्वात् आप्तोक्तपदस्मारितत्वाद्वा मदुक्तपदार्थवदिति।

ननु वक्तुर्ज्ञानविशेषोऽनुमेय: ज्ञाने चार्थ एव विशेष: न त्वर्थाधीनोऽन्य:, अर्थेनैव विशेष: इत्यौपचारिकी तृतीया । तथाच वाक्यार्थज्ञानविशेषोऽनुमेय: तस्य चाप्रसिद्ध्या न व्याप्तिग्रह:। अत एवास्मिन् वाक्यार्थे अयमभ्रान्त आप्तो वेति ज्ञातुमशक्यमिति शब्द एव तमर्थं वोधयेदिति चेत्, न, तात्पर्यावधारणार्थं त्वयाप्यशाब्दा एव संसर्गविशेषप्रततिरवश्याभ्युपेयत्वात् अन्यथा क्व तात्पर्यनिरूपणं । अतएव

आप्तोक्तत्वभ्रामाद्यजन्यत्वनिरूपणमपि सुकरम्। शाब्दन्तु संसर्गज्ञानं प्रथमं न भवति ज्ञानान्तरन्तु भवत्येव। न चैवं शब्दो न प्रमाणं तदर्थस्य प्रागेव सिद्धेरिति वाच्यम् । तवापि तुल्यत्वात् ।

ननु तथापि कथमर्थविशेषसिद्धि: विशेषेण व्याप्त्यग्रहादिति चेत्, न। यथा यो यत्र प्रवर्तते स तज्जानातीति सामान्यतोव्याप्तिज्ञाने पाकादौ प्रवृत्तिदर्शनात् पाकविषयककार्यताज्ञानानुमानं, यथा च चेष्टाविशेषदर्शनात् दशसंख्याभिप्रायमात्रज्ञाने घटे तच्चेष्टादर्शनात् घटे दशत्वज्ञानं तथा सामान्यतोव्याप्त्यात्रापि विशेषसिद्धि:।

यद्वा इदं वाक्यं साकाङ्क्षैततदर्थविषयकैकज्ञानहेतुकं आप्तोक्तत्वे सति एतदर्थप्रतिपादकत्वात् मद्वाक्यवत्, तत एते पदार्था: परस्परसंसर्गवन्त: साकाङ्क्षत्वे सत्येकज्ञानविषयत्वात् सत्यरजतज्ञानविषयवत्, एवं वक्तुर्यथार्थवाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थप्रतीतिपरत्वज्ञानं ततो वेदतुल्यतया शब्दादर्थप्रत्यय इत्यनुवादक: शब्द: वक्तृज्ञानावच्छेदकतया संसर्गानुमानाद्वा वाक्यार्थस्य प्रागेव सिद्धे:।

यत्तु संसर्गाग्रहे भ्रम: तदभावश्च संसर्गग्रह एवेति भ्रमाभावेऽनुमीयमाने संसर्गज्ञानमेवानुमितं इत्याप्तत्वानुमानान्तर्गतमेव वक्तृज्ञानानुमानं न तु वक्तृज्ञानानुमाने तल्लिङ्गं इति। **तन्न**, भ्रमोहि ज्ञानद्वयं अगृहीतभेदं तदभावश्च गृहीतभेदज्ञानं, न हि ज्ञानाभावे सुषुप्तौ भ्रमव्यवहार:, ततो भ्रमाभावनिश्चयानन्तरं वक्तृज्ञानानुमानम्। किञ्च यद्याप्तोक्तत्वानुमानमेव वक्तृज्ञानानुमानं, तर्हि यादृशं लिङ्गं तादृशमेव गमकमस्त्विति।

अत्रोच्यते। यथार्थवाक्यार्थधीपरत्वं न ज्ञातं प्रमोत्पादकं गौरवात् वाक्यार्थनिरूप्यत्वेन प्रथमं ज्ञातुमशक्यत्वाञ्च तस्यापूर्वत्वात्। यच्च लोके भ्रमादिनिरासानन्तरं वक्तृज्ञानावच्छेदकतया तदग्रे स्वातन्त्र्येण वा पुमभिप्रेतवाक्यार्थज्ञाने तत्प्रतीतिपरत्वं प्रकरणादिना ज्ञायत इत्युक्तं, तन्न, वाक्यार्थमज्ञात्वा अत्रायमभ्रान्त इति ज्ञातुं पुरुषत्वाद्वक्तुर्भ्रमप्रमादसम्भवेन प्रथमं भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यत्वात् प्रवृत्तिसंवादार्ज्ञानोत्तरकालीनत्वात् भ्रमादिजन्यविलक्षणत्वेन च शब्दस्याज्ञानात् ज्ञाने वा यादृशो

ज्ञोलिङ्गत्वं तस्यैव प्रत्यायकत्वं अव्यभिचारात् । वेदेऽपि वाक्यार्थमविज्ञाय तद्यथार्थप्रतीतिपरत्वं न्यायेनापि ज्ञातुमशक्यं विषयनिरूप्यत्वात् प्रतीतेः लोके तात्पर्यनिरूपणार्थमशाब्दवाक्यार्थप्रतीतेः प्रथमं त्वयापि स्वीकारात्।

अन्यथा वक्तृज्ञानानुमानं न स्यात्। न च लोकवन्मानान्तरात्तदवगमः, वेदार्थस्य तदाविषयत्वात् वेदस्य प्रथमं मूकत्वात्, न च न्यायसिद्धे वेदार्थे मानान्तरात्तात्पर्यग्रहः, वेदस्यानुवादकतापत्तेः शब्दस्याप्रमाणत्वापत्तेर्वा। अज्ञाते वाक्यार्थे तर्क-संशययोरप्यभावात्। अयं पदार्थोऽपरपदार्थसंसृष्टो न वेति संशये तर्के वा एककोटौ संसर्ग उपस्थित इति चेत्, न, अनिश्चिते तात्पर्यानिश्चयात् तयोरगृहीतसंसर्गविषयत्वेनासदर्थविषयकत्वेन वा वाक्यार्थाविषयत्वाच्च। अन्यथा लोकेऽपि ताभ्यामेवोपस्थितिरिति किं वक्तृज्ञानानुमानेन।

वस्तुतस्तु यदि यथार्थताप्तर्यकत्वं ज्ञातं शाब्दप्रमोत्पादकं तदा लोक-वेदयोस्तादृशपदस्मारितत्वेन पदार्थसंसर्गानुमितिसम्भवात् न शब्दः प्रमाणं स्यात्। अपिच पुंवाक्यस्य दोष-विशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषाद्दोषाजन्यत्वनिश्चयदशायां वेदतुल्या सामग्री पुंवाक्येऽपि वृत्तेति तत एवार्थनिश्चयात् वेदवत्तस्यापि प्रामाण्यं, अनुमितानुमानस्य व्याप्तिस्मृत्यादिविलम्बितत्वात्।

एतेनाबाधितार्थपरत्वं लोके वेदे च प्रमापकं लोके वाक्यार्थो बाधितोऽपि दृष्ट इति श्रोतुः प्रमाणावतारं विना न बाधाभावनिश्चयः स च क्वचिच्छ्रोतुरिन्द्रियेण क्वचिद्वक्तुराप्तत्वानुमानेन वेदे तु न्यायात्तन्निश्चयः तदर्थस्य प्रमाणान्तराविषयत्वात् न तत्र, शङ्केति सामग्रीभेद इति निरस्तम्। प्रथमं भ्रमाद्यभावस्याप्तत्वस्य वा निश्चेतुमशक्यत्वात् वेदस्यानुवादकतापत्तेश्च। तस्मात् भ्रमाद्यजन्यत्वं आप्तोक्तत्वं अबाधितार्थकत्वं यथार्थतात्पर्यकत्वं निरस्तव्यभिचारशङ्कत्वं अन्यद्वा व्यभिचारिव्यावृत्तं यत्प्रमोत्पादकं तत् स्वरूपसत् न ज्ञातम्। अन्यथा तादृशस्य वाक्यार्थाव्यभिचारितया तादृशपदस्मातिरत्वात् लिङ्गादेव संसर्गसिद्धिः स्यादिति णितं वैशेषिकैः।

अथ व्यवहारानुमितव्यवहर्तृकार्यान्वितज्ञाने उपस्थितत्वेन पदानां हेतुत्वग्रहादन्विताभिधायकत्वं गृहीतं न तु लिङ्गज्ञानस्य तदानीं शब्दस्य लिङ्गत्वेनानुपस्थितेरिति चेत्, न। लिङ्गाभावेनैव शब्दादन्वितज्ञानोपपत्तेर्नाकाङ्क्षादि-मच्छब्दत्वेन कारणता गौरवात्। शब्दस्य लिङ्गत्वं सम्भवदपि बालेन न ज्ञातमिति चेत्, सोऽयं बालस्य दोषो न वस्तुन इत्यादि वक्ष्यतें। किञ्चैवं लोकवद्वेदेऽपि अनुवादकता स्यात्।

एतेन वाक्यार्थतात्पर्यग्राहकानुमानात् तात्पर्यावच्छेदकतया तदुपजीविनोऽनुमानात् स्वातन्त्र्येण वाक्यार्थसिद्धेर्न शब्दः प्रमाणमिति वैशेषिकमतमपास्तम्। यथार्थतात्पर्यग्रहस्य वाक्यार्थबोधाहेतुत्वात्।

यत्तु ज्ञायमानकरणे **इति, तन्न,** यथार्थतात्पर्यकत्वादेः प्रथमं ज्ञातुमशक्यत्वेनानुमानस्य बाधितत्वात् व्याप्त्यसिद्धेश्च। न हि व्याप्तिः शब्दशक्तिश्च कारणं, किन्तु तद्धीः, अतीतेऽनुमितिदर्शनात्। अपभ्रंशादौ शक्तिभ्रमादन्वयवोधाच्च। न च सैवोपयुज्यत इति साध्यं, प्रथमं तदसम्भवात्। तस्मात् यत् अर्थाव्यभिचारित्वेन ज्ञातं करणं तत्र व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते अन्यथा शब्दस्यार्थाव्यभिचारितया ज्ञातस्य ज्ञापकत्वे लिङ्गतापत्तेर्वज्रलेपायमानत्वात् ।

स्यादेतदनाप्तोक्ते बाधकेनार्थाभावदर्शनात् आकाङ्क्षादिमद्वाक्यत्वेन सदर्थकं बाधितार्थकं वेति संशयान्न तावन्मात्रादर्थनिश्चयः, न हि संशायकमेव निश्चायकं, इत्यधिकमपेक्षणीयमिति चेत्, न। अर्थसंशयस्य तद्बाधसंशयस्य वा प्रमाणाप्रतिबन्धकत्वात् वह्नितद्बाधयोः संशयेऽपि प्रत्यक्षानुमानादिना अर्थनिश्चयात् । अन्यथा प्रमाणमात्रोच्छेदः, तत्पूर्वमर्थतद्बाधसंशयात्। विनाप्यर्थं वाक्यरचना सम्भवत्यत एतस्यायमर्थो न वा, एतत्सदर्थकं न वा, एतज्जन्यज्ञानं सद्विषयकं न वेति संशयस्यार्थावगमोत्तरकालीनत्वाच्च। तस्मादाप्तोक्तत्वं भ्रमाद्यजन्यत्वं अबाधितार्थकत्वं यथार्थवाक्यार्थप्रतीतिपरत्वं वा ज्ञातं अनुगतमपि न हेतुः प्रथमं ग्रहीतुमशक्यत्वात्, किन्तु तात्पर्यग्राहकत्वेनाभिमतानां न्यायजन्यज्ञानप्रकरणादीनामन्यतरत् तात्पर्यव्याप्यत्वेनानुगतं, तथाकाङ्क्षासत्तिनिश्चयः,

तद्विपर्यये संशये च शाब्दज्ञानाभावात्। योग्यतायाश्च ज्ञानमात्रं हेतु: तत्संशये विपर्यये प्रमायाञ्च वाक्यार्थज्ञानात्, तथा विभक्त्यादिसमभिव्याहार: सम्भूयोच्चारणाञ्च शाब्दज्ञानमात्रे कारणानि नानार्थे श्लिष्टे चानेकोपस्थितावपि प्रकरणादिवशादेकमर्थमादायान्वयबोध:।

लक्षणा च न तात्पर्य्यानुपपत्त्या किन्त्वन्वयानुपपत्त्येव प्रकरणाद्भोजन-प्रयोजनकत्वेनावगतप्रवेशनस्य यष्ट्यन्वयानुपपत्ते:। अजहत्स्वार्थायां प्रकरणादेव छत्रितदितरस्य यान्तीत्यनेन गमनकर्तृत्वमवगतं तदन्वयानुपपत्तिश्छत्रिमात्रे, पचतीत्यस्य कलायमित्यन्योक्तेन समं नार्थप्रत्यायकत्वं समभिव्याहाराभावात्, तवापि तस्य तात्पर्यग्राहकत्वात् सहोच्चरितानां सम्भूयार्थप्रत्यायकत्वस्य व्युत्पत्तिसिद्धत्वात् ।

**अन्ये तु** नानार्थे लक्षणायाञ्च नियतोपस्थित्यर्थं पदार्थे तात्पर्यग्रहापेक्षा तेन विना तदभावात् न वाक्यार्थे, तदज्ञानेऽपि प्रकरणादिना सैन्धवपदं तुरगपरं, काकपदं उपघातकपरमिति हि प्रतियन्ति। अन्यत्रान्वयप्रतियोग्युपपस्थिति: तात्पर्यग्रहं विनैवेति न तदपेक्षा।

वस्तुतस्तु इतरपदस्य इतरपदार्थसंसर्गज्ञानपरत्वं तात्पर्यं तच्च वेदे न्यायादवधार्यते लोके न्यायात् प्रकरणादेर्वा। अत एव शाब्दबोधे नानियतहेतुकत्वं तच्चेतरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रह: हेतुर्न तु विशिष्य, तच्च स्वपरपदार्थयो: संसर्गानुभवजननं विना अनुपपन्नमिति पदानि सम्भूय जनयन्ति, अत एव नानार्थे विनिगमना, तदनुपपत्तिरेव लक्षणाबीजं तदभावादेव पचतिपदे न स्मृतकलायान्वयबोध इति सिद्धं शब्दस्य प्रमाणान्तरत्वं। तस्य च निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारीति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे शब्दाप्रामाण्यवाद:।।**

## अथाकाङ्क्षा

अथ केयमाकाङ्क्षा, न तावदविनाभावः, नीलं सरोजमित्यादावभावात्। **"विमलं जलं नद्याः कच्छे महिष चरति"** इत्यत्र जलान्वितनद्या अविनाभावात् कच्छे साकाङ्क्षतापत्तेः । नापि समभिव्याहृमतपदस्मारितपदार्थजिज्ञासा, अजिज्ञासोरपि वाक्यार्थबोधात् **"विश्वजिता यजेत"** द्वारं इत्यत्रापदार्थयोरप्यधिकारिणोऽध्यात्हतस्य पिधानस्य चाकाङ्क्षितत्वाच्च, तत्र शब्दकल्पनपक्षेऽपि घटः कर्मत्वमानयनं कृतिरित्यत्र जिज्ञासितस्यानयनादेराकाङ्क्षितत्वापत्तेः।

अथ जिज्ञासायोग्यता सा, जिज्ञासा च विशेषाज्ञाने भवति, योग्यता च श्रोतरि तदुच्चारणजन्यसंसर्गावगमप्रागभावः, **"विमलं जलं नद्याः कच्छे महिष"** इत्यत्र तात्पर्यवशात् कदाचित् नद्याः कच्छे संसर्गावगमात् तत्प्रागभावसत्त्वेऽपि श्रोतरि तदुच्चारणेन तात्पर्यवशात् जलान्वितनद्याः कच्छे संसर्गावगमो नेति न तत्प्रागभावः, घटः कर्मत्वमानयनमित्यत्रापि तथेति चेत्,। न।

निराकाङ्क्षे तदुच्छारणजन्यसंसर्गावगमप्रागभावस्य सिध्यसिद्धिपराहतत्वात्। किञ्च यत्रैको विमलं जलमित्यश्रुत्र्वेव तात्पर्यभ्रमेण वा नद्याः कच्छान्वयपरत्वमवैति, अपरः समस्तमेव श्रुत्वा नद्या जलान्वयपरत्वमवधारयति, तत्रोभयोरपि तदुच्चारणजन्य-संसर्गावगमात् नद्या इत्युभयसाकांङ्क्षं स्यात्।

अपि च प्रागभावाभावस्य कारणान्तराभावव्याप्तत्वात् तत एव कार्याभाव इति किमाकाङ्क्षया। एवञ्च योग्यतासत्ती अपि न हेतू अयोग्ये अनासन्ने च तदुच्चारणजन्यसंसर्गज्ञानाभावेन तत्प्रागभावाभावात् । न चैवं बाधाभावस्यानुमित्यादावपि हेतुत्वं, प्रागभावाभावेनैव कार्याभावात् प्रागभावस्य च कार्यमात्र हेतुत्वात्। शब्दे नासाधारण्यं उत्थितोत्थाप्याकाङ्क्षयोरुत्कर्षापकर्षौ न स्यातां प्रागभावे तदभावात् ।

अथ ज्ञाप्य-तदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सत्यजनित-तात्पर्यविषयान्वयबोधत्वमाकाङ्क्षा, घटमानयतीत्यत्र घटमित्युक्ते किमानयति पश्यति वा, आनयतीत्युक्ते किं घटं अन्यद्वेति जिज्ञासा भवति । घटः कर्मत्वमानयनं कृतिरित्यत्राभेदेन नान्वयोऽयोग्यत्वात्, घटस्यानयनमिति तु नान्वयबोधः घट इतिपदात् सम्बन्धित्वेन

घटस्यानुपस्थितेः। राज्ञ इति पुत्रेण जनितान्वयबोधत्वात् न पुरुषमाकाङ्क्षतीति चेत्, तर्हि नामविभक्तिधात्वाख्यातार्थानां घटकर्मत्वानयन-कृतीनां स्वरूपेणोपस्थितिर्नान्वयप्रकारक-जिज्ञासानुकूलेति तत्र नाकाङ्क्षा स्यात्। घटः कर्मत्वमानयनं कृतिरित्यत्र घटमानयतीत्यत्रेवान्वयबोधः स्यात्। न हि तत्र पदार्थस्वरूपाणां एतद्वैलक्षण्येनोपस्थितिः, त्रयाणां तुल्यवत् स्मरणे प्रथमं यत्तो राज्ञ इति पुरुषेण नान्वेति किन्तु पुत्रेण तत एवाग्रेऽपि व्यर्थमजनितान्वयबोधत्वमिति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे शब्दाकाङ्क्षावादपूर्वपक्षः।।**

**अथ शब्दाकाङ्क्षावादसिद्धान्तः**

उच्यते । अभिधानापर्यवसानमाकाङ्क्षा यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तदपर्यवसानं, नामविभक्तिधात्वाख्यातक्रियाकारकपदानां परस्परं विना न परस्परस्य स्वार्थान्वयानुभवजनकत्वं। परमते नीलो घटोऽस्ति नीलं घटमानयेत्यादौ नामार्थानां कारकाणाञ्च न परस्परमन्वयबोधः विशेषणान्वितविभक्त्यर्थानन्वयादिति न विशिष्टवैशिष्ट्येनान्वयः किन्त्वार्थः समाजः। अस्माकन्तु नीलघटयोरभेदानुभवबलादभेद एव संसर्गः विशेषणविभक्तिः साधुत्वार्थम्।

यद्वा समानविभक्तिकयोरभेदानुभवबलात् विशेषणान्वितविभक्तेरभेदार्थकत्वं । अतो विशेषण-विशेष्यभावानुभावकत्वं तत्पदयोः, न परस्परं विना। द्वारमित्यत्राध्याहारं विना प्रतियोग्यलाभात् न स्वार्थान्वयानुभावकत्वं, **"विश्वजिता यजेतेत्यत्र"** ममेदं कार्यमिति प्रवर्तकतात्पर्यविषयज्ञानं नाधिकारिणं विनेति तदाकाङ्क्षा।

यद्वा कर्तुरिवाधिकारिणोऽपि आक्षेपादेव लाभ इति तदन्वयो न शाब्दः किन्त्वानुमानिकः, गौणलाक्षणिकयोरननुभावकत्वपक्षे तदुपस्थापितस्याध्याहृतस्येवेतरपदं विना नानुभावकत्वम्। घटः कर्मत्वं आनयनं कृतिरित्यादौ अभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यस्तात्पर्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव। घटमानयतीत्यत्रेव भ्रमेण

तथान्वयतात्पर्येऽपि क्रियाकारकभावेन नान्वयः, नामविभक्तिधात्वाख्यातक्रियाकारकपदानां अन्वयबोधे तान्येव पदानि समर्थानि न तु तदर्थकानि पदान्तराणि।

अग्निः करणत्वं ओदनः कर्मता पाकः कृतिः इष्टसाधनता इत्यादिपदेभ्यः अग्निनौदिनं पचेतेत्यत्रेव अन्वयाबोधात्, अग्निकरणकौदनकर्मकपाकविषयककृतिरिष्टसाधनं इति तु वाक्यं न पदं, अतएव द्वारमित्यत्र पिधेहिपदाध्याहारः, क्रियापदार्थस्यान्यत उपस्थितौ अपि कारकानन्वयात् असामर्थ्यञ्च स्वभावात्। अनासन्नमपि आसन्नतादशायां आसन्नत्वभ्रमेण वा अन्ययबोधसमर्थमेव। वह्निना सिञ्चतीत्यत्र क्रियाकारकपदयोरन्वयबोधे सामर्थ्येऽपि अयोग्यताज्ञानं प्रतिबन्धकं दाहे समर्थस्याप्यग्रेर्मणिरिव। अत एव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽप्यन्वयबोधः। नहि स्वभावतोऽसमर्थं आरोपितसामर्थ्यं वा दहति पचति वेति, प्रकृते तु पदार्थस्वरूपज्ञानं न त्वन्वयभ्रमोऽपि। पुरुषपदं विनापि राज्ञ इत्यस्य पुत्रेण समं स्वार्थान्वयानुभावकत्वं इति न तदाकाङ्क्षा।

यद्वा त्रयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वये तात्पर्याभावात् नान्वयबोध इत्यग्रेऽपि तथा। न च पुत्रस्योत्थिताकाङ्क्षत्वात् तेनैवान्वयबोध इति वाच्यम्। तात्पर्यवशात् पुरुषेणैव प्रथममन्वयबोधात्। अत एवान्वयबोधसमर्थत्वे सति अजनिततात्पर्यविषयान्वयबोधत्वमाकाङ्क्षेति **केचित्** । प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत्क्रियाकारकपदयोरजनितान्वयबोधत्वमाकाङ्क्षा।

**नव्यास्तु** पदविशेषजन्यपदार्थोपस्थितिः घटः कर्मत्वं आनयनं कृतिरित्येवविंधपदाजन्यपदार्थोपस्थितिर्वा आसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेवविंध-शब्दान्नान्वयबोधः । त्वयाप्येवविंधपदार्थोपस्थितेराकाङ्क्षाहेतुत्वेनावश्यमभ्युपेयत्वात्, जनितान्वयबोधात् नान्वयान्तरबोधः तात्पर्याभावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति, किन्तु स्वजनकोपस्थितेः परिचायकत्वमात्रमिति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे शब्दाकाङ्क्षावादसिद्धान्तः।**

**समाप्तोऽयमाकाङ्क्षावादः**

**अथ योग्यतावादः।**

ननु का योग्यता। न तावत् सजातीयेऽन्वयदर्शनं, यथाकथञ्चित् साजात्यस्याव्यावर्तकत्वात्। पदार्थतावच्छेदकेन साजात्यस्याद्यजातः पयः पिबतीत्यादावभावात् वाक्यार्थस्यापूर्वत्वाच्च। नापि समभिव्याहृत पदार्थसंसर्गव्याप्यधर्मवत्त्वं, वाक्यार्थ-स्यानुमेयत्वापत्तेः। न च वस्तुगत्या संसर्गव्याप्यो यो धर्मस्तद्वत्त्वम्। तच्च न ज्ञातमुपयुज्यते इति नानुमेयः संसर्ग इति वाच्यम्। योग्यताभ्रमाच्छाब्दभ्रमानुपपत्तेः। अत एवानन्वयनिश्चयविरह एव योग्यता स्वरूपसती हेतुः, तत्र तद्धर्माभावनिश्चये तत्प्रकारकशाब्दज्ञानानुदयात् इति परास्तम् ।

नापि समभिव्याहृतपदार्थसंसर्गभावव्याप्यधर्मशून्यत्वम्, प्रमेयमभिधेयमित्यादौ संसर्गाभावस्याप्रसिध्या तदनिरूपणात् गेहनिष्ठघटाभावे प्रमिते घटोऽस्तीतिवाक्यात्तन्निश्चयेऽप्यन्वयज्ञानानुदयाच्च । नापि बाधकप्रमाणाभावः, अन्यत्र यद्बाधकं तदभावस्यायोग्येऽपि सत्त्वात्। नापि प्रकृतसंसर्गबाधकस्याभावः, प्रतियोगिसिध्यसिद्धिव्याघातात्। न च प्रकृतसंसर्गे अन्यत्र सिद्धयस्य बाधकप्रमाणस्याभावः, प्रकृतसंसर्गस्य प्रथममप्रतीतेः अयोग्येऽपि तत्सत्त्वाच्च। तत्र बाधकमप्यस्तीति चेत्, तर्हि प्रकृतसंसर्गबाधकस्याभावः तच्चाप्रसिद्धम्। अत एव तत्र वाधकस्याप्यनिरूपणम्। नापीतरपदार्थसंसर्गाभावप्रमाविषयत्वाभावोऽपरपदार्थे, केवलान्वयिन्यप्रसिद्धेः।

एतेन यत्रासम्बन्धग्राहकं प्रमाणं नास्ति तद्योग्यमिति निरस्तम्। नापि बोधनीयसंसर्गाभावप्रमाविरहः, प्रतियोग्यप्रसिद्धेः बोधनीयसंसर्गस्य प्रागप्रतीतेः। योग्यता च न स्वरूपसत्युपयुज्यते इत्युक्तम्, अयोग्ये तत्सत्त्वस्यानिरूपणाञ्च।

अपि च स्वीयबाधकप्रमाविरहस्यायोग्येऽपि सत्त्वात् बाधकप्रमामात्रविरहस्य योग्येऽपि ज्ञातुमशक्यत्वात् परप्रमाया अयोग्यत्वात्। न च स्वरूपसन्नेवायां हेतुः, स्वीयबाधकप्रमाविरहदशायां योग्यताभ्रमेण शाब्दभ्रमानुपपत्तेः । अन्वयप्रयोजकरूपवत्त्वेन

बाधकप्रमामात्रविरहोऽनुमेय इति चेत्, न। सेकानन्विततोये द्रवद्रव्यत्वे सत्यपि बाधकसत्त्वेन व्यभिचारात् उपजीव्यत्वेन तस्यैव योग्यतात्वापत्तेश्च। न चैवमेवेति वाच्यम्। आकाङ्क्षासत्त्यन्वयप्रयोजकरूपवत्त्वे सत्यप्यनाप्तवाक्ये बाधकप्रमायामन्वयाबोधात्, बाधकप्रमाविरहो हेतुरिति चेत्तर्ह्यावश्यकत्वात् सैव योग्यता।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे योग्यतावादपूर्वपक्ष:।।**

## अथ योग्यतावादसिद्धान्त:

उच्यते । बाधकप्रमाविरहो योग्यता। सा चेतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभाव-प्रतियोगित्वप्रमाविशेष्यत्वाभाव:। प्रमेयं वाच्यमित्यत्र प्रमेयनिष्ठात्यन्ताभावप्रतियोगित्व-प्रमाविशेष्यत्वं गोत्वे प्रसिद्धं वाच्यत्वसंसर्गे तदभाव:।

वस्तुतस्त्वितरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यता लाघवात् । शक्यज्ञानत्वाच्च । न च नरशिर:शौचानुमानबाधात् तदशौचबोधकशब्दात् अन्वयाबोध इति वाच्यम्। उपजीव्यजातीयत्वेन शब्दस्य बलवत्त्वात् तेनैव तदनुमानबाधात्। नान्वाकाङ्क्षासत्तिमत्त्वेन शब्दस्य प्रमाणता न तु योग्यतापि तन्निवेशिनी बाधाभावस्य प्रमामात्रहेतुत्वादिति चेत्, न। बाधे हि प्रमाणदोषोऽवश्यं वक्तव्य:। अन्यथा प्रमाणविषये बाधासम्भवात् यथानुमाने बाधादुपाधिकल्पनाद्वारा व्याप्तिविघात:, निरूपाधौ बाधानवकाशात्।

सेयं न स्वरूपसती प्रयोजिका शाब्दाभासोच्छेदप्रसङ्गात्। तन्निश्चयश्च भवत्युपायाभावात् इति चेत्, न। संशयविपर्यय-प्रमासाधारणस्य योग्यताज्ञानमात्रस्य कारणत्वात्। अयोग्यताज्ञानस्य प्रतिबन्धकस्य सर्वत्राभावात् क्वचित्तन्निश्चयोऽपि योग्यानुपलब्ध्या यथेह घटो नास्तीति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे योग्यतावाद:।।**

**अथासत्तिवाद:**

आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थिति:। सा च स्मृतिर्नानुभवोऽतो नान्योन्याश्रय:।

अथ नानाविशेषणककर्मकर्तृकरणाधिकरणक्रियादिक्रमिकपदज्ञानजन्यक्रमिकपदार्थ-स्मृतीनां न यौगपद्यं सम्भवति आशुतरविनाशिनां क्रमिकाणां मेलकानुपपत्तेरिति कथं तावत्पदार्थान्वयबोध: विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येति चेत्, श्रौत्रप्रत्येकपदानुभव-जन्यसंस्कारमेलकादेकदैव तावत्पदस्मृति: तत एकदैव तावत्पदार्थस्मृतौ सत्यं वाक्यार्थानुभव:। न चान्यविषयकसंस्कारेण नान्यत्र स्मरणमिति वाच्यम्। वाक्यार्थानुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण तत्रैकस्मरणकल्पनात्। प्रत्येकवर्णसंस्काराणामिवानन्यगतिकतया पदस्मरणे।

अथ **"यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते। तेन तोनान्वित: स्वार्थ: पदैरेवावगम्यते"** । न चैवमन्वयान्तराभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यम्। एवमपि प्रथममनन्वये हेत्वनुपन्यासात् उत्तरस्य हीदं सामग्रीवैकल्यं न पूर्वस्येति चेत्, अस्तु तावदेवं तथापि चरमं तावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्य गतिकत्वात्।

अत्र वदन्ति, सन्निधिर्न पदजन्यैवान्वयबोधहेतु:, द्वारमित्यादौ अध्याहृतेनापि पिधानादिना अन्वयबोधदर्शनात्। न च पिधेहीति शब्द एवाध्याह्रियते, अनुपयोगात्। अर्थस्यैवान्वयप्रतियोगित्वेनोपयोगित्वात् आवश्यकत्वाच्च। अर्थापत्तेरूपपादकविषयत्वात्। न च शब्दमात्रमुपपादकं, अपि तु तदर्थ:, अवश्यकल्प्यार्थसाहचर्येण दैववशसम्पन्नशब्दस्मृतेरन्यथासिद्धे:। अन्यथा पदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्ते:। स्वार्थान्वयपरत्वाच्छब्दानां द्वारमिति न पिधानान्वयबोधकमिति तदन्वयबोधार्थमवश्यं शब्दकल्पनमिति चेत्, न। लक्षणायां व्यभिचारात् तवाप्याक्षिप्तेन कर्त्रान्वयबोधाच्च।

अथ द्वारपदसहभावमात्रं पिधेहिशब्दस्य कल्प्यते लाघवात् । न च पिधानाभिधायकानेकशब्दोपस्थितौ विनिगमकविरहः, संस्कारतारतम्यात् पदविशेषस्मृतेरिति चेत्, न । आकाङ्क्षादिमत्प्रतियोग्यन्वितस्वार्थपरत्वस्य क्लृप्तत्वात् लाघवेनार्थाध्याहारात् । न च श्रुतपदानि लब्धप्रयोजनानीति कथमप्यध्याहृते तेषां तात्पर्यमिति वाच्यम् । श्रुतार्थान्वयानुपपत्त्या अध्याहृते तात्पर्यात् । कथं तर्ह्योदनं पचतीत्यत्र समभिव्याहृतमात्रान्वय: कलायादेरपि स्मृतत्वात् इति चेत्, न ।

तात्पर्यनियमादित्यवेहि यत्पर: शब्द: स हि शब्दार्थ:। अन्यथा तवापि दैववशस्मृतकलायपदोपस्थापितेनान्वयबोध: स्यात् । अयं देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्तुरनभिधानात् तृतीया स्यात् इति चेत्, न। अध्याहृतपचतिपदेनापि कर्तुरनभिधानात्, कर्तृसंख्याभिहितेति चेत्, न। देवदत्तस्य पाक इत्यत्रापि तृतीयापत्ते:। तात्पर्यतस्तत्र व्यवस्थेति चेत्, तुल्यम्।

ननु द्वारं पिधेहीत्यादौ पिधानशब्दानुभवे पिधानोपस्थापकपदत्वेनं जनकत्वमिति चेत्, न । अन्वयप्रतियोग्युपस्थापकपदत्वेन जनकत्वात् न तु तदुपस्थापकयावत्पदत्वेन गौरवात् । एवं पिधानान्वयबोधेऽपि। अन्यथा गौणलाक्षणिकयोरन्वयबोधो न स्यात् तयोरननुभावकत्वादिति ।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे आसत्तिवादपूर्वपक्ष:।।**

**अथासत्तिवादसिद्धान्त:**

उच्यते, क्रियापदोपस्थापिता क्रिया, कारकपदोपस्थापितञ्च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रम् । अन्यथा द्वारं कर्मता पिधेहि, द्वारं पिधानं कृतिरित्यत्रापि क्रियाकर्माध्याहार इवान्वयबोधप्रसङ्ग: क्रियाया: कर्मणश्चोपस्थितेस्तुल्यत्वात्। एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत्, तर्ह्याराकाङ्क्षायां पदविशेषोपस्थापितत्वं तन्त्रं न तूपस्थितिमात्रम् । अर्थविशेषेऽसाधुत्वान्नात्रान्वयबोध इति

चेत्, न, पिधेहीति पदं विना द्वारमित्यस्याप्यसाधुत्वात् । तदर्थयोगे साधुत्वस्य तुल्यत्वात् । साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वाच्च गौरवादपभ्रंशादप्यन्वयबोधाच्च । न चात्रासंसर्गाग्रहः, बाधकाभावात् । तस्मात् क्रियापदस्य कारकपदेन कारकपदस्य क्रियापदेन सहान्वयबोधकत्वं न त्वेकं विनाऽपरस्य ।

अपि च सकर्मकक्रियापदयोगं विना द्वितीयानुपपत्तिः, न हि क्रियापदार्थयोगे द्वितीया, घट आनयनं कृतिरित्यत्रापि द्वितीयापत्तेः । तथाच पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः । यदि स्पृहयतिपदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात् स्पृहयतीच्छतिपदयोरेकार्थत्वात् ।

अथ साधुत्वार्थं द्वारं पुष्पेभ्यः इत्यत्र पिधेहिस्पृहयतिपदाध्याहारोऽनुमन्यते न त्वन्वयबोधार्थं, तस्यान्वयप्रतियोगिविज्ञानादेवोपपत्तेरिति चेत्, तर्हि क्रियापदयोगं विना न कारकविभक्तिः, कारकपदयोगं विना न तदन्वययोग्यं क्रियापदमिति केवलकारकपदे क्रियापदाध्याहारः, केवलक्रियायाञ्च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तज्जन्योपस्थितिरन्वयबोधौपयिकी। तस्मात् क्रियाकारकपदोपस्थापितयोरेव क्रियाकारकयोः परस्परमन्वय इति शब्दाध्याहार एव। कर्त्राक्षेपे तु वक्ष्यामः।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे आसत्तिवादः।।**

### अथ तात्पर्यवादः

तात्पर्याधीनं शब्दप्रामाण्यम्। तत्र तत्परत्वं न तत्साध्यकत्वं पदार्थतत्संसर्गयोः शब्दासाध्यत्वात्।

अथ तद्गोचरप्रवृत्तिनिवृत्तिसाध्यकत्वं तत्परत्वम् । तच्च भाव्यार्थस्य साक्षात् भूतार्थस्य तु प्रशंसानिन्दावाक्यस्य प्रशस्तनिन्दितार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्तिनिवृत्तिजनकत्वं तत्परत्वमिति चेत्, न, तत्परत्वे तज्ज्ञानं जनयित्वा तत्र

प्रवर्तकत्वं, तत्प्रवर्तकत्वञ्च तत्परत्वमिति परस्पराश्रयात् । लाक्षणिकस्याननुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः स्वरूपाख्यानमात्रपरत्वेनापि पर्यवसानाच्च ।

ननु तद्बुद्धिजनकत्वं तत्परत्वं प्रशंसानिन्दावाक्यमपि प्रशस्त-निन्दितस्वार्थधीहेतुत्वेन तत्परमेव, तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्तते निन्दिताच्च निवर्तते इति स्वविषये प्रवृत्तिनिवृत्ती जनयतीति तत्परमुच्यत, इति चेत्, न ।

गौणलाक्षणिकयोरननुभावकत्वात् तद्बुद्धिजनने तत्परत्वमित्यन्योन्याश्रयाच्च । तज्जननयोग्यत्वमिति चेत्, तर्ह्येकत्रोच्चारणे नानार्थे नानार्थपरत्वं लक्षणायाञ्च मुख्यार्थपरत्वं स्यात् योग्यतायाः सत्वात् । नापि तत्प्रतिपाद्यकत्वं, तात्पर्यं विना न तथेत्यन्योन्याश्रयात् । प्रशंसा-निन्दावाक्यस्य प्रवृत्त्याद्यप्रतिपादकत्वात् लाक्षणिकस्याप्रतिपादकत्वाच्च ।

अथ गङ्गापदं स्वार्थाविनाभावि तीरं प्रतिपादयत्तत्परमिति चेत्, न । मञ्चाः क्रोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्यात् गङ्गादिपदं मत्स्यादिपरं मुख्ये तीरपरञ्च स्यात् अविनाभावस्य तादवस्थ्यात् । मुख्ये बाधके सतीति चेत्, तर्हि मुख्यार्थपरतैव न स्यात् न स्याच्च गच्छ गच्छसीत्यत्र गमनाभावपरत्वं ।

उच्यते । तत्प्रयोजनकत्वं तत्परत्वं तदर्थश्च प्रतीतिः प्रवृत्तिनिवृत्ती च, प्रयोजनत्वञ्च न साध्यत्वं अन्योन्याश्रयात्। नापि प्रतिपाद्येच्छाविषयत्वं, यस्य यदिच्छाविषयः तं प्रति तत्परत्वापत्तेः । तदर्थसाध्यत्वेन इच्छानियम इति चेत् । न । इह धूम इत्यत्र जन्यज्ञाप्यभेदेन साध्यस्य बहुविधतया वाक्यथेदप्रसङ्गात् पुमिच्छाया नियन्तुमशक्यत्वात् । किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वं, यः शब्दः वक्ता यदिच्छया प्रयुक्तः स तत्परः, सा चेच्छाप्रतिपाद्यधीप्रवृत्तिनिवृत्तिविषयेति तत्परत्वं । नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापदात् मुख्यलाक्षणिकपराच्चावृत्त्या क्रमेणानेकपदार्थज्ञानं न त्वेकदैव, सकृदुच्चरितस्य सकृदर्थपरत्वनियमेनैकत्रोच्चारणे अनेकार्थपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया वदन्ति।

वयन्तु ब्रूमः । अनेकपदार्थप्रतीतीच्छया एकमुच्चारणं भवत्येव पुमिच्छाया नियन्तुमशक्यत्वात् । यदि च तदुच्चारणं नानेकार्थपरं तदावृत्तिरपि न स्यात् तात्पर्यनिर्वाहार्थमावृत्तिकल्पनात् । अन्यथैकपरेऽपि तदापत्तेः । अत एव तदुच्चारणस्य उभयपरतायां नावृत्तिकल्पणं तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्यादिज्ञाने युगपदनेकान्वयबोधो भवति सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियन्तुमशक्यत्वाच्च । अथ विवादाध्यासितमक्षपदोच्चारणं एकपदैकशक्तिविषयमेकमेवानु-भावयति एकपदोच्चारणत्वात् घटपदोच्चारणवत् । यद्वा एकत्रोच्चारणे नानाशक्त्या नानार्थाननुभावकं नानार्थत्वात् एकपरनानार्थपदवदिति चेत्, न ।

अनेकार्थानुभवसामग्रीसत्त्वेन बाधितत्वात् सामग्रीविरहस्योपाधित्वाच्च । अतएवाक्षमानयेत्युक्ते भिन्नप्रकरणादिना भिन्ने तात्पर्यप्रमायां भ्रमे वा प्रतिपाद्ययोरेकदैवावृत्तिं विनानेकार्थप्रतीतिर्न तु तत्रैको विलम्बते । एवं घटं पटं वा आनयेत्यत्रानयनस्योभयपरत्वे एकदैवान्वयबोधो न त्वावृत्तिः वाक्यभेदस्त्वर्थभेदात् न ज्ञानभेदात् ।

गङ्गायां जलं घोषश्च प्रतिवसतीत्यत्र गङ्गापदस्य युगपत्प्रवाहतीरयोस्तात्पर्यग्रहे तयोद्र्वयोरप्येकदोपस्थितौ जलघोषयोरेकदैवान्वयबोधः। न च युगपद्वृत्तिद्वयापत्तिः, इष्टत्वात्, तात्पर्याद्धिवृत्तिः, न तु वृत्त्यनुरोधात् तात्पर्यं, गौणलाक्षणिकयोरुच्छेदापत्तेः । तात्पर्यनिर्वाहार्थं वृत्तित्वेन तयोः कल्पनात् । मुख्यलाक्षणिकयोरेकैकमात्रपरत्वे तु युगपद्वृत्तिद्वयविरोधः । अनेकान्वयबोधपरत्वे वृत्तिद्वयविरोधस्य दोषत्वे परिभाषापत्तेः, यत्र मुख्यार्थे शीघ्रत्वेन प्रथममन्वयबोधः अनन्तरं लाक्षणिकान्वयबोधः तत्रावृत्तिरेव । तस्मात् युगपत्तात्पर्यग्रहेसति नावृत्तिः किन्त्वनेकार्थपरत्वे सत्येव यत्र तात्पर्यग्रहक्रमादन्वयबोधक्रमः तत्रावृत्तिः प्रथमोच्चारणस्य पर्यवसितत्वादिति। एवञ्च लोके क्लृप्तत्वात् वेदेऽपीदं तात्पर्यमिति तस्य पौरुषेयत्वं।

**अत्र मीमांसका:** यथोच्चारणपूर्वकत्वात् उच्चारणं वेदे परतन्त्रं तथा तात्पर्यमपि तात्पर्यपूर्वकमेवेति परतन्त्रं न तु कस्यापि प्रथमं तात्पर्यं अनादित्वात् पूर्वपूर्ववाक्यार्थज्ञानेच्छयोच्चारणमुपजीव्याग्रिमग्रिमस्य तदिच्छयोच्चारणात् तदिच्छया तदुच्चारणमेव हि तत्परत्वं लोकवेदसाधारणं, सा चेच्छा स्वतन्त्रा परतन्त्रावेति न कश्चिद्विशेष:, तदवधारणञ्चानादिमीमांसापरिशोधितन्यायाद् वेद इत्युभयवादिसिद्धं, अतस्तात्पर्यानुरोघेन वेदस्य न पौरुषेयत्वं ।

नन्वर्थज्ञानं विनोच्चरितवेदात् कथमर्थधी: वाक्यार्थज्ञानं विना तदिच्छयोच्चारणाभावात्, प्रतिपुरुषमुच्चारणभेदादिति चेत्, तर्हि पठ्यमानभारतादपि तथाभूतादर्थधीर्न स्यात् व्यासेन यत्प्रतीतीच्छया उच्चारणं कृतं तज्जातीयत्वात् अर्थज्ञानं विनापि पठ्यमानभारतादर्थधीरिति चेत्, तर्हि वेदेऽपि तुल्यम्। तत्तात्पर्यकजातीयत्वस्य नियामकत्वात् अन्यथा पठ्यमानवेदात्तवाप्यर्थधीर्न स्यात् ईश्वराप्रणीतत्वात्।

अथ वेद: पौरुषेय: वाक्यत्वात् भारतादिवत् इति चेत्, को वेद:, अनुगतधर्माभावेन तस्य शाखासु नानार्थत्वात् । तथाहि न मुख्यवेदपदप्रयोगविषयो वेद: मुख्यार्थाकथनात् । नापि शाखासमुदाय:, तस्य वेदनिरूप्यत्वात् समुदायस्याप्रतिपादकत्वेन वाक्यत्वासिद्धेश्च । नापि स्वर्गकामादिवाक्यं, स्मृतिभारतादेरपि तथात्वात् । नापि सन्दिग्धकर्तृकवाक्यं, वादिनोर्निश्चयात् । वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशय इति चेत्, तर्ह्यनुमानाभ्यां तस्य संशयो मध्यस्थसंशयप्रश्नानन्तरञ्चानुमानमित्यन्योन्याश्रय: ।

नापि विवादाध्यासितं वाक्यं, अनुगतधर्मं विना विवादस्याप्यभावात् भारतादावपि तत्सम्भवाच्च । नापि महाजनानां वेदाकारानुगतव्यवहारात् वेदत्वं जाति:, देवदत्तीयत्वाद्यनुमापकशब्दवृत्तिजातिभि: सङ्करप्रसङ्गात्।

किञ्च पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा, अध्यापकतदुभयधीजन्यत्वेन सिद्धसाधनात् । नाप्युच्चारणस्य सादित्वं, प्रत्युच्चारणस्य सादित्वात् । नापि स्वतन्त्रपुरुषप्रणीतत्वं, पठ्यमानवेदभारतयोस्तदभावात् । तज्जातीय:

स्वतन्त्रपुरुषप्रणीत इति चेत्, तर्हि पठ्यमानभारतं व्यासस्य न ममेति कथं स्यात्, स्वातन्त्र्यञ्च यद्युच्चारणव्यक्तौ तदा ममाप्युच्चारणसामान्ये न व्यासस्यापि।

किञ्च स्वतन्त्रपुरुषप्रणीतजातीयत्वं यदि साध्यते तदाद्यभारते स्मृतौ च वाक्यत्वमनैकान्तिकं, न हि तज्जातीयं स्वतन्त्रपुरुषप्रणीतमस्ति।

अथ स्वतन्त्रकृतसजातीयं स्वतन्त्रतपुरुषप्रणीतमिति साध्यमनिर्धारितविशेषं जीवी क्वचिदस्तीतिविदिति चेत्, न । पठ्यमानभारते व्यभिचारात्। अथार्थं प्रतीत्य तदर्थपरतया प्रतिसन्धीयमानपदत्वं पौरुषेयत्वं तस्य प्रथममावश्यकत्वात्, अत एवानुच्चारितोऽपि मौनिश्लोक: पौरुषेयः इति चेत्, न । अर्थज्ञानवताध्यापकेन सिद्धसाधनात्, अन्यथा पठ्यमानवेदभारताभ्यां व्यभिचारात् । अत एव वेदत्वं

स्वतन्त्रपुरुषप्रणीतवृत्ति वाक्यवृत्तिधर्मत्वात् भारतत्ववदिति निरस्तम् । स्वतन्त्रप्रणीतत्वं हि वाक्यार्थगोचरयथार्थज्ञान चिख्यापयिषयोच्चारणं, तथाच तथाविधाध्यापकेन सिद्धसाधनम्। एतेन वक्तृत्वानुवक्तृत्वयोर्भेदस्य लोकसिद्धत्वात् सवक्तृकत्वं साध्यमिति निरस्तम्। नापि सजातीयोच्चारणानपेक्षोच्चारणं पौरुषेयत्वं पठ्यमानवेदे बाधात् भारते व्यभिचाराच्च।

उच्यते, शब्दतदुपजीविप्रमाणतिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्। ईश्वरीयप्रमाया: अजन्यत्वात्, वेदार्थस्यानुमानादिविषयत्वेऽपि अनुमानादेर्वेदोपजीवकत्वात्। स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदार्थं प्रतीत्य तत्प्रणयनात्।

सजातीयोच्चारणानपक्षोच्चरितजातीयत्वं पौरुषेयत्वं, आद्यभारतेऽपि तज्जातीयत्वान्न व्यभिचार:।

अथवा वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति प्रमाणतावच्छेदकवाक्यवृत्ति-धर्मत्वात् स्मृतित्ववत्।

यद्वा वेदा: शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्या: प्रमाणशब्दत्वात् भारतवत्। न च पठ्यमाने वेदे बाध: भारते मन्वादिस्मृतौ च व्यभिचार: । तेषां द्विकर्तृकत्वात्, तादृशज्ञानजन्यजातीयत्वं वा साध्यं, तवाप्येतदभावादेव वेदेऽपौरुषेयत्वव्यवहार: ।

नन्वप्रयोजकमिदं वाक्यार्थगोचरयथार्थज्ञानपूर्वकत्वमेव शब्दप्रामाण्ये तन्त्रं न तु तादृशज्ञानस्य शब्दाजन्यत्वमपि गौरवात् । अन्यथा वेदेऽपि तव द्विकर्तृकत्वेन प्रामाण्यं स्यात्। लोके तथा दर्शनात् । एवञ्च अनादिमीमांसासिद्धन्यायेनावगततात्पर्यात् वेदादर्थं प्रतीत्य पूर्वपूर्वाध्यापकेन उच्चरिताद् वेदादुत्तरोत्तरस्याप्यध्ययनतदर्थप्रतीत्यादितैव अत: किं स्वतन्त्र-पुरुषेण, तत्प्रयोजनस्य परतन्त्रादेव सिद्धे: ।

किञ्च पूर्वकालो न वेदशून्य: कालत्वात् वर्तमानकालवत् । न चांशे बाध: अंशे चाश्रयासिद्धि:, अंशत्वेनानुपादानात्, पूर्वकालो न वेदशून्य इत्युद्देश्यप्रतीतेरसिद्धे: नांशत: सिद्धसाधनं, तथा पूर्वकालीनं वेदाध्ययनं गुर्वध्ययनपूर्वकं अध्ययनत्वात् इदानीन्तनाध्ययनवत्। न च लिप्यनुमितवेदाध्ययनेन व्यभिचार:, लिपेरध्ययनपूर्वकत्वात् । न चैवं भारताध्ययनमपि तथा स्यात्, तस्य भारतादावेव व्यासादिकर्तुकत्वेन कथनादिति।

उच्यते। वेदप्रामाण्याधीनं तत्प्रामाण्यमित्यात्माश्रय:। न च पूर्ववेदप्रामाण्याधीनमुत्तरवेदप्रामाण्यमिति व्यक्तिभेदमादाय नात्माश्रय इति वाच्यम्। एवं तत्पूर्वस्यापि तत्पूर्वप्रामाण्यात् प्रामाण्यमित्यनवस्थानात्। अनादित्वादयमदोष इति चेत्, न। मूलभूतप्रमाणान्तराभावात् अन्धपरम्परापातात्। स्वत: प्रमाणं वेद एव सर्वत्र वेदे मूलमिति चेत्, न। सर्वेषामेव परवेदापेक्षत्वेन स्वत: प्रमाणत्वाभावात्। अत एव आचरात् स्मृति:

स्मृतेराचार इत्यत्र विश्वासबीजपरानपेक्षमूलभूतप्रमाणाभावादन्धपरम्पराभये न तत्र वेदमूलकत्वकल्पना।

अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रामाण्यावधारणेऽपि तान्निर्वाहकेतरानपेक्षमूल-भूतप्रमाणाभावेनानाश्वास एव । अन्यथा स्मृत्याचारयोरप्येवं प्रामाण्यावधारणे प्रमाणमूलकत्वकल्पना न स्यात् । तस्मादाश्वासबीजपरानपेक्षेश्वरप्रत्यक्षमूलकत्वादेव वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्यते । एतेनानुमानमपि निरस्तम्। मूलभूतप्रत्यक्षं विना वेदप्रामाण्यानुपपत्या साध्याभावसिद्धौ बाधात् ।

ननु वेदो न पौरुषेय: अस्मर्यमाणकर्तृकत्वादिति बाधकमस्त्विति चेत्, न । कपिल-कणाद-गौतमैस्तच्छिष्यैश्चाद्यपर्यन्तं वेदे सकर्तृकत्वस्मरणस्य प्रतीयमानत्वात् । न च मूलभूतानुभवाभावात् स्मरणानुपपत्ति:, पौरुषेयत्वानुमानादेवानुभवात्। अस्मरणमेव तत्र बाधकमिति चेत्, न। एवं सत्यस्मरणाननुभवयोरन्योन्याश्रयात्। अग्रे तदर्थस्मरणाभावेऽपि प्रमाणस्यानुभावकत्वात्। न हि **"भाविस्मरणमपेक्ष्य प्रमाणमनुभावकं। "तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त" नामानि जज्ञिरे"** इति कर्तृश्रवणात् **"प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते"** इत्यादिकर्तृस्मरणाच्च ।

पौरुषेयत्वे बाधकं विना अर्थवादमात्रत्वस्य वक्तुमशक्यत्वात् । **"स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ता: स्मर्तारोऽस्य न कारका:"** इति महाभागवतपुराणीयवाक्यस्य श्रुतिविरोधेनान्यत्र तात्पर्यात्। न च कार्यपरमेव प्रमाणं, कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् सकर्तृकत्वार्थवादस्य स्वर्ग-नरकार्थवादस्येव **"ईश्वरमुपासीत"** इति विधिशेषत्वाच्च । साधरिष्यते च सिद्धार्थस्य प्रामाण्यम् । न चैवमानन्दोऽपीश्वरे स्यादिति वाच्यं, तत्र मानान्तरविरोधात् । पुरुषस्य भ्रम-प्रमादादिभूयिष्ठत्वेन वेदे नाश्वास इति चेत्। न। धर्मग्राहकमानेन नित्यसर्वज्ञत्वेन सिद्धे तत्र दोषाभावादिति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे तात्पर्यवाद:।।**

## अथ शब्दानित्यतावाद:

ननु तथाप्यप्रयोजकं पौरुषेयत्वानुमानं नित्यनिदोर्षत्वनैव तत्प्रामाण्योपपत्तेरिति चेत्, न। वर्णानां अनित्यत्वेन तत्समूहस्य सुतरामनित्यत्वात्। न च तदसिद्धं, तथाहि वर्णात्मक: शब्दोऽनित्य: समवेतत्वे सत्युत्पत्तिमत्वात् घटवत्। न च हेत्वसिद्धि:, उत्पन्नो गकार: हट्टायामुत्पद्यमानोऽस्ति कोलाहल इति प्रत्ययात्। न च व्यञ्जकाभावात् प्रागनुपलब्धस्योपलब्धिमात्रं तस्य, उत्पन्नो गकार इति प्रत्ययात्। न चायमौपाधिक:, अन्योत्पत्तावगृह्यमाणायामपि तदनुभवात्। न च स्मर्यमाणारोप:, बाधकाभावात्। अन्यथा घटोत्पत्तिरपि न सिद्ध्येत्।

**यत्तु** श्रोत्रानुविधानात् पदं श्रृणोमीत्यबाधितानुव्यवसायात् श्रोत्रादन्येन ग्रहीतुमशक्यत्वाच्च श्रोत्रग्राह्यैवानुपूर्वी । सा च घसमानकालीनप्रागभावप्रतियोगित्वं टस्येति प्रागभावप्रतियोगित्वमुत्पत्तिमत्त्वं वर्णस्य प्रत्यक्ष**मिति**, **तन्न,** घज्ञानानन्तरज्ञानविषयत्वं टस्यानन्तर्य्यं तयोरानुपूर्वी सा च मनसैव गृह्यते घटपटज्ञानयोरिव । तदुपनीता च श्रोत्रविषय:।

ननु स एवायं गकार इति प्रत्यभिज्ञाबाधितमिदमित्येकैका एव गकारादिव्यक्तय:। यद्यपि प्रत्यभिज्ञाया नित्यत्वं न विषयस्तथापि नाशकत्वाभिमतशब्दान्तरादीनां अन्तरासम्भवेऽपि तावत्कालीनतां गकारस्य गृह्णातीति **"तावत्कालं स्थिरञ्चैनं क: पश्चान्नाशयिष्यतीति पराभिमताशुविनाशित्वव्यतिरेकान्नित्यतायामेव पर्यवस्यति"** । न च धर्मिणो गकारस्य भेदेऽपि एकजातीयत्वेन प्रत्यभिज्ञा, तथा सति तज्जातीयोपमिति: स्यान्न तु स एवायमिति।

अथ तारत्व-मन्दत्व-विरुद्धधर्माध्यस्तविषयत्वेन सा न प्रमाणम् । न च तारत्वादीनां स्वाभाविकत्वं विरुद्धत्वञ्चासिद्धं, मन्दस्तारो गकारस्तारान्मन्दोऽन्य इत्यनन्यथासिद्धप्रत्यक्षात् तत्सिद्धे: । न ह्यपां शैत्य-द्रवत्वे स्वाभाविके इत्यत्र प्रत्यक्षादन्यत् प्रमाणम् । तत् किं यो यद्गतत्वेन भासते स तद्धर्म एव तथा सति रक्त: पट: लोहित: स्फटिक-इत्यादावपि तथा स्यादविशेषात्, न, रक्तत्वादीनामन्यधर्मत्वस्थितौ स्फटिकादीनाञ्च

तद्विरुद्धधर्मत्वे स्थिते जपाकुसुमादेरन्वय-व्यतिरेकानुविधानाद्बाधेन तत्र भ्रान्तत्वात् । न चेह तारत्वादेरन्यधर्मत्वेनोपस्थितिः । नापि गकारादीनां तद्विरुद्धधर्मवत्वं, नाप्यन्यस्य तारत्वादिधर्मिणोऽनुविधानम् ।

न चावश्यं स्वीकृतवायोरेव धर्मास्तारत्वादयो गकारादिगतत्वेन भासन्ते इति वाच्यं। स्वर्शग्रहे त्वचो व्यापाराभावेन त्वचा तदग्रहात् । न च श्रवसा तद्ग्रहः, अवायवीयत्वेन वायुमात्रधर्माग्राहकत्वाच्चक्षुर्वत्। तारत्वादयो वा न वायुधर्माः श्रावणत्वात् कादिवत्, वायुर्वा न श्रवणमात्रग्राह्यधर्मीमूर्तत्वात् पटवत् । अत एव न तारत्वादयो वायुधर्मध्वनिधर्माः वायुधर्मस्य ध्वनेरग्रहात् । न च ध्वनिरूपः शब्दो नभोवृत्तिरेव तथा सति तद्धर्मतारत्वादिग्रहः श्रवसेति वाच्यम् । तारोऽयं गकार इत्यत्र ध्वनीनामस्फुरणात् तत्कारणाभावाच्च। न च व्यक्त्या विना जातिस्फुरणं, तस्या व्यक्तिसमानसंवित्संवेद्यत्वात्। न च स्मर्यमाणतारत्वाद्यारोपः, बाधकाभावत् प्रथमतस्तारत्वाद्यग्रहप्रसङ्गाच्चेति।

मैवम्। तारत्वादयो न गकारादिजातयः गत्वादिना सङ्करप्रसङ्गात् । न च नानैव तारत्वं, ताराकारानुगतप्रत्ययाभावप्रसङ्गात् । न च सजातिय साक्षात्कारप्रतिबन्धक-तावच्छेदकशब्दवृत्तिजातित्वेन नानातारत्वेष्वनुगमः, तदप्रतिसन्धानेऽपि तारत्वानुगतप्रत्ययात्। तारत्व-मन्दत्वे च न शब्दवृत्तिजाती सप्रतियोगिकत्वात् । नापि तारत्व-मन्दत्वयोर्विरोधः, य एव गकारस्तार आसीत् स एवेदानीं मन्द इति समयभेदेन वक्तृभेदेन च तयोरेकत्वप्रतीतेः । तारोऽयं न तारतरस्तारान्मन्दोऽन्य इति भेदप्रतीतिरस्तीति चेत्, न, धर्मिणोऽभेदे भासमाने विशिष्टधर्मिभेदप्रतीतेर्धर्मभेदविषयत्वात् । एकत्र घटे लोहितोऽयं न श्याम इदानीमिति प्रतीतिवत् । न च तीव्रेण गकारेण मन्दगकाराभिभवात् तयोर्भेदः न हि तदेव तदभिभावकं, तस्यैव तेनैव तदैव ग्रहणाग्रहणयोर्विरोधात् इति वाच्यं ।

तारत्वव्यञ्चकवायोर्बलवत्त्वेन मन्दत्वव्यञ्चकवाय्वभिभवात् मन्दत्वस्याग्रहणात् ।

सन्तु वा तार-मन्दरूपादयोऽभिन्ना एव गकारास्तत्प्रत्यभिज्ञाने बाधकाभावात्। तस्मात् वायुधर्मा एव तारत्वादयः शब्दगतत्वेन भासन्ते दर्पणधर्म्मा इव मुखादौ तद्ग्रहणञ्च

स्पर्शपुरस्कारेण कर्णशष्कुलीत्वगिन्द्रियेण तार-मन्दजनकवायूनां त्वयाप्युत्कर्षापकर्षस्योद्भूत-स्पर्शस्य च स्वीकारात् श्रौत्रेणैव वा। चक्षुरादेर्यत्र वायुधर्मग्रहस्तत्रायोग्यत्वमुपाधिः, अन्यथा श्रोत्रेण स्वगुणो न गृह्येत इन्द्रिये तथा दर्शनात्, चक्षुर्वा न पार्थिवरूपग्राहकं अपार्थिवेन्द्रियत्वात् रसनवत् इत्याद्यपि स्यात्।

अथ योग्यो योग्येन गृह्यते स्वगुणः परगुणो वा, योग्यता च फलबलेन कल्प्यते, तर्हि श्रोत्रस्यापि वायुधर्मग्रहे तुल्यं। न च तारो गकार इत्यत्र वायोरप्रतीतिः, वायुत्वेनाप्रतीतावपि तारत्वादिनैव तत्प्रतीतेः, यथा अग्नित्वेनाप्रतीतावपि अयोगोलके लोहित इति प्रतीतिः।

ननु वायु-शब्दयोस्त्वचा श्रोत्रेण वा ग्रहे केन तारोऽयं गकार इत्यारोप इति चेत्, न, उभयेन्द्रियग्राह्ययोरसंसर्गाग्रहात् संसर्गव्यवहारः। अस्तु वा त्वगिन्द्रियोपनीतस्य श्रोत्रेणारोपः श्रोत्रेणैव वा तारत्वग्रहोऽपीत्युक्तं, उत्पत्तिमत्त्वञ्चासिद्धं तत्प्रतीतेः श्रुतपूर्वोऽयं गकार इति प्रत्यभिज्ञानबाधितत्वात्। ननु प्रत्यभिज्ञैव तया बाधिता गत्वजात्यौपाधिकोऽभेदप्रत्ययो गकारे सम्भवतीत्युक्तमिति चेत्, न, गत्वजातेरसिद्धेः भेदे भासमाने ह्यभेदप्रतीतिर्जातिमालम्बते। न च गकारभेदप्रतीतिरस्ति, तारत्व-मन्दत्वे अपि न भेदहेतू य एव तारः स एवेदीनीं मन्द इति प्रत्यभिज्ञानात्, गकारानित्यत्वेऽपि तथा सम्भवतीति चेत्, तर्हि नित्यत्वेऽपि कर्णशष्कुलीत्वगिन्द्रियोपनीतवायुधर्मोत्पत्तेरुपाधित्वं सम्भवति। न च वायोरप्रतीतिः, उत्पन्नत्वेनैव तत्प्रतीतेः लोहितत्वेनेव जवाकुसुमस्य स्फटिके।

अस्तु वा प्रागनुपलभ्यमानत्वे सति उपलभ्यमानत्वेन उत्पन्नस्य सादृश्येन स्मृतोत्पत्तिमत्त्वारोपः । न चैवं घटादावपि नोत्पत्तिः सिद्ध्येदिति वाच्यम्। कुलालव्यापारानन्तरमनुभूयमानघटस्य तद्व्यापारात् प्रागनुभूयमानेन घटेन नाभेदो भासते किन्तु भेद एवेति तत्र प्रागसत्वे सत्वं सिध्यति, गकारे तूत्पत्तिप्रतीत्यनन्तरं कण्ठताल्वादिव्यापारात् पूर्वमनुभूयमानगकारेणाभेदप्रत्ययात् दीपवत् स व्यञ्चक एव।

अथ शब्द उत्पद्यते उत्कर्षवत्वे सति अपकर्षवत्वात् माधुर्यवत्, अत एवानित्यत्वमिति चेत्, न। तारत्व-मन्दत्वयोरुत्कर्षापकर्षयोर्गकारे पूर्वन्यायेनासिद्धेः सिद्धौ वा जातिसङ्करभयेनोत्कर्षापकर्षयोर्जात्योः रसत्व-शब्दत्वव्याप्ययोर्नानात्वेन रसशब्दसाधारण्या-भावात् । अत एव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकसामान्यमुत्कर्षः, तत्प्रतिबध्यसाक्षात्कारविषयतावच्छेदकसामान्यमपकर्ष इति साधारणो हेतुरपास्तः। तारत्वादेर्गकारजातित्वासिद्धेः।

साधनावच्छिन्नसाध्यव्यापकमूर्तगुणत्वस्याश्रौत्रत्वस्यचोपाधित्वात् अप्रयोजकत्वाच्च । न हि कारणाधीन एव उत्कर्षोऽपकर्षश्च, परममहति परमाणौ च परिमाणे प्रत्येकं सत्वात् । न चोभयस्यैकत्र सत्वं कारणप्रयोज्यं, एकैकवदद्वयोरपि प्रत्येकमेकत्वात्।

स्यादेतत् श्रोत्रव्यापारानन्तरमिदानीं श्रुतपूर्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमेव शब्दानित्यत्वं विनाशिभावत्वेनोत्पत्तिमत्त्वानुमानाद्वा । प्रत्यक्षप्रतियोगिकाभावत्वेन हि प्रत्यक्षत्वं ध्वंसस्य घटध्वंसवत् न तु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्षत्वं तन्त्रं, धर्माभावस्य प्रत्यक्षत्वापत्तेः। तदिन्द्रियाग्रह्येऽपि प्रतियोगिसमवायिनि गन्ध-रसाभावयोग्रहणाच्च । नोभयं गौरवात् स्मृतघटसंयोगध्वं-साप्रत्यक्षत्वापाताच्च । न च प्रतियोगियोग्यत्वस्य तन्त्रत्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यात् इति वाच्यम्। आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावात् ।

किञ्च यस्य सत्वं यत्रानुपलब्धिविरोधि तस्याभावस्तत्र गृह्यते इति योग्यानुपलब्ध्यर्थः। अतएवं पृथिवीत्वाभावो जलीयपरमाणौ न प्रत्यक्षः प्रत्यक्षश्च वायौ रुपाभावः।

अस्ति च तथा शब्दे तस्य सत्वे समवधाने च प्रतीतिप्रसङ्गात्। निरधिकरणाभावप्रतीतिर्नास्तीति चेत्, न, इहेदानीं शब्दो नास्तीति प्रतीतेः। तस्मात् यत्राधिकरणे देशे समये वा प्रतियोग्यत्र वर्तते तत्र तदभावो निरूप्यते। अत एव सद्भ्यामभावो निरूप्यते इत्युक्तं, शब्दाभावस्य च स्वतएवेन्द्रियसन्निकृष्टत्वात् नाश्रये सन्निकर्षापेक्षा।

इन्द्रियविशेषणतया नाभावग्रहणामिति चेत्, न। अयोग्यत्वस्योपाधित्वात्। अन्यथा गुणस्य संयुक्तसमवायेन ग्रहणदर्शनात् न समवायेन शब्दग्रहः स्यादिति।

मैवम्। अत एव हि शब्दस्य व्यञ्जकविरहादनुपलब्धिमात्रं न तु ध्वंसः, तत्तद्व्यायप्येतरसकलतदुपलम्भकसमवधाने तदनुपलब्धिरूपयोग्यानुपलब्धेरभावात् । प्रतियोग्युपलम्भकव्यञ्चकवायोरभावात्, विनष्टप्रतीरपि त्वगिन्द्रियोपनीतव्यञ्चकवायुस्पर्शध्वंसोपाधिकैव। वायुर्नोत्पादकः किन्तु व्यञ्चकः इत्यत्र किं विनिगमकमिति चेत्, न । इदानीं श्रुतपूर्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीत्यनन्तरं पुनः श्रवणे श्रुतपूर्वोऽयं गकारः पुनः स एवायं कोलाहल इति प्रत्यभिज्ञानमेव, घटध्वंसप्रतीत्यनन्तरञ्च स एवायं घट इति न प्रत्यभिज्ञानमिति तत्र विनष्टप्रतीत्या ध्वंस एव सिध्यति । अतएव तारत्व-तारतरत्व-मन्दत्व-मन्दतरत्वप्रतीतीनां भ्रमत्वकल्पनाद्वरं प्रत्यभिज्ञानमात्रस्य भ्रमत्वकल्पनमित्यपास्तम्। एतासु सतीष्वप्यभेदप्रत्यभिज्ञानात् ।

स्यादेतत् शब्दः प्रयत्नसाध्यः तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलभ्यमानत्वात् पटवत्, अभिव्यञ्जकत्वं हि इन्द्रियसम्बन्धप्रतिबन्धकापनायकत्वादिन्द्रियसन्निधापकत्वाद्वा कुड्योत्सारणेनेव पटादीनां, तदुभयमपि शब्दे न सम्भवति नित्यसमवेतत्वेनावरणापनयन-सन्निधापनयोरभावात्। नापि श्रोत्रसंस्कारात्, इन्द्रियसंस्कारस्य उन्मीलनालोकादेः सकृदिन्द्रियसम्बन्धयोग्यसर्वार्थोपलब्ध्यनुकूलसंस्कारजनकत्वं दृष्टं तद्वद्वायुरपि सकृदेव सर्वशब्दोपलब्ध्यनुकूलं श्रोत्रे संस्कारमादध्यात्। तथाच सर्वशब्दोपलब्धिः स्यात्।

तदुक्तं

**"सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्। घटयोन्मीलितं चक्षुः पटं न हि न बुध्यते"।।**

अथान्वय-व्यतिरेकाभ्यां कार्ये प्रतिनियतजनकजन्यत्ववच्छब्देऽपि प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमिति चेत्, न । वर्णा हि न प्रतिनियतव्यञ्जकव्यङ्ग्याः, एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात् घटैकत्वपरिमाणवत् । न

चावयवसंयोग-बहुत्वव्यञ्जकाव्यङ्येनावयविनोत्पलत्वव्यञ्चकदीपाव्यङ्येन तन्नीलिम्ना घटवृत्तिपृथक्त्वाव्ऱ्जकाव्यङ्ग्येनैकत्वेन वा व्यभिचार:। अवयवसंयोगाऽवयविनोर्नीलत्वोत्पलत्व-योश्चाव्याप्यव्याप्यवृत्तिनोरुत्पलत्वस्य चाधिकवृत्तित्वेनैकावच्छेदेन वृत्त्यभावात् ।

बहुत्वपृथक्त्वव्यञ्जकव्यङ्ग्यत्वञ्च अवयव्येकत्वयोरिति न परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यम् । अतएव नीला बलाकेत्यत्र रूप-परिमाणयोरर्धनिखात-वंशसङ्ख्यापरिमाणयोर्वा न व्यभिचार इति ।

मैवम् । वर्णा: प्रतिनियतव्यञ्जकव्यङ्ग्या: आश्रयेण सह समानेन्द्रियाग्राह्यत्वात् गन्धवत् इत्यापातत: सत्प्रतिपक्षत्वात्।

वस्तुतस्तु अनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ प्रतिनियतव्यञ्जकव्यङ्ग्यत्व-साधकस्यैव बलवत्त्वं, शब्दस्य शब्दजनकत्वञ्च शब्दनाशकत्वं वीचीतरङ्गन्यायेनोत्पत्तिकल्पनञ्च कल्पनमेव शब्दस्य शब्देऽजनकत्वादनाशकत्वाञ्च अन्त्याद्यशब्दवत्। एतेन सामान्यवत्त्वे सत्यस्मादादिबहिरिन्द्रियजप्रत्यक्षत्वात् इत्यपास्तं, प्रत्यभिज्ञानबाधात् शब्दत्वगत्वादेरसिद्धेश्च, तस्माच्छब्दो नित्य: व्योमैकगुणत्वात् तत्परिमाणवत्, श्रोत्रग्राह्यत्वात् शब्दत्ववत्, विशेषगुणान्तरासमानाधिकरणैकवृत्तिगुणत्वात् समयपरिमाणवत्, पृथिवीतरनित्यभूतविशेषगुणत्वात् अपाकजत्वे सति नित्यैकसमवेतत्वात् जलपरमाणुरूपवत्, अव्यासज्यवृत्तित्वे सति अनात्मविभुगुणत्वात् कालपरिमाणवत्, विपक्षे बाधकञ्च प्रत्यभिज्ञानमेवेति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दाख्यतुरीयखण्डे शब्दानित्यतावादपूर्वपक्ष:।**

**अथ शब्दानित्यतावादसिद्धान्त:**

अत्रोच्यते। गकारादिव्यक्तयो नैकैका:, अस्ति च शुक-सारिका-मनुष्यप्रभवेषु स्त्री-पुंसतद्विशेषप्रभवेषुच गकारादिषु स्फुटतरवैलक्षण्यात् स्वरूपतो भेदप्रथा इक्षुक्षीरादिमाधुर्यवत्। न चेयमौपाधिकी भेदप्रतीति:, न हि विदितकुङ्कुमस्य कुङ्कुमारुणा तरुणीतिवत् स्त्री-

पुंसप्रभत्वमानुभविकमुपाधिः इन्द्रियासन्निकर्षेण स्त्री-पुंसादिभेदमविदुषोऽपि शब्दभेदप्रत्ययात्, यतोऽनुमापयन्ति शुकशब्दोऽयं स्त्रीशब्दोऽयमित्यादि अन्यथान्योन्याश्रयात्, तत्प्रभवत्वे ज्ञाते भेदप्रत्ययस्तस्माच्च तदनुमानमिति। न च कृपाणान्वय-व्यतिरेकानुविधानात् कृपाणे मुखदीर्घत्ववत् औपपत्तिकमौपाधिकत्वं, अन्यानुविधानाभावात् ।

अथ व्यञ्जकवायोरेव वैलक्षण्यं शुकादिगकारगतत्वेन भासते वायोरुपलब्धिस्तेनैव रूपेणेति चेत्, न। गकारगतत्वे  बाधकाभावात् । न चाभेदप्रत्यभिज्ञानं बाधकं, न हि य एव शुकशब्दः स एव स्त्रीशब्द इति प्रत्यभिज्ञानं, अन्यथा तेषु भेदज्ञानाभावेन वक्तृविशेषानुमानं न स्यात्। न चाभिव्यञ्जकवायोरेव वैलक्षण्यं शुकाद्यनुमापकं, तस्य गकारावृत्तित्वात् तत्र चारोपे अनुमितेर्भ्रान्तत्वापातात्। तस्मात् यथा कृष्णा गौः शुक्ला गौरिति भेदे भासमाने गकारानुगतप्रतीतिर्गोत्वमालम्बते तथा शुकादिगकारेषु, भेदे भासमानेऽयं गकारोऽयमपि गकार इति बुद्धिर्गत्वमालम्बते इति प्रत्यभिज्ञा च भेदप्रथा चोपपद्यते।

किञ्च गत्वादिकं यदि न जातिस्तदा कोलाहलप्रत्ययो न स्यात् । तथा हि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्यक्तगकारादिवर्णविभागं कोलाहलमात्रं श्रूयते । न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः सम्भवति, तदभिव्यञ्जकभेरीताडनादेरभावात् । न च वर्णाभिव्यञ्जका एव ध्वनिव्यञ्जकाः, सन्निधानेऽपि श्रूयमाणे वर्णे तच्छ्रवणप्रसङ्गात् । न च वर्णाभिव्यञ्जकवायुभिरेव दूरे ध्वनिमात्रमभिव्यज्यते, कव्यञ्जकस्य गव्यञ्जन इव वर्णव्यञ्जकस्य ध्वनिव्यञ्जनेऽसामर्थ्यात् तत्समर्थशङ्खादेरभावाच्च ।

न च तत्र शब्दत्वमेव प्रतीयते न शब्दः, व्यक्त्यग्रहे जात्यग्रहात्। न चाभिव्यञ्जको वायुरेव कोलाहलत्वेन प्रतीयते, शब्दत्वेन प्रत्ययात् सन्निधावपि तथा प्रत्ययप्रसङ्गाच्च। गकारादिग्रहेऽपि तेषां परस्परभेदाग्रहात् कोलाहलधीरिति चेत्, न, तेषु वैधर्म्याभावात् तदभावेऽन्योन्याभावात् स्वरूपग्रहणात् समीपे बहुगकारेषु भेदाभावेन तदग्रहे कोलाहलधीप्रसङ्गाच्च। अनेकवर्णोच्चारणस्य तद्धेतुत्वे दूरेऽपि तदप्रत्ययापत्तेः।

तस्मादवश्यं गत्वादिजातिरुपेया यदग्रहे गकारादिग्रहेऽपि कोलाहलबुद्धिव्यपदेशौ। अस्ति च शब्दस्य कोऽपि जातिविशेष: श्रोत्रग्राह्य: यस्मात् प्राच्यादिदिग्देशविशिष्टशङ्खप्रभवत्वमनुमीयते, अव्यपदेश्यत्वेऽपि इक्षुक्षीरादिमाधुर्यावान्तरवत्तत्सत्त्वात्। अन्यथा दिग्देशविशिष्टशङ्खादीनां ग्रहे श्रोत्रस्यासामर्थ्यात् तत्प्रतीतिर्न स्यादेव। तथापि गत्वादिना परापरभावानुपपत्त्या शुकादिगकारादिषु न जातिविशेषा इति चेत्, शुककककारादिषु कत्वादिव्याप्या नानाजातिर्भिन्ना तया प्रत्येकं शुककककारादिषु शुकादिप्रभवत्वमनुमाय तद्व्यवहार:, न तु शुककककारादिषु एका जातिरस्ति शुकप्रभवत्वाद्यनुमापिका तद्व्यवहारकारिका वा, गत्वादिना सङ्करप्रसङ्गात्, गत्वन्तु न नाना अननुगतत्वेन ततोऽनुगतव्यवहारानुपपत्ते:।

अत एव तारत्वमपि गत्वादिव्याप्यं नाना न तु गत्वं, तन्निश्चयेऽपि गत्वसन्देहश्च व्याप्यतावच्छेदकरूपानिश्चयात्। न चानुगतव्यवहारानुपपत्ति:, सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेनानुगतेन नानातारत्वेष्वनुगतव्यवहारसम्भवात्, तदज्ञाने व्यवहारासिद्धे:। तारत्व-मन्दत्वे न जाती सप्रतियोगिकत्वात् इति चेत्, न, तारत्व-तारतरत्वादय उत्कर्षादिरूपा जातिविशेषा एव ते चाश्रये गृह्यमाण एव गृह्यन्ते न तूत्कर्षावध्यपेक्षा: यथा मधुरतरत्वादय उत्कर्षव्यवहारं इतरसापेक्षा: कुर्वन्ति तथा मन्दाद्यपेक्षया तारत्वादिव्यवहारं, उत्कर्षस्तु जातिरूपादन्योऽसम्भावित एव । गकारे तु नैवं, अनन्यथासिद्धभेदप्रत्ययबलेन वक्तृविशेषानुमानबलेन च तत्सिद्धेर्गत्वकत्वव्याप्यतन्नानात्वस्वीकारात्। तवापि वायुवृत्तित्वे शुकादिककारगकारादिव्यञ्जकवायूनां विजातीयत्वं वाच्यं, तथाच ककारव्यञ्जकवायुत्वव्याप्यं यदि शुकवर्णाभिव्यञ्जकवायुत्वं तदा शुकगकारव्यञ्जकवायौ न स्यात्, अथ व्यापकं तदा सर्व एव कव्यञ्जकवायव: शुकवर्णाभिव्यञ्जकवायव: स्युस्तस्माद्वायुवृत्तित्वेऽपि तासां नानात्वमावश्यकम्।

अथास्तु स्त्री-पुंसादिगकारभेदस्तथापि यावद्वक्तृभेदमनन्ता एव नित्या वर्णाः प्रत्यभिज्ञानादिति चेत्, अस्त्युत्पाद-विनाशप्रतीतौ सत्यामपि स एवायं गकार इति प्रत्यभिज्ञा। अस्ति हि तदनन्तरमप्युत्पाद-विनाशप्रथा। न चोत्पादप्रतीत्यभेदप्रत्यभिज्ञयोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति, न वानयोः परस्परं बाध्य-बाधकभावे विनिगमकं येनैकभ्रान्तत्वेनाविरोधः स्यात्। कथं वा भेदाभेदज्ञानयोरन्यत्रावधारितं परस्परप्रतिबन्धकत्वं परिभूय प्रथमं तयोरेकसत्त्वेऽप्यपरोत्पत्तिप्रसङ्ग इति सङ्कटप्रविष्टत्वेन प्रत्यभिज्ञानं शब्दनित्यत्वे प्रमाणयितुं न शक्यते।

नन्वेवमुत्पत्तिमत्त्वादिनाप्यनित्यत्वसिद्धिः कथम्। इत्थम्, उत्पादादिबुद्धि-प्रत्यभिज्ञयोरप्यवश्यं विषयभेदः, एकविषयत्वे विरोधेनैकानन्तरमपरानुत्पत्तिप्रसङ्गात् । एवञ्च भेदे भासमाने प्रत्यभिज्ञायाः सजातीयत्वं विषयो न व्यक्त्यभेदः । न चैवं वर्णस्तज्जनककण्ठताल्वाद्यभिघाताभावादिति वाच्यम् । तज्जातीयत्वप्रतीतेरपि सोऽयमित्याकारदर्शनात् यथा सैवेयं गाथा तदेवेदमौषधं बहुभिः कृतं मयापि प्रत्यहं क्रियमाणमस्तीत्यादौ। न हि तावद्वर्णमात्रमानुपूर्व्वी, जरा-राज-नदी-दीना-दिषु तन्नानात्वात्, किन्तु तदुच्चारणानन्तरमुच्चारणं तज्ज्ञानानन्तरं ज्ञानं वा तच्च नानेति तद्वती गाथापि नानैव ।

नचाभेदे भासमाने उत्पादादिबुद्धिरेवान्यस्योत्पादादिकमवगाहते, गकारगतत्वप्रतीते-भ्रान्तत्वप्रसङ्गात्। न चेष्टापत्तिः, अभेदे भासमाने तद्विरुद्धधर्मवत्वभ्रमानुदयात्, विनिगमकाभावेनोभयस्यापि यथार्थत्वाच्च, कुतस्तर्हि तस्या अभेदो विषयः, यत्र प्रथमं न भेदप्रथा अतएव भेदसत्त्वे तदज्ञानात् क्वचित् सा भ्रान्ता, तस्माद्यत्र भेदप्रतीतिस्तदितरबाधकाबाध्या तत्र प्रत्यभिज्ञैव न भवति भवन्ती वा तज्जातीयत्वमालम्बते, न तु भ्रान्ता, विशेषदर्शने भ्रमानुदयात्।

अपि च यथा शङ्खादिध्वनीनां उत्पत्ति-विनाशप्रत्ययात् तारत्वादिविरुद्धधर्मसंसर्गाच्चानित्यत्वे सैवेयङ्गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया तथा

वर्णप्रत्यभिज्ञापि। अन्यथा ध्वनयोऽपि नित्या: स्यु: उत्पत्ति-विनाश-तारत्वादिप्रतीतीनां प्रत्यभिज्ञानबलेनौपाधिकत्वात् । न च वर्णेषु तारत्वेनैव भासमाना ध्वनय उपाधय: सम्भवन्ति, न तु ध्वनिषु, तज्जातीयोऽयमिति स्यात् न तु सोऽयमिति वाच्यं। वर्णोच्चारणदशायामपि गुर्जरीकादिजनकानामभावात् । तस्मात् उत्पत्ति-विनाशतारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वे द्वयोरपि नित्यत्वमनित्यत्वं वा । न चोभयोरपि नित्यत्वमेव, उक्तन्यायेन प्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वात् ।

किञ्च यदि व्यङ्ग्य: शब्द: स्यात् तदा बाह्यलोकाभावे घटस्येव व्यञ्चकाभावे शब्दस्यानुपलम्भात् तत्संशय: स्यात्, न त्विहेदानीं शब्दो नास्तीति निश्चय: । तस्माद् वर्णो न नित्योऽनित्यो वा सत्वे सत्युत्पत्तिमत्त्वात्, अस्मदादिबहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वात्, अस्मदादिप्रत्यक्षगुणत्वाद्वा । आत्मैकत्वप्रत्यक्षत्वपक्षे प्रत्यक्षविशेषगुणत्वात्, व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्, अनात्मप्रत्यक्षगुणत्वात्, अव्याप्यवृत्तित्वात्, ईश्वरज्ञानञ्च न तथा, तत्प्रयोजककारणाभावात्, बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, भूतप्रत्यक्षगुणत्वात्, उत्कर्षापकर्षाशब्दप्रवृत्तिनिमित्तजातिमत्त्वेत्यादि । रसत्वादिव्याप्य-जातेर्नानात्वेऽपि तादृशप्रवृत्तिनिमित्तत्वस्य साधारण्यात्।

न चात्र साधनावच्छिन्नस्य पक्षधर्मावच्छिन्नस्य वा साध्यस्य व्यापक: स्पर्शवत्समवेतत्वं उपाधि:, सर्वत्र वर्णात्मकशब्दपक्षीकरणे व्योमगुणेष्वनित्येषु ध्वनिषु साध्याव्यापकत्वात्स्पर्शवत्पदस्य पक्षमात्रव्यावर्तकत्वेन पक्षेतरत्वाच्चेति। यदा च वर्णा एव न नित्यास्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमुहरूपाणां पदानाम्, कुतस्तराच तत्समूहरूपस्य वाक्यस्य कुतस्तमाच तत्समूहस्य वेदस्येति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दाख्यतुरीयखण्डे शब्दानित्यतावादसिद्धान्त:।।**

**अथोच्छन्नप्रच्छन्नवाद:**

तथापि परतन्त्रपुरुषपरम्पराधीनतया प्रवाहाविच्छेदमेव नित्यत्वं ब्रूमः इति चेत्, न, स्मृत्याचारानुमितानां शाखानामुच्छेददर्शनात्। स्यादेतत्, विवादपदमपूर्वबोधिका स्मृतिः स्मृत्यर्थानुभवजनकवेदमूला अविगीत-महाजनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलकस्मृतिवत् । वेदमूलकत्वञ्च वेदजन्यानुभवजन्यत्वं, ज्ञानद्वारा ज्ञायमानस्यैव वेदस्य स्मृतिहेतुतयानुमानं, कुविन्दस्येव ज्ञानादिव्यवहितस्य पटे, न तु कारणकारणता, वेदे सत्येव तत्प्रतिसन्धाने स्मृतिप्रणयनात्, वेदार्थस्मृतिता च प्रसिद्धिसिद्धा, स्मृत्यर्थश्च स्मृतित एव उपस्थितः।

न च स्मृत्यर्थबोधकवेदानुमाने स्मृत्यर्थरूपवेदार्थस्य विषयत्वात् वेदोऽनुवादकः ज्ञानान्तरोपनीतस्य विशेषणत्वेन विशिष्टबुद्धिसम्भवात्, पाककृतौ मानसप्रत्यक्षायां पाकस्य संज्ञासंज्ञिज्ञाने संज्ञाया ज्ञानायथार्थत्वे तदनुव्यवसाये भ्रमविषयस्येव, अन्यथाभ्रान्त-भ्रान्तिज्ञसङ्करापत्तिः न तु शब्दार्थोऽनुमानस्य विषयः तस्यासिद्धत्वेनाजनकतया स्मृत्यव्यापकत्वात् । स च वेदो नित्यमनुमेय एवानुमितादेवार्थमवधार्य स्मृतिप्रणयनसम्भवात्।

नन्वासंसारमपठितस्य न वेदत्वं उत्पत्तितोऽभिव्यक्तितो मौनिश्लोकवदभिप्रायतो-वानुपूर्वीहीनवर्णमात्रस्य निरर्थकत्वात् । ज्ञानजनकसमभिव्याहारस्यानेकत्वे विशेषाननुमानाच्चेति चेत्, न । स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य वेदस्य स्मृत्यर्थानुभावकत्वात्।

न हि शाब्दबोधे नियतपदानुपूर्वी हेतुः, व्यभिचारात् । पदस्य वर्णविशेषानुपूर्वीनियमेऽपि तत्तवर्णानुपूर्वीकपदविशेषत्वेन न हेतुत्वं हस्त करादिपदानां प्रत्येकं व्यभिचारात्। किन्त्वव्यभिचारितदर्थज्ञापकत्वेन ज्ञातस्य लाघवादावश्यकत्वाच्च, तदर्थज्ञापकत्वज्ञानार्थमेव क्वचिद्वर्णक्रमस्वरविशेषाणामुपयोगः। अतएव वर्णलोपादौ कुशमानयेति सकारसन्देहे लिपावुच्चारणे वा हस्त-करसन्देहेऽपि वाक्यार्थबोधः।

ननु क्रमिकपदवत्वं वाक्यत्वं। न चात्र पदक्रमः, अनुच्चार्यमाणतयोच्चारणाधीनस्य युगपदनुमीयमानतया बुद्ध्यधीनस्य वा तस्याभावादिति चेत्, न हि क्रमिकपदवत्वं वाक्यत्वं, गौरश्वः इत्यादावभावात् । किन्तु विशिष्टार्थपरशब्दत्वं तच्चात्राप्यस्त्येव । अथानुच्चार्यमाणस्य न वाक्यत्वं न वा अर्थानुभावकत्वमिति चेत्, न, लिप्यनुमितानामपि

वाक्यत्वात् अर्थबोधकत्वाच्च, लिपितुल्या च स्मृतिः । किञ्च वाक्यमुच्चार्यते न तूच्चारणाद्वाक्यत्वं, अन्यथा वाक्यमुच्चारयेत्यत्रानन्वयापत्तिः अनुच्चारितमौ तमौनिश्लोकश्च वाक्यं न स्यादुच्चारणदशायाञ्च वाक्यत्वे वाक्यस्यासत्वमेव स्यात् एकदा तावत्पदानां उच्चारणाभावात् ।

न च कृत-क्रियमाण-करिष्य-माणोच्चारणस्य वाक्यत्वं, समुदाये प्रत्येकस्याभावात्। तस्मादर्थविशेषज्ञापकत्वेनैव ज्ञातादर्थविशेषधीः। अत एवास्ति वह्निलिङ्गमितिशब्दात् प्रतीते धूमे वह्नेरनुमानं, न तु तदर्थज्ञापकत्वेन ज्ञातात्, पदादर्थज्ञानमात्रं स्यात् न तु संसर्गधीः, घटः कर्मत्वमानयनं भावना तद्बोधकमिति ज्ञानेऽपि घटमानयेतिवाक्यादिवान्वयबोधाभावात्। एवञ्चान्वयप्रकारकर्मत्वाद्युपस्थापकविभक्त्यादिमत्पदविशेषस्य तदुत्थापिताकाङ्क्षादेश्च ज्ञानं वाक्यार्थधीहेतुरतो न तैर्विना ज्ञापकत्वमात्रेण ज्ञातादर्थधीः, हस्त-करादिसन्देहे कुशमानयेत्यादौ विभक्त्यादिज्ञानादेव वाक्यार्थानुभव इति,

मैवं, न हि तत्तद्विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थथीहेतुत्वं, अननुगमात्, किन्तु घटः कर्म्मत्वमित्याद्यन्वयविरोधिपदाजन्यपदार्थोपस्थितिस्तथा सा चेहाप्यस्ति वस्तुतस्तु नानापदात् पदार्थोपस्थित्यनन्तरं वाक्यार्थवोधे तथैव सामग्री अनुमितवेदाद्वाक्यार्थानुभवे विलक्षणैव सा स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् धर्मग्राहकप्रमाणेन तस्य तथैव सिद्धत्वात् । तवेश्वरस्येवाशरीरस्य कर्तृत्वे । अतएव वर्णपद विभक्त्यादिविशेषघटितत्वेनाज्ञातस्याखण्डस्य सखण्डस्य वा वाक्यार्थानुभावकत्वात् पदार्थस्थानीयस्तस्य वाक्यार्थस्तत्र वर्णसमूहः पदं पदसमूहो वाक्यमित्यत्रापि ततो ग्रहः, प्रमाणशब्दत्वमात्रेण तस्य सिद्धेः, अन्यथा क्लृप्तहेतुं विना सोऽनुभावक इत्यादौ तदसिद्धावाश्रयासिद्धिः सिद्धौ वा बाधः तेन विनैव सर्वानुपपत्तिं परिभूय तदनुभावकत्वस्य धर्मिग्राहकमानसिद्धत्वात् ।

अतएव क्वचित् स्तुति-निन्दाभ्यां कल्पितविधिनिषेधकवेदार्थमधिगम्य प्रवृत्ति-निवृत्ती । अन्यथा विधि-निषेधकानां नानाप्रकारकत्वेन विभक्त्यादिविशेषवत्पदस्यानुमातुमशक्यत्वात्

न ततोऽर्थधी: स्यात् । तथापि वक्तृज्ञानानुमानानन्तरमिवानुमितानुमानादेव वाक्यार्थसिद्धेर्लौकिकवाक्यवद्वेदस्यानुवादकत्वं स्यादिति चेत्, न, धर्मिग्राहकमानेन स्मृत्यर्थज्ञापकतया ज्ञातात् सम्भूतसामग्रीकत्वेनानुपदमेव वाक्यार्थबोधोदयात् अपेक्षणीयान्तराभावात्, अनुमानस्य व्याप्त्यादिज्ञानापेक्षितत्वेन विलम्बितत्वात् । न च वेदस्यापि योग्यतादिज्ञानापेक्षिततया विलम्ब:, तन्निरपेक्षबोधकस्यैव धर्मिग्राहकमानसिद्धत्वात् योग्यतादिविशिष्टस्यैवानुमानाद्वा । एवं मङ्गलाचारस्याविगीतशिष्टाचारत्वेन कर्तव्यतामनुमाय सा कर्तव्यता वेदबोधिता अलौकिकाविगीतश्शिष्टाचारकर्तव्यतात्वादिति तद्बोधकत्वेनानुमितवेदात् कर्तव्यताधीस्तत: प्रवृत्ति:।

ननु स आचारो वेदबोधितकर्तव्यताक:, तादृशाचारत्वादित्यनुमितवेदात् तत्कर्तत्यताधी:। विभक्त्यादिकं विनानुमितवेदात् तत्कर्तव्यताज्ञानाभावात् मङ्गलमाचरेदित्येवंरूपस्य च वेदस्य नानुमानं तथा व्याप्त्यभावात् । तस्मात् तस्य कर्तव्यतामनुमाय तद्बोधकवेदानुमानं, प्रथमं कर्तव्यताज्ञानेऽपि वेदानुमानं अविनाभावात्। न च तत एव प्रत्यक्षवेदानुमानं, प्रत्यक्षत्वे उच्छेदानुपपत्ते: शाखान्तरवत्।

**यत्तु** अष्टका: कर्तव्या: कार्या अष्टका इत्येवंरूपमेव वाक्यमनुमेयं उपस्थितत्वात् । एवञ्च तत्रैवार्थे प्रतिपुरुषमन्यान्यवेदानुमानं न दोषाय एकार्थानेकपदोपस्थितौ वानेकवाक्यानुमान**मेवेति। तन्न।** आचारतो वेदानुमाने मङ्गलमाचरेदित्याद्यन्यतरोपस्थितौ नियमाभावात्। अनेकवेदकल्पने च स्वानुभवविरोध:, मनुस्मृतिमूलञ्चानेकं वाक्यं नावश्यकमिति कथमाधुनिकोऽनेकमनुमिनुयात्। न च स्मृत्यर्थबोधको वेद: स्मृतिसदृश एवानुमेय: नियमत: स्मृतेरुपस्थितत्वात् इति वाच्यम्ण तदर्थस्मृतेरपि नानाप्रकारत्वात् तस्य च प्रदोषादौ अनुच्चरितवेदस्येव वेदत्वं श्रोत्रग्रहाणार्हतया च शब्दत्वं वाक्यत्वमर्थबोधकत्वादित्येतदेव युक्तं स्मृत्याचारेण चानुमितो वेदोऽर्थं बोधयतीति पूर्वपूर्वेणानुमितवेदात् उत्तरोत्तरस्मृत्याचाराविति नान्धपरम्परा शब्दार्थशरक्तिग्रहवत् स्वत: प्रमाणमूलकत्वात्। तस्मान् नित्यानुमेयत्वं वेदस्य न तूच्छेद इति।

अत्रोच्यते। उच्छिन्नवेदादर्थं प्रतीत्य स्मृत्याचारयोरुपपत्तेः न सामग्र्यन्तरकल्पनम् अत एव नाश्रयासिद्धिर्बाधो वा स्मृत्याचारानुमितवेदस्यास्माभिरभ्युपगमात्। इदानीञ्च स्मृतेरर्थं प्रतीत्याचाराच्च कर्तव्यतामनुमाय प्रवृत्तिः। न चैवं किं वेदेनेति वाच्यम्। तुल्यत्वात् अविनाभावाच्च तत्कल्पनं तुल्यं तथाच स्मृत्याचारयोर्वेदजन्यानुभवमूलत्वानुमानादेव पक्षधर्मताबलात् प्रत्यक्षवेदमूलकत्वसिद्धिः। अन्यथा तस्यानुभावकत्वाभावेन मूलत्वानुपपत्तेः। तस्मात् स्मृत्याचारानुमितो वेदः प्रत्यक्षोऽध्ययनविषयश्च वेदत्वात् सम्मतवत्, अन्यधा सामग्र्यन्तरकल्पने गौरवप्रसङ्गः।

ननु स्तुति-निन्दार्थवादेन कल्पितात् विधि-निषेधकवाक्यात् कथमर्थमवगम्य प्रवृत्ति-निवृत्ती, न हि तत्र वर्ण-पद-विभक्ति-विधि प्रत्ययक्रमविशेषाणामनुमानं सम्भवति, व्यभिचारादिति चेत्, न, स्तुति-निन्दावाक्याभ्यां प्रवृत्ति-निवृत्तिपराभ्यां प्रवृत्ति -निवृत्तिहेतुरर्थएव कल्प्यते लाघवात् न तु विधायकनिषेधकवाक्यं गौरवात् उक्तदोषाच्चा यत्र चार्थवादादेव तदर्थवगमः **"तरति मृत्युमित्यादौ"** तत्र न तत्कल्पनापि ।

अथ तस्याध्ययनविषयत्वे शाखान्तरवत् बहुभिर्मेधाविभिराध्यात्मिकशक्ति-सम्पन्नैर्धियमाणशाखाया उच्छेदासम्भव इति चेत्, न, एकस्य न सकलशाखाध्ययने शक्तिरित्येकेनेवापरैरपि तदनध्ययने शाखोच्छेदसम्भवादेकानधीताया अपराध्ययनविषयत्व-नियमे मानाभावात् । शाखात्वस्येव प्रत्यक्षशाखात्वस्याप्रयोजकत्वात् । यद्यपि वेदसहस्रशाखाविदो व्यासादयः सन्त्येव, तथाप्यध्ययनाभाव एव शाखोच्छेदः ।

ननु शाखोच्छेदे वर्ण-पदवाक्यहानिशङ्कया प्रत्यक्षवेदादपि वाक्यार्थ-प्रयोगयोरनिश्चये वैदिकव्यवहारमात्रं लुप्येतेति चेत्, न, श्रूयमाणमात्रस्यैव महाजनपरिगृहीतत्वात् तन्मात्रबोधिताङ्गेतिकर्तव्यतयैव शिष्टैरनुष्ठीयमानत्वाच्च तदर्थनिश्चयात् । न च उच्छिन्नशाखाबोधितेतिकर्तव्यताशङ्कया एकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गः, नानाशाखेतिकर्तव्यतापूरणीयत्वात् तस्येति साम्प्रतं, सन्ति हि तत्तत्कर्मणि नानाशाखाबोधितसकलेतिकर्तव्यताबोधनायैनमेव कालक्रमभाविनमनाश्वासमशङ्कमानैर्महर्षिभिः

प्रणीता महाजनपरिगृहीताः स्मृतय इति नानाश्वासः । अन्यथा एकस्य सकलशाखानवगमात् शाखान्तरबोधितेतिकर्तव्यतासंशयेनैकशाखातो नार्थनिश्चयः स्यात्।

**यत्तु** विभक्त्यादिमत्ततत्पपदानां तत्समुदायानाञ्च प्रत्यक्षत्वन्तेष्वपि कश्चिद्वेदः तत्रायं समुदायो वेद इत्यनिश्चय एव नित्यानुमेयार्थः, वेदत्वं वा तत्रानुमेयमिति, **तन्न** । प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वेदत्वाभावनिश्चयात्। अत एव वेदत्वं तत्र नानुमेयं बाधात् विशिष्य पक्षाज्ञानाच्च धर्मवेदनाजनकत्वञ्च वेदत्वं नानुमेयं तज्जनकत्वस्य प्रत्यक्षत्वात्, नाध्ययनविषयत्वं तदभावात्, न जातिरनभ्युपगमादिति।

स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तत्रोच्छेदादिविवादस्तदेव त्वसिद्धं, तथा हि वेदसमानार्था महाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमाने लिङ्गम् । तथाच प्राथम्यात् साध्यप्रसिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवापूर्वादिवाक्यार्थज्ञानमस्तु किं वेदेन तदर्थस्य स्मृतित एव सिद्धेः अपूर्वस्यापि शब्दैकगम्यत्वेन स्मृतितो ज्ञातस्य ज्ञापकत्वेनानुवादकतापत्तेश्च । सा च स्मृत्यन्तरादित्यनादिरेव स्मृतिधारावश्यकी ।

अन्यथा मनुस्मृतेः पूर्वन्तवापि वेदानुमानं न स्यात् । सर्वा च स्मृतिः स्मृतिजन्यवाक्यार्थप्रमाजन्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नान्धपरम्परा, प्रत्यक्षा च स्मृतिः स्मृतिमूलं नानुमिता अनुमितवेदवत्तस्याननुभावकत्वात् । वेदार्थस्मृतिताप्रसिद्धिस्तु प्रत्यक्षवेदमूलस्मृतिसाहचर्येण भ्रमात् प्रत्यक्षवेदाबोधितलोभन्यायमूलस्मृताविव तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलत्वभ्रमाद्वा भवन्ती न सम्भवन्मूलान्तराणां वेदमूलकत्वं कल्पयति ।

अथ स्मृतिरिव तद्वेदमूलकत्वप्रसिद्धिरपि महाजनपरिगृहीता । एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिगृहीतवेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्, एवं वेदार्थताप्रसिद्धिरपि । अन्यथा महाजनपरिगृहीतानादरे वेद-स्मृत्योरपि प्रामाण्यं न स्यादिति चेत्, न, यूपहस्त्यादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात्, क्लृप्तलोभादित एव तत्सम्भवात्, विचारकाणां विप्रतिपत्तेश्च । तत्र तत्प्रसिद्धौ विगानं महाजनानामिति चेत्,

न, अत्रापि मूलान्तरसम्भवाद्विप्रतिपत्तेश्च विगानमेव तेषां। अत एव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वम् ।

न च वेदमूलेयमिति कृत्वा स्मृतेर्महाजनपरिग्रहात् तन्मूलत्वं वेदमूलेयमिति प्रथमं ज्ञातुमशक्यत्वात्, शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, अप्रसिद्धेः, मन्वादिस्मृतित्वेन पूर्वमहाजनपरिग्रहेणोत्तरोत्तरेषां परिग्रहादनुष्ठानाद्युपपत्तेः, एवं होलाकाद्याचारेऽपि वेदलिङ्गेनैव कर्तव्यताज्ञानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः।

अविगीतालौकिकविषयकशिष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात्, वेदं विनापि तत्कर्तव्यताधीसम्भवात् न तदर्थं वेद इति इहापि तुल्यम् । आचारकर्तव्यतानुमानयोरनादित्वेनाचाराणां कर्तव्यत्वानुमानमूलकत्वात् नान्धपरम्परा। न च पूर्वानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् सा, व्याप्तिपक्षधर्मतासत्त्वेन सर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति न निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः।

एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तम्। अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैव हेतोरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च। न च सापेक्षत्वेन न प्रमाणता, व्याप्त्यादिसत्वात्। अन्यथा प्रमाणे नैरपेक्षस्य वैयर्थ्यात् । न चाचारे वेदमूलत्वप्रसिद्धेस्तदनुमानं, असिद्धेः व्यभिचारादन्यथोपपत्तेश्च । न च वेदमूलत्वेनैव महाजनपरिग्रहात्तथा, न हि वेदमूलोऽयमिति कृत्वा महाजनानां तत्परिग्रहः, वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वाच्छक्यत्वे वा किनुमानेन । न च वेदमूलत्वेनैव महाजनपरिगृहीतोऽयमाचार इति ज्ञात्वा तत्र महाजनपरिग्रहः, गौरिवादसिद्धेश्च। पूर्वमहाजनपरिग्रहादेवोत्तरोत्तरेषां परिग्रहादनुष्ठानोपपत्तेः । तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदसिद्धिरिति चेत्, न, असम्भवन्मूलान्तरत्वस्योपाधित्वात् । अन्यथा लोभन्यायमूलस्मृतेरपि वेदमूलत्वप्रसङ्गः।

अस्तु वा स्मृत्याचारयोरनादित्वम् । न चाचारात् स्मृतिः स्मृतेराचार इत्यन्धपरम्परा मूलभूतप्रमाणाभावात् इति वाच्यं। स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमपीति।

उच्यते । प्रलये पूर्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः । अन्यथा मूलाभावेनान्धपरम्पराप्रसङ्गः। न च मन्वादीनामतीन्द्रियार्थदर्शित्वं, तदुपायश्रवणादेस्तदानीमभावात् । पूर्वसर्गसिद्धसर्वज्ञमन्वादय एव ते इति चेत्, न, प्रमाणाभावात् । स्मृत्याचारयो; प्रमाणमूलत्वमेव तत्कल्पकमिति चेत्, न, प्रतिसर्गं तेषामन्यान्यत्वकल्पने गौरवमित्येकस्यैव नित्यसर्वज्ञस्य कल्पनात् । न च स्मृतय एव तत्प्रणीताः, तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधनात् स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च। एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाधकमपि भगवति प्रमाणम् । अत एव **"प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते"** इत्यागमोऽपि। एवञ्च पूर्वं प्रत्यक्षमूलावेव स्मृत्याचारौ, अग्रे च कालक्रमेणायुरारोग्यबलश्रद्धाग्रहणधारणादिशक्तेरहरहरपचीयमानत्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्तव्यतामधिगत्य प्रवृतिः।

नन्वेवं स्मृतिरस्तु वेदमूला, मङ्गलाद्याचारस्तु ईश्वरादेव भविष्यति घट-लिप्यादिसम्प्रदायवदिति चेत्, न, बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात् । न च मङ्गलादिपदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यम् । स्वर्गादिपदवद्वाक्यार्थे तदुपपत्तेः । अत एव यत्र वचनमात्रात् परप्रतिपत्तिस्तत्र नाचारः परीक्षकाणां, तस्य च वेदत्वं नेश्वरप्रणीतत्वेन शक्तिग्रहणार्थतद्वचने व्यभिचारात्, किन्तु तादृशाचारस्य वेदमूलत्वनियमादिति ।

स्यादेतत्, प्रलये सत्येवमेव तत्, स एव तु नास्ति प्रमाणाभावात् इति चेत्, न, काल-कपालान्यावृत्तिघटप्रागभावः कार्यद्रव्यानाधाराधारः कार्यद्रव्यानधिकरणकार्याधिकरण-वृत्तिर्वा अभावत्वात् आकाशवृत्यन्योन्याभाववदिति वृत्तप्रलयसाधनात् । एवमेव घटध्वंसं पक्षीकृत्यागामिप्रलयसाधजं । यद्वा घटः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगी

कार्यत्वाच्छब्दवत् । यद्वा कार्यद्रव्यत्वं कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंस-प्रतियगिवृत्ति कार्यमात्रवृत्तित्वात् शब्दत्ववत् । यद्वा एककालीना: सर्वे परमाणव: समग्रोपादेयप्रबन्धशून्या आरम्भकत्वात् नष्टपवनारम्भकपरमाणुवत् । सर्वत्र पक्षतावच्छेदकावच्छिन्नं साध्यं प्रतीयते इति एककाले शून्यता लभ्यते ।

न च पवनपरमाणूनामपि पक्षत्वेनांशत: सिद्धसाधनं, पक्षधर्मताबललभ्यसाध्याप्रतीते:, अथेदानुमानवच्च पक्षस्य दृष्टान्तत्वाविरोध: । यद्वा परमाणव: कार्यद्रव्यानधिकरणवृत्तिकार्यवन्त: नित्यद्रव्यत्वात् आकाशवत्, भूगोलकसन्तानोऽयं भूगोलकसन्तानानधिकरणवृत्तिध्वंसप्रतियोगी कार्यत्वात् घटवत् । यद्वा एतत्कर्मातिरिक्तानि कर्माणि एतत्प्रतिवन्धकप्रतिबध्यानि कर्मत्वात् एतत्कर्मवत् । न चात्र व्यभिचारशङ्का, सर्वेषामेवरूपत्वादनेवम्भावे च स्वभावप्रच्यवात् । अन्यथा नियमेऽपि नियमान्तरापेक्षायामनवस्थिते:। आगमोऽप्यमुमेवार्थं संवदतीति कृतं प्रसक्तानुप्रसक्त्या ।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ**

**शब्दखण्डे उच्छिन्नप्रच्छन्नवाद:।।**

## शब्दखण्डे विधिवाद:

आचारमूलत्वं वेदस्य प्रवर्तकज्ञानजनकत्वेन भवतीति प्रवर्तकज्ञानं निरूप्यते । तत्राभिधासङ्कल्पापूर्वभावनाज्ञानं न प्रवर्तकम्, तस्मिन् सत्यपि अप्रवृत्ते:, असत्यपि प्रवृत्तेश्च। कार्यत्वज्ञानं प्रवर्तकमिति गुरव: । तथाहि ज्ञानस्य कृतौ जन्यायां चिकीर्षातिरिक्तं न कर्तव्यमस्ति । तत्सत्त्वे कृतिविलम्बे हेत्वन्तराभावात् । चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा । पाकं कृत्या साधयामीति तदनुभवात् । सा च स्वकृतिसाध्यताज्ञानसाध्या । इच्छाया: स्वप्रकारकधीसाध्यत्वनियमात् । अत एव स्वकृति साध्ये पाके प्रवर्तते, न त्विष्टसाधनताज्ञानसाध्या। स्वकृत्यसाध्ये चिकिर्षापत्ते: । स्वकृत्यसाध्यत्वज्ञानं प्रतिबन्धकमिति चेत्, न । तदभावकारणत्वे गौरवात् ।

अथाभाव उभयसिद्धः कृतिसाध्यताधीरसिद्धेत्यतो न लाघवावसर इति चेत्, न । यत्र शब्दादनुमानाद्वा दैवात् सा तत्र लाघवावतारादिच्छायाः स्वप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वाच्च, जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वाच्च । व्याप्तिज्ञानविघटनद्वारा अनुमितिप्रतिबन्धकानैकान्तिकज्ञानवत् । अन्यथा स्वकृत्यसाध्यत्वानिष्टसाधनत्वोपेक्षणीयत्वनिष्फलत्वज्ञानं प्रतिबन्धकं क्रियाज्ञानमेव प्रवर्तकं कल्प्येत ।

ननु सनो धात्वर्थगोचरेच्छावाचित्वात् लाघवाच्च कृताविच्छा चिकीर्षा । सा च वृष्टाविवेष्टसाधनताज्ञानादिति चेत्, न । वह्निना साधयामीतिवत् कृत्या साधयामीतीच्छायाः कृतेः पूर्वमनुभूयमानायाः सनन्तावाच्यत्वेन गौरवेण च प्रत्याख्यातुमशक्यत्वात् । किञ्च पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छा विषयत्वमनुभूयते न तु कृतेः । धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारवाचित्वम्, ओदनं बुभुक्षत इत्यत्र भोजन विशेष्यतयौदनस्येच्छा-विषयत्वानुभवात् । इष्टसाधनत्वेन वृष्टाविव कृताविच्छासम्भवेऽपि कृतीच्छा न प्रवर्तिका। किन्तु स्वकृतिसाध्येच्छैव । घटं जानाति चिकीर्षति करोतीतिज्ञान-चिकीर्षा-कृतीनामेकविषयत्वानुभवात् ।

अथ यदि कृत्या साधयितुमिच्छा सा तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेत् । न ह्युपायविशेषसाध्यत्वेनेच्छोपायान्तराधीनफललाभेन निवार्यते। प्रीत्या धनलाभेऽपि प्रतिग्रहेण तल्लिप्साया अनिवृत्तेरिति चेत्, न । स्वविषयसिद्धत्वस्य फलेच्छाविच्छेदस्य चोपायेच्छाविरोधित्वात् । अस्ति च तत्र पाकौदनयोः सिद्धत्वम्, अन्यौदनेच्छायां पाकचिकीर्षा भवत्येव। प्रत्युतासिद्धत्वात् कृतावेवेच्छा न विच्छिद्येत यदि कृतिविषयसिद्धत्वफलेच्छाविच्छेदौ न विरोधिनौ । प्रीत्या धनलाभे च तदधिकधनेच्छा न विच्छिद्यते तस्यासिद्धत्वात् । तत्फलेच्छायाश्च सत्त्वात् । धनमात्रार्थिनश्च प्रीत्या धनलाभेऽपि प्रतिग्रहेण तल्लिप्सा नास्त्येव, धनमात्रस्य सिद्धत्वात् । किञ्चिद्विशेषसिद्ध्यैव हि सामान्येच्छाविच्छेदः। अन्यथा सकलस्वविषयसिद्धेरसम्भवेन तद्विच्छेदो न स्यादेव ।

वस्तुतस्तु क्रियानुकूला कृतिरिष्टोपाय इति ज्ञाने क्रियाया: कृतिसाध्यत्वमिष्टोपायत्वञ्च भातं क्रियाद्वारैव कृतेरिष्टसाधनत्वादिति तद्बोधात् कृताविव कृतिसाध्यत्वेन क्रियायामपि सैवेच्छेति चिकीर्षायां कृतिसाध्यत्वप्रकारनैयत्यमत: कृतिसमानविषयचिकीर्षात्वेन चिकीर्षाया: कृतिकारणत्वम्, न तु कृतीच्छात्वेन, भिन्नविषयतया गौरवात्। तथापि येन रूपेण यस्येष्टसाधनत्वं तेन प्रकारेण तत्रैच्छा, यथा स्वकेदारवृष्टित्वेन इष्टसाधनत्वात् तथैवेति, तथा कृतिसाध्यत्वेन पाकस्येष्टासाधनत्वमत: कृतिसाध्यत्वेन तत्रेच्छा भवतीति, कृतौ कृतिविषये वा चिकीर्षायां न वृष्टीच्छा ।

विलक्षण सामग्र्यन्तरकल्पनमिति चेत्, भवेदेवम्, यदि कृतिसाध्यत्वेन पाकस्य ओदनसाधनता स्यात् । न चैवं गौरवात् । किन्तु पाकत्वेन, स तु कृतिं विना नेत्यन्यदेतत् । वह्निना साधयमीतिवत् कृत्या साधयामीतीच्छा इष्टसाधनताज्ञानादेवेति चेत्, तर्हि तत्र वह्निसाध्यताज्ञानवदत्रापि कृतिसाध्यत्वज्ञानं कारणमावश्यकम् । कृतौ चानुभवसिद्धचिकीर्षाधीनत्वं विशेष:। तेन प्राणपञ्चकसञ्चारे जीवनयोनिकृतिसाध्ये न प्रवृत्तिः। अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि तत्र प्रवर्तेत ।

ननु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्ष्यमात्रगतानतिप्रसक्तधर्माभावात् कृतिमात्रस्य चातिप्रसङ्गात् तत्तत्कृतिविशेषा उपलक्ष्या: । तथा च तदननुगमात् प्रवृत्त्यननुगम: । विशेषणत्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं प्रमाणाभावश्च । किञ्च चिकीर्षासाध्यावस्थाया: कृते: सिद्धावस्थसाधनत्वविरोधेन कृतिसाध्यता पाकादौ न ज्ञायेतेति चेत्, न । अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धो जीवनयोनिप्रयत्नव्यावृत्तश्चिकीर्षोपलक्ष्य: यत्र चिकीर्षाकारणत्वग्रह: । स च तव जातिरूप:। मम त्वनुगतकाणोपाधिरूप: । एवञ्च चिकीर्षाधीनत्वेनानुगतेन कृतिविशेषाणमुपलक्ष्याणामनुगतत्वमपि । यथा गोत्वेन तटस्थेनोपलक्षिता महिष्यादिव्यावृत्तधानकर्मव्यक्तिविशेषा: धेनुपदेनोच्यन्ते, न तु गोत्वमपि, तथा चिकीर्षापि। एवं जीवनयोनियत्नव्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानं कारणमिति नाननुगम: ।

ननु कृतिसाध्ये न कृतिविशेषणमसत्त्वात् । सत्त्वे वा कृतौ सत्यां ज्ञानम्, ज्ञाने च कृतिरित्यन्योन्याश्रय:। नोपलक्षणमतिप्रसङ्गादिति चेत्, न । कृतिर्हि ज्ञाने विषयतया विशेषणमेव । साध्ये च परिचायकतयोपलक्षणम् । अन्यथा इष्टसाधनेऽपीष्टं न विशेषणमसत्त्वात् । नोपलक्षणमतिप्रसङ्गात् । लिङ्गज्ञानादौ वा का गति:।

नन्वेवं श्रमेऽपि चिकीर्षा स्यात्तस्यापि चिकीर्षाधीनकृतिसाध्यत्वात् । अत्र वदन्ति- श्रमस्तु भोजनादिक्रियासाध्यो न तत्कृतिसाध्य: । अचिकीर्षितत्वात् । कृते: स्वध्वंससाक्षात्कारातिरिक्ते चिकीर्षाविषयमात्रे जनकत्वात् । न हि भोजनचिकीर्षाधीनकृत्या गमनं साध्यते इति **केचित् । तन्न ।** गुरुतरभारोत्तोलने कृत्यसाध्ये भ्रमात् प्रवृत्तस्य निगड़निश्चलदेहस्य वा कृतौ सत्यामुत्तोलनचलनक्रियानुत्पादेऽपि श्रमानुभवात् कृतेरेव कारणत्वात् । न तु तज्जन्यक्रियाया: सुखे व्यभिचाराच्च । न हि सुखं कृतिकारणचिकीर्षाविषय:। उपायचिकीर्षाजन्या हि कृति:, न तु सुखचिकीर्षाजन्या । चिकीर्षाजन्यकृतिसाध्यत्वं न श्रमे द्वेषयोनिप्रयत्नादपि तदुत्पत्ते**रित्यपरे । तन्न ।** शत्रुवधस्येष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वात्। द्वेषस्य यत्नाजनकत्वात्, द्वेषसिद्धिस्तु शत्रुं द्वेष्मीत्यनुभवबलात् ।

**यत्तु** श्रम: कृतित्वेन कृतिसाध्यो, न चिकीर्षाधीनकृतिवेन । यद्यचिकीर्षितेऽपि श्रमे चिकीर्षाधीनकृतित्वेन कारणता स्यात् तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं गमनादीति न स्यात् । श्रमवद्गमनेऽपि तज्जन्यत्वप्रसङ्गात् । भोजनादिश्च चिकीर्षाधीनकृतिविशेषात् । स हि कृतिमात्रं व्यभिचरति जीवनयोनिकृतेस्तदनुत्पादात् । यद्वा श्रमो न भोजनकृतिसाध्य:, किन्तु तन्निरन्तरोत्पन्नाज्जीवनयोनिप्रयत्नादेवेति । **तन्न । न** हि कृर्तिवेन तच्छ्रमजनकत्वम्, नापि कृत्यन्तरादेव श्रमोत्पत्ति: । जीवनयोनिप्रयत्ने सत्यपि भारोद्वहनादिकर्मकुर्वतस्तादृशश्रमाननुभवेन तस्य श्रमाजनकत्वात् । तस्मात् भोजनादिवत् श्रमविशेषाणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात् । सुप्तस्य स्वेदाद्यनुमित: श्रम: तज्जन्य इति चेत्, न । स्वेदादे: श्रमान्यहेतुकत्वात् । अन्यथा जागरेऽपि तदनुवृत्तौ

श्रमानुवृत्तिप्रसङ्गात् इति। मैवम्, स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात् । श्रमश्च नियमतोऽन्येच्छाधीनकृतिसाध्य: । श्रमे दुःखत्वेनेच्छाविरहात् । अत एवान्येच्छाजन्यकृति-साध्यत्वेन श्रमो नान्तरीयक इत्युच्यते । स्वचिकीर्षाधीनत्वन्तु न कृतौ विशेषणम्, गौरवात् ।

**अन्ये तु** कृतिगतं धर्मान्तरमेव उद्देश्यत्वम्, तद्विशिष्टकृतिसाध्यश्च न श्रम:, अचिकीर्षितत्वात् , किन्तु कृतिमात्रसाध्य:

अत एव कष्टं कर्मोत्यनुभवो लोकानाम्। एवं चिकीर्षायां ममैकं कृतिसाध्यत्वं प्रयोजकम् । तव तु कृतिसाध्यत्वे सतीष्टसाधनत्वं सुखत्वं दुःखाभावत्वञ्चेति चतुष्ट्यम् । इच्छाप्रयोजकन्तु मम सुखत्वं दुःखाभावत्वञ्चेति द्वयम् । वृष्टिसाध्ये सुखे हीच्छा वृष्टिमपि विषयीकरोति। न त्विष्टसाधनत्वेन तत्रेच्छा । साधनत्वस्येच्छाविरोधित्वात् । तव तु त्रयम् । विषभक्षणे तु कृतिसाध्यत्वेऽपि बलवदनिष्टसाधनत्वेन चिकीर्षा नास्तीति कृतौ चिकीर्षाजन्यत्वं विशेषणमिति कश्चित् । **तत्तुच्छम्** । एवं हि विषभक्षणं कृतिसाध्यमेव न स्यात् । जीवनयोनिकृतेस्तस्यानुत्पत्तेरिति व्यर्थं विशेषणम् ।

स्यादेतत् । इष्टसाधनताभ्रमाद्विषभक्षणे चैत्यवन्दने च चिकीर्षाजन्यकृति-साध्यत्वमस्ति । ज्ञानप्रयुक्तत्वात् कार्यत्वस्य । तथा च सञ्जातबाधोऽपि तत्र कार्यत्वज्ञानात् प्रवर्तेत । तथा तृप्तोऽपि भोजने ।

ननु स्वकृतिसाध्यतानुभवस्तथा । अन्यथेष्टसाधनता स्मरणे विषभक्षणेऽपि प्रवर्तेत, न चेष्टसाधनताज्ञानं वेदो वाऽनुभावकमस्तीति चेत्, न । वस्तुतस्तत्र कृतिसाध्यत्वे लिङ्गान्तरेणाप्तवाक्येन वा तदनुभवसम्भवात् । लिङ्गाभासाच्छब्दाभासाद्वा अप्रवृत्तिप्रसङ्गाच्च, भेदाग्रहवादिनस्तत्र तव तदनुभवाभावात् ।

मैवम् । स्वविशेषणवत्ताप्रतिसन्धानजन्यं हि कार्यताज्ञानं प्रवर्तकम् । तथा हिकाम्ये पुरुषविशेषणं कामना । तत: काम्यसाधनताज्ञानेन याग-पाकादौ कार्यताज्ञानम् । नित्ये च काल-शौचादि स्वविशेषणम् । तथा चैतत्सन्ध्यायामहं कृतिसाध्यसन्ध्यावन्दन: सन्ध्यासमये शौचादिमत्त्वात् पूर्वसन्ध्यायामहमिवेति कार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यम् । तदुक्तं -

**"स च कार्यविशेष: पुरुषविशेषणावगत: प्रवृत्तिहेतुरिति"** ।

संजातबाधस्य च विषभक्षणे चैत्यवन्दने च भ्रमदशायामिव नेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात् प्रवर्तेत । तृप्तस्य च कामनाविरहेण इष्टसाधनताज्ञानाभावात् न तथा बोध: ।

अन्ये तु आत्मनो तु आत्मनो जीवित्वप्रतिसन्धानजन्यं श्रमे कृतिसाध्यताज्ञानं सम्भवतीति जीवनव्यतिरिक्तत्वं स्वविशेषणे **विशेषणमिति । तन्न ।** श्रमे स्वेच्छाधीनकृतिसाध्यत्वाभावात् । इष्टसाधनतालिङ्गकं कार्यताज्ञानं प्रवर्तक**मित्यपरे । तन्न।** नित्ये तदभावात् ।

ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु। स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लघुत्वात् । किञ्चोपायविषया चिकीर्षा इष्टसाधनता-ज्ञानसाध्या उपायेच्छात्वात् वृष्टीच्छावत्। भोगचिकीर्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत्, न । तवापि स्वविशेषणधीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात् । कृतिहेतुचिकीर्षायां तत् प्रयोजकम्, न च भोगचिकीर्षा तथा । उपायचिकीर्षात एव कृतिसम्भवात् इति चेत्, तुल्यमिति ।

मैवम्, साध्यत्वसाधनत्वयोर्विरोधनैकत्र ज्ञातुमशक्यत्वात् । असिद्धावस्थस्य हि साध्यत्वं सिद्धतादशायां तदभावात् । सिद्धतादशायाञ्च साधनत्वम्, असिद्धावस्थावत: कार्यानुत्पत्ते: । तथा च पाकादेरसिद्धत्वसिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रह: । न चैकमेकेनैकदा सिद्धमसिद्धञ्च इति ज्ञायते । न च स्वरूपगतता साध्यत्वसाधनत्वयो:, अतो न विरोध इति वाच्यम्।

यदि हि स्वरूपनिबन्धनं तदुभयं तदा तत्स्वरूपं सदैव सिद्धमसिद्धञ्च स्यात् । भिन्ननिरूपितत्वेऽपि तयो: सिद्धत्वासिद्धत्वे अनवगम्याज्ञानात् । तस्मात् समयभेदोपाधिक एव तदुभयसम्बन्ध: पाके । इदानीं साध्यत्वं अग्रे साधनत्वं ज्ञायत इति चेत्, न । इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहात्, शब्देन तथा प्रतिपादयितुमशक्यत्वात्,

गौरवाच्च । न च कृतितः सिद्धमिष्टसाधनमितिज्ञानात् चिकीर्षा । न हि सिद्धं कश्चित् चिकीर्षति । कृते: पूर्वं कृतित: सिद्धमिति ज्ञानाभावाच्च । न च कृतिसाध्यत्वेन पाकादेरिष्टसाधनत्वात् साधनत्वमपि साध्यम्।

न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनता, इत्युक्तम् । तस्मात् कृतक्रियमाण-विलक्षणं कृत्यनन्तरभविष्यत्तारूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकम् । तादृशञ्च साधनत्वविरोध्येव । किञ्च साधनत्वस्य सिद्धमात्रधर्मत्वात् साधनत्वज्ञानमिच्छाविरोधि । न हि कश्चित् सिद्धमिच्छतीत्युक्तम् । एतेन वृष्ट्यादाविष्टसाधनता ज्ञानमुपायेच्छाकारणत्वेन क्लृप्तमिति निरस्तम्। कथं तर्हि स्वतोऽसुन्दरे वृष्ट्यादाविच्छा । तत्साध्येष्टज्ञानादिति गृहाण।

**अन्ये तु** सुख-दुःखाभाव-तत्साधनेष्विच्छाप्रयोजकमनुगतमुद्देश्यत्वं पुरुषार्थपदवेदनीयं धर्मान्तरमस्ति । अनुगतकार्यस्यानुगतकारणनियम्यत्वात् । तदेव दुःखतत्साधनव्यावृतं सुख-तत्साधनादौ चिकीर्षाप्रयोजकमिति । न च दुःखविरोधित्वमेव तथास्तीति वाच्यम् । सहानवस्थाननियमविरोधस्यासम्भवात्, वध्यघातकभावस्यैकसमये सामानाधिकरण्याभावस्य च यत्नादिसाधारण्यादिति । **तन्न ।** तदज्ञानेऽपि सुखत्वज्ञानादिच्छोत्पत्ते: । न हि सुखत्वे ज्ञाते धर्मान्तरज्ञानं विना नेच्छेति । तथात्वे स्वत: प्रयोजनहान्यापत्ते: । तदेव हि स्वत: प्रयोजनं यदवगतं सत् स्ववृत्तितयेष्यते । किञ्चानुगतधर्मकल्पनापि न कारणे । न च सुखादि इच्छाकारणम्, अनागतत्वात् । किन्तु तदवगम: । तर्हि सुखादिज्ञाने तत् स्वरूपसदेवेच्छाप्रयोजकमस्त्विति चेत्, न । यथा ह्यद्देश्यत्वं सुखज्ञानादिषूत्पद्यते अन्यतरत्वात् तृणारणिमणिन्यायाद्वा तथैवेच्छैव जायताम् । कृतिसाध्यत्वञ्च कृतौ सत्यां अग्रिमक्षणे स्वरूपं न कृतिं विना । क्षेमसाधारणञ्चैतत् । कृतिसाध्यत्वञ्च न कृते: पूर्वम्।

ननु कृतौ नष्टायां सन्नपि धर्मी न कार्य: तथा च कथं कार्येऽपूर्वे कामिनोऽन्वय:। क्षणिकत्वेन क्रियातुल्यत्वादिति चेत्, न । यद्वृत्तिकाम्यसाधनत्वं तत्र कार्यताबुद्धे: प्रयोजकत्वात् । न तु कार्यताविशिष्टस्य काम्यसाधनतेति व्याप्ति: । ननु पाकादौ

कृतिसाध्यताज्ञानं न प्रत्यक्षेण, कृत्यन्तरं पाके सति कृतिसाध्यताज्ञानम्, तस्मिन् सति कृतिरित्यन्योन्याश्रयात्, कृतिसाध्यतोत्तीर्णे चिकीर्षाकृत्योरसम्भवाच्चेति चेत्, न । पाको मत्कृतिसाध्यः मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात् दैवाद्यनधीनत्वे सति मदिष्टसाधनत्वाद्वा मद्भोजनवदित्यनुमानात् स्वकृतिसाध्यताज्ञानम्, यस्य यदिष्टसाधनं यत्कृतिं विना यदा न सम्भवति तत् तदा तत्कृतिसाध्यमिति व्याप्तेः । असिद्धस्येष्टसाधनत्वाभावात् । बलवदनिष्टाननुबन्धित्वञ्च लिङ्गविशेषणम् । तेन न मधु-विषसंम्पृक्तान्नभोजने व्यभिचारः । अतीतपाके च कृतिसाध्यतोत्तीर्णे न व्यभिचारः सामान्यतस्तस्यापि कृतिसाध्यत्वात् ।

अतीततादशायाञ्चातीतौदनेच्छाविरहेणेष्टसाधनत्वा-भावात् । अत एव निदाघदूनदेहो वर्षति वारिदे तोयदात्तोयलाभसम्भावनायां वा सरोऽवगाहने न प्रवर्तते। इष्टसन्तापशान्तिसाधनतोयसम्बन्धस्य स्वकृतिं विनापि सिद्धिप्रतिसन्धानेन लिङ्गाभावेन स्वकृतिसाध्यत्वज्ञानाभावात् । यदा च मत्कृतिं विना न सम्भवतीति प्रतिसन्धत् ते, तदा प्रवर्तते ।

यस्य सन्तापशान्तिमात्रमिष्टं स सरोऽवगाहनस्येष्टसाधनत्वमेव न प्रतिसन्धत्ते उपस्थितवृष्टितोऽपि तत् तत्सम्भवादिति **कश्चित्** । **तन्न** । तोयसम्बन्धत्वेन सन्तापशन्तिसाधनत्वम् । तस्य च सरोऽवगाहनेऽपि सत्त्वात्। अन्यथा वृष्टिरपि तत्साधनं न स्यात् । सरोऽवगाहनादपि तत्सिद्धेः ।

कार्यसाधनत्वञ्च कृतिसाध्यत्वे न लिङ्गम् । पाकादिवदोदनादेरपि प्रवृत्तेः पूर्वं कृतिसाध्यत्वज्ञाने हेत्वभावात्

नन्वेवं लिङ्गज्ञानमेव प्रवर्तकमस्तु । प्राथमिकत्वात् आवश्यकत्वाच्च । न च लाघवात् कृतिसाध्यत्वज्ञानं तथा । कृतिसाध्यतानुमितौ तदा मानाभावेन युगपदुपस्थित्यभावात् प्रवृत्तिसामग्र्यानुमितिप्रतिबन्धाच्चेति चेत्, न। लिङ्गज्ञाने कृतिसाध्यत्वाप्रकाशे तत्प्रकारकचिकीर्षायां तस्याहेतुत्वात् । अत एव लिङ्गान्तरज्ञानमपि न प्रवृर्तकम् ।

ननु पाकादि: कृत: क्रियमाणो वा न पक्ष। तस्य कृतिसाध्यत्वे बाधात् । नाप्यनागत: । भाविपाके मानाभावेनाश्रयासिद्धे: । पाकत्वं भविष्यद्वृत्ति सामान्यत्वात् गोत्ववत् इति मानमिति चेत्, न । मानाभावेन गोत्वेऽपि तस्याप्रसिद्धे: । पाकमात्रं पक्ष इति चेत्, न। मात्रार्थो यदि पाकत्वं तदा बाधो लिङ्गासिद्धिश्च । सर्वपाकपरत्वे च तस्य सिद्धभागे बाध: अनागतभागे चाश्रयासिद्धि: । वर्तमानाद्युदासीन: पाक: पक्ष: पाकसामान्ये च कृतिसाध्यत्वं न बाधितमित्यपि न, सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमिते: सिद्धविषयत्वे बाधात् । भिन्नविषयत्वे वा सिद्धविषयेच्छाप्रवृत्त्याद्यनुत्पादकत्वाच्च । कृतक्रियमाणसाधारणकृति साध्यत्वज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते ।

अनन्यगतिकत्वेन तथा कारणस्वभावकल्पनादिति चेत्, तर्हि यादृशं कृतिसाधत्वं चिकीर्षायां प्रकारः तादृशं ज्ञाने नास्तीत्यन्यप्रकारकज्ञानादेव चिकीर्षा स्यात् । तथा च लिङ्गज्ञानमेव प्रवृत्तिहेतुरस्तु प्राथमिकत्वात् ।

यत्तु स्मृतपाके कृतिसाध्यत्वासंसर्गाग्रहात् प्रवृत्ति: स चासंसर्गग्राह: इष्टसाधनताग्र**हादिति । तन्न।** स्मृतपाकस्य सिद्धत्वेन तत्र कार्यत्वासंसर्गग्रहेऽनुमानबाधात् । स्मृतपाकस्य सिद्धत्वं तदा न गृह्यते इति चेत्, तर्हि स्मृतपाकस्य सिद्धत्वग्रहे ओदनार्थी पाके न प्रवर्तेत सिद्धौदनोऽपि पाके तृप्तोऽपि भोजने प्रवर्तेत । तत्र सिद्धत्वग्रहात्तदसंसर्गग्रह इति चेत्तुल्यम् । अपि च स्मृतपाके कार्यत्वासंसर्गाद्विद्यमानासंसर्गाग्रहाद्विसंवादिनी प्रवृत्ति: स्यात् । किञ्चैवं सिद्धपाकज्ञानादज्ञातेऽसिद्धे पाके इच्छा-प्रवृत्ती स्यातामिति ।

अत्र ब्रूमः । पाके कृतिसाध्यत्वं सिद्ध्यत् सिद्धे बाधात् अनगातपाकमादाय सिध्यति। पक्षतावच्छेदकधर्मसामानाधिकरण्यं साध्यमानस्य लिङ्गेन सिद्धतीत्यनुमाने क्लृप्तत्वात् यथा प्रसिद्धवह्निबाधेऽपि वह्निमात्रं न बाधितमित्यप्रसिद्धोऽपि वह्निः सिध्यति, तथा प्रसिद्धपाके कृतिसाध्यत्वबाधेऽपि पाकमात्रे न बाधितमित्यप्रसिद्धं पाकमादाय तत्सिध्यति । अप्रसिद्धयो: पक्षसाध्ययो: सिद्धाववि‍शेषात् । तस्मात् असिद्धस्य क्वचित् सिद्धे, सिद्धे सिद्धस्य च क्वचित्, अप्रसिद्धस्य चासिद्धे सिद्धिस्तेनानुमा त्रिधा ।।

अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि पाकादौ कृतिसाध्यत्वं कथमवगम्येत । किञ्च तवापीष्टसाधनताज्ञानात् कथं वृष्ट्यादाविच्छा सिद्धत्वस्येच्छाविरोधित्वात् । अनागतस्य ज्ञातुमशक्यत्वात् । अत एव सिद्धासिद्धविषयत्वनिरासेन सुखादिज्ञानात् फलेऽपि नेच्छेति न वृष्ट्यादाविष्टसाधनतापि । न च वृष्ट्यादिसाध्येष्टज्ञानात् वृष्ट्यादाविच्छा । इच्छायाः सिद्धासिद्धवृष्ट्यादितत्फलविषयत्वविकल्पग्रासात् ।

अथ सामान्यलक्षणप्रत्यासत्त्या वृष्ट्यादित्वेन सुखादित्वेन च सिद्धासिद्धवृष्ट्यादितत्फलविषयकं ज्ञानमुत्पन्नम्। तेन सिद्धं विरोधिनं त्यक्त्वा असिद्धविषयेच्छोत्पद्यते। यदि च सामान्यलक्षणा नास्ति तदा येन रूपेणेष्टसाधनत्वग्रहः तेन रूपेण ज्ञाते सिद्धे वेच्छोत्पद्यते । अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात् । सुखेच्छायामप्येवं इति चेत्, तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा । तच्च ज्ञानं सकलपाकविषयं सन्निकृष्टपाकविषयं वेत्यन्यदेतत् । बालस्य व्याप्त्याद्यग्रहेणाद्या प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरसंस्कार-जन्यात् स्तनपानं कार्यमिति स्मरणात् । तवापीष्टसाधनतास्मरणात् तत्र प्रवृत्ति: अनन्यगतिकत्वात् । न च जन्मान्तरेऽपि पर्यनुयोग: । जन्मधाराया अनादित्वात् । प्रत्यक्षानुमानमूलकत्वाच्च नान्धपरम्परा ।

वस्तुतस्तु शुष्ककण्टतया बालो दुःखमनुभवन् विरोधितया सुखं स्मरति । तत: सुखत्वज्ञानात् सुखवृत्तिकार्यत्वं सुखवृत्तितया, अन्तरङ्गत्वात् । न तु स्तनपानमिष्टसाधनमिति स्मरणम्, सुखावृत्तित्वेन बहिरङ्गत्वात् । सुखकार्यत्वञ्च स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्यत्वस्मरणे स्तनपानमपि विषय: । तेन स्तनपाने कार्यत्वज्ञानादेव, प्रवृत्ति:। इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् । एवञ्चाद्यप्रवृत्तौ कार्यत्वज्ञानं प्रयोजकं क्लृप्तमित्यग्रेऽपि तदेव प्रवर्तकं क्लृप्तत्वात् ।

नवीनस्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्तकम्, अनागतविषये प्रत्यक्षानुमानयोरसम्भवात्, किन्तु यादृशस्य पुरुषस्य कृतिसाध्यं यद्दृष्टं तादृशत्वमात्मन:

प्रतिसन्धाय तत्र प्रवर्तते, तथाह्योदनकामस्य तत्साधनताज्ञानवतश्च तण्डुलाद्युपकरणवत: पाक: कृतिसाध्य:, अहमपि च तादृश इति ज्ञानात् पाके प्रवर्तते । एवञ्चान्यकृतपाके कृतिसाध्यताज्ञानं आत्मन: पाके कृतिसाध्यत्वप्रयोजकविशेषणवत्त्वज्ञानञ्च प्रवर्तकम् । अन्यत्रापि प्रवृत्तिरेवमेवेत्यनादितैव। अत एव सञ्जातबाधश्चैत्यवन्दने विषभक्षणे च न प्रवर्तते । इष्टसाधनताज्ञानवतो हि तत् कृतिसाध्यम् । न च सञ्जातबाधस्तत्र इष्टसाधनताज्ञानवान् । एवं तृप्तीच्छावतोऽपि भोजनं कृतिसाध्यम्, तृप्तश्च न तृप्तीच्छावत्त्वमात्मन्यवैतीति न भोजने प्रवर्तते ।

अतिनवीनास्तु यादृशस्येत्यादौ अविगीतत्वं तत्कृतौ विशेषणमाहु: । सञ्जातबाधस्तु विषभक्षणं चैत्यवन्दनञ्च विगीतकृतिसाध्यत्वेनैव जानातीति तत्र न प्रवर्तते।

प्रवृत्तिविषयश्च सामान्यत: कालासम्भिन्न: पाकादिर्ज्ञायते । प्रवृत्तिमहिम्ना चानागतपाकसिद्धि: । चिकीर्षा च कालासम्भिन्नविषया, न तु भाविनं कृत्या साधयामीत्याकारैवेति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दखण्डे विधिवादपूर्वपक्ष: ।।**

## विधिवादसिद्धान्त: ।

अत्रोच्यते । विषभक्षणदिव्यावृत्तं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषयतयावच्छेदकं लाघवात् । न तु स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वम् , गौरवात् । न च सिद्धासिद्धावस्थयो: साध्यत्वसाधनत्वयोर्विरोध: । निर्विशेषितयोस्तयोरविरोधात् । पाकोऽसिद्ध: साध्य: सिद्ध: साधनञ्चेत्यनुभवात् । तदा साध्यत्वं हि तदा साधनत्वस्य विरोधि। नियमतस्तेनैव तस्य प्रतिक्षेपेण सहानवस्थाननियमात्, । न तु साधनत्वस्यान्यदा साधनत्वस्य वा, तयोरप्रतिक्षेपात् ।

अन्यदा साधनत्वेऽपि साधनत्वमस्त्येव सामान्याभावे विशेषाभावप्रसङ्गात् । एवन्तदा असिद्धत्वस्य तदा सिद्धत्वं विरोधनियमतस्तस्यैव प्रतिपक्षेपात् । न तु सिद्धत्वमात्रं,

अन्यदापि तत्र सिद्धत्वाभावप्रसङ्गात्। निर्विशेषितयोर्विरोधे च सिद्धत्वासिद्धत्वयोश्चान्यतरदेव पाकादौ स्यान्न तु समयभेदेऽप्युभयम् । न च तदा कृतिसाध्यत्वे सति तदेष्टसाधनत्वज्ञानं प्रवर्तकम्। अत एव वाजपेयेन यजेतेत्यत्र यागस्य करणावस्थायां सिद्धत्वेन न वाजपेयस्य साध्यता, एकदा तयोर्विरोधादिति कर्मनामधेयत्वम्। न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः। यागस्वरूपे तयोः सत्त्वात् ।

अथ विरुद्धयोरवच्छेदभेदमादाय एकत्र प्रतीतिः स्यात् । न च कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादायैकत्र प्रतीतिरस्ति । तथा लिङ्गाभावादिति चेत्, न। साध्यत्व-साधनत्वयोरविरोधस्योक्तत्वात् । एवं सिद्धत्वासिद्धत्वयोर्भावाभावरूपत्वेऽपि न विरोधः। एकधर्मिगतत्वेन मानसिद्धत्वात् । तस्मात् संयोग-तदभावयोरिव येन प्रकारेण ययोर्विरोधः तेन तयोरेकधर्मिगतत्वं न प्रतीयते । न तु रूपान्तरेणापीति । अपि च यदि साध्यत्वसाधनत्वयोर्विरोधस्तदा तवापीष्टसाधनत्वेन कार्यसाधनत्वेन वा कार्यत्वं नानुमीयेत। हेतु-साध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधासिद्ध्योरन्यतरप्रसङ्गाच्च ।

न च वाच्यमिदानीं मत्कृतिसाध्यत्वं साध्यमग्रे मदिष्टसाधनत्वं हेतुः, दैवाद्यनधीनत्वे सति यदग्रे मदिष्टसाधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तिः। तथा च समयभेदमादाय साध्यत्व-साधनत्वयोरवगम इति। इदानीमग्रिमपदार्थयोर्नानात्वादनुगत-रूपाभावेन व्याप्तेरग्रहात् । पाकन्यायेनान्यत्रापि तत्तत्समयान्तर्भावेन साध्यत्वसाधनत्वयोरप्रतीतिः। प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यग्रे इष्टसाधनमिति ज्ञानं प्रवर्तकमस्तु । न च पाके साध्येष्टकत्वेन कृतिसाध्यत्वमनुमेयम् । असिद्धावस्थावतो हि पाकादिष्टानुत्पत्तेः पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यम् असिद्धत्वञ्चावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्विरोधोऽत्रापि दुर्वारः ।

अपि च स्वविशेषणधीजन्यकार्यताज्ञानाभावात् सुखे कथं चिकीर्षा। न हि कृतिसाध्यताज्ञानमात्रात् सा। सञ्जातबाधस्य विषभक्षणादौ चिकीर्षाप्रसङ्गात् ।

अथोपायचिकीर्षायां तत्कारणम् । इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा। नो चेदिच्छामात्रमिति द्वयमेव चिकीर्षाहेतुरिति चेत्, तर्हि इच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं भासते तदा चिकीर्षा नो चेदिच्छामात्रमित्येव सुख-तदुपायचिकीर्षाकारणमस्तु लाघवात्, सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात् । अत एव पाके इष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति तत्र चिकीर्षा । न तु वृष्ट्यादिज्ञाने तद्विषयत्वमितीच्छामात्रम्, सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात् । अन्यथा तत्र चिकीर्षानुत्पत्तेः ।

वस्तुतस्तूपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् वृष्टिच्छात्। न च भोगचिकीर्षावत्तेन विनापि स्यादित्यप्रयोजकत्वम्। उपायेच्छायास्तदन्वयव्यतिरेकानुविधानात् । वृष्टेश्च स्वतोऽसुन्दरत्वेनेच्छानुत्पत्तेः । अनुगतोपायेच्छायां अनुगतस्य प्रयोजकत्वे सम्भवति बाधकं विना त्यागायोगाच्च । न च चिकीर्षान्यत्वे सति उपायेच्छात्वम् , इच्छात्वं वा तज्जन्यत्वे प्रयोजकम् गौरवात्, सुखेच्छायां तदभावाच्च । एवञ्चोपायचिकीर्षायामिष्ट-साधनत्वज्ञाने ध्रुवेऽतिप्रसङ्गवारणार्थं कृतिसाध्यत्वनिर्वाहार्थञ्च कृतिसाध्यत्वमपि विषयतयावच्छेदकमस्तु न तु तद्विहाय तन्मात्रम् । क्लृप्तकारणं विना कार्यानुपपत्तेः ।

अत एव स्तनपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनत्वज्ञानस्यापि कल्पनम्, दृष्टानुरोधित्वात् कल्पनायाः । ननु साधनत्वमिच्छाविरोधि, तस्य सिद्धधर्मत्वात् वृष्ट्यादौ तत्साध्येष्टज्ञानादिच्छेति चेत्, न । निर्विशेषितयोः सिद्धत्वासिद्धत्वयोः विरोधेन इच्छासाधनत्वयोरविरोधात् । तदा असिद्धत्वं तदा सिद्धत्वं च नेच्छासाधनत्वयोः प्रयोजकमिति तथा न ज्ञायत एव ।

**यत्तु** तद्साध्येष्टज्ञानात् वृष्ट्यादा**विच्छेति, तत्तुच्छम्** । असिद्धावस्थात् वृष्ट्यादेरिष्टानुत्पत्तेः तस्यावस्य सिद्धत्वमवगन्तव्यम्, इच्छानुरोधित्वाच्च असिद्धत्वमिति, तत्रापि विरोध एव । वृष्टौ सत्यामिष्टतया विना नेत्यन्वयव्यतिरेकग्रहस्य

वृष्टिसिद्धत्नमादाय दृष्टिनिरूपितेष्टसाध्यकत्वग्राहकत्वात् । किञ्च चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थ-प्रतिपादकं मण्डलीं कुर्यादिति वाक्यं प्रमाणं स्यात्, विषयाबाधात्।

एतेन नवीनमतमप्यपास्तम् । परस्य हि कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधनता-ज्ञानानां ज्ञानं तथा आत्मन ओदनकामनावत्त्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात् । किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव, लाघवात् । यथा च साध्यत्वसाधनत्वयोरविरोध:, अनागतस्य पाकादे: कृतिसाध्यताज्ञानञ्च तथोपपादितमेव । किञ्च परकृतिसाध्यत्वमज्ञात्वापि स्वकृतिसाध्येष्टसाधनताज्ञानात् स्वकल्पितलिप्यादौ यौवने कामोद्रेकात् सम्भोगादौ प्रवृत्तेश्च तदेव प्रवर्तकम् ।

वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात् कथं कृत्या साधयामीतीच्छा। सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् । अथ सिद्धविषयादेव कृतिसाध्यताज्ञानात् असिद्धविषया कृतिसाध्यत्वेनेच्छा ज्ञायते। इच्छाया असिद्धविषयत्वस्वभावत्वादेकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावो न त्वेकविषयत्वे सति गौरवात् । इच्छाया अनागतविषयत्वात् तस्य चाज्ञानात्। तथात्वदर्शनात् सुखादीच्छायामप्येवमिति चेत्, न । असिद्ध-विषयेच्छानुरोधेनानागतज्ञानोपायस्य दर्शितत्वात् । अस्तु चैवम्, तथापि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्तकमस्तु । स्वपरकीयेष्टसाधनताज्ञान- फलकामनाज्ञानापेक्षया लघुत्वात्, इष्टसाधनताज्ञानज्ञानस्य फलकामनाज्ञानस्य च हेतुत्वे मानाभावाच्च ।

नव्यास्तु स्वकृतिसाध्यताज्ञानमेव प्रवर्तकम्। तेन स्वकृत्यसाध्ये वृष्ट्यादौ कारीर्याञ्च कृषीवलस्य न प्रवृत्ति: । न च सञ्जातबाधस्य विषभक्षणे प्रवृत्तिप्रसङ्ग:। स्वकृतिसाध्यताज्ञानविषये इष्टत्वस्य स्वरूपसत: प्रवृत्तौ सहकारित्वात् । न च सञ्जातबाधस्य विषभक्षणादाविच्छास्ति । इष्टसाधनत्वेनाज्ञानात् । अतीतभोजनेऽप्यत एव न प्रवर्तते, तृप्ते: सिद्धतया इच्छाविरहेण भोजने तदुपाधिकेष्टत्वाभावात्। अतीततृप्ताविच्छा नास्तीति तत्साधनेऽपीष्टत्वाभावादेव न प्रवृत्ति: ।

न चैवं पाके न प्रवर्तेत, तस्य स्वरसतः इष्टत्वाभावादिति वाच्यम् । इष्टसाधनत्वज्ञानेन तस्यापीष्टत्वात् । हन्तैवं प्राथमिकत्वादिष्टत्वार्थमवश्यापेक्षणीयत्वाच्च कृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकीर्षाकारणमस्त्विवति चेत्, न । इष्टसाधनत्वाभावेऽपि भोगे चिकीर्षासत्त्वात् । तस्यां स्वकृतिसाध्यत्वज्ञाने सतीष्टत्वमेव कारणम्, न त्विष्टसाधनत्वं व्यभिचारात् । पाकादौ तदन्वयव्यतिरेकावपीष्टत्वोपक्षीणौ । एवं भोगेऽपि प्रवर्तेति चेत्, न । इष्टसाधनतापक्षेऽपि मुक्तिरूपेष्टसाधने सुखे प्रवर्तेतेति तुल्यम् । सुखे चिकीर्षा भवत्येव । कृतिस्तु न भवति । कृतेः सिद्धवृत्त्यसिद्धक्रियाविषयत्वनियमादिति चेत्तुल्यम् । तस्मात् स्वकृतिसाध्यत्वं विधिरिष्टत्वं सहकारीति ।

मैवम् । इष्टसाधनताज्ञानस्योपायेच्छायां हेतुत्वावधारणात्तस्यास्तज्जन्यत्व-नियमादिच्छायाः स्वविषयेच्छानुत्पादकत्वनियमाच्च ।

ननु सिद्धौदनः कुतः पाके न प्रवर्तते, ओदनमात्रस्य सिद्धत्वेनेष्टत्वाभावात् । अत एवातीतभोजनादौ न प्रवर्तते अतीततृष्णादाविच्छाविरहात् ।

ननु सामुद्रिकविदाख्याते भावियौवराज्ये भोगसाधने स्वकृतिसाध्यत्वे सतीष्टसाधनत्वज्ञानात् कुतो न प्रवर्तते। भाविराज्यस्यासिद्धत्वात्, प्रवृत्तेः सिद्धविषयत्वनियमात्, राज्योपायापरिचयाच्च । तत्परिचये च प्रवर्तते एव देवताराधनादाविति चेत्, न । सिद्धे चिकीर्षाविरहेण यागादावप्यप्रवृत्तिप्रसङ्गात्, देवताराधनादेरप्यसिद्धत्वेन तत्राप्यप्रवृत्तिप्रसङ्गाच्च । किञ्च राज्योपायापरिचये तत्र मा प्रवर्तिष्ट स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते राज्ये प्रवर्तिप्रसङ्गे किमायातम् । न हि कृतिसाध्येष्टसाधनत्वेन ज्ञानेऽपि तदुपायज्ञानं तत्र प्रवर्तकम् । गौरवात् भिन्नविषयत्वाच्चेति चेत् । मैवम् । यौवने हि तावत् प्रवर्तत एव राज्ये । बाल्ये तु राज्योपायमकृत्वा मत्कृत्येदानीं राज्यं न सिध्यतीति स्वकृत्यसाध्यताज्ञानादेव न प्रवर्तते, यथा तण्डुलं विना पाके स्वकृत्यसाध्यताज्ञानात् । राज्योपाये तु स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते देवताराधनादौ प्रवर्तते एव । अत एव व्रीह्यवघातमकृत्वा पुरोडाशस्तमकृत्वा यागस्तमकृत्वाऽपूर्वं साधयितुं न शक्यत

इति क्रमशोऽवघातादौ प्रवर्तते, न युगपत्। सिद्धवृत्त्यसिद्धक्रियाविषयस्वभावत्वात् प्रवृत्तेः। यागानन्तरञ्च नापूर्वे प्रवर्तते। कृत्यन्तरं विनैव यागकृतिततस्तत्संभवात् । इष्टसाधने चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं विशेषणम्, न तु तज्ज्ञानाभावः कारणम् । किन्तु तदेव विषयतया कारणतावच्छेदकम्, लाघवात् । तेन मधु-विषसम्पृक्तान्नभोजने न प्रवृत्तिः । परेणापि प्रवृत्तिपूर्वं लिङ्गविशेषणत्वेन अन्यथा वा तज्ज्ञानविनियोगस्वीकारात् । एवञ्चाल्पायाससाध्यादिष्टोत्पत्तिसम्भवे बह्वायाससाध्ये न प्रवृत्तिः । अत एव श्रुतस्वर्गफलकत्वेऽपि बहुवित्तव्ययायाससाध्ये ज्योतिष्टोमादौ फलभूमा कल्प्यते । अन्यथाल्पायाससाध्यादेव स्वर्गसिद्धिसम्भवे तत्राप्रवृत्तौ अननुष्ठानलक्षणमप्रामाण्यं तद्विधेः स्यात् ।

बलवदनिष्टाननुबन्धित्वञ्च न विशेषणम् । बहुवित्तव्ययायाससाध्यबहुतर-दुःखस्याप्यबलवत्त्वं क्वचिदल्पदुःखस्यापि बलवत्त्वं इत्यनुगतस्य तस्याभावात् । न चेष्टापेक्षयानिष्टस्याधिकत्वं बलवत्त्वम्। तस्याप्युक्तातिरिक्तस्याननुगमात् । आस्तिकस्य निषिद्धत्वेन ज्ञातेऽपि प्रवृत्तिः रागद्वेषयोरुत्कटत्वेन नरकसाधनत्वज्ञानतिरोधानात्।

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिः तद्भक्षणस्य तृप्तिरूपेष्टसाधनत्वात् । न चासुराविद्यादिवत् पर्युदासलक्षणया विरोध्यनिष्टसाधनत्वबोधनम्, नञोऽसमस्तत्वात्, क्रियासङ्गतत्वेन प्रतिषेधवाचकत्वव्युत्पत्तेश्चेति चेत्, न । विशेष्यवति विशिष्टनिषेधस्य **"सविशेषणे ही"**ति न्यायेन विशेषणनिषेधपर्यवसायितया कलञ्जभक्षणमिष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखसाधनमिति न कलञ्जं भक्षयेदित्यनेन बोधनात् ।

इष्टसाधनतावाचकस्य विधेः सामान्यतो निषेधानुपपत्तेर्बलवदनिष्टाननुबन्धीष्ट-साधनत्वविशेषनिषेधतात्पर्यम्। तथा चाशक्यविशेषनिषेधपरत्वं नञ इति **कश्चित् । तन्न ।** यथा ह्ययोग्यतया सच्छिद्रं विहाय घटत्वेन तदितरान्वयो, न तु छिद्रेतरत्वेन, युगपद्वृत्तिद्वयविरोधात्, तथात्रापि बलवदनिष्टाननुबन्धित्वेनानुपस्थितौ कथं तन्निषेधः।

**"श्येनेनाभिचरन् यजेतेत्यत्र"** कथं विधिप्रवृत्तिः। हिंसायाः बलवदनिष्टानुबन्धित्वात् इति चेत्, न । तत्र कृतिसाध्यत्वे सतीष्टसाधनत्वमेव योग्यतयान्वेति । न तु बलवदनिष्टाननुबन्धित्वमपि अयोग्यत्वात् । निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसायाः बलवदनिष्टानुबन्धित्वावगमात् । अत एव विहितेऽपि श्येने विगानान्न तात्त्विकप्रवृत्तिः । राग-द्वेषयोरुत्कटत्वेनानिष्टानुबन्ध्यंशस्य तिरस्कारात् कस्यचित् **प्रवृत्तिरित्येके** ।

**अन्ये त्व**भिचारस्य वैरिवधफलकत्वेन श्रुतत्वात् वधसाधनत्वेन श्येनो विधीयते। न तु वधसाध्यनरकसाधनत्वेन नरकस्य फलत्वेनाश्रुतेः । न च जनकजनकस्य जनकत्वनियमः, कुम्भकारपितृपरम्परायाः कुम्भजनकत्वापत्तेः । विधिनैव श्येनस्य बलवदनिष्टाननु-बन्धित्वबोधनाच्च । न च श्येनस्य नरकाहेतुत्वे अपेक्षितवैरिवधहेतुत्वे वा अविगानेन प्रवृत्तिः स्यादिति वाच्यम् । श्येनाद्वधो वधाच्चावश्यं नरक इति प्रतिसन्धानेन विगानात् ।

ननु श्येनो मरणफलकव्यापारत्वेन हिंसा। सा च नरकजनिकेति चेत्, न । नहि साक्षात् परम्परासाधारणमरणफलकव्यापारो हिंसा । कूपादौ विनष्टे गवि तत्कर्तुर्गोवधकर्तृत्वापत्तेः। वध्यस्यापि हन्तुर्मृत्यूत्पादनद्वारेणात्महन्तृत्वप्रसङ्गाच्च । न हि अनुत्पादितमन्युः कश्चित् कमपि व्यापादयति। किन्त्वनुनिष्पादिमरणफलको व्यापारो हिंसा। यदनन्तरं मरणं भवत्येव । न च श्येनस्तथा । किन्तु खड्गहननादिकमेव ।

अथ मरणानुकूलव्यापारो मरणोद्देशेनानुष्ठीयमानो हिंसा। श्येनश्च तथा । कूपादौ च न मरणोद्देशेनानुष्ठीयमानत्वमिति चेत्, न । एवं सति गौरवात् मरणानुद्देशेन क्षिप्तनाराचाद्धतब्राह्मणे च हिंसा न स्यात् । किञ्च हिनस्तिधात्वर्थे अवच्छेदकं फलमव्यवहितमेव मरणम् । अव्यवहितफलकस्यैव व्यापारस्य धातुवाच्यत्वात् । अन्यथा परम्पराया विक्लित्तिफलकान्नकामेष्टतण्डुलक्रयादावपि पचतीति प्रसङ्गात् । एवं खड्गाभिघातानन्तरं यत्र विलम्बेन मरणं व्रणपाकपरम्परया वा अन्ने विषप्रयोगेन वा तत्र हन्तृत्वं प्रायश्चित्तादि च न स्यात् इति चेत्, न । प्रायश्चित्ततुल्यतार्थं हि तत्र हन्तृव्यपदेशो गौणः । विनिगमकञ्च लाघवमेव ।

वस्तुतस्तु मरणोद्देशेन कृतोऽदृष्टा द्वारकस्तदनुकूलव्यापारो हिंसा श्येनश्चादृष्टद्वारा मरणसाधनमतो न हिंसा । यदि चादृष्टद्वारापि मरणसाधनं हिंसा स्यात्, तदा सप्तमीतैलाभ्यङ्गस्यादृष्टद्वारा इष्टभार्याविनाशेहेतुत्वादभ्यङ्गकर्तुर्हिंसकत्वात्तिः । अत एव कूपादौ गोमरणेऽपि न वधकर्तृत्वं तत्कर्तुः । गललग्नान्नमरणे न भोक्तुर्न वा परिवेषयितुरात्महन्तृत्वं ब्राह्महन्तृत्वं वा। व्रणपाकपरम्परया विलम्बेन विषप्रयोगेन च हन्तृत्वं मुख्यमेव। न त्वनुनिष्पादिमरणफलकत्वम्, गललग्नान्नमरणे स्वहन्तृत्वापत्तेः । अन्योद्देशेन क्षिप्तनाराचेन हते ब्राह्मणे ब्राह्महन्तृत्वं न स्यादिति चेत्, न । इष्टापत्तेः । व्यपदेशस्तु गौणः प्रयोगो लक्षणयापि समर्थयितुं शक्यते । तत्पक्षेऽतिप्रसङ्गो वारयितुं न शक्यत इतीदमेव विनिगमकम्। अत एव अतदुद्देशेन कृतेऽपि निषिद्धे प्रायश्चित्ताधर्मुक्तम् ।

**अपरे तु** अनभिसंहितनरान्तरव्यापारमद्वारीकृत्य मरणसाधनं हिंसा। खड्गकारस्यानभिसंहितनरान्तरव्यापारद्वारा मरणसाधनत्वम् । तस्य हि नरान्तरव्यापारो नाभिसंहितः, किन्तु धनलाभ इति खड्गकारो न घातकः । विषस्यान्ने प्रक्षेपेण नरान्तरव्यापारो भोजनमेवाभिसंहितः अनेनेदं भोक्तव्यमित्यभिसन्धाय विषप्रयोगादिति हिंसैवान्ने विषप्रयोग **इति । तन्न** । गललग्नकवलाद्यत्र मरणं तत्र परिवेषयितुर्घातकतापातात्, अनेनेदं भोक्तव्यं इत्यभिसन्धाय परिवेषणाद्भोक्तुरात्म-हन्तृत्वापत्तेश्च । अनभिसंहितनरान्तरव्यापारमद्वारीकृत्य मरणानुकूलान्नभक्षणनुष्ठानात् । अत एवाव्यवहितप्राणवियोगफलको व्यापारो हिंसा। व्रणपाकपरम्परया मृते तु हन्तृत्वं व्यापारस्याव्यवधायकत्वादिति निरस्तम्।

स्यादेतत् नेष्टसाधनता विधिः। नित्ये सन्ध्योपासनादौ फलाभावात् । अथ नास्त्येव तत् नित्यं यत्रार्थवादादिकं विधिवाक्ये वा न फलं श्रुतमस्ति ।

**"सन्ध्यामुपासते ये तु सततं शंसितव्रताः ।**

**विधूतपापास्ते यान्ति ब्राह्मलोकं सनातनम्"** ।।

इत्याद्यर्थवादात्,

**"दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्"** इत्यादिविधिवाक्यश्रवणाच्च, कृत्वाचिन्तयातूच्यते । यत्र न फलश्रुतिस्तत्र **"विश्वजिन्न्यायात्"** स्वर्गः फलमिति चेत्, न । कामनोपाधिकार्यत्वेन यागवन्नित्यताभङ्गप्रसङ्गाद् । अहरहः श्रुत्या हि तत्कालजीविमात्रकृतिसाध्यं सन्ध्यावन्दनमवगतम्, कामनोपाधिकार्यत्वे च यदा फलकामना नास्ति, तदा तत्समय एव तत्कर्तव्यता न स्यात् । न हि तत्काले फलकामनावश्यम्भावः, प्रमाणाभावात् । किञ्च प्रथमप्रवृत्तेतरनिरपेक्षाहरहः श्रुत्या जीविमात्रस्याधिकारोऽवगतः तथा च तत्सापेक्षचरमप्रवृत्त्यर्थवादोपनीतफलकामस्य न तत्राधिकारः । प्रथमप्रवृत्ताहरहः श्रुतिविरोधात्। नित्ये फलश्रुतेरर्थवादस्य च स्तुतौ तात्पर्यम् । अत एव प्रत्यवायपरिहारोऽपि न फलम्, तत्कामनोपाधिकार्यत्वे नित्यताक्षतेः । किञ्च नित्ये कर्तव्यताबोधनात् प्राक् न प्रत्यवाये प्रमाणमस्ति विधेः कर्तव्यत्वमवगम्य कर्तव्याकरणे प्रत्यवायकल्पनम् । विधिश्च फलाभावेन प्रथमं मूक एव । एवञ्च प्रत्यवायप्रमितौ विधिप्रवृत्तिः, तत्प्रवृत्तौ च कर्तव्याकरणे प्रत्यवायकल्पनं इत्यन्योन्याश्रयः ।

**अपरे तु** न विधेः कर्तव्यत्वमवगम्य कर्तव्याकरणे प्रत्यवायकल्पनम्, येनान्योन्याश्रयः। किन्तु निन्दार्थवादेन प्रायश्चित्तोपदेशेन चोपासनस्य प्रकृत्यर्थस्य तावद्व्यापारस्वरूपस्याभावः प्रत्यवायहेतुरवगतः। तथा च सन्ध्योपासनाभावः प्रत्यवायद्वारा दुःखसाधनम् । तदभावः सन्ध्योपासनं दुःखसाधनाभावत्वेन फलम्, प्रायश्चित्ते पापध्वंसवदिति तत्साधनत्वेन कृतिर्बोध्यते विधिना । न चैवं प्रत्यवायपरिहार एव फलमस्त्विति वाच्यम्। परिहारस्य प्रागभावरूपत्वेन अनादितया असाध्यत्वात् । न च उपासनाकरणं प्रत्यवायहेतुर्नोपासनाभावः। तथा च दुःखसाधनाभावत्वेन कृतिरिष्टा न तूपासनमिति वाच्यम् । निन्दार्थवादस्योभयत्र सत्त्वेन उभयस्यापि तथा**त्वादिति । तन्न ।** एवमपि काम्यत्वे नित्यताक्षतिप्रसङ्गात् । किञ्च **"अकुर्वन् विहितं कर्म"त्यादिना "नोपास्ते यश्च पश्चिमामि"**त्यादिना च करणभावस्यैव प्रत्यवायहेतुत्वं बोध्यते, न तु तद्विषयाभावस्य । अन्यथा अकर्तुः प्रत्यवायो नान्यस्येति कथं स्यात्। विषयाभावस्य साधारण्यात् ।

वस्तुतस्तु कृतिसाध्यत्वे सतीष्टसाधनताज्ञानं प्रवर्तकत्वेन निर्यूढम् । न च कृतौ कृतिसाध्यत्वमस्तीत्यतो न किञ्चिदेतत् ।

नव्यास्तु नित्यापूर्वप्रागभावो दुरितद्वारा दुःखसाधनं तदभावोऽपूर्वं दुःखसाधनाभावत्वेनेष्टं तत्साधनत्वेन कृतिसाध्यत्वेन च सन्ध्योपासनं विधीयते **इति । तन्न।** निन्दार्थवादादिना सन्ध्योपासनाभावस्तदकरणं वा प्रत्यवायहेतुरवगतो न त्वपूर्वाभावः। प्रथमं प्रमाणाभावेन तदनुपस्थितेः। विधेः इष्टसाधनत्वबोधकत्वात् परिशेषेणापूर्वमिष्टं कल्प्यत इति चेत्, तर्हि विश्वजिन्न्यायेन स्वर्ग एव फलं कल्प्यताम्। काम्यत्वस्य त्वयापि स्वीकारात् । किञ्च विधिप्रवृत्तावपूर्वज्ञानं अपूर्वज्ञाने च विधिप्रवृत्तिरित्यन्योन्याश्रयः। यावन्नित्य नैमित्तिकनिर्वाहस्य तत्तदाश्रमविहितकर्मणां सम्यक्परिपालनस्य च ब्राह्मलोकावाप्तिः फलं श्रूयते । तथा च नित्यस्य सफलत्वमिति **केचित् । तन्न । तस्य विधेर्नित्यविधिमुपजीव्य** प्रवृत्तिः तस्य च फलाभावेन प्रथमं मूकत्वात् । अन्यथा परस्परसापेक्षत्वेनान्योन्याश्रयः। तस्मात् कार्यतैव विधिः ।

ननु नित्ये वेदात् कार्यताज्ञानेऽपि प्रयोजनज्ञानं विना कथं प्रवृत्तिः। न हि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तते इति चेत्, न। नित्ये फलबाधेन प्रवृत्तिमात्रे प्रयोजनज्ञानस्याप्रयोजकत्वात् । काम्येऽपि प्रयोजनज्ञानं न साक्षात् प्रवर्तकम्, उपायाविषयत्वात् प्रयोजनेऽप्रवृत्तेश्च, किन्त्विष्टसाधनताज्ञानद्वारा कार्यताज्ञाने उपक्षीणमेव । कथमयं निश्चयः नित्ये इष्टसाधनताज्ञानासम्भवात् कार्यताज्ञानस्य वेदादपि सम्भवात् ।

ननु निष्फले दुःखैकफले वा प्रेक्षावतां कथं प्रवृत्तिः । वेदाधीनकार्यताज्ञानसत्त्वात् सफलप्रवृत्तावपि तस्यैव तन्त्रत्वात् । **यत्तु** लौकिके निष्फले दुःखैकफले वा न प्रवर्तते , तदिष्टसाधनतालिङ्गकस्य कार्यताज्ञानस्य वेदाधीनस्य वा अभावात् । न च दुःखैकफलत्वज्ञानं प्रवत्तिप्रतिबन्धकम्, सति कार्यताज्ञाने तस्य प्रतिबन्धकत्वादर्शनात् । अथ वा काम्ये लिङोऽपूर्ववाचकत्वान्नित्येऽपि लिङोपासनादिविषयकमपूर्वं बोध्यते । तच्च निष्फलमपि स्वत एव सुखवत्प्रयोजनं नित्यमभ्यर्थ्यमानञ्चेति।

उच्यते। सर्वत्र नित्ये फलश्रवणाज्जीविफलकामस्य सम्वलिताधिकारः, यथोपरागे नैमित्तिकं स्नानश्राद्धादि फलश्रुतेः काम्यम्। अकरणे प्रायश्चित्तादिश्रुतेश्च नियतकर्तव्यताकम्, यथा वा षोडशश्राद्धस्य प्रेतत्वविमुक्तिकामनाश्रुतेः प्रेतत्वविमुक्तिहेतुषोडशश्राद्धे सङ्कल्पं विधाय महाजनानामाचारात् काम्यत्वं निन्दार्थवादेनाकरणे प्रत्यवायश्रुतेरवश्यकर्तव्यत्वं तथा सन्ध्योपासनमपि फलश्रुतेः काम्यम्, अकरणे नरकश्रुतेः प्रायश्चित्तोपदेशाच्च नियतकर्तव्यताकम् ।

**यत्तु** यागे काम्यत्वेऽपि न नियतकर्तव्यताकत्वम् । तदकरणे प्रायश्चित्तानुपदेशात् । न च नित्ये फलकामनाया असम्भवः, त्रिकालकाम्यस्तवपाठवत् नित्ये फलकामनासम्भवात् ।

**यत्तु** प्रथमप्रवृत्ताहरः श्रुत्या तत्कालजीविमात्रस्याधिकारबोधनात् न फलकामस्याधिकार इति ।

**तन्न** । अहरहः श्रुत्यर्थवादयोः प्रथमगृहीतैकवाक्यताबलेन तत्कालजीविफलकामस्य सम्बलिताधिकारात् अर्थवादोपस्थितफलान्वयं विनैकवाक्यताभङ्गात्। न चार्थवादस्य स्तुतिपरत्वान्नैकवाक्यता । बाधकं विना स्वार्थापरित्यागात् । विधिवाक्योपस्थिते फले विधिवाक्यस्थफलमादायैवाहरहःश्रुत्या कार्यताबोधनात् ।

नन्वेवं तत्कालजीविकामिनोऽधिकारे यदा फलकामनाविरहस्तदा अशुचेरिवाधिकाराभावान्नियतकर्तव्यता न स्यात् । अधिकृताकरणे प्रत्यवायो न त्वकरणमात्र इति चेत्, न । नैमित्तिकेऽपि तत्काले कस्यचित्कामनाविरहिणोऽनियतकर्तव्यतापत्तेः ।

अथापवादाभावेनौत्सर्गिकी फलकामनास्त्येव, फलज्ञानस्य स्वविषयकेच्छाजनकस्वभावत्वात् । यस्य तु मुमुक्षापवादेन फलान्तरे कामना नास्ति तस्याकरणेऽपि न प्रत्यवाय इति न तन्नियतकर्तव्यताकत्वं नैमित्तिके। तथा नित्येऽपि मुमुक्षया फलकामनाबाधेनाकरणेऽपि न प्रत्यवाय इति तुल्यम् । किञ्चार्थवादोपस्थितफलोपाधिकर्तव्यत्वेऽवगते **"अकुर्वन् विहितं कर्म"**त्यादिवाक्याच्छौचे सति सन्ध्यावन्दनाकरणे निन्दार्थवादेन च नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायः कल्प्यते ।

तत्फलकामनाविरहेऽपि प्रत्यवायपरिहारार्थं नियमतः प्रवर्तते विधिप्रवृत्त्यनन्तरं प्रत्यवायस्य प्रामाणिकत्वात् । अकरणोन्मुखस्य करणेन प्रत्यवायप्रागभावस्य साध्यत्वात्, नैमित्तिके फलोपाधिकर्तव्यत्वे कामनाविरहेऽपि नियतकर्तव्यतावत् ।

**यत्तु** निष्फलेऽपि नित्ये वेदाधीनकार्यताज्ञानात् प्रवर्तत **इति । तन्न ।** दुःखैकफलत्वेन ज्ञायमाने प्रेक्षावतां कृतेरनुत्पादनियमात् अयोग्यतया नित्ये कृतिसाध्यत्वस्य बोधयितुमशक्यत्वात्। अत एव सन्ध्योपासनमफलमपि क्रियते वेदबोधितकर्तव्यताकत्वादित्याशङ्क्य **गुरुमतमेतन्न गुरोर्मत**मित्यभिप्रायेणेपेक्षि**तवानाचार्यः** ।

**यत्तु** पण्डापूर्वं स्वत एव प्रयोजनम्**, इत्युक्तम् । तदपि** न । एवं तवापि काम्यत्वे नित्यत्वहान्यापत्तेः । किञ्च सुखं दुःखाभावश्च मुख्यं प्रयोजनम् । तत्साधनञ्च गौणं नित्यापूर्वन्तु तेषु नैकमपि पण्डापूर्वत्वात् । काम्यापूर्वञ्च सुखहेतुर्गौणं प्रयोजनम् । प्रवर्तकविध्यनुरोधेन तदपि प्रवर्तकं कल्प्यत इति चेत् । न । प्रवर्तनीयेन लोकेन तस्य प्रयोजनत्वेनाज्ञानात् गुरुणा नित्यापूर्वं प्रयोजनमुक्तं । इत्युच्यमानेऽपि नादरः प्रेक्षावताम्। मुक्ति- स्वर्गौ चालौकिकावपि सुख - दुःखाभावसजातीयतया प्रयोजने । तस्मादेवं वदन् गुरुरपि लघुरेव ।

तदयं सङ्क्षेपः-नित्ये दुःखैकफलत्वेन प्रवृत्त्यनुपपत्तेः फलोपाधिकर्तव्यता। तच्च फलं दुःखसाधनाभावः पण्डापूर्वं वेति तदिच्छा प्रवृत्यर्थं प्रत्यहमुपेया, तां विना प्रवृत्त्यनुपपत्तेः । तथा चार्थवादिकं विधिवाक्यश्रुतञ्च फलमस्तु । कृतमन्येन । न च कामनाविरहे नियतकर्तव्यता न स्यात् । अपूर्वादीच्छाविरहेऽपि तुल्यत्वात् । प्रत्यवायपरिहार्थं नियमतः प्रवृत्तिस्तुल्यैव । यत्र च न फलश्रुतिस्तत्र विश्वजिन्न्याय इति ।

नन्विदमिष्टसाधनमिति ज्ञानादेतत्साध्यमिष्टमिति ज्ञानाच्च प्रवृत्तिदर्शनात् प्रथमस्यैव प्रवर्तकत्वे किं विनिगमकम्, उच्यते । फलेच्छायां स्वविषयविशेष्यकज्ञानस्य हेतुत्वेन क्लृप्तत्वात् उपायचिकीर्षापि बाधकं विना तथा । वस्तुतस्तु कृतिसाध्ययागस्य साध्य इति ज्ञानस्य प्रवृर्तकत्वे यजेतेतिपदात् प्रथमं कृतिसाध्यो याग इति ज्ञानम्। ततः

कृतिसाध्ययागस्य साध्य इष्ट इति ज्ञानम्, विशेषणज्ञानसाध्यत्वात् विशिष्टज्ञानस्येति ज्ञानद्वयं तव । मम तु याग: कृतिसाध्य इष्टसाधनमित्येकमेव ज्ञानम्। न च कृतिसाध्यत्वं यागे बोधयित्वा कृतिसाध्ययागस्य साध्य इष्ट इति लिङा बोधयितुं शक्यमपि, एकस्वार्थान्वयमपरदार्थे बोधयित्वा तदन्वितापरस्वार्थन्वयबोधकत्वस्य पदेऽव्युत्पत्ते:। यजिपदे च कृत्या यागान्वयं बोधयित्वा पर्यवसिते पुन: स्वार्थान्वयबोधकत्वे आवृत्तिप्रसङ्ग: ।

अथ साध्यमिष्टं यस्येति साध्येष्टकत्वं शक्यम्, तथा च बहुव्रीह्यर्थापेक्षया इष्टस्य साधनमिति षष्ठ्यर्थस्य लघुत्वात्तदेव शक्यम्। किञ्च तत्साध्यत्वं न नियमतस्तदुत्तरसत्त्वम्, दण्डसाध्ये घटे व्यभिचारात् । नापि तदवच्छिन्नक्षणोत्तरक्षण एव सत्त्वम् , एवकारव्यवच्छेद्यतदनुत्तरसमयस्याकाशेऽप्रसिद्धे: शब्दस्य तदसाध्यत्वापत्ते:। अत एव न तदभावव्यापकाभावप्रतियोगित्वं रूपे रससाध्यत्वापत्तेश्च । नापि तदवधिकोत्तरत्वव्याप्यसमयसम्बन्ध:, उत्तरत्वव्याप्यत्वं ह्युत्तरत्वानधिकरणकालावृत्तित्वम्। तच्चाकाशेऽप्रसिद्धं गुरुतरञ्च। तस्मात् तत्साधनकत्वमेव तत्साध्यत्वम्, एवञ्च लाघवात् तत्साधनत्वज्ञानमेव प्रवर्तकं न तु तत्साधनकत्वज्ञानमिति ।

स्यादेतत् । इष्टत्वज्ञानस्य प्रवर्तकत्वे तृप्तोऽपि भोजने प्रवर्तेत, मनसा तृप्तेरिष्टत्वज्ञानात् ।

अथ स्वरूपसत्यपि फलेच्छा कारणम् । सा च सिद्धतया तृप्तौ नास्तीति चेत् , तर्हि हन्तैवमावश्यकत्वात् फलेच्छैव कारणम्, न तु तज्ज्ञानं गौरवात् । किञ्च इच्छाज्ञानस्य कारणत्वे इच्छा कारणं न स्यात् स्वज्ञानेन तन्नाशात् इच्छातज्ज्ञानधाराकल्पनेऽनवस्थानात्। अपि चेच्छाविषय: सुखं इति ज्ञानं न मानसम्, सुखस्यासिद्धतया तद्विशेष्यकसाक्षात् कारस्य तत्सन्निकर्षं विना अभावात् ।

ओदनादावपीष्टत्वज्ञानं न सम्भवति मनसो बहिरस्वातन्त्र्यात् । नापि चक्षुरादिना ज्ञात: कृत इतिवत् इष्टत्वज्ञानम् । तत्र विशेष्यसन्निकर्षात् । वस्तुतस्तु इष्टस्य विशिष्य सुखत्वादिना अज्ञाने यागपाकादाविष्टसाधनताज्ञानेप्यप्रवृत्तिप्रसङ्ग: इष्टस्याल्पाधिकभावेन

नानाप्रकारत्वेन च विशिष्यानध्यवसायात् । न चेष्टविषयतावच्छेदकसुखत्वादेरुपलक्षण-मिष्टत्वम्, सुख-दुःखाभावतत्साधनेषु अनुगतस्योपलक्ष्यस्याभावेनाननुगमादिति ।

उच्यते । यत्रेच्छा तत्साधनताज्ञानमेव लोकवेदसाधारणं प्रवर्तकम्। तेषां सुख-दुःखाभाव-तत्साधनत्वेनेच्छाविषयाणामननुगतनामपि वस्तुसदिच्छाविषयत्वमेवानुगमकम्। एवं यदा सुखादाविच्छा भवति स्वकृतिसाध्यत्वे सति सुखादिसाधनमिति ज्ञानं तदा पाकादौ प्रवर्तते ।

नन्वेवं प्रवर्तकज्ञानविषयस्य नानात्वेन तच्छक्तस्य विधिप्रत्ययस्य नानार्थत्वप्रसङ्ग इति चेत्, न । सुखत्वादिनानुगतं इष्टत्वेनाननुगतं फलं प्रति साधनत्वस्य यागादेर्लिङ्गादिना बोधनात् । तथा च फलानामनुगमार्थं फलेच्छा शक्या, न त्विच्छा ज्ञानकारणत्वेन ।

अथैवं सुखादिसाधनत्वेन ज्ञानं प्रवर्तकम्। तन्न शक्यम्, अननुगमात् । यच्च शक्यमिष्टसाधनत्वं तज्ज्ञानं न प्रवर्तकम् इति विधेः प्रवर्तकता न स्यात् इति चेत्, साक्षादेवमेव। किन्त्विष्टसाधनं याग इति लिङा बोधिते इष्टाकाङ्क्षायां काम्यत्वेन श्रुतः स्वर्ग एव इष्टत्वेनावगम्यते । तदनन्तरं स्वर्गकामपदसमभिव्याहारात् स्वर्गसाधनं याग इति ज्ञानं प्रवर्तकमुत्पद्यते । एवञ्च विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्तकम् ।

**यत्तु** सर्वेषामेव विधेर्न साक्षात् प्रवृर्तकत्वं विधिबोधकात्, स्वकृतिसाध्यत्वादेरनवगमात्, स्वेष्टसाधनत्वञ्च अहं इष्टसाधनयागकः स्वर्गकामत्वाद्दर्श-वाक्यावगतस्वर्गकामवदित्यनन्तरमर्थात् प्रतीयते । **तन्न** । यत्रेच्छा तत्साधनमिति शाब्दज्ञानादेव प्रवृत्त्युपपत्तेस्तत्प्रतीतिर्निष्फला ।

**अन्ये तु** साधनत्वमात्रं विध्यर्थः, स्वर्गादिसाधनतालाभस्तु समभिव्याहारात् इष्टसाधनतापक्षेऽपि तस्योपजीव्यत्वात् । तथाहि यजेतेत्यनेन यागः कृतिसाध्यः साधनञ्चेति बोधिते साधनस्य साध्याकाङ्क्षायां कामनाविषयत्वेन श्रुतोऽसिद्धः स्वर्ग एव साधनाकाङ्क्षी साध्यत्वेनावगम्यते, उपस्थितत्वात् । न च यागस्य साधनाकाङ्क्षा । कृतिसाध्यत्वेनैवोपस्थितेः । अत एव विश्वजिदादौ स्वर्ग एव साध्यत्वेन कल्प्यत इति ।

इष्टसाधनताविधिपक्षेऽपि **"तरति मृत्युं तरति ब्राह्महत्यां योऽश्वमेधेन यजते"** इत्याद्यर्थवादे विधिबोध्येष्टसाधनत्वस्यार्थवादादेवावगमात् । कुतो विधिकल्पनमिति **चेत् । न ।** अविनाभावात् । तथाभूतसाधनत्वस्य विधेयत्वव्याप्तत्वात्। व्यापकानुपलम्भबाधोद्धाराय वा प्रयोजनाभावान्न **तत्कल्पनं तत्रेत्यप्याहु: ।**

**यत्विष्**टसाधनत्वाभिधाने करणे लिङोऽनुशासनात् दर्श-पौर्णमासाभ्यामित्यनभिहिताधिकारविहिता तृतीया न **स्यादिति । तन्न ।** उपायतामात्राभि-धानेऽपि तद्विशेषकरणत्वानभिधानात् । वस्तुतस्त्वभिहितान्वयलभ्यं यागेष्टसाधनत्वम्। इष्टसाधनत्वमात्रस्य विध्यर्थत्वात् ।

**नव्यास्तु** चिकीर्षाद्वारा ज्ञानस्य कृतौ हेतुता। चिकीर्षा च कृताविच्छा। सन: प्रकृत्यर्थगोचरेच्छावाचित्वात् पिपक्षादिवत् । न तु कृतिविषयपाकादिविषये कृतिसाध्यत्वप्रकारकेच्छाभिधायकत्वम्, पाकादे: प्रकृत्यनभिधेयत्वात् न हि कृतिवाचकस्य तद्विषयवाचकत्वं, करोतीत्युक्ते तद्विषयसंशयात् । एवञ्च कृताविच्छेष्टसाधनताज्ञानात् तत्साध्येष्टज्ञानाद्वा वृष्ट्यादौ तथा कल्पनात् । यदा च कृताविच्छा तदा सैव चिकीर्षा । अन्यत्रेच्छामात्रं न तु कृतिसाध्यताज्ञानात्, कृतौ कृतिसाध्यत्वाभावात् ।

अथ पाकं कृत्या साधयामीतीच्छानुभवसिद्धा। अनुभवापलापे उपेक्षणीयत्वापत्ते: । सा च कृतिसाध्यताज्ञानात्, सा च चिकीर्षापदाप्रतिपाद्यापि कृतिहेतु: समानविषयत्वात्, न तु कृतीच्छा कृतिहेतु: कृतिविषयाविषयत्वादिति चेत्, अस्ति तावत्पाककृताविच्छा वृष्टीच्छावत् । अस्ति च कृतिसाध्यत्वकारिकेच्छा पाके, तथापि कृतीच्छैव कृतिकारणं लाघवात् न तु कृतिसाध्यत्वप्रकारिकेच्छा गौरवात् । धात्वर्थानुपरक्ते कृतिस्वरूपे इच्छैव नोदेतीति चेत्, न । पाकादिकृतीष्टसाधनताज्ञानात् पाककृताविच्छा तत: कृतिरित्यभ्युपगमात् । न चावगतिप्रवृत्त्यो: समानविषयत्वमुभयसिद्धम्, तस्यैव विचार्यत्वात् ।

कथं तर्हि पाकं कृत्या साधयामीतीच्छा। यथा वह्निसाध्यत्वेन इष्टसाधनतावगमात् वह्निना पाकं साधयामीतीच्छा तथा कृतिसाध्यत्वेन इष्टसाधनत्वात् पाकस्य पाकं कृत्या

साधयामीतीच्छा । अन्यथा तत्तदुपायसाध्यत्वेन इच्छा पाकादौ तत्तदुपायसाध्यत्वप्रकारक-ज्ञानात् स्यादित्यनन्तकारणकल्पना स्यात् । मम तूपायेच्छायामिष्टसाधनताज्ञानमेव हेतु: क्रियाद्वारा कृतेरिष्टसाधनत्वज्ञाने क्रियाया अपीष्टसाधनत्वं विषय इति कृतीच्छा भवन्ती क्रियाविषयापि भवतीति ज्ञानेच्छाप्रयत्नानां समानविषयतापि । अत एव पाकं चिकीर्षतीति चिकीर्षाविषयतया पाक: प्रतीयते ।

यद्वा इच्छाविषयविषयतया पाक: प्रतीयते इति तस्य कर्मता ग्रामं जिगमिषति शत्रुं जिघांसतीत्यत्र ग्रामादेरिव । न हि ग्रामादाविच्छा, सिद्धत्वात् । अत एव भोगे सुखे च चिकीर्षा तदनुकूलकृतेरिष्टहेतुत्वात् । अन्यथा कृतिसाध्येष्टसाधनतापक्षे तच्चिकीर्षासामग्र्यन्तरं कल्प्येत । एवञ्च सन्ध्यावन्दनं दु:खसाधनाभावरूपत्वेनेष्टं तत्साधनं कृतिरिति लिङर्थ: । अन्यथा कृतिर्न कृतिसाध्या सन्ध्यावन्दनञ्च नेष्टसाधनमिति कस्य कृतिसाध्यत्वे सतीष्टसाधनत्वं विध्यर्त: स्यात् । अत एवैकप्रत्ययाभिधेयत्वप्रत्यासत्तेरन्तरङ्गतया विधिप्रत्ययाभिधेयेष्टसाधनत्वस्य कृतावेवान्वयो न, प्रकृत्यर्थे। तथैव चिकीर्षाकारणज्ञानजनकत्वात् । प्रकृत्यर्थस्य च कृतौ विषयत्वेनान्वय इति ।

उच्यते । वह्निसाध्यत्वेन कृतिसाध्यत्वेन वा न पाकस्यौदनसाधनता इत्युक्तम् । कथं तर्हि वह्निना पाकं साधयामीतीच्छा इति चेत्, न। इष्टसाधनत्वेन ज्ञाते यत्र यत्साध्यत्वं ज्ञायते तत्र तत्साध्यत्वेनेच्छा भवतीति । यथेष्टसाधनत्वेन ज्ञाते पाके वह्निसाध्यत्वज्ञानात् वह्निना साधयमीतीच्छा एवं कृतिसाध्यत्वेनावगते इष्टस्य साधनताज्ञानात् कृत्या साधयामीतीच्छा। तथा चेष्टसाधनत्वेन कृतिसाध्यत्वेन च ज्ञाते कृतिसाध्यत्वप्रकारिकेच्छा न त्विष्टसाधनताज्ञानमात्रादिति ।

आचार्यास्तु प्रवर्तकमिष्टसाधनताज्ञानमेव । लिङर्थस्त्वाप्ताभिप्रायो लाघवात् । पाकं कुर्या: कुर्यामित्यत्र विधिलिङ: सम्बोध्यस्वकर्तृकक्रियेच्छाभिधायकत्वेनाज्ञाप्रार्थनाशंसनादिलिङो वक्त्रादीच्छाभिधायकत्वेन लिङमात्रस्येच्छावाचकत्वकल्पनाच्च । एवञ्च **"स्वर्गकामो यजेते"** त्यस्य स्वर्गकामस्य कृतिसाध्यतया यागो यागयत्नो वा आप्तेष्ट इत्यर्थ: । ततो यो व्यापारः

यस्य कृतिसाध्यतया यद्व्यापारविषयक: प्रयत्नो वा यस्याप्तेनेष्यते स तस्य बलवदनिष्टाननुबन्धीष्टसाधनमिति व्याप्तिग्रहात् यागस्येष्टसाधनत्वमनुमिनोति ।

तथाहि यागो मदिष्टसाधनं मत्प्रयत्नविषयतया आप्तेनेष्यमाणत्वात्, यथा मत्पित्रा मत्प्रयत्नविषयतयेष्यमाणं मद्भोजनं मदिष्टसाधनम् । तथाचेदम् । तस्मात्तथा । एवं न कलञ्जं भक्षयेदित्यस्य मम कलञ्जभक्षणप्रयत्नो नाप्तेच्छाविषय इत्यर्थ: । तत: कलञ्जभक्षणं मम बलवदनिष्टसाधनं मदिष्टसाधनत्वे सत्यप्याप्तेन मत्प्रयत्नविषयतया अनिष्यमाणत्वात् । यथा मत्पित्रा मत्प्रयत्नविषयतया अनिष्यमाणं मधु-विषसम्पृक्तान्नभोजनं मम बलवदनिष्टसाधनम्। तथाचेदम् । तस्मात्तथा । स चाप्तो वेदव्याख्याता भगवानीश्वर एव ।

यस्तु वेदे पौरुषेयत्वं नोपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिकुमार्य्याः पुंयोगे प्रमाणम् । न तर्हि लाघवम्, तात्पर्यगौरवादीश्वराद्यनन्तकल्पनादिति चेत्, न। लाघवादिनेच्छाबोधकत्वेन लोके लिङ: प्रमाणसिद्धत्वेन फलमुखगौरवस्यादोषत्वात् । न तु कर्तुरस्मरणं बाधकम्, प्रागेव निरासात् । तृप्तिकामनया विषभक्षणप्रवृत्तस्य विषभक्षणं तत्कृतिसाध्यतया नेश्वरेणेष्यते । ततो विषभक्षणस्य ईश्वरेच्छाविषयत्वेऽपि न तेन व्यभिचार:। यद्वा यत्कामकृतिसाध्यत्वेन यो व्यापार आप्तेनेष्यते स तस्येष्टसाधनम्। विषभक्षणञ्च तृप्तिकामकृतिसाध्यत्वेन नेश्वरेच्छाविषय: मानाभावात् । अत एव **"न कलञ्जं भक्षयेदित्यत्र"** कलञ्जभक्षणं तृप्तिकामनया भक्षणप्रवृत्तस्य कृतिसाध्यत्वेनाप्तेच्छाविषयो नेति तस्येश्वरेच्छाविषयत्वेऽपि विशिष्टनिषेध उपपद्यते। अभिप्रायविधिपक्षे बलवदनिष्टा-ननुबन्धित्वमानुमानिकम् । इष्टसाधनताविधिपक्षे तु तदपि शक्यमिति गौरवमिति ।।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दखण्डे विधिवादः समाप्तः ।**

## अथापूर्ववाद:

अथ **"स्वर्गकामो यजेतेत्या"** दाविष्टसाधनत्वं कार्यत्वं वा यद्विधि: स समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा।

**अत्र गुरवः-** नाहत्य क्रियाकार्यतया लिङा बोधयितुं शक्यते स्वर्गकामनियोज्यान्वययोग्यताज्ञानविरहात् । कामनाविशिष्टस्य हि ममेदं कर्यमिति बोद्धृत्वं नियोज्यत्वम् । तत् कामनायास्तद्बोधोपयोगे सति भवति। स च कामनानन्तरं काम्यसाधनताबोधात् कार्यताबोधे सति स्यात् । एवञ्च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वयोग्यता । न च कालान्तरभाविस्वर्गे क्रिया साक्षात् परम्परया वा साधनमिति शब्दो बोधयितुमर्हति। आशुविनाश्शित्वात् परम्पराघटकानुपस्थितेश्च तृतीयप्रकाराभावाच्च । अन्यथा तमादाय साधनत्वसम्भवात् कल्प्यमप्यपूर्वं न स्यात् । इष्टसाधनताविधिपक्षे स्फुटैवानुपपत्तिः । कार्यताविधिपक्षे अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न कश्चिद्विशेषः । अतः क्रियातोऽन्यत् स्वर्गसाधनतार्हं क्रियाकार्यतानिर्वाहकं लिङाद्यर्थः।

ननु स्वजातीयेऽन्वयदर्शनं योग्यता। दृष्टञ्च घृतपानस्याशुविनाशिनः कालान्तरे पुष्टिहेतुत्वमिति चेत्, न, यथाकथञ्चित् साज्यात्यस्यायोग्येऽपि सत्त्वेन योग्यताया अव्यावर्तकत्वापत्तेः। पदार्थतावच्छेदकेन साजात्यस्याद्यजातः पयः पिबतीत्यादौ प्रकृते चासम्भवात्। तस्मादन्वयप्रयोजकरूपवत्त्वं साजात्यम् । अत एव द्रव्यद्रव्यत्वं सेककरणत्वे प्रयोजकम् इत्ययोग्यो वह्निः। तदिहाशुविनाश्शिनः कालान्तरभाविफलजनकत्वे फलसमयपर्यन्तस्थायिव्यापारजनकत्वं प्रयोजकम्। अतोऽपूर्वं विना साजात्यमेव न गृह्यते । घृतपानस्य तु वैद्यकोपस्थितधातुसाम्यमादाय पुष्टिसाधनत्वयोग्यताज्ञानं विज्ञस्य ।

अथ बाधकप्रमाणाभावो योग्यता । न च साधनत्वमात्रे बाधकम् । साक्षात्तद्बाधेऽपि परम्परासाधनत्वमादाय तद्विश्रान्तिसम्भवात् । न च योग्यानुपलब्ध्या द्वारस्य बाधात् परम्परासाधनत्वमपि बाधितम्, संस्कारस्येव तस्य सम्भवात् । अन्यथा वाच्येऽप्यपूर्वे क्रिया कामिकार्या न स्यात्। काम्यासाधनत्वात् । न हि यदेवायोग्यं तत्पश्चात् योग्यम्, अयोग्यत्वे च निष्फलः प्रयासः । न च कामिकार्यमपूर्वं तदर्थिकार्या च क्रियेति वाच्यम् । यागे रागादित्यनेन विरोधात् । तथापि द्वारानुपस्थित्या परम्परासाधनमिति ज्ञानं न भवेदिति चेत्,

सत्यम् । किन्तु स्वर्गसाधनं याग इति ज्ञानं साक्षात्परम्परोदासीनं वस्तुगत्या परम्परासाधनत्वविषयकमुत्पद्यमानं नायोग्यतया परिभवितुं शक्यम् ।

यदि च साक्षात्परम्पराविशेषद्वयव्यतिरिक्तं सामान्यं नास्त्येव तदा अननुगमः । किं वा विशेषयसि साक्षात्परम्परया वेति । न च यावद्विशेषबाधे तद्बाधितम्, परम्परासाधनत्वेऽबाधादिति ।

मैवम् । योग्यता हि स्वबाधकप्रमाविरहो वा सकलबाधकप्रमाविरहो वा । आद्ये वह्निना सिञ्चतीत्यादौ स्वबाधकप्रमातद्विरहौ समयभेदेन स्त इति तदेव योग्यमयोग्यञ्चेति प्राप्तम् । द्वितीये तु योग्यानुपलब्ध्या तन्निश्चयोऽशक्य: परप्रमाया अयोग्यत्वात् । न च वाच्यं सकलबाधकप्रमाविरह: स्वरूपसन्नेव प्रयोजक इति । अयोग्ये योग्यता-भ्रमादन्वयबोधाभावप्रसङ्गात् अन्यस्य तत्र बाधकप्रमासत्त्वात् । अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमाविरहो निश्चीयते इति चेत्, तर्हि प्राथमिकत्वात् सैव योग्यता । न च सा प्रकृते सम्भवतीत्युक्तम् । किञ्चैकविशेषबाधे शाब्दसामान्यज्ञानं तदितरविशेषप्रकारतानियतं छिद्रबाधे छिद्रेतरघटज्ञानवत् । न च द्वारानुपस्थित्या प्रकृते तथा घटते ।

एतेन यदुक्तं प्रशस्तरूपवान् चैत्र इत्यत्र गौर-श्यामविशेषानवगमेऽपि रूपमात्रमवगम्यते तद्वत् विशेषानवगमेऽपि साधनत्वमात्रमिति, तत्प्रत्युक्तम् । तत्रैकविशेषबाधाभावेनौदासीन्यसम्भवात् ।

एतेन स्वर्गकामान्वयबलात् क्रियाया: फलसाधनत्वं तद्बलाच्च पटो: संस्कारस्येव स्थायित्वं कल्प्यताम्, किमपूर्वेण। सङ्कल्पविशेषस्य यागस्याग्रे प्रत्यक्षानुप-लब्धिरात्मविशेषगुणानां प्रथमक्षण एव स्वविषयकप्रत्यक्षजननस्वभावात् अस्तु, न चैवं क्रियान्तरमपि तथा, प्रमाणाभावात् । एवं लोकप्रसिद्धक्रियाकार्यत्वव्युत्पत्तिरपि भग्ना न भवतीति परास्तम् । स्वर्गसाधनतायोग्यतया स्वर्गकामान्वयः तदन्वये च स्थायित्वम् । इत्यन्योन्याश्रयात्, लोके धर्मिग्राहकमानेन क्रियाया: क्षणिकत्वनिश्चयाच्च।

ननु देवपूजार्थो यजिः। पूजा चाराधना गौरवितप्रीतिहेतुः क्रिया। अतो देवताप्रीतिद्वारा यागस्य स्वर्गसाधनत्वम् । प्रीतेः क्षणिकत्वेऽपि प्रीत्यनुभवजनितसंस्कारद्वारा तत्सम्भवात् । अत एवाग्नेयादौ प्रीतिभागितया अग्न्यादेरुद्देश्यत्वमिति चेत्, न । **"यज् देवपूजायाम्'** इति हि शाब्दिकस्मृतिः, स्मृतित्वादेव न स्वतः प्रमाणम्। न च यागस्य देवताप्रीतिहेतुत्वे स्वर्गस्य देवताप्रीतिसाध्यत्वे वा मानान्तरमस्ति ।

वस्तुतस्तु चेतने देवे मानमेव नास्ति। यत्र च विष्णुप्रीतिकामादिवादोऽस्ति तत्र विष्णुरेव प्रीतिः न तु विष्णोः, षष्ठ्यर्थलक्षणादोषात्। विष्णुशब्दस्य प्रीतिविशेषवाचकत्वं वेद एव कल्प्यते । न च देवपूजार्थयज्यन्वयबलात्तथा। अन्योन्याश्रयात् ।

नन्वेवं आग्नेयादीनां षण्णां क्षणिकत्वात् योग्यतानवगतौ परमापूर्वकारणत्वानवगमे कथमपूर्वकल्पनेति चेत्, न । काम्ये अपूर्ववाच्यत्वस्थितौ आग्ननेयादौ तद्वारा साधनत्वस्य योग्यतासम्भवात् न तु प्रथमम्।

ननु **"यो ब्राह्मणायावगुरेत्तं शतेन यातयेदित्यत्र"** ब्राह्मणवधोद्यमस्य शतयातनाहेतुत्वावगमे यथा दुरितापूर्वं कल्प्यते तथेहापीति चेत्, न। अवगुरेत् यातयेत् इत्यत्र हेतु-हेतुमतोर्लिङित्यनुशासनात् लिङा अवगोरण-शतयातनयोर्नियतं पौर्वापर्यं बोध्यते । प्रत्यक्षेणनुभव-स्मरणयोरिव । तच्च साधनत्वे साधनसाधनत्वे वा उभयमपि मध्यवर्तिघटितमिति दूरितकल्पनम् संस्कारवत् । इह तु विध्यनुशिष्टा लिङ् कार्यतामाह । किञ्च कामी काम्यादन्यत् काम्याव्यवहितसाधनतया ज्ञातमेव कर्तव्यतयाऽवैतीति नियमात् न क्रियायां कामिनोऽन्वयो योग्यः । न च तृप्तिकामस्य पाके प्रवृत्तेव्यभिचारः । ओदनकामस्य तत्र प्रवृत्तेः । तृप्तिकामना तु तत्कामनोपयोगिनी न तु साक्षात्। अन्यथा साधनसाधने प्रवृत्तिर्न स्यात् । काम्यसाधनत्वं प्रवर्तकम्, लाघवादिति चेत्, न । भोजनकामस्य सिद्धौदनस्य पाके प्रवृत्तिप्रसङ्गात्, तस्यौदनद्वारा भोजनसाधनत्वाविशेषात् । विशेषणे तु यत्राव्यवहितसाधनं पाकः तत् न काम्यम् । यच्च काम्यं तत्र नाव्यवहितसाधनं पाक इति न प्रवृत्तिः ।

ननु पाकस्य सिद्धौदनद्वारा भोजनसाधनत्वं न सम्भवति द्वारस्यासाध्यत्वात् । ओदनान्तरद्वारा च तथा प्रतिसन्धाने अव्यवहितविशेषणेऽपि कुतो न पाके प्रवर्तते। ओदनान्तरे द्वारे साक्षात्साधनत्वादिति चेत्, न । पाकस्य भोजनसाधनत्वे विशेषस्याप्रयोजकतया ओदनमात्रस्य द्वारत्वात् तस्य च साध्यत्वाविवादात् । ओदनविशेषे च सिद्धे ओदनकामनाविरहात् न तुल्यत्वम् ।

नन्वोदने सिद्धत्वात् यथा न कामना तत एव द्वारतापि न । अथौदनान्तरस्यासिद्धत्वमादाय द्वारता तर्हि कामनापि स्यात् तस्यासिद्धत्वादिति चेत्, न। पाकस्यैकविशेषद्वारता बाधो न विशेषान्तरद्वारताविरोधी सकलविशेषस्यैकत्र द्वारत्वासम्भवात् । एकविशेषसिद्धौ तु तन्मात्रकामना विच्छिद्यते । न हि सकलविशेष-सिद्धत्वेन सामान्यकामनाविच्छेदः । सकलविशेषसिद्धेरसम्भवेन तदनुच्छेदप्रसङ्गात् । अथवा काम्यादन्यत् साक्षादसाधनत्वेन ज्ञायमानं यत्कर्तव्यतया कामी बुध्यते तत्काम्याव्यवहितसाधनमन्तरा कृत्वैव । यद्वा काम्यादन्यत् कामी प्रथमं काम्याव्यवहितसाधनं कर्तव्यतयाऽवैति । पश्चात् तद्द्वारा अव्यवहितसाधनमिति प्रथमं यागे कामिकार्यताबोधोऽयोग्यतापराहत एव ।

**उत्तानास्तु** विवादविषयो लिङ् समभिव्याहृतक्रियान्वितकार्यताबोधिका प्रमाणलिङ्त्वात् लौकिकलिङ्वत् । लिङुपस्थाप्यं कार्यत्वं समभिव्याहृतक्रियान्वितं लिङुपस्थाप्यकार्यत्वत्वात् पचेतेतिकार्यत्ववत् । यागो वा कार्यत्वान्वितः लिङ्सम्बन्धिधातुप्रतिपाद्यत्वात् पाकवदित्यनुमानात् क्रियाकार्यत्वावगमेनापूर्वं कल्प्यमिति । तत्र प्रथमे यागान्वितकार्यत्व-बोधकत्वं लिङो बोध्यते न तु क्रियते । न च योग्यताज्ञानं विना तत्सम्भवतीत्युक्तमेव । न हि योग्यतादिकं विनैव तदनुमानप्रामाण्यप्रयोजनमात्रादन्वितमभिधीयते शब्देन। नान्त्यौ। कुर्यादित्यत्रव्यभिचारात्। वेदस्यानुवादकतापाताच्च ।

नन्वपूर्वे व्युत्पत्तिविरहः । तथाहि प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्या उपस्थिते शक्तिर्ग्रहीतव्या । न च शाब्दानुभवात् पूर्वं अपूर्वमुपस्थितम्, मानाभावात्

अपूर्वत्वव्याघातात्, अवाच्यत्वापाताच्च। न च लिङादिना तदुपस्थितिः । व्युत्पत्त्यनन्तरं तत्प्रवृत्तावन्योन्याश्रयात् । न च कार्यत्वेनोपलक्षिते तत्र शक्तिग्रह: । उपलक्षणं हि स्मरणमनुमानं वा अगृहीते सम्बन्धाग्रहादशक्यमिति ।

मैवम् । कार्ये धर्मणि कार्यत्वेन शक्तिग्रहात् । कार्यत्वविशिष्टञ्चोपस्थितमेव । ततोऽन्विताभिधानदशायां यागविषयकं कार्यमित्यनुभवः स्वर्गकामान्वयायोग्यतया घटादिकं तिरस्कृत्य क्रियाभिन्ने योग्यतावशाद्यागविषयकापूर्वे पर्यवस्यति। न त्वपूर्वत्वेन शक्तिग्रहः । न चापूर्वं कार्यमित्यनुभव: । भवति च सामान्यत: सम्बन्धबुद्धि: सहकारिवशात् विशेषबुद्ध्युपायः। यथा तवैव कर्तृमात्रे सम्बन्धग्रहात् कर्तृविशेषसिद्धि:।

ननु कार्यत्वेनापि किं घटादौ शक्तिग्रह: उतापूर्वे उभयत्र वा । नाद्यः, अन्यप्रतिपत्तावन्यशक्तिग्रहानुपयोगात् । नान्त्यौ, प्रागनुपस्थितेरिति चेत्, न । येन हि रूपेण शब्देनानुभवो जन्यते तेन रूपेण शक्तिग्रहः पदार्थस्मरणञ्च शाब्दानुभवहेतुः । न हि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मरणञ्च घटत्वेन शाब्दानुभवहेतु: । एवञ्च घटादावेव कार्ये शक्ता लिङिति शक्तिग्रह:। ततः कार्यमिति स्मरणम् । ततो योग्यतादिवशात् प्रचुरद्रव्य-गुण-कर्माणि कार्याणि विहाय यागविषयकं कार्यमित्यनुभवो भवन्नपूर्वमालम्बते । योग्यत्वाच्च तस्य । स्थायित्वलाभः । अत एव वाक्यार्थानुभवमात्रविषयत्वात्तदपूर्वम् । न च स्मृतानामाकाङ्गादि न चापूर्वं स्मृतिगोचार इति वाच्यम् । शक्तिग्रहपदार्थस्मृतिशाब्दानुभवानां समानप्रकारकतामात्रेण हेतुहेतुमद्भावावधारणात् लाघवादावश्यकत्वाच्च । न तु क्वचित् सहचारमात्रेण अन्वयप्रतियोगिन एवोपस्थितिस्तथा । गौरवात् गोपदादपूर्वगवाननुभव-प्रसङ्गाच्च। विशिष्टवैशिष्ट्यबोधे सर्वत्र तथैव । अन्यथा पर्वतीयवह्निर्व्यापकतया नावगत इति कथं तदन्वयोऽनुमितौ ।

ननु सामान्यलक्षणया प्रत्यासत्त्या सर्वा एव व्यक्तयो व्याप्तिहग्रहे शक्तिग्रहे च विषयीभवन्ति । कथमन्यथा पर्वतीयधूमव्याप्त्यग्रहे तस्मादनुमितिरिति चेत्, न। येन रूपेण व्याप्तिग्रहस्तेन रूपेण व्याप्यत्वेन वा पक्षधर्मताग्रहोऽनुमितौ कारणमस्तु। किं तया । अपि च

सा यद्यस्ति ममापि, नास्ति चेत्तवापि । किञ्च तव दर्शने सास्तीति सुतरामपूर्ववाच्यता । कार्यत्वेन हि रूपेणापूर्वस्यापि शक्तिग्रहविषयत्वं पदार्थस्मृतिविषयत्वञ्च । न चैवमपूर्वत्वक्षतिः। यागविषयत्वादेर्विशेषस्य कार्ये लिङं विनानुपस्थितेः। यथा पर्वतीयत्वभानं वह्नौ नानुमितिं विना ।

ननु कार्ये यदि क्रियासाधारणेन लिङशक्तिः क्रिया चायोग्येति योग्यापूर्वलाभः तदा नित्यनिषेधापूर्वयोरलाभः । न हि तत्रायोग्यतया क्रिया त्यक्तुं शक्यते , फलाश्रवणात् कल्पनायाञ्च वीजाभावात् । न च एकत्र निर्णीतः शास्त्रार्थोऽन्यत्र तथैवेति न्यायात् तत्राप्यपूर्वमेव लिङर्थ इति युक्तम्, न ह्यपूर्वत्वेन शक्तिग्रहः। किन्तु कार्यत्वविशिष्टे धर्मणि, क्रिया च तथा भवत्येव । न च कार्येण समं क्रियाया अन्वयानुपपत्त्या अपूर्वे पर्यवसानम् । अभेदस्याप्यन्वयादिति।

मैवम् । न हि लोके पचेतेत्यादौ कार्ये धर्मणि शक्तिः कल्पिता ।

किन्त्वनन्यलभ्ये कृतिरूपे कार्यत्वमात्रे धर्मिणः पाकादेर्धातोरेवोपस्थितिसम्भवात् क्रियाकार्यत्वस्यान्विताभिधानलभ्यत्वात् । तथा च धर्मिणि वेदे शक्तिः कल्पनीया । सा च क्रियानिरासेनैव । न हि क्रियायाः कार्यत्वान्वययोग्यत्वे धर्मणि शक्तिः कल्पयितुं शक्यते । तस्मादयोग्यतया क्रियानिरासानन्तरं तदतिरिक्त एव शक्तिः, कल्पनीया । न च क्रियातिरिक्तकार्यात् कार्यमात्रं लघु । ततः क्रियापि शक्यैवेति वाच्यम् । यतो न ब्रूमः क्रियातिरिक्तकार्यत्वेन शक्ति: किन्त्वयोग्यतया क्रियायां निरस्तायां धर्मणि शक्तिकल्पनसमये यत् क्रियातिरिक्तं तत्र शक्तिः न तु शक्तिग्रहे क्रियाप्रवेश: । न हि यत्प्रत्युक्तानुपपत्त्या यत्कल्पनं तदेव तस्य विषयः ।

एवञ्च कार्यत्वेनापि तदतिरिक्तकार्ये एव शक्तिकल्पनान्नित्यनिषेधयोरपि तदेवोपासनाद्यन्वययोग्यं लिङाभिधीयते । न तु कार्यत्वमात्रम्। धर्मणि बाधकाभावात् लक्षणाप्रसङ्गाच्च । घटादिस्तु लिङशक्तिग्रहे न तिरस्क्रियते न पुरस्क्रियते, उभयथापि गौरवात् । अन्विताभिधानदशायान्त्वयोग्यतया तस्याप्रवेशः। विधिप्रत्ययस्य च तत्राप्रयोगः केवलस्य तस्यासाधुत्वात् । धातुसमभिव्याहारस्थले च तदर्थेनान्वयबोधजनननियमेन घटाद्यप्रतिपादकत्वात् । अत एवाप्रयोगादेवाप्रयोगोऽपूर्वत्वं वा प्रयोगोपाधि**रिति वदन्ति ।**

अथाप्रतिपाद्यघटादिवृत्तितया न कार्यत्वं प्रवृत्तिनिमित्तं प्रतिपाद्यमात्रवृत्तेरेव तथात्वात् । अन्यथा प्रमेयत्वमेव तथास्त्विति चेत्, न । यत्प्रकारिका हि प्रतिपत्ति: पदजन्या तदेव तत्र प्रवृत्तिनिमित्तं फलकल्प्यत्वात् शक्ते: न तु प्रतिपाद्यमात्रवृत्ति सास्नादौ व्यभिचारात् । न च प्रमेयत्वं तथा । तद्बोधस्याप्रवर्तकत्वात् । अत एव लोके लिङ् लाक्षणिकी। क्रियाभिन्ने धर्मणि वेदे शक्तिकल्पनात् ।

न च लौकिकानामपूर्वे तात्पर्यं सम्भवति । पूर्वं प्रमाणान्तरेणाप्रतीतेः। क्रियासाधारणशक्तावपि लोके लक्षणैव। पचेतेत्यत्र हि पाककार्यतावगम्यते । तत्र कार्यत्वे लिङ्स्तात्पर्यं लाघवात् । न धर्मणि क्रियाया धातुलभ्यत्वात् । तदाहुः- **"तात्पर्यद्धि वृत्तिर्न तु वृत्तेस्तात्पर्यमि"ति** । तृतीयायाः करणत्वैकत्ववत् कार्यं कार्यत्वञ्च न स्वतन्त्रं शक्यम् । किन्तु विशिष्टं विशिष्टाच्च विशेषणमन्यदेवेति कार्यत्वे लक्षणा । न च कार्यत्वविशिष्टधर्म्युपस्थितावपि धर्म्यंशमपहाय क्रियायां कार्यत्वान्वयोऽस्तु। किं लक्षणयेति वाच्यम् । न हीतरधर्मगतत्वेनोपस्थितस्य धर्म्यन्तराकाङ्क्षास्ति । अतः स्वतन्त्रकार्यत्वोपस्थितये लक्षणा यथा पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशार्थितया तदन्वितत्वेनोपस्थितस्य कपालस्य नोपवापाकाङ्क्षेति स्वतन्त्रकपालोपस्थितयेऽधिष्ठानलक्षणा। न च व्युत्पत्तिविरोधः ।

न हि लोके क्रियाकार्यत्वे शक्तिरवधारिता, येन विरोधो भवेत् । किन्तु कार्यत्वमात्रे, क्रियाया धातुलभ्यत्वात् । न च धर्म्यन्तरे शक्तावपि तद्भङ्गः। तस्मात् प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानां गृहीतं प्रत्ययार्थश्चापूर्वमपीति न विरोधः। अस्तु वा लोके लिङः क्रियाकार्यत्वे शक्तिः तथापि तद्भङ्गं विनैव नानार्थन्यायेन वेदे धर्म्यन्तरे शक्तिस्तां विना स्वर्गकामान्वयासम्भवात् ।

**अन्ये तु** पचेतेत्यादौ धातुनैव पाक: कार्योऽभिधीयते। लिङ् तत्र तात्पर्यग्राहिका। न तु शक्ता। नियमतस्तादृश्येव तत्प्रयोगात् । सामान्यशब्दस्य विशेषपरत्वञ्च न वृत्यन्तरनिर्वाह्य, अत एव वर्तमानत्वादौ न लडादिशक्तिरिति लोके शक्त्यग्रहात् न व्युत्पत्तिविरोध **इति । तदसत् ।** लिङः कार्यत्वेऽशक्तौ पचिपदात् कार्यत्वज्ञानानुपपत्तेः युगपद्वृत्तिद्वयविरोधात् । न चाजहत्स्वार्थां, उभयसाधारणस्यानुपस्थितेरिति दिक् ।

यद्वा ज्ञाने पदानां शक्तिः शक्यत्वात् । एवञ्च लिङ्पदं एकत्रोच्चारणे स्थायित्व-स्वर्गजनकत्व- कार्यत्वानां ज्ञाने शक्तमिति व्युत्पत्तिः स्थायिज्ञानादिकञ्चोपस्थितमेव। ततो लिङ्पदेन एकत्रोच्चारणे योग्यतादिवशात् यागविषयकं स्थायिस्वर्गजनकं कार्यमित्येकं

ज्ञानमनुभवरूपं प्रचुरद्रव्यगुणकर्मविलक्षणविषयं क्रियते । न चैवं नानार्थवदेकैकज्ञाने शक्तिग्रहादेकैकविषयोऽनुभवो भवेत्, न समुदितविषय इति वाच्यम् ।

शक्तिग्रहकाले एकत्रोच्चारण इति विशेषणमहिम्ना तत्सम्भवात् । नानार्थे तु प्रमाणाभावेन गौरवेन च शक्तिग्रहे तस्याप्रवेशात् । तथाप्यमीषां समूहालम्बनं स्यान्न तु परस्परं वैशिशिष्ट्यज्ञानमिति चेत्, न। साकाङ्क्षधर्मधर्मिगोचरैकज्ञानस्यैव विशिशिष्टज्ञानत्वात् । न च समूहालम्बनसम्भेदः । तस्य निराकाङ्क्षविषयत्वात् । अस्तु वोपस्थितेष्वगृहीतासंसर्गेषु स्थायित्वस्वर्गजनकत्वकार्यत्वेषु शक्तिः। अगृहीतासंसर्गकस्यापि विशिशिष्टज्ञानसमानशीलत्वात्। अत उक्तन्यायेन तावद्विषयकमेकं ज्ञानं लिङ्पदेन जन्यते । एवमेवालौकिकार्थेषु स्वर्गादिपदेषु शक्तिग्रहः ।

ननु भवतूक्तप्रकारेण शक्तिग्रहस्तथापि लिङ्पदात् यागविषयककार्यानुभवे सत्यपूर्वलाभात् स्वर्गकामान्वयः सम्भवतीत्युपपादकप्रतिसन्धाने प्रसिद्धार्थस्वर्गकामपदसमभि-व्याहारान्यथानुपपत्त्या लिङः कार्ये शक्तिकल्पनम्। न हि प्रथममुपपादकप्रतिसन्धानं विनार्थापत्तिः सम्भवति । न च शक्तिकल्पनात् पूर्वमुपपादकशरीरनिविष्टमपूर्वं ज्ञातमिति चेत्, तत् किं य एव विशेष उपपादकः पक्षधर्मताबलात् सिध्यति। तत्प्रतिसन्धानमर्थापत्तौ कारणम्। तथात्वे पूर्वं गृहीतमात्रस्य कल्प्यत्वे क्लपनोच्छेदापत्तिः ।

तस्मात् यथा सामान्यतो भोजनस्य पीनत्वसम्बन्धावगमात् उपपादकतर्के सति कल्पनातो विशेषावगमः, यथा वा सामान्यशक्तव्यक्तिवाचकपदेन समभिव्यावहारवशाद्-विशेषाभिधानम् । एवमत्रापि कार्यमात्रवाचकत्वे कार्यविशेषलाभः सम्भवतीति तर्कितोपपादकप्रतिसन्धानाद्भवत्यर्थापत्त्या शक्तिकल्पनम्, यागविषयकञ्च कार्यं न घटादि, तस्य सविषयकत्वाभावात् । विषयत्वञ्च ज्ञानघटयोरिव स्वभावसम्बन्धो वा तन्निरूपणाधीननिरूपणत्वं वा तत्समानसंवित्संवेद्यत्वं वा व्यावृत्तसाधनत्वं वेति । अस्ति हि यागदानहोमजन्यापूर्वाणां तुल्यरूपसाधनान्तरव्यवच्छेदेन प्रत्येकमात्रजन्यत्वम् ।

तदुक्तम्-

**"विशब्दो हि विशेषार्थः सिनोतिर्बन्ध उच्यते ।**

**विशेषेण सिनोतीति विषयोऽतो नियामकः ' इति ।**

ननु येन रूपेण शक्तिग्रहः तेन रूपेण कार्यत्वशक्ताल्लिङ्पदाल्लक्षणया कार्योपस्थितौ योग्यतादिवशादपूर्वलाभोऽस्तु । कार्यस्मरणं हि अन्विताभिधानोपयोगि न त्वपूर्वस्मरणम् । तच्च पदेन पदार्थेन वेति न कश्चिद्विशेषः । कार्यञ्च शक्यकार्यत्वसम्बन्धितयावगतमेवेति चेत्, न। लिङो लाक्षणिकत्वेनापूर्वाननुभावकत्वात् । न चेतरान्वितस्वार्थशक्तस्य यज्यादिपदस्येतरदपूर्वमादायानुभावकत्वमिति वाच्यम्। इतरोपलक्षितस्वार्थान्वयमात्रे हि पदानां शक्तिर्न त्वितरत्र, गौरवात् पदान्तरलभ्यत्वाच्च । लक्षणायाञ्च तीरोपलक्षितान्वय-शालिस्वार्थानुभावकत्वमितरपदस्य । तीरस्य तु संस्कारादुपस्थितिरसन्निहितेनान्विता-भिधानाभावात् । न चापूर्वं संस्कारविषयः । किञ्च यजिपदेन स्वर्गकामकार्यविषयो याग इत्यनुभवो भवेत्। लक्षणायामितरपदस्य लक्षणीयविशेषणस्वार्थविशेष्यकानुभवजनकत्वात् । न चैतादृशो बोध आकाङ्क्षितः । न च यागाविशेषितकार्यमात्रेण स्वर्गकामान्वयः प्रतीयते । किन्तु यागविषयककार्यविशेषे, तथाच तथाविधबोधार्थं लिङः कार्ये शक्तिरेवेति ।

**इति अपूर्ववादपूर्वपक्ष:।**

**अथापूर्ववादसिद्धान्त:।**

अत्रोच्यते । अन्वयप्रयोजकरूपवत्त्वं न योग्यता। अनाप्तोक्ते पयसा सिञ्चतीत्यत्र सत्यप्यन्वयप्रयोजकद्रवद्रव्यत्वे बाधकप्रमायामन्वयाबोधात् । अथ योग्यत्वेऽपि स्वबाधकप्रमाविरहः कारणं तर्हि सोऽप्यवश्यापेक्षणीय इति लाघवात् सैव योग्यता । एवञ्च तदेव योग्यमयोग्यञ्च स्यादिति चेत्, सत्यम् । यथा दशाविशेषे तदेव साकाङ्क्षमनाकाङ्क्षमासन्नमनासन्नञ्च तथा स्वबाधकप्रमातद्विरहदशायां तदेवान्वयबोधे योग्यमयोग्यञ्चाभिधीयते । स्वबाधकप्रमायां तद्विरहे वा योग्यायोग्यताव्यवहारदर्शनात् स्वबाधकप्रमाविरहदशायां योग्यतादिसत्त्वेऽपि वह्निना सिञ्चतीत्यत्रान्वयबोधः अप्रमादोषवत्पुरुषप्रणीतत्वात् ।

सामान्यभानस्य किञ्चिद्विशेषभाननियतत्वात् । विशेषाभाने कथं तद्भासत इति चेत्, न । वस्तुगत्या परम्परासाधनं विशेषो भासत एव। परम्परासाधनत्वन्तु प्रकारो न भासते । तत्प्रकारभाने हि परम्पराघटकज्ञानस्य हेतुत्वात्। यथा घटेन जलमाहरेत्यत्र योग्यतया छिद्रेतरघटो घटत्वेन भासते न तु छिद्रेतरत्वेन। तथा सति लक्षणायां युगपद्वृत्तिद्वयविरोधेन घटानन्वयप्रसङ्गात् उभयसाधारणरूपेणानुपस्थितेश्च नाजर्हस्वार्था ।

अथ संस्कारात्तदुपस्थितिः । न च सुब्विविभक्तीनां प्रकत्यर्थगतस्वार्थान्वय-बोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थो नान्वीयेतेति वाच्यम् । प्रकृत्यर्थो हि प्रकृतिप्रतिपाद्यः लक्षणीयान्वयानुरोधात् । स च संस्कारसहकारात् प्रकृतेऽपि । न च तस्यानियतोद्बोधकान्न नियता तदुपस्थितिः । फलबलेन तथा कल्पनादिति चेत्, न । शब्दोपस्थापितेनैव शब्दस्यान्वयबोधकत्वात् । न चैवमाकाशपदाशक्यस्य संस्कारोपस्थितस्य शब्दाश्रयत्वस्य कथं शाब्दानुभवविषयत्वमिति वाच्यम्। नियमतो यद्धर्मवत्त्वेनोपस्थिते यत्र शक्तिग्रहः तत्स्मरणजनकसंस्कारस्य तद्धर्मविषयतानियमेन तदुद्बोधकादेव तदंशेऽपि उद्बोधनियमेनाकाशपदादशक्यस्यापि तस्य भानात् ।

अस्तु वा तदपि शक्यं यदि नियमत उपस्थितिः सहप्रयोगस्य वाच्यादिपरत्वेनाप्युपपत्तेः । वस्तुतस्तु नियतोपस्थितिरेव नास्ति । अस्तु वा पदादपि निर्विकल्पकम्। तर्ह्यरन्वयबोधदशायामितरान्वयानुपपत्त्यभावादग्रेऽपि कल्पना न स्यादिति चेत्, तर्हि तवापि कार्यताबोधानन्तरं औपादानिकसाधनताबोधो न स्यात् औपादानिकबोधेऽनुपपत्तिबोधस्य हेतुत्वात् । कल्पनामात्रोच्छेदश्चैवं स्यात्, प्रतीतानुपपत्ति-मूलकत्वात् कल्पनायाः ।

वस्तुतस्तु बाधकप्रमाविरहस्य योग्यतात्वे संशयसाधारणं ज्ञानमात्रमेव तस्याः प्रयोजकम्। तेन यत्र बाधकप्रमानिश्चयस्तत्रैवान्वयबोधाभाव: । अन्यत्र तु तद्धीमात्राच्छाब्दबोध इति यागेऽपि योग्यतासंशयेनान्वयबोध:प्रतिबन्धः । बाधसंशयस्याप्रतिबन्धकत्वात् । अन्यथा अनुमानाद्युच्छेदप्रसङ्गात् । अपूर्ववाच्यत्वेऽप्यपूर्व

स्वर्गसाधनतासंशयाद्योग्यतायाः संशय एव। अपूर्वस्य प्रथमं स्वर्गसाधनत्वानिश्चयादुपादानस्यान्विताभिधानोत्तरकालीनत्वात् । साधकबाधकप्रमाणाभावेन द्वारसम्भावनया साधनत्वसम्भावनातः स्वर्गकामान्वय इति तुल्यम्। अपि च यथा न क्रिया स्थिरेत्ययोग्या तथा कार्यमपूर्वमपि विशिशष्टं न स्थिरं कृतेर्विनष्टत्वात् । न चाधिष्ठाने अपूर्वमात्रे साधनत्वम् । तस्य पदार्थैकदेशत्वेनान्वया-प्रतियोगित्वात् ।

**अन्ये** त्वन्वयविरोधिरूपविरहो योग्यता । अत एव वह्निना सिञ्चतीत्यत्र तद्भ्रमे भवत्यन्वयभ्रमः । यागेचान्वयविरोधिरूपविरहो योग्यानुपलब्ध्या सुगम एव । न च यागे आशुविनाश्शित्वं कालान्तरभाविफलजनकत्वविरोधीति वाच्यम् । अनुभवे क्वाथपाने चाशुविनाशिनि कालान्तरभाविफलजनकत्वाद्यागेऽप्यन्ततस्तत्सत्त्वात् । अन्यथापूर्ववैफल्यात्। अस्मादन्वयप्रयोजकरूपवत्त्वं लघ्विति चेत्, न । तत्सत्त्वेऽप्यनाप्तोक्ते व्यभिचारात्। अन्वयविरोधित्वेन यत्किञ्चित्प्रतिसन्धानं तत्रास्त्येव। अन्ततो बाधकप्रमाविषयत्वस्यैव विरोधिनो ज्ञानादिति ।

काम्यसाधनत्वज्ञानमेव प्रवर्तकं लाघवात् । सिद्धौदनस्तृप्तिकामो लघूपाये भोजने प्रवर्तते न तु पाके गुरूपायत्वात् । जलाद्यर्थी च सन्निहिते । अत एव ज्योतिष्टोमादौ श्रुतस्वर्गफलकत्वेऽपि गुरूपायत्वेनाननुष्ठानलक्षणाप्रामाण्यापत्त्या फलभूमा कल्प्यते । इष्टोत्पत्त्यनान्तरीयकश्रमजनकत्वं वा प्रतिबन्धकम् । अपि च काम्याव्यवहितसाधनतया ज्ञातमेव यदि कामी कर्तव्यताऽवैतीति नियमः तदाऽपूर्वमपि कार्यतया नावगम्येत अन्विताभिधानात् पूर्वं काम्यसाधनताबोधकाभावादुपादानस्यान्विताभिधानोत्तरकालीत्वात् । अत एव काम्यादन्यदित्यादि प्रकारद्वयं निरस्तम्, कार्यताबुद्धौ प्रवृत्तौ वा काम्यसाधनत्वस्यैव हेतुत्वात् । न च कार्ये घटादौ लिङ्शक्तिग्रहः यथा लिङ्शक्तिग्रहकाले स्वर्गकामान्वयायोग्यत्वात् क्रियानिरासस्तथा यागान्वयानुपपत्त्या घटादिःनिरसोऽपि स्यात्। न हि यागविषयको घटादिः सम्भवति ।

अन्यथा अन्विताभिधानदशायामपि तन्निरासो न स्यात् । स्यादेतत् । स्वर्गकामान्वयानुपपत्त्या तदन्वययोग्ये लिङ्शक्तिग्रहः स्थायिकार्यञ्च तथा । अतः शक्तिग्रहकाले क्रियानिरासो युज्यते न घटादेः । यजिपदमन्तर्भाव्य स्वर्गकामपदलिङ्पदाभ्याम्। अन्विताभिधानदशायां घटादिनिरासो यागान्वयोग्यत्वादिति। तत् किं शक्तिग्रहकाले यागान्वयानुपपत्तिर्हस्तपिहिता येन घटादिनिरासिका सा न प्रतिसन्धीयेत । प्रत्युत प्रत्ययस्यान्तरङ्गप्रकृत्यर्थान्वयं बोधयत एवेतरान्वयबोधकत्वमिति तदन्वयानुपपत्तिप्रतिसन्धानमेव प्राथमिकम्, पुरुषदोषादप्रतिसन्धाने शक्तिग्रहो भ्रम एव घटादेरशक्यत्वात् पुरुषविशेषं प्रति अपूर्ववाच्यतापत्तेश्च । घटादीनामनन्तत्वेन यदि तन्निरासो न शक्यः तदा अन्विताभिधानदशायामपि न स्यात् ।

पाकादीनां क्रियात्वेनेव पृथिवीत्वादिना निरासासम्भवाच्च । एवं च प्रचुरद्रव्यगुणकर्मसु निरस्तेषु क्व कार्ये धर्मणि शक्तिग्रहः । न च विशेषे निरस्तेऽपि कार्यसामान्यं न निरस्तमिति वाच्यम् । न हि विशेषाविषयं सामान्यज्ञानं सम्भवति ।

एतेनापूर्वसाधारणकार्यत्वेन घटादौ शक्तिग्रह इति परास्तम् । अगृहीतासंसर्गेषु स्थायित्वकार्यत्वस्वर्गजनकत्वेषु तज्ज्ञानेषु वा शक्तिग्रह इत्यपि परास्तम् । अस्थायिनां घटादीनां निरासात् । धर्ममात्रे च शक्तिग्रहस्य प्रकृतेऽनुपयोगात् । किञ्च तेषु शक्तिग्रहः समुदितेषु प्रत्येकं वा । नाद्य:, प्रथमं समुदायस्यैकज्ञानाविषयत्वात् । विषयत्वे वा पूर्वमेव विशिष्टस्य सत्त्वेऽपूर्वत्वव्याघातः । एकज्ञानविषयसाकाङ्क्षधर्मधर्मिणोरेव विशिष्टत्वात् । न द्वितीयः। एवं हि लिङ् पदात् स्मरणत्रयं यजिपदाच्च यागस्मरणम्। न च चतुर्णां तेषां यौगपद्यमस्ति । न च प्रत्येकं शक्तिग्रहेऽपि समुदितविषयकमेकमेव स्मरणं । लिङ्पदादिति युक्तम् । समुदायस्य पूर्वमननुभवात् ।

स्मरणञ्च यदि साकाङ्क्षधर्म-धर्मिविषयकमेकं तदा अपूर्वत्वक्षतिः एकज्ञानारूढयो: साकाङ्क्षधर्मधर्मिणोरेव विशिष्टत्वात् तन्नियतत्वाद्वा। ।

एतेन स्वर्गादिपदेषु अगृहीतासंसर्गधर्मधर्मिषु शक्तिग्रह इति व्युदस्तम् । प्रत्येक-समुदायविषयकस्मरणविकल्पग्रासात् । अस्तु वा लिङः कार्ये लक्षणा । यथा हि मञ्चाः क्रोशन्तीत्यादौ पुरुषविशेषः प्रागननुभूतोऽप्यनुभूयते इतरपदाल्लाक्षणिकस्यानुभावकत्वात् तथाऽपूर्वमपि । अस्तु च स्वर्गकामकार्यविषयो याग इत्यनुभवे स्वर्गकामयागयोरन्वयप्रकारतया अपूर्वलाभः ।

यद्वा स्वर्गकामकार्यविषयो याग इति शाब्दानुभवानन्तरमर्थाद्यागविषयकं कार्यमिति ज्ञानं अनुपपत्तिप्रभवम् । अत एव शाब्दबोधानन्तरमौपादानिकबोधात्प्रवृत्तिः । किञ्चापूर्ववाच्यत्वेऽपि न कलञ्जं भक्षयेदित्यादितः कलञ्जभक्षणाभावविषयकमपूर्वमवगम्यापि न प्रवर्तेत तदभावे । तथाहि-भक्षणे रागादस्य कर्तव्यताबुद्धिर्जाता । शब्दाच्च भक्षणाभावे । निष्फलात् कार्यात् सफलं गरीय इति न्यायेन सुखहेतौ भक्षण एव प्रवर्तेत न तदभावे । निषेधापूर्वमेव फलमिति चेत्, न । तस्य सुखदुःखाभावान्यतया पण्डत्वेन तदजनकतया च गौणमुख्यप्रयोजनत्वाभावात् । सुखवदपूर्वमपि प्रयोजनमिति चेत्, न । लोके तथानवगमात् ।

अलौकिकयोः स्वर्गापवर्गयोः लोकावगतप्रयोजनसुखदुःखाभावजातीयतया प्रयोजनत्वम्, वेदेऽपि काम्यस्थले काम्यसाधनस्यैवापूर्वस्य गौणप्रयोजनस्य लिङाभिधानम् । काम्यसाधनताज्ञानं विना कामिकार्यत्वस्य बोधयितुमशक्यत्वात् । न तु स्वतः प्रयोजनत्वेन । तत्रासामर्थ्यादनुपयोगाच्च । प्रवृत्तेर्भोजनादाविव लोकक्लृप्तकाम्यसाधनताज्ञानात् कार्यताज्ञानाद्वा गौणप्रयोजनत्वेनैवोपपत्तेः । नापि नित्यनिषेधयोरपूर्वं स्वतः प्रयोजनं लिङाभिधीयते । काम्यस्थले हि धर्मिग्राहकलिङादिना प्रवर्तककार्यत्वेनापूर्वमभिहितम् । अतो नित्यादावपि कार्यत्वेनापूर्वबोधनं न तु स्वतः प्रयोजनत्वेन ।

ननु नित्ये लोकवेदावगतगौणमुख्यप्रयोजनाभावे सति लिङेवापूर्वस्य स्वतः प्रयोजनत्वं बोधयति तेन विना प्रवृत्तिपरत्वानिर्वाहादिति चेत्, न । निरूपाधीच्छाविषयत्वं हि स्वतः प्रयोजनत्वम् अपूर्वस्य सिद्धं लिङा बोधनीयम् । न च तादृशेच्छाविषयोऽपूर्वं क्वचिदपि सिद्धम्। न च लिङेवापूर्वेच्छां जनयित्वा तां बोधयति तस्यास्तत्रासामर्थ्र्यादिच्छायाः

सामग्र्यन्तरजन्यत्वाच्च । अतोऽपि काम्ये नित्ये चेच्छाविषयत्वं प्रयोजनत्वमपूर्वस्य लिङादिना न बोध्यते। अपूर्वेच्छायाः शाब्दज्ञानात् पूर्वं असत्त्वात् । किन्तु शाब्दकार्यताज्ञानात् सेति । अथ नित्ये कार्यत्वेनैवापूर्वस्याभिधानम् । न तु स्वतः प्रयोजनत्वेन। किन्तु लिङा अपूर्वे बोधिते तस्य स्वतः प्रयोजनत्वमिच्छाविषयत्वं सम्भवति सुखज्ञानवदपूर्वज्ञानस्यापि स्वत एवेच्छाजनकत्वात् । ततः काम्यापूर्वसाधनताज्ञानान्नित्ये कार्यताबोधात् प्रवृत्तिरिति चेत्, न। अपूर्वज्ञानस्येच्छाहेतुत्वेनाक्लृप्तत्वात्। काम्यापूर्वे हि लोकक्लृप्तेष्टसाधनताज्ञानादेवेच्छा न त्वपूर्वत्वज्ञानात् । शास्त्रस्थस्य शास्त्रजकर्तव्यताज्ञानं बलवदिति चेत्, सफलविषयं तथा । इदञ्च निष्फलविषयम्।

अथ प्रवृत्तिमतो निवृत्तिनियोगेऽधिकार इति यदा भक्षणप्रवृत्तस्तदा तन्निषेधे शाब्दकार्यताधीरिति तया विपरीतप्रयत्ने जनिते रागात् क्रियोत्पत्तिः। तेनैव प्रतिबन्धात् । रागकारितप्रवृत्तिमुपजीव्य हि निवृत्तिकार्यताशास्त्रेण बोधिता । अतस्तेन बोधने स्वफलं विपरीतकृतिरवश्यं उत्पाद्येति शास्त्रस्य बलवत्त्वमिति चेत्, न । निवृत्तिकार्यताबोधेऽपि निवृत्तौ प्रयत्न एव नोत्पद्यते यस्य प्रतिबन्धकता स्यात् । स्याच्च निवृत्तिकार्यताबोधकमप्रमाणं निष्फलत्वेन तत्र कृतेरभावात् । अथ कलञ्जर भक्षणस्य निन्दार्थवादेन बलवदनिष्टसाधनत्वावगमात् तद्भक्षणे न प्रवर्तते इति चेत्, एवमपि कलञ्जभक्षणे निवर्ततां, तदभावे निष्प्रयोजनतया प्रवृत्तौ किमायातमिति । एतेन नित्यापूर्वसाधने सन्ध्यावन्दनादावपि प्रवृत्तिरपास्ता । क्रियायाः कष्टत्वात् तदपूर्वस्य पण्डत्वात् स्वतोऽप्रयोजनत्वाच्च । तस्मात् लोके 'पचेतेत्यादौ कार्यत्वेष्टसाधनत्वरूपधर्मशक्तत्वेन ज्ञाता लिङ् स्वर्गकामो यजेतेत्यादौ तदन्वयं यागे योग्यतादिवशाद् बोधयतीति न वेदे धर्मिणि शक्तिकल्पना। प्रतीता च स्वर्गसाधनता साक्षादसाधनस्य यागस्य व्यापारमन्तरेणानुपपद्यमाना तन्निर्वाहकं व्यापारमपूर्वं कल्पयति ।

ननु निरुपाधिपूर्ववर्तिता कारणता। सा व्यापारेण निर्वाहयात इत्यत्र कोऽर्थः, किं क्रियते, उत ज्ञाप्यते । नाद्यः उत्तरवर्तित्वेन व्यापारस्य तत्रासामर्थ्यात् । नेतरः, लिङैव

तद्बोधनात् चिरध्वस्तं कारणं व्यापारेण व्याप्तमिति चेत्, न । विपक्षे बाधकाभावेनाप्रयोजकत्वात् । अन्यथा ऐन्द्रियकं कारणमतीन्द्रियव्यापारकमिति यागानुभव-योर्दर्शनात् तथा कल्प्येत ।

प्रायश्चित्तादीनाञ्च फलप्रतिबन्धकत्वमेव । प्रायश्चित्तस्य **"तस्मादेनसः पूतोः भवती'**ति यत् फलं श्रुतमस्ति तस्य निषिद्धक्रियातः फलभाक् न भवतीत्यर्थः। "धर्मः क्षरति कीर्तनादि'ति च कीर्तनाद्विहितक्रिया क्षरति फलं न जनयतीत्यर्थः । क्षरतीत्यत्र बाधकं विना न लक्षणेति चेत्, न । उपस्थितत्वेन विहितक्रियायामेव धर्मपदशक्तिग्रहस्य बाधकत्वात् । न चैतस्य मुख्यत्वार्थं पदार्थान्तरे शक्तिः, लक्षणोच्छेदापत्तेः विहितक्रियाकर्तृत्वज्ञानेन धार्मकपदप्रयोगाच्च । एतेन देवदत्ताद्यशरीरं देवदत्तविशेषगुणप्रेरितभूतपूर्वकं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निर्मितस्रग्वदित्यनुमानात् तत्सिद्धिरिति परास्तम् ।

जन्मान्तरीयज्ञानादिभिरेव तज्जनकत्वाभिमतैः सिद्धसाधनादिति मैवम्। चिरध्वस्तस्य व्यापारसत्वे कारणत्वमिति निरुपाध्यन्वयव्यतिरेकाभ्यां व्यावधारणात् यागस्यप्तय। चिरध्वस्तकारणत्वेन व्यापारकल्पनात् । कार्ये व्यापारस्य पृथगन्वयव्यतिरेक-ग्रहस्तद्व्यापारकत्वे उपाधिरिति चेत्, न । संस्कारे तदभावेऽप्यनुभवस्य तद्व्यापारकत्वात् । न चाप्रयोजकत्वम् । यागो यदि चिरध्वस्तत्वे सति सव्यापारो न स्यात् स्वर्गसाधनं न स्यात् घटवदिति विपक्षे बाधात् । न चात्र कारणताग्राहकाभाव उपाधिः । तेनापि समं व्याप्त्यवधारणे तस्याप्यापादनात् । न चैन्द्रियकस्यातीन्द्रियव्यापारवत्वनियमः। सव्यापारत्वे कार्याव्यवहित-पूर्वसमये असत्त्वस्योपाधित्वेनाप्रयोजकत्वात् ।

नन्वेवं सन्ध्यावन्दनाकरणस्य दुःखसाधनत्वश्रुतेः तत्करणप्रागभावो दुःखहेतुः । तथा च तस्य स्थिरत्वेन दुःखजननसम्भवात् न पापे प्रमाणम् । न च प्रायश्चित्तवैफल्यम्। प्रायश्चित्ताभावसहकृतस्यैव तस्य तज्जनकत्वात् । **यत्तु** प्रागभावनाश एव तेन क्रियत इति । **तन्न ।** ध्वंसप्रागभावानवच्छिन्नकालस्य प्रतियोगिकालत्वेन तदा करणापत्तेरिति चेत्, न। सन्ध्याकालीनाकरणस्य दुःखजनकत्वेन विशिष्टस्य सन्ध्याकालापगमेऽनुपगमात् । न च

सन्ध्याकालो नाकरणे विशेषणं । किन्तु प्रतियोगिनि करणे । तथा च विशिशष्टाभाव: स्थिर: एवेति वाच्यम्। सन्ध्याया ह्यकरणेऽन्वयस्तस्य पदार्थत्वात् न तु करणे तस्य पदार्थैकदेशत्वेनाप्रधानत्वात् ।

तथापि ध्वंस एव व्यापारोऽस्तु । तव सहभावानिरूपकस्यापि कारणत्वात् । तस्यानन्तत्वेऽपि स्वभावात् सावधिफलजनकत्वम् । यत्र यद्ध्वंसो हेतुस्तत्र तत्प्रागभावोऽपीति चेत्, न । दुग्धध्वंसजन्यदध्नि मिथ्याधीध्वंससाध्यमुक्तौ च व्यभिचारात् प्रतिबन्धकाभावत्वेन हेतुत्वे तथाभावाच्च । ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेत्, न । ध्वंसे सति तद्व्यापारत्वज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया शान्तेरिति ।

मैवम् । प्रतियोगि-ध्वंसयोरेकत्राजनकत्वात् । न हि नियमतो यद्ध्वंसे सति यद्भवति तत् तत्र कारणम्। न च संसर्गाभावत्वेन हेतुत्वे तथैति वाच्यम्। व्यभिचाराभावेन तस्यापि प्रयोजकत्वात् ।

अथ शब्दाद् यागकारणता व्यापारं विना तदनुपपत्तेः तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकम् । अन्यत्र तु मानाभावान्न तथैति चेत्, न, यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य प्रमाणान्तरविरोधेनार्थापत्त्याप्यकल्पनात् । अस्तु तर्हि देवताप्रीतिरेव व्यापार इति चेत्, न। यागस्य देवताप्रीतिहेतुत्वे मानाभावात्। गङ्गास्नानादौ देवताविरहेण तदसम्भवात् । न च तत्रापि तत्प्रीतिः, तस्य तत्प्रीतिहेतुत्वे मानाभावात् लाघवेन कर्तृगता-भोक्तृगतव्यापारकल्पनाच्च ।

ननु नायं नियमः पुत्रकृतगयाश्राद्धादिना पितरि पितकृतजातेष्ट्या पुत्रे चादृष्टोत्पत्तेः। अथ तत्रापि कर्तर्येवादृष्टं विहितक्रियायाः यागस्येव कर्तृगतादृष्टजनकत्वात्। न च मुक्ते पुत्रे तददृष्टनाशात् पितरि न स्वर्गः स्यादिति वाच्यम्। अदृष्टस्य फलनाश्यतया पितरि स्वर्गाभावेनादृष्टानाशात् स्ववृत्तिभोगजनकादृष्टस्य मुक्तिविरोधित्वात् । न तु पितृगतमदृष्टं जन्यते । मुक्ते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः पित्रदृष्टाजनकत्वात् । तथात्वे

च साङ्गमपि श्राद्धादिकं निष्फलं स्यादिति तद्विधेरप्रामाण्यापत्तिः पुत्रागतादृष्टेन च मुक्ते पितरि सुखोत्पत्तौ न विरोधः। योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात् ।

अथ पितृसुखं पितृपुण्यजन्यमिति पितरि पुण्यम्। तेन विना तदसम्भवात् । न पुत्रे तत्र फलप्रसङ्गादिति पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जनिकेति चेत्, एवं पितृक्रियापि पितृपुण्यजनिकेति न तां विना पितरि पुण्यं पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु । तत्पुण्यं पितृवृत्ति तत्सुखहेतुपुण्यत्वात् । न पुत्रवृत्ति तत्सुखाहेतुपुण्यत्वादिति चेत्, न । तत्पुण्यं न पितृवृत्ति तत्कृत्यजन्यपुण्यत्वात् । पुत्रवृत्ति वा तत्कृतपुण्यत्वात् । तस्मात् पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्रे एव तत्पुण्यमिति ।

मैवम् । स्वर्गोपपादकं ह्यपूर्वं स्वर्गाश्रये कल्प्यते प्रथमोपस्थितत्वात् लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च । न च स्वर्गहेतुकामनाश्रये स्वर्गकामनाजन्यक्रियाकर्तरि वा । विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपादकत्वाच्च । यदि च पुत्रकृतपुण्येन मुक्तस्य पितुः शरीराद्युत्पत्तिः सुखञ्च स्यात् तदा साक्षिविधया असत्याभिधानादिपुत्रक्रियाजन्यपापेन **"स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते"** इत्यादिबोधितनरकभागितापि मुक्तस्य पितुः स्यात् । तथा च पुत्रकृततथाविधशङ्कया न कश्चिन्मोक्षार्थं ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत् । **"दुःखेनात्यन्तं विमुक्तश्चरति" "न स पुनरावर्तते"** इति श्रुतिविरोधश्च । तथा च मुक्तस्य सुखदुःखे शरीरञ्च भवतीत्यपदर्शनम्। मुक्ते पितरि श्राद्धादिना दोषाभावादेव नादृष्टमुत्पद्यते । न चैवं साङ्गश्राद्धस्यापि निष्फलत्वम्। अदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैगुण्यात् । यथा विघ्नहेतुदुरितशून्येन कृतं मङ्गलं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावात्। एवञ्च यागस्यापि व्यधिकरणो व्यापारो भविष्यतीति ।

उच्यते । विहितक्रियया कर्तृगतव्यापारद्वारा कालान्तरभाविफलं जन्यत इत्युत्सर्गः । स च बलवता बाधकेनापोद्यते । प्रकृते च बाधकं नास्ति । यथा शास्त्रदेशितं

फलमनुष्ठातरीत्युत्सर्गः । पुत्रकृतगयाश्राद्धस्य पितृस्वर्गं प्रति पितृकृतजातेष्टेः पुत्रपूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेण बोधनात् ।

नन्वयं नियम एव पितृयज्ञजातेष्ट्यादौ परम्परासम्बन्धेन कर्तृगतमेव फलम्। न हि यस्य कस्यापि पितरि पुत्रे वा फलं, किन्तु स्वपितृपुत्रयोः । तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं वा परम्परासम्बन्धः फलेन पुत्रस्य । एवं पूतपुत्रकत्वादिकमपि पितृगतमेव। न च फलस्य कर्तृगतत्वं साक्षात्सम्बन्धेनैवेति वाच्यम्। ग्राम-पशु-पुत्र-हिरण्यादीनां परम्परया कर्तृगतत्वमिति व्यभिचारात्। न हि ग्रामादायः साक्षात् कर्तृ-सम्बद्धाः । एवं फलस्य साक्षात्कर्तृगामित्वबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्तृगामिताबोधने ।

**यत्तु** स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात्, पितृगतस्वर्गकाम इत्यादिश्रुतेः । स्वतश्च तथा कामनया प्रवृत्तौ श्रुतकामनाविरहेण प्रयोगेऽङ्गवैगुण्यात् फलाभावप्रसङ्गः । किञ्च स्वर्गभागिपितृकत्वं विशिष्टं तत्र विशेष्यं तत्पितृकत्वं न काम्यं न वा फलं सिद्धत्वात्तदसाध्यत्वाच्च । किन्तु विशेषणं पितृगतस्वर्ग इति स एव फल**मिति । तन्न ।** न हि स्वर्गभागिपितृकत्वं फलम्, अपि तु स्वर्गेण समं पुत्रस्य परम्परासम्बन्धरूपं तदुक्तमिति ।

उच्यते । यदि परम्परासम्बन्धेन पुत्रगतत्वं पितृस्वर्गस्य तदा संयुक्तसमवायादिना पुत्रेतरस्यापि फलं स्यात् । स सम्बन्धो न शास्त्रेण बोधित इति चेत्, तर्हि स्वर्गभागिपितृकत्वमपि न तथा, शास्त्रेणाबोधितत्वात् । ग्राम-पशु-हिरण्यादीनाञ्च सिद्धत्वेन न काम्यत्वम्, किन्तु तद्विषयकं स्वत्वम्, काम्यं फलमपि तदेव। तच्च साक्षादेव कर्तृगतमिति कर्तृगतत्वेन फलस्य साक्षात् सम्बन्धो नियत एव। तस्माद् यद्गतत्वेन फलकामना तद्गतमेव शास्त्रदेशितं फलम् । अत एव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः । स्वर्ग-पूतत्वादेश्च पितृ-पुत्रगतत्वेन काम्यत्वमिति श्राद्ध-जातेष्ट्यादेः पितृ-पुत्रगतमेव फलम् ।

एवञ्च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीमहादानादिकं मातापित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाधनत्वेन तेषां श्रुतत्वात् । न हि स्वगतस्वर्गकामस्य कर्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति तथाऽश्रुतेः। किन्तु स्वर्गकामस्य । स्वर्गश्च स्वगतः परगतो वेति स्वर्गकामत्वमविस्शिष्टम् । यजेतेत्यात्मनेपदमपि कत्रभिप्रेतक्रियाफलमात्रजनकत्वे । न च स्वर्गकामो दद्यादित्यादौ । स्वगतस्वर्गकामनायाः यान्तरङ्गत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते। सामान्ये बाधकं विना विशेषपरत्वे मानाभावात् ।

**केचित्तु** सम्यग्गृहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयत इति जातेष्टिपितृयज्ञयोरपि गृहस्थकर्मत्वेन तदेव फलमिति फलस्य कर्तृगामित्वे नियम एव। प्रातिस्विकफलाभिप्रायेणोत्सर्ग **इत्याहुः** ।

ननु यावन्नित्यपरिपालनस्य तत् फलं न तु काम्यश्राद्धादेः । काम्यान्तर्भावे मानाभावात् यावत्काम्यानुष्टठानाशक्तेश्च । यावच्छक्यानुष्ठानस्यापि नात्रान्तर्भावः, कामनाविरहादिनाप्यकरणात् । यावन्नित्यानुष्ठाने तत्फलाभावप्रसङ्गात् नित्यस्यैवावश्य-कत्वेनोपस्थित्यान्वयाच्च । अपि च तैः कर्मभिः प्रत्येकमुत्पत्त्यपूर्वं तैश्च परमापूर्वं जन्यते इति न । गौरवात् मानाभावाच्च । किन्त्वन्तिमक्रियया परिपालनरूपक्रियान्तरेण वेति, न सर्वं कर्म ब्रह्मलोकावाप्तिफलकमिति ।

मैवम्। भगवदुद्देशेन कृतस्य काम्यस्य नित्यस्य वा यस्य कस्यापि कर्मणः परिपालनाद्ब्रह्मलोकावाप्तिः फलं श्रूयत इति जातेष्टि-पितृयज्ञयोरपि तथा कृतयोस्तदेव फलम् ।

**तथा च भगवद्गीता**

**“यज्ञायाचरतः कर्म कर्मग्रन्थिर्विलीयते ।**

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः”** ।।

इति, तच्च कर्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थम् । सम्बलनन्तु मङ्गलवदुपयुज्यते, अन्यथा एकप्रयोगस्य व्यवधानादसम्भवः । परिपालनन्तु कर्तव्यमित्येव करणम्। तदुक्तम्- **"ददामि देयमित्येव यज्ञे यष्टव्यमित्यहमि'**ति ।

**यत्तु** निषिद्धासम्बन्ध एव सम्यक्त्वं न तु विहितमात्रानुष्ठान**मिति । तन्न ।** यत्किञ्चिन्निषिद्धासम्बन्धस्याभावात् सर्वनिषिद्धासम्बन्धस्य सर्वत्र सुलभत्वादिति **सम्प्रदायः** ।

अत्र ब्रूमः । भगवदुद्देशेन कृतं किञ्चिदेव कर्म, सर्वं काम्यं वा, सर्वं नित्यं वा, सर्वमिति वा । नाद्यः, एकेनैव काम्येन नित्येन वा स्नानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये श्राद्धादावप्रवृत्त्यापत्तेः । नापरौ, अशक्यत्वात् । न तुर्यः, जातेष्ट्यादेर्नित्यत्वाभावात् । तस्मात् सम्यग्गृहस्थाश्रमपालनस्य तत्फलम्, सम्यक्त्वन्तु सामस्त्यमेव। अतो गयाश्राद्धादेर्न ब्रह्मलोकावाप्तिः फलमिति साधूक्तं **"शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्ग"** इति । तच्च फलं क्वचिद्विधिवाक्यश्रुतं क्वचिच्चार्थवादिकमिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे अपूर्ववादः।।**

## अथ कार्यान्वितशक्तिवादः ।

नन्वर्थवादादीनां सिद्धार्थतया न प्रामाण्यम् । कार्यान्वित एव पदानां शक्त्यवधारणात्। वृद्धव्यवहारादेव सर्वेषामाद्या व्युत्पत्तिः। उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात् । तथाहि प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वा-दुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिमेव प्रयोजनमवधारयति । न चाकिञ्चित्कुर्वतस्तादर्थ्यं सम्भवतीति तज्जन्यं प्रवृत्त्यनुकूलं कार्यताज्ञानमेव कल्पयति । स्वप्रवृत्तौ च तेन कार्यताज्ञानस्य हेतुत्वावधारणत् । नान्यत् प्रवृत्तेः कार्यताज्ञानावरुद्धत्वात् ।

न चैवं शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वम् । स्वप्रवृत्तौ बालेन शब्दाहितविशेषस्य कार्यताज्ञानस्य हेतुत्वेनानवधारणात् । ज्ञाने च प्रत्यक्षादिनानोपायकत्वदर्शनात् शब्दोऽपि

कार्यताज्ञानहेतुरित्यवधार्य तत्रैव शक्तिं कल्पयति उपस्थितत्वात् । पश्चादावापोद्धारेण क्रियाकारकपदानां कार्यान्विततत्तदर्थेषु शक्तिं गृह्णाति। प्रथमगृहीतसामान्यशक्त्यनुरोधात् ।

स्यादेतत्, यद्यपि वृद्धव्यवहारादौ कार्यान्वितधीरनुमिता तथाप्यन्वितमात्रशक्त्यैव कार्यतावाचकपदसमभिव्याहारादाकाङ्क्षादिमहिम्ना कार्यान्वितधीसम्भवात् न कार्यांशेऽपि शक्तिः परम्परयापि शब्दस्य कार्यान्वितज्ञानानुकूलत्वादर्थापत्तौ अन्यथोपपत्तिरपि । अवश्यञ्चाकाङ्क्षादेः कारणत्वम् । कार्यांशे शक्तावपि तद्व्यतिरेकादन्विताभिधानव्यतिरेक-नियमात् । सति चाकाङ्क्षादौ कार्यव्यतिरेकदर्शनादन्विताभिधानव्यतिरेको न क्वाप्यस्ति । अन्यथा गवादिपदानां व्यक्तावेव शक्तिः स्यात्। संस्कारादेव व्यक्तिलाभदर्शनान्न तथेति यदि, तदा कार्यवाचकपदादेव कार्यान्वितलाभ इति किं शक्त्या ।

वृद्धव्यवहारे नियमतः कार्यान्वितज्ञानं तत्र दृष्टमिति तथा शक्तिकल्पने वृद्धव्यवहारे शब्दोपस्थापितेनैवान्वयबोधदर्शनाच्छब्दसन्निधेरेवान्वयबोधहेतुत्वकल्पने द्वारमित्यादौ शब्द एवाध्याह्रियेत । क्वचिदसम्पूर्णवाक्ये वृद्धव्यवहारादाद्यव्युत्पत्तेः शब्दसन्निधिर्व्यभिचरतीति चेत्, तर्हि, सिद्धार्थेऽप्यन्वयप्रतीतिदर्शनात् कार्यत्वमपि व्यभिचारि । न च तत्र लक्षणा । बाधकाभावात् । शक्तिकल्पनाभिया ह्यन्यत्र लक्षणानुमता। इह तु लघीयस्या उभयसाधारणपदार्थमात्रशक्त्या मुख्यस्यैवोचितत्वात् । किञ्च कार्यवाचिलिङादीनां आकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थबोधकत्वमवश्यं वाच्यम् । अतो विशेषात् पदान्तराणामपि तथात्वमस्तु लाघवादिति ।

मैवम् । व्यवहारहेतुतयानुमिते हि कार्यान्वितज्ञानेऽन्वयव्यतिरेकाभ्यां शब्दस्य साक्षात्कारणत्वमवधारयति न परम्परया । साक्षात्त्वस्यौत्सर्गिकत्वेन तत्सम्भवे परम्पराया अन्याय्यत्वादिति तत्रैव शक्तिं कल्पयति । नान्वितज्ञाने पदार्थज्ञाने वा । अप्रवर्तकतया प्रवृत्त्या स्वकारणत्वेन तयोरनुपस्थापनात् । न चान्वितज्ञानशक्तावपि परम्परया कार्यत्वधीः सम्भवतीत्यर्थापत्त्या सैव कल्प्यतां लाघवात्, न तु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वात् इति वाच्यम् । अर्थापत्तेः साक्षादुपपादकमात्रविषयत्वेन न्यूनाधिकाग्राहकत्वात् । साक्षादुपपादक-

कार्यान्वितज्ञाने शक्तिः कल्प्यते। लिङादीनां शक्तेरकल्पनात् अन्यलभ्यत्वतर्कस्याप्यभावात् वा आद्यव्युत्पत्तेर्विचार्यत्वात् ।

किञ्च प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायानुपस्थितान्वितज्ञानमात्रे शक्तिकल्पनमयुक्तं हेत्वभावादुपस्थित्यन्तरे च गौरवात् ।

अथ कार्यान्वितज्ञानोपस्थितावप्यन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्यांशमपहायान्विते शक्तिर्गृह्यतामिति चेत्, न । ज्ञाने हि पदानां शक्तिः शक्यत्वान्नार्थेषु । अन्यच्च कार्यान्वितज्ञानं अन्यदेवान्वितज्ञानं विषयभेदेन ज्ञानभेदात् । **तदुक्तमभाववादे "अन्यद्भूतलज्ञानमन्यच्च घटवद्भूतलज्ञानमि"**ति । अन्वितज्ञानमुपस्थाप्य तत्र शक्तिग्रह इति गौरवमेव । लघुनि शक्ये सम्भवत्यन्यलभ्यं गुरु न तथेति चेत्, न । युगपदुपस्थितौ तथात्वात् । न च तस्याप्यनुपस्थितिः । पुरुषविशेषदोषात् । सर्वैरेवाद्यव्युत्पत्तौ तथानवगमात् ।

तथापि न कार्यान्विते शक्तिः कार्यवाचिलिङादीनां व्यभिचारादिति चेत्, न । सर्वपदानां कार्यत्वविशिश्टधीजनकत्वात् । तच्च कार्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थ-कार्यप्रतिपादकतया वेति । एवञ्च कार्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारा-दाकाङ्क्षादेरुपाधित्वम् । तथा चोपजीव्यप्रथमभाविकार्यान्वितव्युत्पत्त्यनुरोधेन विध्यश्रुतावपि कार्याध्याहारः ।

क्वचिल्लक्षणा क्वचिदसंसर्गाग्रह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तर-कालमन्वितमात्रे शक्तिरेव कल्प्यताम् । प्राचीनकार्यान्वितज्ञानं बाध्यतामित्यप्यत एव निरस्तम् । पूर्वकल्पनातः कल्पनान्तरप्रसङ्गात्, उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेः अनन्यथासिद्धत्वाभावेन प्राचीनज्ञानबाधकत्वात् उपजीव्यव्यघाताच्च ।

अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति। तथाहि-उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव वार्ताहारेण समं चैत्र समीपं गतश्चैत्र । **पुत्रस्ते जात** इति वार्ताहारवाक्यं श्रृण्वन् चैत्रस्य मुखप्रसादं **गृह्णन्** श्रोतुर्हर्षमनुमिनोति, हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति ।

उपस्थितत्वादुपपादकत्वादन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्प्यति लाघवादिति चेत्, न । हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात्। प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वाच्च ।

अथ पुत्रजन्मज्ञानाव्यभिचारिवृद्धिश्राद्धादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत्, तर्हि **"पुत्रस्ते जात"** इति वाक्यं तत्क्रियाकर्तव्यपरमेवेति कार्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो गृह्यते। उत्तरकालं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिः कार्यं जहाति। "**यत्रापीह सहकारतरौ मधुरं पिको रौतीति**" प्रसिद्धार्थपदसामानाधिकरण्यादिभिर्व्युत्पत्तिस्तत्रापि व्यवहाराधीनव्युत्पत्तिपूर्विका कार्यान्वित एव युक्ता पिकपदशक्तिः । पूर्वं नावधृतेति चेत्, न। तत्र पिकमानयेत्यादौ कस्यचित् कार्यान्वित एव व्युत्पत्तेः। उपजीव्यजातीयतया च तस्या बलवत्त्वम् ।

किञ्चेदमपि कार्यान्वितज्ञानशक्तम् पदत्वादिति सामान्यतोऽवगतम्। स्वार्थविशेषः परं नाधिगतः। स इदानीं सुहृदुपदेशादिभिरवगम्यते। अतः सिद्धं प्रवृत्तिपराणां शब्दानां प्रवर्तकज्ञानजनकत्वम् । तच्च क्वचित् साक्षात् कार्यान्वयात् क्वचित् परम्परया कार्यान्वयात्। अत एव विधिशेषभूतार्थवादानां स्वर्गादिपदशक्तिग्राहकाणाञ्च प्रवृत्तिपरत्वेन परम्परया कार्यान्वयात् कार्यान्वितस्वार्थबोधकत्वमिति । यत्र पुराणभारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वमेव तेषामतिपरम्परया कार्यान्वयात् कार्यान्वितस्वार्थवोधकत्वम्, स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थासंसर्गाग्रहेण संसर्गव्यवहारो न संसर्गग्रहः इति ।

**। इति कार्यान्वितशक्तिवादपूर्वपक्षः ।**

**अथ कार्यान्वितशक्तिवादसिद्धान्तः**

**अत्रोच्यते।** घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्यताज्ञानमनुमितं बालेन न तु कार्यान्वितज्ञानम् । प्रवृत्तिविशेषे तस्याहेतुत्वाद् घटादिपदशक्तिग्रहे तस्यानुपयोगाच्च । तत्र तज्ज्ञानविशेषे घटामानयेतिवाक्यविशेष-

स्यानाकलितपदविभागस्य हेतुत्वमवधार्य घटपदद्वितीयाधातुविधिप्रत्ययानां प्रत्येकमावापोद्वाद्वारेण घटकर्मत्वानयनकार्यत्वज्ञानेषु प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति । पश्चात् प्रवृत्तिसामान्येनानुमितकार्यान्वितज्ञाने वाक्यमात्रस्यान्यलभ्यत्वेन कार्यांशमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति । न तु प्रथमं वाक्यमात्रस्य कार्यान्वितज्ञानमात्रहेतुत्वकल्पनम्।

अथ घटानयनक्रियाया: प्रथमं क्रियात्वज्ञानात् प्रवृत्तिमात्रानुमानम् । तेन च कार्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति । तदुत्तरं विशेषयो: कार्यकारणभावधीरिति चेत्, न । प्रथमं प्रवृत्तिमात्रकार्यान्वितज्ञानमात्रयोरनुमानम् बालस्य क्रमशो भवतीत्यत्र मानाभावात् । घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात् । न च तदनुमानसामग्री तदावृत्तेति वाच्यम् । तदा व्याप्त्यादिस्मृतौ मानाभावात् । सामान्ययो: कार्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत्, न। विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् । यथा धूमवह्निविशेषयो: कार्यकारणभावग्रहे तत्सामान्ययोरपि हेतु:हेतुमद्भावो भासते। अन्यथा न सकृद्दर्शनगम्या व्याप्ति: स्यात् तथात्रापि विशेषयो: कार्यकारणभाववित्तिवेद्य एव सामान्ययोस्तथाभाव इति चेत्, न ।

प्रत्यक्षेण विशेषग्रहे योग्यत्वात् सामान्यमपि भासते । प्रकृते च कार्यविशेषेण कारणविशेषानुमितौ न सामान्यमिति न युगपदुपस्थिति: ।

अथ विशेषयो: कार्यकारणभावात् सामान्ययोरपि तथात्वमनुमापयतीति चेत्, तर्हि विशेषयोः कार्यकारणभावावगम: प्राथमिक इति तन्मूलक: प्रथमं पदविशेषे शक्तिग्रह एव स्यात् । निष्प्रयोजन**कत्वेनान्तरानु**मितौ मानाभावात् । यच्चोक्तम् प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायान्वितज्ञानं कल्पयित्वा तत्र शक्तिकल्पनमयुक्तम्। उभयथा **गौरवादिति। तन्न ।** कार्यान्वितज्ञानेऽन्वितज्ञानेऽन्वितज्ञानत्वस्य सत्त्वात् तद्विशेषत्वात् तस्य। अतस्तत्रैव शक्तिग्रहो न कार्यत्वांशेऽपि ।

अत एव घटवद्भूतलज्ञाने भूतलज्ञानत्वमपीति तद्भिन्नं तज्ज्ञानमभावव्यवहारे कारणं त्वयापि स्वीकृतम् । अस्त्वेवं । किन्तु तदुपस्थितावप्यन्वितज्ञानत्वं न विषय इति तस्यैवोपस्थित्यन्तरं कल्प्यमिति चेत्, न । कार्यान्वितज्ञाने अन्वितज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् । विशिशष्टज्ञानसामग्रीतो विशेष्यभानावश्यम्भावात् । अन्यथा अन्यज्जातिज्ञानं अन्यच्च जातिविशिशष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं क्वापि नोपस्थितमिति न तव जातिरेव पदार्थ: स्यात् । जाते: केवलोपस्थितौ च व्यक्तिसमानसंवित्संवेद्यत्वं न स्यात् ।

अथ जातिविशिशष्टज्ञानोपस्थितेर्यक्तिज्ञानविषयत्वेऽपि गौरवाद्व्यक्तेरन्यलभ्यत्वाच्च जातिविश्चिष्टज्ञानत्वं न शक्यतावच्छेदकम् । किन्तु जातिज्ञानत्वं लाघवादिति मतम्, तर्हि तुल्यम् । न च युगपदुपस्थितौ लाघवावतार: । न चात्र युगपदुपस्थितिरिति वाच्यम्। विशिशष्टज्ञानस्य विशेष्यविषयत्वनियमात् । किञ्च ममेदं कार्यमिति ज्ञानं साक्षादुपपादकम् । प्रवृत्त्या स्वकारणत्वेनानुमितमतम् । अतस्तत्र शक्तिं गृह्णीयात्, साक्षादुपपादकविषयत्वात् कल्पनाया: । न त्विदं कार्यमिति ज्ञाने । तस्य साक्षादुपपादकोपपादकत्वात् ।

अथेदं कार्यमितिज्ञाने शक्त्यैव परम्परयानुमानद्वारा ममेदं कार्यमिति ज्ञानसम्भवात् अन्यलभ्यत्वेन न शक्तिकल्पना, तर्हि इतरान्वितज्ञानशक्त्यैव कार्यवाचकपदसमभिव्याहारेणैव कार्यान्वितज्ञानसम्भवात् अन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति तुल्यम् ।

नन्विदं कार्यमिति ज्ञानं साक्षादेव प्रवर्तकम् । कर्तव्यताप्रयोजकयावदेकविशेषणस्य स्वगतत्वप्रतिसन्धानं सहकारि । तेन नातिप्रसङ्ग: । न च सहकारिविलम्बेन कार्यानुत्पादे साक्षात् साधनत्वं निवर्तत इति चेत्, न। लाघवेन ममेदं कार्यामिति ज्ञानादेव प्रवृत्ते: । यथा च भविष्यद्विषया कार्यतानुमितिस्तथोक्तमधस्तात् । अपि च यादृशस्य पुरुषस्याविगीतकृतिसाध्यमिदं तादृशोऽहमिति धीर्न प्रवृत्तिहेतु: कृतक्रियमाणविषयक-कृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानुत्पादकत्वात् । इच्छायाः स्वप्रकारकधी-साध्यत्वेन कृत्या साध्यामीतीच्छाया: स्वकृत्यनन्तरभविष्यत्तारूपकृतिसाध्यताधीजन्यत्वाच्च ।

अपि चास्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्कारणताबोधात्तत्र शक्तिग्रहः। तथापि पश्चादावापोद्धारेण पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति लाघवात् । न तु कार्यत्वांशे ऽपि गौरवात् अन्यलभ्यत्वाच्च । न चैवं प्रथमप्रवृत्तस्य साक्षात्कारणताबोधस्य तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधः स्यादिति वाच्यम् । इष्टत्वात् । अन्यथासिद्धिमपश्यतो हि बालस्य स भूत इति तस्या बलवत्त्वात्, गौरवान्यलभ्यत्वतर्क-सहकृतप्रमाणजन्यत्वेनोत्तरस्य बलवत्त्वात् । न चोपजीव्यबाधान्न तथा प्रत्येतीति वाच्यम् । उपजीव्यत्वे मानाभवात् । दैवाद्धि प्रथमं तद्वृत्तं न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वम् । तेन विनापि तत्सम्भवात् । न च प्राथमिकत्वेन बलवत्त्वं, व्यभिचारात् । नापि सर्वैः प्रथमं प्रतीयमानत्वेन बलवत्त्वम् । सर्वेषां शरीराहम्प्रत्यये चन्द्रतारकादिपरिमाणस्य सर्वैरल्पत्वग्रहे च व्यभिचारात् ।

अत एव पूर्वकल्पनातः कल्पनान्तरप्रसङ्गः स्यादिति निरस्तम् । यत्रानन्यथासिद्धतयोपजीव्यतया वा बलवत्त्वं पूर्वकल्पनायास्तत्र तथात्वात् । किञ्च प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्परम्परोदासीनं कारणत्वमात्रं गृह्यते, न तु विशेषोऽपि। उपायस्यान्वयव्यतिरेकादेरुभयविशेषसाधारणत्वेन तत्संशायकत्वात् । उत्सर्गोऽपि बाधकाभावनिश्चयसहकृतो निश्चायकः। न चान्यलभ्यत्वस्य बाधकस्याभावमापाततः स्वतो दर्शनमात्रेण बालो निश्चेतुमर्हति । अत एव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बाधकाभावसहकृतनिश्चयादेव निश्चयः। अन्यथा प्रमाऽप्रमा वा साक्षात्परम्परासाधनं वेति संशयः क्वापि न स्यात् ।

यच्च हर्षहेतूनां बहूनां सम्भवादित्यादि । तन्न । स्वतोगृहीतहर्षहेतुस्तनपानादेर्बाधावतारादन्यस्य हर्षहेतोरग्रहादुपस्थितत्वादुपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव हर्षहेतुत्वेन कल्पनात् । अन्यप्रियज्ञानं हर्षकारणं भविष्यतीति शङ्कायां कथमेवमिति चेत्, न । एवं हि कार्यान्वितज्ञानेऽपि शक्तिर्न गृह्येत । प्रयोज्यज्ञानहेतूनां

बहुत्वादनन्यथासिद्धशब्दानुविधानस्य च तुल्यत्वात् । अन्यप्रियस्याज्ञानाच्च । ज्ञानेऽपि वा तदा तदुपस्थितिनियमे मानाभावात् सन्देहाभावोपपत्तेः।

लिङ्गाभासजन्यकाकतालीयसम्पन्नसंवादानुमितिवद्धर्षेण लिङ्गेन पुत्रजन्मज्ञानानुमानसम्भवाच्च । न चाभासजत्वेनानुमितेर्भ्रमत्वे तद्धेतुकशक्तिग्रहो भ्रमः, विषयस्य तथाभावेन तयोर्यथार्थत्वात् । यथा कश्चित् सूत्रसञ्चाराधिष्ठितं दारुपुत्रकं घटमानयेति नियुङ्क्ते, स च तमानयति तदा चेतनव्यवहारादिव तद्दर्शी बालो व्युत्पद्यते । इयं क्रिया कृतिजन्या । सा ज्ञानजन्या । तत् वाक्यजन्यमित्यनुमितिपरम्पराया भ्रमत्वेऽपि तद्धेतुशक्तिग्रहः तज्जन्यशाब्दबोधश्च यथार्थ एव । विषयस्य तथाभावादिति सिद्धं सिद्धार्थेऽपि शक्तिग्रह इति ।

अत एव

**"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।**

**अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम्"** ।।

इत्यर्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रहः । न तु चन्दनादौ । सुखोपरागेण स्वर्गपदप्रयोगाद्धेयतादशायाञ्च प्रयोगात् सुखमेव शक्यम् । बहुवित्तव्ययायाससाध्ये तत्तत्कर्मणि सुखमात्रार्थी न प्रवर्तत इत्यर्थवादोपस्थिते स्वर्गपदतात्पर्यम् । न चार्थवादस्योपजीव्यत्वात् तदुपनीते तत एव शक्तिग्रहः, तस्य स्वर्गपदतात्पर्यविषयत्वेनास्पदत्वोपपत्तेर्न वाच्यत्वाभिधायकत्वं गौरवात् । सुखमात्रे चाप्रयोगात् अतिशयितसुखत्वं वाच्यम् । प्रयोगोपाधिर्वातिशयः । न चातिशयस्य सावधित्वेन चन्दनसुखेऽस्मादयं स्वर्ग इति धीः स्यात् । रसादाविवातिशयस्य जातित्वेनावध्यनिरूप्यत्वात्। अतिशयपदप्रयोगस्तु इतरज्ञानापेक्ष इति चेत्, न । विचित्रहेतुसाध्यतया विलक्षणातिशयस्यानेकत्वेनाननुगमात् । सुखत्वावान्तरातिशयत्वेनास्यानुगमेऽप्यनध्यवसायेन शक्त्यग्रहादप्रवृत्त्यापत्तेः । सुखत्वावान्तरजातेश्च सुखमात्रसाधारणत्वात् प्रयोगोपाधेर्निरा-कर्तव्यत्वात् । लोके च लक्षणा ।

ननु दुःखासम्भिन्नसुखस्य शक्यत्वे चन्दनादौ स्वर्गपदप्रयोगो लक्षणयापि न स्यात् । सातिशयसुखस्य शक्यत्वे तत्सम्बन्धितया चन्दनादौ लक्षणा भवति । तस्मात् दुःखसम्भिन्नत्वादिनोपलक्षिता सुखत्वावान्तरजातिरेव वाच्या, लाघवादिति चेत् , न। एकजातीयहेतुसाध्ये एकजातिसत्त्वेऽपि विलक्षणहेतुसाध्यस्वर्गेष्वेकजातौ मानाभावात्। विहितकर्मजन्यता च तत्तद्विशेषत्वेनैव । अननुगतस्यापि जन्यतावच्छेदकत्वात् । सम्बन्धमात्रञ्च लक्षणाबीजमिति वक्ष्यते ।

एवं देवतायामपि **"इन्द्रमुपासीतेत्यादौ"** लोके प्रयोगस्यानियमात् गौणतयैव व्यवहाराच्चार्थानध्यवसायेऽलौकिकसहस्राक्षादाविन्द्रादिपदशक्तिग्रहः । प्रमाणञ्च **"इन्द्रःसहस्राक्षा"** इत्यादिविधिसमभिव्याहृतोऽर्थवाद एव, स्वर्गपदवत् ।

अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या तत्सुखं स्वःपदास्पदमितिश्रुतेश्चार्थवादादेव शक्तिग्रहः । न चेह तथार्थवादः। किन्तु **"इन्द्रः सहस्राक्ष"** इत्यादिस्तावकत्वेन प्रवृत्तिपरमिति चेत्, न । **इन्द्रःसहस्राक्ष** इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतौ बाधकं विना सहस्राक्षस्यैवेन्द्रादिपदवाच्यत्वावधारणात् । प्रसिद्धपदसमन्वयबलेन प्रतीयमानमर्थमबाधितमादायैव तेषां प्रवर्तकत्वात् । मन्त्रप्रकाशितशश्चिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां देवताव्यवहारात् । अपि च **"शिवाय गां दद्यादित्यादि"**ना देवतासम्प्रदानत्वश्रुतेः शिवादिसहस्रानाम्नां पर्यायत्वेन श्रुतेर्महाजनपरिग्रहेण प्रमाणत्वादाराधितदेवतायां वरदातृत्वश्रुतेश्च बाधकं विना चेतनैव देवता ।

अत्र देवताचैतन्यपक्षे तत्प्रीतिरेव यागव्यापार इति नापूर्वसिद्धिरिति चेत्, न । प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाश्चित्वात् तज्जन्यसंस्कारस्य स्वविषये फलाहेतुत्वात् फलहेतुस्थायिकृतिव्यापारापेक्षायां लाघवेन कृतिसमानाश्रयस्यैव व्यापारत्वकल्पनात् । नानायागेष्वेकदाह्वाने चैकदा सन्निधानं तद्बुद्धिविशेष एव, प्रतिष्ठाविधिना प्रतिमादावहङ्कारवत् ।

अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिश्चेतन एव। देवतात्वन्तु तस्य नास्ति मानाभावात् । किन्तु देशनादेश्शितचतुर्थ्यन्तपदनिर्देश्यत्वं देवतात्वमितीन्द्रायेत्यादिपदमेव देवता । अत एवाग्निप्रकाशकमन्त्रेणाग्निप्रकाशनानन्तरं अग्नय इति नियमतो हविस्त्यागो न पर्यायान्तरेण । न चेन्द्रोद्देशेन हविस्त्याग इन्द्रनिष्ठकिञ्चिज्जनकः। तत्स्वरूपाजनकत्वे सति तदुद्देशेन क्रियमाणत्वात्, ब्राह्मणाय दानवदिति वाच्यम् । अप्रयोजकत्वात् । तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च । **"इन्द्राय स्वाहेत्य"**त्र न तादर्थ्ये चतुर्थी, किन्तु स्वाहादिपदयोगे उपपदविभक्तिरेव। अन्यथा **"नमःस्वस्ति-स्वाहे"**त्यादिसूत्रवैयर्थ्यात् ।

मैवम् । चतुर्थ्यन्तपदस्य देवतात्वे मानाभावात् । चतुर्थी विनापि इन्द्रो देवतेति व्यवहारात् । अग्नये कव्यवाहनायेत्यादौ देवताद्वयप्रसङ्गात् । **"इन्द्रः सहस्राक्ष"** इत्यर्थवादस्य **"इन्द्रमुपासीतेत्या"**दिविधिसमभिव्याहारेण एकवाक्यतया तस्यैवोपास्यात्वात्। **"शिवस्वन्ना-ददीते"**त्यत्र महादेवमुद्दिश्य त्यक्तेऽपि शिष्टानां शिवस्वत्वेन व्यवहाराच्च । अग्नय इति पदेन नियमतस्त्यागश्रुतिबोधितत्वेन तथा त्यागस्य फलहेतुत्वात् । न च बीजाक्षराणां देवतात्वात् तर्थैव शिवादिपदशक्तिग्रह इति वाच्यम्। बीजाक्षराणां चतुर्थ्यन्तत्वानियमात् । तदप्रतीतावपि मन्त्रप्रकाश्शितशशिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः। बीजाक्षराणां हविस्त्यागभागित्वेनानुद्देश्यत्वात् । शिवस्य प्रतिमन्त्रं बीजाक्षराणां नानात्वात् अननुगमेन शिवपदशक्तिग्रहस्याशक्यत्वाच्च ।

न च मूर्तिभेदेन शिवशरीराणामननुगतत्वेन तवापि न शक्तिग्रह इति वाच्यम् । बाल्यादिना भिन्नशरीरेषु चैत्रत्ववच्छिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य वानुगतत्वात्। अदृष्टशून्यस्य चेश्वरस्य न देवतात्वम् । ईशानश्च तद्भिन्न एव । तस्मान्मन्त्रकरणकहविस्त्यागभागित्वेनोद्देश्यत्वं देवतात्वम्, अन्येषां हविः सम्बन्धे मन्त्रस्याहेतुत्वादिति।

क्वचिच्च वाक्यशेषाच्छक्तिग्रहः । यथा **"यवमयश्चरुर्भवति"** वाराही "**चोपानत् वैतसे कटे प्राजापत्यं चरुं चिनोती"**त्यत्र यव-वराह-वेतसशब्दाः किं कङ्गु-वायसजम्बूनां वाचकाः, उत

दीर्घशूक-सूकर-वञ्जुलानामिति म्लेच्छार्यव्यवहारदर्शनाद्विप्रतिपत्तौ मुख्यार्थानध्यवसायात् तत्पदे प्रामाण्यनिश्चये व्यवहाराद्व्युत्पत्तिः । स चाविशिशष्टः पिकादिपदेषु म्लेच्छव्यवहाराद्व्युत्पत्तेः सूकरस्येव चर्मणा काकस्याप्युपानहोः सम्भवादिति पूर्वपक्षे

**"वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।**

**मोदनमानाः प्रदृश्यन्ते यवाः कणिशशालिनः" ।।**

**"वराहं गावोऽनुधावन्ति । अम्बुजो वेतसः" ।** इति वाक्यशेषरूपवेदविरोधिनी म्लेच्छप्रसिद्धिः स्मृतिरिव वेदविरुद्धा हेयेति निरस्तायां म्लेच्छप्रसिद्धौ निष्प्रतिपक्षार्यव्यवहाराच्छक्तिग्रहः ।

ननु वाक्यशेषात् शूकरादिषु तात्पर्यनिश्चयो न शक्तिनिर्णायकः । काकादिसदृशतया शूकरादौ प्रयोगस्य गौण्यादिनापि सम्भवादिति चेत्, न । शूकरादौ तात्पर्यवच्छक्तेरपि निश्चयात् । तथाहि यद्यप्यनादिप्रयोगयोगिता न शक्तिनियता वैदिकगौण्यादिना व्यभिचारात्, तथापि शक्तिरनादिप्रयोगनियता । अतो वराहशब्दस्यानादिप्रयोगयोगिता । शक्तिश्च काके कल्प्येति गौरवम् । शूकरत्वेऽनादिवेदसम्बन्धात् प्रयोगोऽनादिसिद्ध एव । शक्तिमात्रं कल्प्यत इति लाघवमित्यनादितात्पर्यात् शूकरे शक्तिरेव ।

अथ काकवत् शूकरोऽप्यसदृश एव । सुसदृशस्य गवयादेः सत्त्वात् कथञ्चित् सादृश्यं काकस्याप्यस्तीति चेत्, न । काकशूकरयोर्वराहशब्दाद्बुद्धिस्थत्वेऽनयोः को वाच्य इति जिज्ञासानुरोधात् तयोरन्योन्यापेक्षया गोसादृश्यमुद्भूतं जिज्ञासमानस्य स्मृतिविषय इति तन्निरासात् । अन्यथा तात्पर्यग्राहकवाक्यशेषस्यापि निष्प्रयोजनत्वं स्यात् । कथञ्चित् सादृश्यस्य सर्वत्र सत्त्वेन तात्पर्यानध्यवसायादिति इतरान्विते शक्तिरित्यपि गुडजिह्विका ।

वस्तुतोऽन्वयेऽपि न शक्तिः । ननु व्यवहारेणानुमिते इतरान्वितज्ञाने पदशक्यत्वग्रहात् तत्रैव शक्तिं गृह्णाति उपस्थितत्वात् । न चाग्रे तत्त्यागो हेत्वभावात् । न तु पदार्थज्ञानमात्रे, व्यवहारात् तस्यानुपस्थितेः । उपायान्तरात्तदुपस्थित्यन्तरकल्पने मानाभावात् । अत इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञातपदं स्वार्थान्वयानुभावकम् इत्यन्विताभिधानमिति

चेत्, न । इतरान्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् । विशिशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिं कल्पयति लाघवात् । न त्वन्वयांशेऽपि, गौरवात् ।

अस्तु वा प्रथममितरान्वितज्ञाने शक्तिग्रहेऽग्रे तत्त्याग: अन्यलभ्यत्वप्रतिसन्धानात् । अनन्यलभ्यस्यैव शब्दार्थत्वात् । प्रथमगृहीतमात्रञ्च न बलमित्युक्तमेव । तस्मात् सर्वै: प्रथमव्यवहारादुपस्थिते कार्यान्वितज्ञानेऽन्वितज्ञाने वा पदकारणत्वग्रहात्तत्र शक्तिग्रह:, अग्रेऽपि गौरवान्यलभ्यत्वप्रतिसन्धानेऽपि न तत्त्याग: पूर्वकल्पनाया विपरीतत्वादिति स्वशिशिष्यव्यामोहनम् । अथ कार्यत्वस्येतरपदलभ्यत्वेन तथा न त्वेवमन्वये । तस्येतरपदाशक्यत्वात् । शक्यत्वे वा अविवादादिति चेत्,

न । घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वारा आकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्यथैवान्वयज्ञानलाभात् किं शक्त्या । अन्वयमात्रशक्तावप्यन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यापेक्षणात् । क्रियाकारकपदयो: प्रत्येकमितरान्वितस्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसङ्गात् । न चैकमेवान्विताभिधायक-मितरत्तु प्रतियोगिस्मारकमिति वाच्यम् । अविशेषात् । अशक्यान्वयानुभवेऽतिप्रसङ्गात् । अन्वयेऽपि शक्तिरिति चेत्, न । अशक्यमपि हि शक्यान्वयं बोधयति नान्यत् । शक्यान्वयत्वस्य स्वरूपतो नियमाकत्वात् । अन्यथा तवाप्यप्रतीकारात् ।

नन्वेवं पदानामन्वितज्ञानजनकत्वात् तत्र शक्तिरसूत्येव। अशक्तस्याजनकत्वात्। तवापि पदादन्वयबोध इतीश्वरेच्छासत्त्वादिति। सत्यम्। किन्तु अन्वयबोधे स्वरूपसती सा व्याप्रियते । न तु ज्ञाता । घटज्ञानशक्तत्वेन ज्ञानादेव घटान्वयबोधोपपत्ते:। यथा तव जातिशक्तपदस्य आत्मव्यक्तिज्ञाने । दृष्टञ्च ज्ञातकरणे सामान्यसम्बन्धितया ज्ञातस्यापि विशेषबुद्ध्युपायत्वम् । यथा वह्निसामान्यव्याप्ततया गृहीतधूमस्य वह्निविशेष-बुद्धिजनकत्वम् ।

अथ घटज्ञानत्वं । इतरान्वितघटज्ञानेऽप्यस्तीति तेन रूपेणान्वितघटज्ञानेऽपि ज्ञाता शक्तिर्व्याप्रियत इति चेत्, सत्यम्, किन्तु घटज्ञानं शक्यतावच्छेदकम्, न त्वन्वितघटज्ञानत्वम्, गौरवात् अन्यलभ्यत्वाच्च । एवञ्च जातिवाचकपदस्य व्यक्ताविव एकैव शक्तिरन्वयांशे स्वरूपसती पदार्थांशे ज्ञाता व्याप्रियते । जातिव्यक्त्योः समानसंवित्संवेद्यत्वात् तथा । घटज्ञानादिकन्तु नान्वयविषयतानियतं स्मरणे व्यभिचारादिति चेत्, घटानुभवविशेषं प्रति घटपदत्वेन कारणता ।

स च शब्दानुभवोऽन्वयविषयतानियत एव केवलस्य शब्देनाननुभवात् । स्मरणञ्च प्रति पदत्वेन न जनकता व्यभिचारात् किन्तु सम्बन्धितया ज्ञातत्वेन । स्यादेतत् । अन्वयतात्पर्यकतया तत्प्रतिपादकं पदमित्यविवादम्। तात्पर्यनिर्वाहिका च वृत्तिः सा चेह न गौणी, न वा लक्षणेति शक्तिसिद्धिः।

अथान्वये लक्षणैव स्वार्थसम्बन्धिनि तात्पर्यात्, पदार्थोपस्थित्यनन्तरं तदन्वयोपपत्तेश्च । न च वृत्तिद्वयस्य विरोधः, अन्वयविशेषणतया पदार्थोपस्थितेः । न च लाक्षणिकानामननुभावकत्वादन्वयानुभवः कथमिति वाच्यम्। पदार्थस्य स्मरणादन्वये अशक्तत्वाच्च पदानां शक्याननुभावकतया सर्वत्र लाक्षणिकस्यैवानुभावकत्वादिति । तन्न । वृत्तिर्हि ज्ञातोपयुज्यते, न स्वरूपसत्यतिप्रसङ्गात् । न चेह स्वार्थसम्बन्धितयाऽन्वयः प्रागवगतः । वाक्यार्थस्यापूर्वत्वात् । किञ्च शक्यसम्बन्धितया अन्वये लक्षणार्थं पदार्थे शक्तिकल्पनम्। तद्वरं लाघवादन्वयेऽपि शक्तिरस्तु । किं वृत्तिद्वयकल्पनया । एवं स्थिते प्रयोगोऽपि अन्वयः पदशक्यः वृत्त्यन्तरं विना पदप्रतिपाद्यत्वात् पदार्थवदिति ।

उच्यते । वृत्तिं विनापि तात्पर्यनिर्वाहात् किं वृत्त्या । पदानामुक्तक्रमेणान्वय बोधजनकत्वसम्भवात् । अन्यथा शक्त्या तात्पर्यनिर्वाहो दृष्ट इति लक्षणोच्छेदः ।

अथ शक्तिं विनापि शक्यसम्बन्धात् तन्निर्वाह इति न तत्र शक्तिः, तर्हि वृत्तिं विनापि तन्निर्वाह इति किं वृत्त्या । अत एवानुमानमप्रयोजकम्। अन्यथा पदप्रतिपाद्यत्वादेव

शक्तिसाधने वृत्यन्तरोच्छेदः । अत एव धूमोऽस्तीत्यत्र धूमपदस्य वह्निबोधपरत्वेऽपि वह्नौ न लक्षणा शक्त्या धूमोपस्थितौ अनुमानद्वारा तत्प्रतीतिसम्भवात्।

तथा

**"गच्छ गच्छसि चेत् कान्त पन्थानः सन्तुः ते शिवाः ।**

**ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्"।।** इति

वाक्यस्य **"मा गच्छेत्य"**त्र तात्पर्येऽपि न लक्षणा । गमनस्य प्रियामरणहेतुत्वं हि वाक्यार्थः। तेन गमनं मया न कर्तव्यं प्रियामरणहेतुत्वादित्यनुमानादेव गमने अकर्तव्यताबोधनेन तात्पर्यनिर्वाहात्। यत्र हि मुख्यया साक्षात्परम्परया वा न तात्पर्यनिर्वाहः तत्र लक्षणा। ननु घटमानयेत्यत्र प्रत्येकमन्वयविशेषे जिज्ञासा भवति । न च सामान्यानवगमे विशेषे सा स्यात्, इत्यन्वयसामान्ये शक्तिरेवेति चेत्, न । कारकेण क्रियया च क्रियाकारकसामान्याक्षेपात्तदुपपत्तेः । दृष्टे फलादौ रसविशेषजिज्ञासावत् ।

एतेन यदुक्तमन्वितपदार्थे मम त्वेकैव शक्तिस्तव त्वेका पदार्थेऽपरा त्वन्वय इति निरस्तम् । अन्वये शक्त्यभावात् । न चैवमन्वयानुभवे पदविनियोगो न स्यादिति वाच्यम् । अन्वयानुभवार्थमेव पदार्थे पदानां शक्तिकल्पनात् । तस्मात् पदं कारणम् । पदार्थस्मरणं व्यापारः । आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलम् । पदार्थस्मरणं न व्यवधायकं व्यापारत्वात् । न च स्मरणद्वारा पदार्थ एव करणम्, तस्यानागतत्वादिना स्वस्मरणे अन्वयानुभवे चाजनकत्वात् ।

तथापि पदार्थस्मरणमेव करणमस्तु आवश्यकत्वात् । अत एव चिन्तावशोपनीतपदार्थानामन्वयबोधात् काव्यादिरिति चेत्, न । स्मरणस्य निर्व्यापारत्वेनाकरणत्वात् । अनन्यथासिद्धान्वयव्यतिरेकाभ्यां आकाङ्क्षादिमत्पदस्यान्वयानुभवविशेषे कारणत्वात् । पदार्थोपस्थितेः संसर्गधीमात्रहेतुत्वेऽपि शाब्दसंसर्गधीविशेषे पदस्यैव हेतुत्वात् । गौः कर्मत्वमानयनमित्यत्र पदार्थज्ञानेऽपि अन्वयज्ञानानुदयात् पदविशेषोपस्थितपदार्थज्ञानस्य हेतुत्वे पदविशेषस्यैवावश्यकत्वेन हेतुत्वाच्च । काव्यस्थले च पदार्थज्ञानव्यापारकं

उत्प्रेक्षादिसहकृतं मन एवान्वयानुभवकरणम्। न चैवमुत्प्रेक्षायाः पृथक् प्रमाणत्वम् । व्यभिचारिजातीयतया लिङ्गादाविव प्रमाकरणतावच्छेदकानतिप्रसक्तानुगतरूपाभावान्निर्व्यापारत्वाच्च । किन्तु प्रमाणसहकारिणी सा। अत एव मानसे लिङ्गपरामर्शे व्याप्तिस्मृत्यादि न पृथक् प्रमाणम्।

अथ पदमन्तरेणापि योग्यतादिज्ञानेऽन्वयबोधो भवति। अतः पदार्थस्मरण एव पदानामुपक्षयः । तदुक्तम् --

**"पश्यतः श्वेतिमारूपं ह्रेषाशब्दञ्च शृण्वतः ।**

**खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः"।।** इति

चेत्, सत्यम्। प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यव्यापारदर्शनात् अन्वितज्ञानोपपत्त्यर्थं पदस्यैव शक्तिः कल्प्यते। प्रथमतस्तस्यैव कारणत्वावधारणात् । पदार्थेषु शक्त्यन्तरकल्पने गौरवात् । तदाहुः–

**"प्राथम्यादभिधातृत्वात्तात्पर्योपगमादपि ।**

**पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्"** ।। इति ।

श्वेतोऽश्वो धावतीति धीश्च लिङ्गजा पदस्य क्लृप्तकारणभावस्याभावादिति ।।

**।। इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दखण्डे कार्यान्वितशक्तिवादः ।।**

## अथ जातिशक्तिवादः ।

एवं पदार्थमात्रे शक्तौ पदार्थो निरूप्यते । **तत्र प्राभाकराः** यद्यप्यानयनादिव्यवहाराव्यक्तावेव शक्तिरुचिता तथाप्यानन्त्यव्यभिचाराभ्यां तत्र न शक्तिग्रहः । समुच्चयेन शक्यत्वे गां दद्यादित्यादौ सर्वोपादानासामर्थ्यम् । एकस्य शक्यत्वेऽनध्यवसायः । न च गोव्यक्तिमात्रमर्थः । मात्रशब्दस्य सर्वार्थत्वे उक्तदोषात् । सामान्यार्थत्वे व्यक्तेरप्रतीतेः । नानार्थत्वे च सर्वासां प्रत्येकं ज्ञातुमशक्यत्वम्, शक्तौ शक्ये च गौरवम्, अपूर्वगवि व्यवहाराभावश्च । नापि गोत्वेनोपलक्षिता व्यक्तिः शक्या, धेनुपदवत् । अतो न

शक्यानन्त्यम्, न व्यभिचारः, न सर्वासङ्ग्रहः, न नानार्थत्वम्, गोत्वेन तासामैक्यादिति वाच्यम् ।

रूपान्तरेण विज्ञातमन्येन रूपेण हि उपलक्ष्यते यथा काकेन गृहविशेषो गोत्वेन धानकर्मव्यक्तिविशेषः स्वतोविलक्षणः। न तु काकाद्याकारेणैव तत्प्रतीतिः । न च व्यक्तीनां जातिं विना रूपान्तरमेकमस्ति ज्ञायते वा । गोपादाद्गौरित्येव प्रतीतेः। गोत्वविशिष्टे च कार्यान्वयाद्गोत्वं विशेषणम्, नोपलक्षणम् । तदन्येन कार्यान्वये उपलक्षणम्। यथायं वासस्वी देवदत्तशब्दवाच्य इत्यत्र वासः । न च गोत्वैकत्वेन व्यक्तीनामैक्यं क्रियते, अशक्यत्वात् । नापि ज्ञाप्यते, असत्त्वात् । न च तदेकत्वमेव व्यक्तेरेकत्वं, असम्भवात् । नापि व्यक्तिः शक्या गोत्वमवच्छेदकं कारणत्वे दण्डत्ववत्, एवं हि गोपदात् न गोत्वविशिष्टबुद्धिः स्यात् । शक्तिग्रहाहितसंस्कारोचिवाद्गोपदादेव धेनुपदादिव गोत्वविशिष्टज्ञानम् । तदुद्बोधश्च तद्वदेव । परम्परासम्बन्धादिति चेत्,

न तत्र हि धानकर्मव्यक्तिविशेषस्यावश्यशक्यत्वेऽनुगमाय गोत्वमवच्छेदकमात्रं न तु वैपरीत्यं, गोत्वस्य वृषभेऽपि सत्त्वात्। इह तु व्यक्तिरतिप्रसक्तेति जातिविशिष्टैव सा शक्या स्यात् । वस्तुतस्तु जातेः शक्योपलक्षणत्वे शक्त्यवच्छेदकत्वे वावश्यकत्वात् लाघवाच्च जातिरेव शक्या स्यात्, न तु व्यक्तिः । घेनुपदे तु गोत्वं न तथा अतिप्रसङ्गात् । अस्तु तर्हि जातिविशिष्टं शक्यं स्वव्यवहारेण च स्वहेतुतया जातिविशिष्टज्ञानस्यानुमितत्वादिति चेत्, न विशेष्यभेदाद्विशिष्टानामनन्तत्वेन व्यक्तिवाच्यत्वे उक्तदोषग्रासात् । विशेषणस्यैक्येन विशिष्टानामैक्यस्योपलक्षणपक्षवद्दूष्यत्वात् । तस्माद्व्यक्तेरपदार्थत्वे जातिरेव पदार्थः ।

वस्तुतस्तु व्यक्तौ जातिरनुगमिका विशेषिका चावश्यं वाच्येति नागृहीतविशेषणन्यायेन सैव वाच्या ।

अथ जातावपि व्यक्तिरेव विशेषः, धर्मान्तराभावात् । गवेतरावृत्तित्वे सति सकलगोवृत्तित्वादेरुपाधेरपि व्यक्तिघटितत्वात्। नागृहीतविशेषणन्यायो व्यक्तावपीत्युभयमपि वाच्यमिति, न । जातेः स्वत एव व्यावृत्तत्वात् । अन्यथा जाति-व्यक्त्योर्व्यावृत्तत्व-

ज्ञानादन्योन्यव्यावृत्तत्वबुद्धावन्योन्याश्रयः । स्वतोव्यावृत्तत्वञ्च न स्वयमेव स्वव्यावर्तकत्वं स्वस्मिन् स्वावृत्तेः । नापि व्यावर्तकं विनैव व्यावृत्तत्वं, असम्भवात् । किन्तु स्वाश्रयवत्स्वात्मनि व्यावृत्तधीजनकस्वभावत्वं परेषामन्त्यविशेषवत् । व्यावर्तकधर्मेऽपि धर्मान्तरादेव व्यावृत्तबुद्धावनवस्था स्यात् । तअ एव किञ्चिद्धि वस्तु स्वत एव विलक्षण **मित्याहुः ।**

अस्तु वा व्यक्त्या व्यावृत्ततया बोधिता जातिरेव पदार्थो लाघवात् न तु वैपरीत्यमुभयं वा गौरवात् । कुतस्तर्हि व्यक्तिधीः । जातिशक्तादेव । कथमन्यशक्तादन्यधीः। स्वभावात् । तत्स्वभावत्वमेव व्यक्तिशक्तिं विना न निर्वहतीति चेत्, न । गोपदं हि नियमतो जातिव्यक्ती बोधयति । तत्रास्य जातिशक्तिधीरेव सहकारिणी कल्प्यते लाघवादावश्यकत्वाच्च। न तु व्यक्तिशक्तिधीरपि, गौरवात् । जातिशक्तिज्ञाने सति तां विना व्यक्तिबोधे विलम्बाभावात्। यथा तव पदार्थशक्तादेवान्वयधीः । यद्वा जातिशक्तमेव पदं व्यक्तिं बोधयति । अशक्यत्वेऽपि जात्याश्रयत्वमेव नियामकम् यथा अशक्यमपि स्वार्थान्वयं बोधयति । तत्र प्रयोजकत्वेन क्लृप्ता शक्तिरेवास्तु । जात्याश्रयत्वस्य तथात्वकल्पने गौरवादिति चेत्,

न । अन्यलभ्यस्यापदार्थत्वात् । अन्यथा अन्वयोऽपि शक्यः स्यात्, लक्षणाद्युच्छेदश्च । अथवा जातिशक्तिज्ञानाज्जातिधीर्भवन्ती व्यक्तिमपि गोचरयति । व्यक्तिं विना जातेरभावात् । यो येन विना न भासते तद्धीहेतुस्तमवबोधयति, यो येन विना न भासते तद्धीहेतुस्तमवबोधयति । यथा ज्ञानधीहेतुस्तद्विषयम् । यथा वा तवाधिकरणसिद्धान्तो ज्ञानादिनित्यत्वम् । अन्यथा पदं जातिमपि न बोधयेत्, केवलाया अप्रतीतेः । तथा च जातिशक्तिकल्पनावैयर्थ्यम् । तस्मात् जातिज्ञानार्थं क्लृप्ता शक्तिर्व्यक्तिमपि बोधयति, एकवित्तिवेद्यत्वनियमात् ।

एतेनैकवित्तिवेद्यतैव व्यक्तिशक्तिं विना न स्यात् ज्ञापकाभावात् । न हि व्यक्तिज्ञानमहेतुकं जातिहेतुकं वा, सदातनत्वप्रसङ्गात् । नापि जातिधीहेतुकं, संविद्भेदापत्तेरिति निरस्तम् । जातिशक्तेरेव व्यक्तिज्ञापकत्वात् ।

ननु जातिं विना प्रत्यक्षादिना व्यक्तिज्ञानादन्यैव व्यक्तिधीसामग्री । जातिविशिष्टज्ञानञ्चोभयज्ञापकसामग्रीद्वयसमाजादार्थम् । अत एव व्यक्तिं विना जातेरस्मरणेन जातिस्मरणस्य व्यक्तिविषयत्वनियमात् जातिज्ञापकमात्रमेव व्यक्तिज्ञापकं कल्प्यते। सामान्यकल्पनायां बाधकाभावादिति परास्तम्। जातिं विनापि व्यक्तिस्मरणत्तत्रान्यैव सामग्री। जातिविशिष्टस्मरणञ्चोभयांशस्मारकसमाजादिति ।

अत्र ब्रूमः । जातिव्यक्तिप्रत्यक्षादिबोधे तथैव सामग्रीद्वयस्य पृथगन्वय-व्यतिरेकग्रहात् । शाब्दे तु व्यक्तिबोधे जातिशक्तिज्ञानमेव हेतुर्लाघवात् न सामग्र्यन्तरम् । तत्सत्त्वे तेन विना विलम्बाभावात् । एवञ्च जातिशक्तत्वेन ज्ञातं पदं जातिविशिष्टस्य स्मारकमनुभावकञ्च ।।

ननु ज्ञाने शक्तिः शक्यत्वात् । तथा च यस्य ज्ञाने शक्तिस्तच्छक्यम् जातिव्यक्तिज्ञाने च शक्तिरिति जातिवत् व्यक्तिरपि शक्येति चेत्, न। यद्विषयतया हि ज्ञाता ज्ञाने शक्तिरुपयुज्यते तत् शक्तिज्ञाने विषयतया शक्यतावच्छेदकम्। शक्यं जातिज्ञानञ्च तथेति जातिरेव शक्या न तु व्यक्तिज्ञानत्वमप्यवच्छेदकं गौरवात् । न च शक्यज्ञाने नियतविषयत्वमेव शक्यत्वम् व्यवहारानुमितशक्यानुभवविषयाणामन्वये तत्सम्बन्धिमितिमातॄणामपि शक्यतापत्तेः ।

एवञ्च जातिव्यक्तिज्ञानजनकत्वादुभयत्रापि शब्दशक्तिः । जात्यंशे सा ज्ञाता व्यक्त्यंशे स्वरूपसती हेतुर्लाघवादिति कुब्जशक्तिवादः। एवञ्च सैव तदैव तेनैव ज्ञाता आज्ञाता च वाचिका अवाचिका वेत्यत्र जातिव्यक्त्यवच्छेदकभेदेनाविरोधः । त्वयाप्यन्वये कुब्जशक्तिस्वीकारात् । व्यक्तेः शक्यत्वेऽपि ज्ञातशक्तिशब्दजनितज्ञानविषयत्वलक्षणं वाच्यत्वं नास्ति। न चैवं परिभाषा। शब्दजन्यज्ञानविषयत्वेन वाच्यत्वे लाक्षणिकादेरपि वाच्यत्वापत्तेः ।

व्यक्तेः शक्यत्वेऽपि व्यक्तिशक्तिज्ञानं न कारणम्। व्यक्तिशक्तिज्ञानत्वं नावच्छेदकमिति लाघवम् ।

यत्तु तच्छक्तत्वेन ज्ञातादेव तदर्थबोधः, शक्तिभ्रमादपि धीदर्शनात् । तथा योग्यताद्यन्वयानुपपत्तौ विना पदादुपस्थितिः शक्तिसाध्येति व्यक्तिरपि शक्येति । **तन्न ।** अन्यलभ्ये शक्तेरकल्पनात् । अन्यथा तवान्वयेऽपि शक्तिर्लक्षणाद्युच्छेदश्च ।

ननु न जातिरर्थः व्यवहाराभावेन व्युत्पत्तेरसिद्धेः । कारकोपरक्तक्रिया हि व्यवहारगोचरः । जातिश्च न क्रिया, नित्यत्वात् । कारकं न कत्रादि क्रियायास्तत्रासमवायात्, परसमवेतक्रियाफलभागित्वाभावात्, कर्तृव्यापारानाश्रयत्वात्, अचेतनत्वात्, तया सह विभागाभावात्, क्रियानाधारत्वाच्चेति चेत्, न, व्यक्तिव्यवहारादेव उक्तन्यायेन जातौ शक्तिग्रहात् । जातिसविकल्पकाद्यव्यावृत्ततया ज्ञातायां व्यक्तौ क्रियान्वयः । सविकल्पकञ्चालोचनद्वारा जातिजन्यमितिपरम्परया जातेरपि कारकत्वेनान्वयः । यद्वा न केवलव्यक्तेः कारकत्वम् । न हि गौर्गच्छतीत्यत्र व्यक्तिमात्रं यातीति कस्यचित्प्रतीतिः । किन्तु जातिविशिशिष्टायाः । तथा चोभयमपि कारकम् ।

**श्रीकरस्तु** केवलजातिव्यक्त्योरकारकत्वात् क्रियान्वयो व्यक्तेराश्रयतया जातेरवच्छेदकतया आरुण्यादिवत् । एवञ्च जातिशक्तपदात् जातेरनुभवः शाब्दः। व्यक्तेरौपादानिकः अशक्यत्वादिति ।

**अन्ये तु** जातिशक्तमेव पदं जातिव्यक्त्योः स्मारकमनुभावकञ्चेति व्यक्तेरपि शाब्दत्वम्। न च वृत्तिं विनाऽन्वयानुभवेऽप्रवेशान्न व्यक्तेः शाब्दत्वं, वृतिं्त विनापि एकवित्तिवेद्यत्वनियमेन जातिशक्तादेव व्यक्तेरनुभवात् । अन्यथा जात्यन्वयोऽपि न स्यात्। व्यक्तिं विना जातेरनुभवात् । अत एव जातिशक्तिरेव व्यक्तिं बोधयतीति **गुरवः** । किञ्च शक्त्योपस्थापितस्यान्वयानुभवं प्रति पदानां कारणत्वम् । अतो जातिवदुपस्थापिताया व्यक्तेरनुभवः पदात् ।

न तु तत्तच्छक्योपस्थापितस्य, गौरवात् । न चैवमशक्यपरत्वे लक्षणा। यथा ह्यन्यत एव ज्ञानान्न शक्तिस्तथा लक्षणापि न । तत् किमशक्येऽपि मुख्यः प्रयोगः । सत्यम् । शक्त्या साक्षादुपस्थित एव तस्य मुख्यत्वात् । स्वशक्येति त्वधिकम् । वस्तुतस्तु जातिशक्तादेव व्यक्तिधीसम्भवान्न व्यक्तौ शक्तिः । यदि च ततो न तद्धीस्तदा तत्र शक्तिरेव स्यात् । अन्यथा तद्धीर्न स्यादेव ।

ननु पदजातिभ्यामप्येको जाति-व्यक्त्यनुभवः क्रियते, तत्र जात्यंशे पदस्य व्यक्त्यंशे जातेरनुभावकत्वम् अयमेव उपादानार्थ इति चेत्, तर्हि जातेः कारणत्वापेक्षया शक्तिज्ञाने उपस्थितव्यक्तेरवच्छेदकत्वमात्रकल्पनैव लघीयसी, जातेः प्रमाणान्तरत्वापातश्च ।

अत एव **"व्रीहीनवहन्तीत्यत्र"** व्यक्तौ न लक्षणा । तत्साध्योपस्थितेर्जातिशक्तित एव सिद्धेः । अस्तु वा गवावच्छेदकत्वेनारुण्यादि वद्व्रीहित्वेऽप्यवघातान्वय इति ।

अत्रोच्यते । गोत्वज्ञाने गोज्ञाने वा शक्तं पदमित्याकारः शक्तिग्रहः । तथा च शक्यज्ञाने विषयतया जातेरवच्छेदकत्वं व्यक्तिमादायैव प्रतीयते, न केवलायाः । व्यक्तिं विना जातेरप्रतीतेः । तथा च जातेरवच्छेदकत्वे **"नागृहीतविशेषणा"**न्यायेन व्यक्तेरवच्छेदकत्वं वज्रलेपायितमिति शक्तिज्ञाने विषयतया अवच्छेदकत्वात् जातिवत्सापि शक्या । तस्मात् परिहरैकवित्तिवेद्यत्वनियमं, स्वीकुरु वा व्यक्तेर्वाच्यत्वम् । अपि च यद्धर्मतवत्तया ज्ञात एव यत्र यस्य ज्ञानं स तत्रावच्छेदकः । व्यक्तिज्ञानत्वेन ज्ञात एव तत्र ज्ञाने शक्तिधीरिति व्यक्तिरपि शक्या ।

नन्वाद्यव्युत्पत्तौ मितिमातृविषयत्वेन ज्ञात एव ज्ञाने प्रवर्तकत्वं ज्ञातम् । न च तयोर्ज्ञानं प्रवर्तकमतो व्यभिचारः। अन्यथा प्रवर्तकत्वेन मितिमातृज्ञानमपि प्रयोज्यस्यानुमाय बालस्तत्रापि शक्तिं गृह्णीयात् । एवं तवापि कार्यान्वितज्ञान एव शक्तिः स्यात् । तत्त्वेन ज्ञात एव ज्ञाने शक्तिग्रहादिति चेत्, मितिमातृज्ञानत्वं कार्यन्वितज्ञानत्वञ्च विनापि प्रवृर्तकज्ञाने घटज्ञानत्वदिकं ज्ञातुं शक्यमिति तयोर्नावच्छेदकत्वम्।

किन्तु घटज्ञानत्वादिकमेव लाघवात् तयोरपि तत एव प्राप्तेश्च । किञ्च पदं व्यक्तिज्ञानार्थं शक्यज्ञाने विषयतया व्यक्तेरवच्छेदकत्वमात्रं कल्पयति लाघवात् । जातिविषयत्ववद्व्यक्तिविषयत्वस्य ज्ञानवित्तिवेद्यत्वेनावश्यं शीघ्रोपस्थितत्वात्। न तु जातिशक्तिस्तद्बोधे कारणान्तरं वा तदवच्छेदकं गौरवाच्छक्तिग्रहकाले कल्पनीयोपस्थितिकत्वाच्च।

**अन्ये तु** प्रथमं व्यवहारानुमितव्यक्तिज्ञाने शब्दानुविधानात् पदं शक्तमित्यवधारयति न तु जातिज्ञाने । व्यवहाराजनकत्वेन तदा तस्यानुपस्थितेः । पश्चाद्व्यक्तेर्व्यावृत्त्यर्थं अनुगमार्थञ्च जातिरपि तद्विषय इति मानान्तरेण ज्ञात्वा जातिज्ञानेऽपि तत्पदस्य कारणतां प्रत्येति । तथा च व्यक्तिशक्तिज्ञानमपि कारणम्, न तु जातिशक्तिज्ञानेनान्यथासिद्धिः। व्यक्तिज्ञानकारणतामुपजीव्य जातिज्ञाने कारणताग्रह इत्युपजीव्यविरोधात् । एतेन जातिरेव शक्या लाघवात्। शक्तिग्रहजन्यसंस्कारस्य व्यक्तिविषयत्वनियमेन पदात् जातिस्मरणमुत्पाद्यमानमवश्यं व्यक्तिविषयम् ।

संस्कारस्यानियतोद्बोधकत्वेऽपि जात्यंशोद्बोधकादेव व्यक्त्यंशोद्बोधनियमकल्पना। यथा पदेनोद्बुद्धसंस्कारादेव नियता शक्तिस्मृतिः पदं विनापि च सर्वा जातिस्मृतिर्व्यक्तिविषया। अन्यथा केवलजातिमात्रस्मरणापत्तेः । संस्कारसहितात् पदादेव जातिविश्चिष्टानुभवोऽपीन्द्रियादिव प्रत्यभिज्ञा । अत एव भाष्यम्, "संस्कारशब्दशक्तिभ्यां विशिष्टानुभव इत्युन्नीतमतमपास्तम्'। उक्तन्यायैर्जातिवद्व्यक्तेरपि शक्यत्वात् । विशिष्टानामानन्त्येऽपि एकत्र विशिष्टे तत्त्वं विहाय गोत्वमादाय गोत्वविशिष्टं शक्यमिति शक्तिग्रहः । यथा च क्वचिदेव धूमे धूमो वह्निव्याप्य इति बुद्धिः ।

यथा वा तवैव कार्याणामानन्त्येऽपि क्वचित् कार्ये तत्त्वं तटस्थीकृत्य कृतिमादाय धर्मणि कार्यं शक्यमिति लिङादेरपूर्वे शक्तिग्रहः। अवच्छेदकैक्याच्छक्तेरेकत्वं तद्वदेव । यथा वा व्यक्तिवाचकपश्वादि पदानाम्। अथवा गोत्वेन सामान्यलक्षणया ज्ञाते सर्वत्र गवि गोत्वमादाय शक्तिग्रहः। प्रमेयत्वेन च सर्वज्ञाने सार्वज्ञमिष्यत एव । नेष्यते तु

घटत्वादिसर्वप्रकारज्ञानवत्त्वेन । सर्वैकोदासीनगो: शक्यत्वात् यत्किञ्चिदेकोपादानेऽपि गोरुपादानादन्योपादानाशक्यत्वं एकोपादानेऽनध्यवसायो वा । अन्यथा तवाप्येकवित्ति-वेद्यतया सर्वैकपरत्वे उक्तदोषे का गति:। का वा गतिर्व्यक्तिवाचकपश्वादिपदानाम्। भट्टमते तु जातिरेव शक्या लाघवात् । व्यक्तिस्त्वाक्षेपलभ्या ।

ननु नाक्षेप एकवित्तिवेद्यत्वात्तयो: । समानानां हि भाव: सामान्यम् । तच्च व्यक्तिं विना न भासते इति चेत्, न । स्वरूपेण शक्या जातिः । न च सामान्यत्वं तस्या: स्वरूपम्, तद्धर्मत्वात्। अन्यथा आलोचनेऽपि सा न भासेत । कथं सामान्यत्वेनाप्रतीता जातिर्व्यक्तितो भिन्नतया शब्देनाभिधातव्येति चेत्, न । शब्देन व्यक्तितो भिन्नतया जातेरबोधनात् ।

ननु व्यावृत्ता जातिर्वाच्या । व्यावृत्तबुद्धिं विना व्यक्तिविशेषानाक्षेपात् । व्यावर्तिका च तत्र व्यक्तिरेव अनुगतत्वमप्यनुगम्यमानं विना न भासत इति जातिवित्तिवेद्यैव व्यक्तिरिति चेत्, न । स्वतो व्यावृत्तजातिस्वरूपस्य वाच्यत्वात् । व्यक्तेर्धर्मान्तरस्य वा व्यावर्तकत्वेऽन्योन्याश्रयोऽनवस्था वा ।

ननु गौरितिपदात् जातिव्यक्त्योर्युगपत्प्रतीति: । न च सूक्ष्मकालभेदाग्रहात् सा भ्रान्ता। बाधकाभावात् । तथा च गोपदाद्गोत्वधीस्ततः क्रमेण व्याप्तिपक्षधर्मताज्ञानं ततो व्यक्त्यनुमितिरिति ज्ञानपरम्पराकल्पनाद् वरं जातिवित्तिवेद्यत्वं व्यक्तेरिति चेत्, न । व्युत्पत्त्यधीनं हि शब्दस्य बोधकत्वम् । अतो व्युत्पत्तिपर्यालोचनया युगपज्ज्ञानमसिद्धम् । अत एव ज्ञानपरम्पराकल्पनमपि युक्तम् । अन्यथा कर्तुरप्याक्षेपो न स्यात् । शब्दात् सकर्तृकाया एव क्रियाया अवगमात् । न च जातिज्ञानत्वेन व्यक्तिविषयतानियम:। प्रत्यक्षादौ तस्य व्यक्तिधीहेतुसमाजाधीनत्वात् । अत एव न जातिधीहेतौ व्यक्तिधीहेतुसहकारितानियम: समाजस्यार्थसिद्धत्वात् । गोत्वं गवाविषयप्रतीतिविषय: जातित्वात् गोभिन्नभावत्वाद्वेति जातिमात्रधीसिद्धेश्च ।

अथ यत् यत्परतन्त्रं तत् तेनैकवित्तिवेद्यं यथार्थपरतन्त्रं ज्ञानमर्थेन जातिश्च परतन्त्रेति व्यक्तौ भासमानायामेव भासत इति चेत्, न । परतन्त्रत्वं हि न परसमवेतत्वं

गन्धादिना व्यभिचारात् । न तद्धीनिरूप्यत्वं असिद्धेः । नापि तस्मिन् भासमान एव भासमानत्वं साध्याविशेषात् । नापि विशेषणत्वेनैव ज्ञानं गौरित्येव प्रतीतेः । गवि गोत्वमिति कश्चित् प्रत्येतीति चेत्, न । आलोचने विशेषणत्वं विनापि स्वरूपतः प्रतीतेः । जातिमात्रशक्तात् पदात् जातेः स्मरणमालोचनमेव जातिविशिष्टगोचरसंस्कारादेव पदेन जात्यंशोद् बोधे सति जातिमात्रस्मरणात् ।

अत एव ततो जातिं विनापि कदाचित् व्यक्तिस्मृतिः । अस्तु वा गुरोरिवालोचनमपि संस्कारजनकं शब्दव्युत्पत्तिबलेन जातिमात्रस्मरणसिद्धेः। न च स्मरणस्य विशिष्टज्ञानत्वमेव । अनुभवस्यापि तथात्वेन निर्विकल्पकासिद्धिप्रसङ्गात् । एकवित्तिवेद्यत्वेऽपि प्रथमदर्शनवत् शब्दाद्गोत्वस्मरणमालोचनमेव । गोत्वे गोव्यक्तिवृत्तित्वादिवैशिष्ट्यस्याशक्यत्वेन तदविषयत्वात् । न चालोचनस्येन्द्रियजन्यत्वात् न स्मृतित्वम्। ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वेन स्मृतित्वस्यालोचनवृत्तित्वात् । नन्वाक्षेपाद्व्यक्तिधीर्न गोत्वेन गोत्वस्य गोत्वविश्चिष्टाभेदेनाक्षेपाभावादिति चेत्, न । विशेषणविशेष्यायोर्भेदेन आक्षेपाभावादिति चेत् न । विशेषणविशेष्ययोथेदेनानुमानाविरोधात् । अत एव गोत्वं व्यक्त्याश्रितं जातित्वादिति पक्षधर्मताबलात् गोत्वाश्रयव्यक्तिसिद्धिः । अर्थापत्तेर्वा त्सिद्धि ।

ननु व्यक्त्या विना किमनुपपन्नं, व्यक्तिं विनापि गोत्वस्य तद्बुद्धेश्च सिद्धेः कथमर्थापत्तिरिति चेत्, न। व्यापकं विना व्याप्यस्यासिद्धेः । उच्यते । गामनायेत्यतो गोत्वविशिष्टस्य क्रियान्वयबोधाद्गौरित्याकारकगोविशेष्यकबुद्धिः कारणम् । सा च न शब्दं विना । आक्षेपाद्व्यक्त्याश्रितं गोत्वमिति धीर्न तु गौरिति । न चैवं व्यक्तेः क्रियान्वयोऽपि। गोत्वाश्रिततया निराकाङ्क्षत्वात् राजपुरुषमानयेत्यत्रेव राज्ञः । अन्वये वा व्यक्तिमानयेति धीः स्यात्, न तु गामिति ।

किञ्च गोत्वं न व्यक्तिव्याप्यम्। न हि यत्र यदा वा गोत्वं तत्र तदा व्यक्तिर्यत् सामान्यं सा व्यक्तिरिति वा नियमः । व्यभिचारात् । नापि गोत्वं गवाश्रितं

गोत्वादित्यनुमितिः, व्याप्तिग्रहशरीरत्वात् । न च जातित्वं व्यक्त्याश्रितत्वे लिङ्गम् । जातित्वस्य पदादनुपस्थितेः । तथात्वे वा जातिवित्तिवेद्यैव व्यक्तिः । अपि च लिङ्गं व्याप्यमनुपपन्नं स्वाश्रये व्यापकमुपपादकञ्च बोधयति । नचेह गोत्वाश्रये व्यक्तिबुद्धिः ।

वयन्तु ब्रूमः- व्यक्तेरपदार्थत्वे विभक्त्यर्थसङ्ख्याकर्मत्वादेर्व्यक्तावनन्वयः स्यात्। सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धित्वात्, प्रकृतितात्पर्यविषये तदन्वयव्युत्पत्तौ लक्षणोच्छेदो गौरवञ्च । आख्यातार्थसङ्ख्यापि नानुमितेनान्वेति । किन्तु भावनान्वयिना शुद्धेन प्रथमान्तादुपस्थितेन पदान्तरादुपस्थितिरेव तत्राक्षेपार्थः। अत एव न व्यक्तेराक्षेपः ।

किन्तु लक्षणया गोपदाद्गौरिति व्यक्तिधीरिति **मण्डनः** । यदाह-

**"जातावस्तित्वनास्तित्वे न हि कश्चित् विवक्षति ।**

**नित्यत्वोल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे" इति ।।**

उच्यते-स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा । तीरत्वेन ज्ञाते गङ्गापदस्येव । न चेह गोत्वादन्येन रूपेण व्यक्तेरुपस्थितिः, किन्तु गोत्वेनैव । व्यक्तित्वेन सास्नादिमत्त्वेन चोपलक्ष्यत्वे गोपादादव्यक्तित्वादिरूपेण धीः स्यान्न तु गौरिति । नापि गोत्वसम्बन्धिनि गोत्वविश्चिष्टे लक्षणा । गोत्वे हि न साक्षादानयनाद्यन्वय इति व्यक्त्यवच्छेदकतया तस्यान्वयेऽमुख्यत्वम् । लक्षणयापि गोत्वावच्छिन्नैव व्यक्तिः क्रियान्वयिनी प्रतीयते न केवला व्यक्तिरिति गोत्वविशिश्टस्य लक्ष्यत्वे युगपद्वृत्तिद्वयविरोधः । गोत्वेऽपि वा लक्षणा । अपि च जातिमात्रे न शक्तिर्न वा व्यक्तौ लक्षणा । जातौ मुख्यप्रयोगाभावात् । तयोस्तन्मूलकत्वात् । प्रयोगो हि व्यवहारहेतुज्ञानार्थः ।

न च जातिमात्रनिर्विकल्पकाद्व्यक्तिमनादाय केवलजातौ व्यवहारः । तस्य विशिश्टज्ञानसाध्यत्वात्। गां पश्य गौरस्तीत्यादावपि गोत्वविशिश्टस्यैव ज्ञानं व्यवहारश्च । तस्मादेकवित्तिवेद्यत्वनियमात् जातिविशिश्टं शक्यम्। यदि च तृतीयायाः करणैकत्व इव गोगोत्वे शक्ये तदा गोत्वं गोव्यक्तिश्चेति धीः स्यात् न तु गौरिति । वैशिश्ट्यञ्च सम्बन्धो

वा ज्ञातो घट इत्यत्रेव विशेषणताविशेषोऽर्थान्तरं वेत्यन्यदेतत् । जातिविशेषवदवयवसंयोगरूपाकृतिरपि पदशक्या गोपदात् जात्याकृतिविशिष्टस्यैवानुभवात् । पिष्टकमय्यो गाव इत्यादौ गवाकृतिसदृशाकृतौ लक्षणा पिष्टकसंयोगविशेषस्याशक्यत्वात् । जात्याकृतिव्यक्तीनां प्रत्येकमात्रपरत्वे लक्षणैव ।

प्रत्येकस्य जात्याकृतिविशिष्टादन्यत्वात् । यथा गुरूणां कार्यशक्ताया लिङो लोके कार्यत्वपरत्वे । अत एव **"व्यक्त्याकृतिजातयस्तु पदार्थ"** इति **पारमर्षसूत्रम् ।** एकयैव शक्त्या एकवित्तिवेद्यत्वसूचनाय पदार्थ इत्येकवचनम् । एवं पद्मं पङ्कजपदशक्यम् ततो नियमत: पङ्कजनिकर्तृपद्ममिति प्रतीते: । अवयवानां तत्रासामर्थ्यात् रूढिं विना योगमात्रात् कुमुदे प्रयोगधीप्रसङ्गाच्च । ननु रूढावपि योगात् कुमुदे तौ कुतो न स्याताम् । रूढ्या प्रतिबन्धादिति प्राञ्च: । वयन्तु नियमतो रूढ्या स्मृतं पद्ममेव व्यक्तिवाचकडप्रत्ययेन पङ्कजनिकर्तृतयानुभाव्यते, बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात् । **यथाग्नेयीति** ढगन्तपदेन प्रकरणादिना सन्निहिता ढगभिहिता ऋग्व्यक्तिर्बोध्यते। एवञ्च सर्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धीर्न वा तदर्थप्रयोग: ।

नन्वेवं रूढिरेवास्तु तत एवोभयलाभात् किं योगरूढ्या । न । अवायवशक्ते: क्लृप्तत्वात् यौगिकार्थानुभवाच्च। यदि च रूढ्यर्थ एव यौगिकार्थ एव वानुभूयेत, तदा विवाद एव न स्यात्, अनुभवेनैव तद्विच्छेदात् ।

**अत्र मीमांसका:** - न तावत् स्मृत्यर्थं शक्तिः। पङ्कजपदप्रयोगविषये नियतपद्मानुभवजनितसंस्कारात् स्मृतेरेवोपपत्तेः, स्मृतेस्तज्जन्यत्वनियमात् । नाप्यनुभवार्थं, नियमतः स्मृतं पद्ममादाय व्यक्तिवचनन्यायेनावयवै: पङ्कजनिकर्तृ पद्ममित्यनुभवसम्भवात्। स्मृतिश्च रूढ्या अन्यथा वेति न कश्चिद्विशेषः । शक्तिं विना नियमत: प्रयोग एव कुत इति चेत्, न । पूर्वप्रयोगमपेक्ष्य अवयवानामुक्तन्यायेन पद्मानुभवजनकत्वनियमात् । पूर्वप्रयोगोऽपि तत्पूर्वप्रयोगमपेक्ष्येत्यनादितैव । अथानियतोद् बोधस्य संस्कारस्य शक्तिं विना नियतोद् बोधे हेत्वभावात् नियता स्मृतिरेव न स्यादिति इति

चेत्, न । कदाचिच्छक्तितोऽपि उद्बोधाभावेन शक्यास्मरणात् शक्तिं विनापि नियमतः शक्तिस्मरणाच्च ।

उद्बोधकं च न नियतं, सदृशपदशक्तिसम्बन्धिज्ञानानां प्रत्येकं व्यभिचारात् । किन्तु यत्र स्मृतिः तत्र तत्कालोत्पन्नमनियतमेवोद्बोधकं कल्प्यते फलबलात् । कार्योन्नेयधर्माणां यथाकार्यमुन्नयनात् । न च पद्मत्ववत् तद्व्यापकादेरपि स्मृतिप्रसङ्गः । स्मृतिबलेनोद्बोधकल्पनमिति न तत्र स्मृत्यभावेन तदुद्बोधाभावात् । तस्मात् शक्तिं विना शक्तेरिव पद्मत्वस्य नियता स्मृतिः। न चैवं गवादिपदेऽपि न शक्तिः स्यात् । व्यवहारकालीनसंस्कारादेव गवादिस्मृतिसम्भवादिति वाच्यम् । न हि तत्र स्मृत्यर्थं शक्तिः । किन्तु अनुभवार्थं पदादन्यतो गवादेरनुभवासम्भवात् अव्युत्पन्नस्य ततोऽनुभवा सम्भवाच्च । पद्मानुभवश्च भोगादेवेति न समुदायो हेतुरन्यथायसिद्धत्वात् । अतो नानुभवबलात् समुदाये शक्तिकल्पनम् ।

नन्वेवं गवादिपदानां प्रमेयत्वे शक्तिरस्तु । गवादिस्मृतिः संस्कारादिति चेत्, न । गोव्यवहारेण स्वोपपादके गोज्ञाने पदस्य शक्तिकल्पनं, न त्वनुपपादके प्रमेयत्वेन गोज्ञाने गोपदात् प्रमेयो गौरित्यननुभवाच्च । अथैवं संस्कारादेव तीरादिस्मृतिसम्भवे गौणलाक्षणिकोच्छेदः । तीराद्यनुभवार्थं हि न तत्कल्पनं तदनुभवस्येतरपदादेव सिद्धेः तयोरननुभावकत्वात् । तस्मान्नियता स्मृतिः वृत्तिसाध्येति तयोः कल्पनात् । तथा च नियतपद्मस्मृत्यर्थं पङ्कजपदेऽपि वृत्तित्वेन शक्तिकल्पनमावश्यकं लक्षणाद्यभावादिति चेत्, न गङ्गायामित्यादौ वृत्तिं विना तीरादेरपदार्थत्वे विभक्त्यर्थान्वयस्तत्र न स्यात् । विभक्तीनां प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वव्युत्पत्तेः । पद्मस्य तु पङ्कजवाक्यप्रतिपाद्यत्वेन पाचकादेरिव विभक्त्यर्थान्वयोपपत्तिः

**यत्तु** शब्दोपस्थित एव शाब्दान्वयबोधः । अन्यथा प्रत्यक्षोपस्थिते कलाये पचतीत्यन्वयबोधः स्यादिति । **तन्न ।** पदस्य तत्र तात्पर्याग्रहात् । तद्ग्रहे भवत्येव किं पचसीत्युक्ते वधूपदर्शितकलायादौ। अन्यथा दैवात् श्रुतस्मृतकलायपदात् कुतो नान्वयबोधः ।

द्वारमित्यादावपि न पिधेहिपदाध्याहारः । किन्तु तदर्थस्यैव लाघवात् । न च पद्मममानयेत्यादौ शाब्दानुभवे पद्मोपस्थापकपदजन्यत्वादन्यत्रापि तथेति वाच्यम् । शाब्दपद्मानुभवे हि तदन्वयबोधतात्पर्यकपदत्वेन कारणता न तु पद्मोपस्थापकपदत्वेनापि गौरवात् ।

अथैवं जनिकाल एव प्रयोगः स्यात् न **तदत्यये**ऽपि । न ह्यसति हि दण्डे दण्डीति व्यपदिश्यत इति चेत्, न । पाचकादिपद इव प्रत्ययस्य योग्यताशक्तत्वात्, तल्लक्षकत्वाद्वा, उपसर्गादौ तथा निर्णयात् । अन्यथा योगरूढावपि जनिकाल एव प्रयोगः स्यात् । योगत्यागे केवलरूढिवादे विवादाभावश्च । तथापि कुमुदे लक्षणा न स्यात् योगार्थस्याबाधादिति चेत्, न । वक्ष्यते हि तत्र तस्यासाधुत्वम् ।

**नव्यास्तु** नियमतः स्मृतपद्मस्यान्वयानुपपत्त्यनन्तरमेव कुमुदधीरिति न तत्र लक्षणाव्यवहारः वस्तुतो मुख्यतैव । तवापि पद्मत्वस्यायोग्यतया अनन्वये योगादेव कुमुदधीर्न लक्षणयेति । उच्यते । अस्ति व्युत्पन्नस्य पदज्ञानानन्तरं नियमतोऽन्वयप्रतियोगि-स्मृतिरतस्तद्धेतुसंस्कारोधकं प्रतिबन्धकं विना पदज्ञानमेव दृष्टानुविधानत्वादनु-गतत्वाल्लघुत्वाच्च । न तु प्रतिपदार्थस्मृतितत्कालोत्पन्नमनन्तमहदृष्टचरमनिर्वचनीयं गौरवात् ।

अतः पद्मस्मृतावपि गृहीतसम्बन्धं पङ्कजपदमपि तथेति सम्बन्धत्वेन शक्तिसिद्धिः। एवञ्च रथकारशब्देऽपि जातिविशेषे रूढिर्न स्यात् । संस्कारादेव तदुपस्थितिसम्भवात् । तथा च **"वर्षासु रथकारोऽग्नीनादधीते"**त्यत्र रूढ्यर्थस्य बलवत्वत्वेन शीघ्रमुपस्थितत्वात् जातिविशेषवत एवाधानं विधीयत इति राद्धान्तव्याघातः । यथा च शाब्दः सन्निधिरन्वयबोधाङ्गं तथोक्तमासत्तिप्रस्तावे ।

स्यादेतत्, । पद्मे नियतप्रयोगरूपसम्बन्धेन पङ्कजपदादेव पद्मस्मृतिरस्तु । एवञ्च पद्मे विभक्त्यर्थान्वयः शाब्दानुभवप्रवेशश्चोपपद्यते पङ्कजपदप्रतिपाद्यत्वात् । न च प्रतिपाद्यता वृत्त्यैव तदुपयोगिनी, पाचकमानयेत्यादौ वाक्योपस्थाप्ये तदभावात् । न च

पदाद्वृत्त्यैव स्मृतिः। किन्तु सम्बन्धिज्ञानाद्वृत्तेरपि सम्बन्धत्वेन स्मृत्युपयोगात्। अन्यथा पदाच्छक्तेः स्मृतिर्न स्यात् । गवादिपदे त्वेवं स्मृतिसम्भवेऽप्यन्वयानुभवार्थं शक्तिरित्युक्तम्।

एतेन पङ्कजपदान्नियमतः पद्मज्ञानं न वृत्तिं विना। अतो लक्षणाद्यभावे शक्तिरित्यपास्तम् ज्ञानं हि स्मृतिरनुभूतिश्च शक्तिं विनाप्युपपन्ना न तां कल्पयति अनन्यलभ्यस्यैव शब्दार्थत्वात् । अन्यथा शक्तिं विना पदान्नोपस्थितिरित्यन्वयेऽपि शक्तिर्लक्षणोच्छेदश्च । पङ्कजं पद्ममुच्यत इति प्रसिद्धार्थपदसामानाधिकरण्यात् पद्मस्य ज्ञापकं तत् सिध्यति न तु तच्छक्तम्। अत एव पङ्कजपदं पद्मशक्तम् नियमतस्तत्स्मारकत्वात् पद्मपदवदिति निरस्तम्। शक्तौ व्यभिचारात्, अनन्यलभ्यत्वस्य पद्मानुभावकत्वस्य चोपाधित्वाच्चेति ।

उच्यते । नियतपद्मस्मृतेरुक्तसम्बन्धेन पङ्कजपदसाध्यत्वे पद्मवत्तद्व्याप्यव्यापक-योरपि नियमतः स्मृतिप्रसङ्गः । अथ पद्मे प्रयोग एव पद्म एव प्रयोग इति नियतसम्बन्धेन पद्मेतरव्यावृत्तेन पद्मस्यैव पदात् स्मृतिः । न चैवं नियतप्रयोगादेव शक्तिसिद्धिः । अनन्यलभ्यस्यैव पदार्थत्वादिति चेत्, न। तर्हि ज्ञानस्यास्य हेतुत्वे सकलप्रयोगादर्शिनो बहुधा पद्म एव गृहीतप्रयोगस्य समव्याप्तिज्ञानाभावान्न नियता पद्मस्मृतिः स्यात् । स्वरूपसतस्तथात्वे वा अगृहीतपद्मप्रयोगस्यापि ततो नियतपद्मस्मृतिप्रसङ्गः ।

अथ यादृशः प्रयोगस्त्वया शक्तिग्राहकत्वेनाभिमतः स एव पद्मस्मारकोऽस्तु । न च पद्मत्वस्येव प्रयोगसमव्याप्तत्वेन गृहीतस्य सौरभादेरुपाधेस्ततः स्मृतिप्रसङ्गः। तवापि शक्तिग्रहप्रसङ्गात् । तयोस्तुल्यत्वेऽपि शक्तिग्राहकप्रमाणे लाघवादितर्कावतारान्नोपाधौ शक्तिरिति यदि तदा तर्कसहकृत एव शक्तिग्राहकत्वभिमतः सम्बन्धः पद्मस्मृतिहेतुरस्तु । तर्काद्यनवतारेऽपि बहुधा गृहीतप्रयोगस्य पद्मस्मृतिदर्शनान्न तथेति चेत्, तर्हि तवापि तर्कं विना शक्तिग्राहकाभावात् कथं पद्मस्मृतिरिति तुल्यम्। न चैवं तत एव शक्तिग्रहोऽपि स्यात् । अनन्यलभ्यस्यैव शब्दार्थत्वादिति ।

मैवम्, एवं गवादिपदेऽपि शक्तिग्राहकत्वाभितादेवंविधप्रयोगादेव ज्ञाताद्गवादेः स्मृत्यनुभवौ स्यातां किं शक्त्या । तस्मात् पदाधीना नियता स्मृतिः शक्तिसाध्या वा नियतसम्बन्धसाध्या वा वृत्तिसाध्या वा । तत्र परिशेषादिह शक्तिसाध्यैव । न च शक्तिस्मृतौ व्यभिचारः । शक्तिस्मारकत्वाभिमताद्धि पदात् पदार्थस्यैवाहत्य स्मरणं न शक्तेर्हेत्वभावात् कल्पनागौरवाच्च सम्बन्धिनं विना सम्बन्धस्यास्मरणेन प्रथमं पदार्थस्मरणस्यावश्यकत्वाच्च । पदार्थस्मृतेश्च शक्तिविषयत्वे मानाभावात् । उद्बुद्धसंस्कारविषयत्वाद् यदि शक्तिरपि तद्विषयः तथापि पदार्थशक्तत्वेनैव ज्ञातस्य पदस्य शक्तिस्मारकता न तु शक्तिसम्बन्धित्वेन अन्यथासिद्धत्वात् ।

यद्वा पदान्नियमतः स्मृतिर्नियतसम्बन्धसाध्या शक्त्यापि समं पदस्य शक्त्याश्रयत्वमेव नियतः सम्बन्धः। अपि च कुमुदेऽवयवशक्तिप्रतिबन्धार्थं रूढिः । न च नियतपद्मस्मृतिरेव प्रतिबन्धिका। रूढिं विना नियतस्मृतेरभावात् । अत एव न व्यक्तिवचनन्यायोऽपि । नचैकं पदमेकदैकेनैव रूपेण प्रवर्तते । अतो न पद्मत्वपङ्कजत्वयोर्धीरिति वाच्यम् । अवयवसमुदाययोर्भेदात् लम्बकर्णादिपदे व्यभिचाराच्च । तर्हि तद्वदेव रूढ्या नावयवशक्तिप्रतिबन्ध इति चेत्, न । तत्रावयवार्थ-क्रियान्वयेनाप्रतिबन्धान्नानार्थे च नानार्थानुभवात् नैकशक्त्यान्यशक्तिप्रतिबन्धः। **यत्तु** अवयवशक्तिस्मृतिकाले समुदायशक्तिस्मृतिनियमे हेत्वभावान्न तया प्रतिबन्ध इति । **तन्न** । समुदायस्य तावदवयवरूपत्वेन सर्वावयवादेवोभयशक्तिस्मृतिसम्भवात्, मण्डपपदे तथा दर्शनात् ।

**अथ** पङ्कोत्तरजपदं प्रतिबन्धकं गोबलीवर्दवत् पङ्कजनिपदप्रयोगे उप्रत्ययस्य कर्तृविशेषपद्मपरत्वं वा जनेः पद्मजनिविशेषपरत्वं वा स्वभावादेव कुमुदबोधाजनकत्वं वा चक्षुष इव रसे कुमुदेऽवयवशक्तिकुण्ठनं वा कल्प्यताम्। तेन कुमुदे न धीरिति चेत्, तह्यज्ञातपद्मप्रयोगस्य कुमुदसाधारणबोधो न स्यात् । न भवत्येवेति चेत्, किमवयवव्युत्पन्नस्य । ततोऽर्थप्रत्यय एव न भवति । यद्वा पङ्कजत्वेन पद्ममेवानुभूयते।

आद्ये मन्दुरजादिपदादिव सामग्रीसत्त्वे कथं नानुभवः । द्वितीये कुमुदमप्यनुभूयेताविशेषात् । न चैवं पङ्कजशब्दस्य सामान्यशब्दत्वात् तात्पर्यवशेन विशेषतः पद्मकुमुदधीसम्भवात् न रूढिर्न वा लक्षणास्यादिति वाच्यम्। न हि प्रयोजनक्षतिभयेन सामग्री नानुभावयति ।

यदि च पद्मकुमुदयोस्तुल्यता तदा अगृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्तिपुरःसरैव कुमुदधीर्न स्यात् । स्याच्च कदाचिद्वैपरीत्यम् । अतः पद्मे रूढिरेव। कुमुदे यथा लक्षणातथा वक्ष्यामः । कुण्ठनञ्च शक्तिवृत्तिधर्मान्तरं वा शक्तेरनुद्भवो वा अभिभवो वा तत्र कारणान्तरं वा अदृष्टचरं कल्प्यम् । रुढेः प्रयोगप्रतिबन्धकत्वं मण्डपादौ दृष्टमेव । अत एव पङ्काद्यवयवैः पद्ममेवानुभाव्यत इति अवयवनियमस्य कल्पनान्न कुमुदे धीप्रयोगौ । अन्यथा रूढावपि योगान्न कुतस्तौ कुमुदे । यथा उद्भित्पदस्य योगात् खनित्रे रूढ्या कर्मविशेषे प्रयोग इति निरस्तम्। अगृहीतनियतपद्मप्रयोगस्य कुमुदसाधारणबोधदर्शनात् ।

रूढिवादे तु सैव प्रतिबन्धिका मण्डपपदवत् । ज्ञातस्य चावयवनियमस्य प्रयोजकत्वे पद्मे शक्तिरेव पद्मज्ञानजनकत्वज्ञानस्य शक्तिनिर्वाह्यत्वात् । उद्भित्पदे त्ववयवार्थः कर्मण्ययोग्यत्वादेव नान्वीयते न तु रूढ्या प्रतिबन्धात् । अवयवान्वययोग्ये खनित्रेऽपि न प्रतिबन्धः योगेन खनित्रेऽपि प्रयोगात् । एवञ्च रूढियोगाभ्यामुद्भित्पदस्य नानार्थतुल्यतैव उभाभ्यामेकार्थानवगमात् ।

ननु गृहीतपद्मप्रयोगस्यावयवैःसह प्रयोगे पद्ममेवानुभाव्यत इति स्वभावकल्पनमस्तु । नचैवं व्युत्पत्त्यन्तरं । स्वरूपसत एव प्रयोगग्रहस्य शक्तिग्रहस्येवोपसन्धानत्वात् उपसर्गस्येव धातोः प्रकर्षादिबोधकत्वे , उपसन्धानं विना कुमुदबोधो भवत्येव ।

**यत्तु** पदानां स्वार्थान्वयबोधसामर्थ्यं उपजीव्य कुमुदाबोधार्थं नान्विताभिधानेऽवयनियमः कल्प्यते उपजीव्यविरोधात् । किन्तु समुदायस्य कुमुदे स्वार्थत्वाभाव **एवेति । तन्न ।** एवं स्वार्थत्वाभावेन समुदायात् कुमुदधीर्न स्यात् अवयवेभ्यस्तु स्यादेवेति ।

**मैवम्** । न हि पदानां स्वभावाधीनं बोधकत्वम्। किन्तु शक्तिज्ञानाधीनं अज्ञातशक्तेरबोधकत्वाच्छक्तिभ्रमेण बोधकत्वाच्च । तथाच बोधकशक्त्यभावादेवाबोधकत्वं कार्याभावे हेत्वभावस्यैव तन्त्रत्वात् । धातोश्चोपसर्गोपसन्धानात् प्रकर्षादौ शक्तिरेव ।

स्यादेतत्। यथा सर्वनामत्वमहम्पदेषु बुद्धिस्थत्वसम्बोध्यत्वोच्चारयितृत्वानि प्रयोगोपाधयः। तेन बुद्धिस्थात्वादिकमेव तद्बोधयति। तत्रैव प्रयुज्यते च। न तु बुद्धिस्थत्वादिकं शक्यम्। तेन रूपेण ज्ञानाभावात् । तथा पद्मत्वमपि प्रयोगोपाधिरिति चेत्, न । तेन हि नावयवशक्तिर्विच्छिद्यते पद्मे तत्सत्त्वात् । नापि कुमुदे तात्पर्यमपोद्यते, बाधकं विना तस्यौत्सर्गिकत्वात् । नाप्यवयवाधीनज्ञानं प्रतिबध्यते । शक्त्याकाङ्क्षादितात्पर्याणां सत्त्वे अन्वयज्ञानस्यावश्यकत्वात् उपाधेरन्वयबोधप्रतिविबन्धाहेतुत्वात् । नापि प्रयागोवार्यते, इष्टकुमुदधीहेतुतया इष्टसाधनताज्ञानस्य तल्लिङ्गककार्यताज्ञानस्य वा प्रयोगहेतोः सत्त्वे अप्रयोगस्याहेतुत्वात् । अहमादिपदे त्वात्ममात्रशक्ते शक्तिग्रहसहकारितया स्वरूपसदेव उच्चारयितृत्वादिकं धीनियामकं स्वभावान्नियमतस्तस्यैव बोधनादिति स्वरूपसत एवोपाधित्वम् । पद्मत्वन्तु न तथा । कुमुदसाधारणबोधदर्शनात् ।

ननु कुमुदे पूर्वेषामप्रयोगादाधुनिकानामप्रयोगः। न च प्रयोगमात्रे को हेतुरिति वाच्यम्। प्रयोगाणां हि न मेलनकार्यता । किन्तु प्रत्येकम्। तत्रोत्तरस्य पूर्वो हेतुः। यथा पूर्वगौरुत्तरस्य। अन्यथा गोमात्रे को हेतुरित्यत्र किमुत्तरं तवेति चेत्, न प्रयोगहेतोः सत्त्वात् पूर्वप्रयोगस्य चाहेतुत्वात् पूर्वप्रयोगमज्ञात्वाप्यवयवव्युत्पन्नेन पाचकादिपदानां नवकाव्यानां गौणलाक्षणिकदेवदत्तादिपदानाञ्च प्रयोगात् ।

स्यादेतत् । ग्रामगामादिपदेऽन्वयबोधाभावात् साधुत्वज्ञानमपि हेतुः । न चैवं तदेव हेतुरस्तु किं शक्त्या। गौणलाक्षणिकविवेकश्च सोपाधित्वानुपाधित्वाभ्यामेवास्तु इति वाच्यम् । प्रथमं व्यवहारेण शब्दस्य ज्ञानकारणतावगमात् तत्रैव शक्तिकल्पनम्। ततो ग्रामगामादौ व्यभिचारादाकाङ्क्षादेरिव साधुत्वज्ञानस्य हेतुत्वकल्पनात् । साधुत्वञ्च न

पूर्वप्रयोगप्रवाहाविच्छेदः । नवकाव्यादौ तद्भावात्। किन्तु भ्रमादिजन्यत्वाभावः । कुमुदे च तत्प्रयोगो बोधकत्वभ्रमात् । न चैवं भ्रमजन्यत्वादबोधकत्वम् अबोधकत्वे च भ्रमजन्यत्वम्। इत्यन्योन्याश्रयः । पूर्वभ्रमजन्यत्वेनोत्तरं प्रति बोधकत्वभ्रमात् उत्तरस्य प्रयोगो भ्रमजन्यः । एवं पूर्वस्यापीति तत्र भ्रमपरम्परैव मूलम्। एवं ग्रामगामादेरपि ।

कथमिदं ज्ञातव्यमिति चेत्, ग्रामगमनकर्तरिकिग्रामगामपदस्येव प्रामाणिकानां कुमुदे तस्य निरुपाधिप्रयोगाभावात् । अत एव साधुत्वभ्रमात् कुमुदसाधारणो बोधोऽपि । कुमुदे ह्यसाधुत्वात् समुदायेन तत्र पङ्कजन्मकर्तृत्वं लक्ष्यते । न चासाधुत्वे ग्रामगामपदवत् लक्षणापि न स्यात्, पद्मे तस्य साधुत्वात् । उच्यते । पङ्कजन्मकर्तरि तत्प्रयोगस्य भ्रमाद्यजन्यत्वेन साधुत्वम्। कुमुदे न तथेति चेत्, न । पुण्डरीकवन्नवपद्मवच्च तस्य व्यक्तिस्थानीयत्वात् । प्रतिवाक्यार्थञ्च साधुत्वज्ञानस्य हेतुत्वे अभिनवव्यक्तौ भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यतया पाचकादिपदप्रयोगो न स्यात् । पाककर्तृजातीये भ्रमाद्यजन्यत्वस्य सुग्रहत्ववत् पङ्कजन्मकर्तृजातीयेऽपि सुग्रहत्वात् येन रूपेणान्वयबोधस्तस्य कुमुदवृत्तित्वात् ।

अथ पङ्कजपदं कुमुदे वृत्यन्तरं विना न साधु, वृत्यन्तरं विना वृद्धैस्तत्राप्रयुज्यमानत्वात्। यः शब्दः यत्र वृध्यन्तरं विना वृद्धैः न प्रयुज्यते स तत्र वृत्यन्तरं विना न साधुः। यथा गङ्गापदं तीरे । यथा वा ग्रामगामपदं ग्रामगमनकर्तरि । न प्रयुज्यते च वृत्यन्तरं विना पङ्कजपदं कमुदे । तस्मात् वृत्यन्तरं विना न तत्र साध्विति चेत्, न । व्यर्थविशेषणत्वात् । तत्रोप्रयुज्यमानत्वस्यैव व्याप्त्यत्वात् ।

आकाङ्क्षादिमवद्वाक्यासाधुत्वे अवयवार्थान्वयाबोधकत्वस्य व्याकरणस्मृत्यनुपगृहीत-त्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकस्योपाधित्वाच्च । पक्षे उभयाभावेन साधनाव्यापकत्वात् । पङ्कजशब्दः कुमुदे साधुः साधुत्वे सति कुमुदबोधप्रयोजकाकाङ्क्षादिमद्वाक्यत्वात् । साधुत्वे सति यद्वाक्यं यद्बोधप्रयोजकाकांक्षादिमत् भवति, तत्तत्र साधु यथा तरुप्रसूनशब्दः कुसुमे । यथा वा पाचकशब्दः पाककर्तरि, तथा पङ्कजपदं कुमुदे तस्मात्तथेति सत्प्रतिपक्षत्वाच्च ।

वस्तुतस्तु साधुत्वज्ञानं न हेतुः । अवयवादिव्युत्पन्नेन भ्रमाद्यजन्यं पूर्वप्रयोगमज्ञात्वापि नवकाव्यादि प्रयोगात् । कुतस्तर्हि ग्रामगामादौ नान्वयबोधः। असाधुत्वनिश्चयादिति ब्रूमः। साधोरप्यसाधुत्वनिश्चयेनाबोधकत्वात् अभिनवकाव्यादौ नासाधुत्वनिश्चयः । संशश्च न प्रतिबन्धकेः अन्यथा योगरूढिसंशये सत्यभिनवव्यक्तौ पाचकादिप्रयोगो न स्यात् ।

अन्ये तु ततोऽन्वयबोधो भवत्येव अपभ्रंशादिव यथा तव साधुत्वं तस्य नास्ति तद्वदेव यथा । **अपरे** त्वत्राकाङ्क्षैव नास्ति घटः कर्मत्वमानयनमित्यत्रेव ।

**यत्तु** गमाद्यनुत्तराण्त्वेन गमादिपूर्वेतराण्त्वेन वा शक्तिः काशपूर्वेतरकुशत्वेनेवेति । **तन्न** । कर्मोपपदाधातूत्तराण्त्वेनैव शक्तेर्न तु तत्तद्धात्वनुत्तराण्त्वेन गौरवात् । तत्तद्धातूनां विशिशिष्याज्ञाने शक्तिग्रहानुपपत्तेः कमण्यणिति सूत्रार्थमजानतः कुम्भकारादिपद-प्रयोगानुपपत्तेश्च शक्तिसन्देहात् ।

असाधुत्वञ्च न भ्रमादिजन्यत्वम् । अनोप्तोक्ते असाधुत्वापत्तेः । शुकाद्युदीरिते ग्रामगामादौ भ्रमाद्यजन्यत्वाच्च । किन्तु महाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धत्वं तदपरिगृहीतत्वं वेति वक्ष्यते । पदस्य साधुत्वं वृत्तिरेव । वृत्तिश्च शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थयोः सम्बन्धः ।

वाक्यसाधुत्वञ्चाकाङ्क्षादिमत्स्वार्थान्वयबोधकत्वे सति व्याकरणस्मृत्यनिषिद्धत्वम्। तस्मात् कुमुदे पङ्कजशब्दस्य साधुत्वे सति प्रयोगप्रतिबन्धकत्वेन समुदायशक्तिसिद्धिरिति । न चैवं लाघवात् जशब्द एव शक्तिरस्तु न समुदाये, मन्दुरजादौ पद्मधीप्रसङ्गात् । पङ्कोत्तरजपदत्वेन शक्तिरिति चेत्तर्हि सर्वत्र तत्तद्वर्णोत्तरान्त्यवर्ण एव शक्तिरिति समुदायशक्त्युच्छेदः । न चैवम्। विनिगमकाभावादिति **सम्प्रदायः** ।

अत्र ब्रूमः ज्ञाता हि या शक्यमनुभावयति सा शक्तिः । न च समुदायः पद्मानुभवहेतुः, अवयवादेव तदुपपत्तेः । एवञ्च प्रतिबन्धकमात्रे शक्तिपदं पारिभाषिकम्। शक्तित्वादनुभावकत्वसाधनेऽन्योन्याश्रयः प्रतिबन्धकत्वेनावगते शक्तित्वासिद्धिश्च । मण्डपादौ त्वनुभावकत्वेनैव शक्तिसिद्धिः । किञ्च रूढियोगयोर्विरोध एव परं रूढ्या

योगप्रतिबन्धः मण्डपादौ तथा निर्णयात् । अन्यथा लम्बकर्णदावपि योगप्रतिबन्धः स्यात् । न चेह विरोधः । पद्मे समावेशात् । योगादर्थधीश्चोभयत्र तुल्या।

**यत्तु** पङ्कजमानयेत्यादौ रूढ्या शीघ्रोपस्थितं पद्ममेव क्रिययान्वीयते । न पङ्क**जन्मकर्तृ** । तस्य वाक्यार्थत्वेन विलम्बितप्रतीतिकत्वात् । एवञ्चाविरोधेऽपि रूढेर्योगाप**हारितेति । तन्न ।** क्रियापदतदर्थयोग्यतादिज्ञानाधीनत्वेन क्रियान्वयबोधस्य विलम्बितत्वात् रूढ्यवयवार्थयोः अन्वयबोधस्य सामग्रीसत्वेन प्राथमिकत्वात् । तस्मान्न प्रतिबन्धकत्वेन रूढिसिद्धिः न वा तया योगप्रतिबन्धः इति ।

अत्रोच्यते । नियमतः पद्मस्मृत्यर्थमेव रूढिः रूढ्या च नियमतः स्मृतं पद्ममेवावयवैः पङ्कजनिकर्तृत्वेनानुभाव्यते । बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात् । अतः सर्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धीप्रयोगौ । न चैवमनुभवाजनकत्वेन न सा शक्तिः । या ज्ञाता नियमतः शक्यं ज्ञापयति सैव हि शक्तिः ज्ञप्तिश्च स्मृतिरनुभूतिश्चेति नियतस्मारिकापि शक्तिः । वस्तुतः स्वार्थस्मृतिद्वारा अवयवानामिव समुदायस्य स्वार्थानुभावकत्वमविशेषादिति पश्चादनुभाविकापि रूढिः पङ्कजमानयेत्यादावानयनादिना स्वार्थान्वयानुभवे समुदायावयवयोर्हेतुत्वाच्च ।

तस्मान्नियतस्मृतिहेतुत्वेनैव रूढिसिद्धिः न तु प्रतिबन्धकत्वेन । यदि च नियता स्मृतिः प्रकारान्तरेण भवति तदा योग एव, न रूढिः । रूढिन्यायेनैव कुमुदे धी-प्रयोगयोरभावादिति । गोपादस्य गवि वेदेऽहीनपदस्य कर्मविशेषे रूढिरेव, लाघवात् । न तु **"गमेर्डोरहन: खः क्रतावि"**त्यनुशासनाद्योगोऽपि । डोः खप्रत्यययोर्लोके कर्तरि कर्मविशेषे च शक्तिर्न क्लृप्ता । अतः प्रत्यये शक्तिः । नियामकञ्च गमिपदोत्तरत्वं अहः पदोत्तरत्वञ्च कल्प्यम्, तथा च गौरवम् ।

एवं धेनुपदेऽप्येकैकस्यातिप्रसक्तत्वात् गोत्वविशिष्टधानकर्मणि रूढिरेव। नियमतो गोत्वविशिष्टोपस्थितेः । न तु योगोऽपि । दानुभानुकृशान्वादौ भिन्नार्थत्वेन नुप्रत्ययशक्तेर-कल्पनात् **"गमेर्डोरहन: खः क्रतौ" "दाभाभ्यां नुर्धेट इच्चेत्या"**दिस्मृतिश्चालवड्डादिवत्

कथञ्चिद्व्युत्पादनपरा । अत एव **भगवान् पाणिनिरर्था**ननुगमात् समुदायशक्त्यपेक्षया गौरवादुणदिप्रत्ययेषु न शक्तिरिति पञ्चपादिकाविहितानुणादिप्रत्ययान् उणदयो बहुलमित्येकेनैव सूत्रेण विहितवान् । यत्र तु प्रत्यये शक्तिस्तत्र प्रत्येकमेवासूत्रयत् ।

**यत्तु** धेनुपदे गोत्वं न शक्यम् । किन्तु शक्योपलक्षणतया शक्त्युपाधिः । यत्र गोत्वं तद्धानकर्म शक्यम्। शक्यास्तूपलक्ष्या महिष्यादिव्यावृत्ता धानकर्मव्यक्तिविशेषा एव । अनुगमस्तूपलक्षणैक्यात् । न चैवं लाघवाद्गोत्वं शक्यं धानकर्मत्वमुपाधिः । उपलक्ष्यस्य गोत्वस्यातिप्रसक्तत्वात् । गोत्वविशिष्टधानस्मृतिस्त्वेकैव शब्दसंस्काराभ्यां जन्यते न तूभयस्मृत्यनन्तरं परस्परमन्वयबोधः अवयवशक्तेरभावा**दिति । तन्न ।** शक्तिं विना नियतगोत्वोपस्थित्यभावादुपलक्षणैक्येन उपलक्ष्यैक्याभावाच्च । अन्यथा महिष्यादिव्यावृत्तधानकर्मत्वेऽपि न शक्तिः । धानगोत्वे शक्त्युपाधी । अग्रे च संस्कारादुपस्थितयोस्तयोः कर्मणि धेनुपदादन्वयो भासत इति धानमपि न शक्यम् । यदि चानुगतं विशेषणं शक्त्युपाधिर्विशेष्ये च शक्तिरननुगमातिप्रसङ्गाभावश्चोपाधिनैव, तदौपाधिककारणादिपदानां विशिष्टे शक्तिर्न स्यात् ।

नन्ववयवात् पङ्कजनिकर्तृत्वानुभवः समुदायाच्च पद्मस्मरणं स्यान्न तु पङ्कजनिकर्तृ पद्ममित्यनुभव इति चेत्, न, अवयवसमुदायस्मारितपङ्कजनिकर्तृपद्मानां पङ्कजनिकर्तृ पद्ममित्यनुभवोऽवयवसमुदायाभ्यां सम्भूय जन्यते । समुदायोपस्थितपद्मेन समं स्वार्थान्वयोऽवयवैर्वा अवयवजनितानुभवोपस्थितपङ्कजनिकर्तृत्वेन समं स्वार्थान्वयः समुदायेन वा अनुभाव्यते । आकाङ्क्षाद्युपेतशब्दानां तात्पर्यविषयोपस्थापितस्वार्थान्वयबोधकत्वनियमात्। न च वाक्यान्तरे तथात्वादर्शननेन नैवं व्युत्पत्तिरिति वाच्यम् ।

वाक्यान्तरे हि समुदायशक्त्यभावेन तथा । अत्र तु समुदायशक्तिबलात् पदविधया वाक्यविधया वा एकस्मादेवोपस्थितयोः पङ्कजनिकर्तृपद्मयोरन्वयो बोध्यते। समुदायेन पदैकवाक्यतावत् । पङ्कजं कुमुदमित्यत्र समुदायेनैव पङ्कजनिकर्तृत्वमशक्यं

स्वार्थपद्मसम्बन्धि लक्ष्यते । कुमुदे साधुत्वात् कथं तत्र लक्षणेति चेत्, न । समुदायस्य तत्रासाधुत्वात् ।

**यत्तु** तत्र पद्मत्वमयोग्यतया नान्वेति योगादेव मुख्यया वृत्त्या कुमुदे पङ्कजनिकर्तृत्वं अनुभूयते **इति। तन्न ।** कुमुदेऽवयवशक्तेः समुदायशक्त्या ज्ञातया प्रतिबन्धात् तथैव तदवगमात् ।

ननु यदा व्यक्तिवचनन्यायात् न कुमुदे धीर्न त्ववयवशक्तिप्रतिबन्धात् तदा पङ्कजशब्दादुपस्थिते पङ्कजं पद्ममिति वाक्यार्थेऽयोग्यतया पद्ममपहाय पदवाक्यैकवाक्यतया पङ्कजनिकर्तृ कुमुदमित्यनुभव इति चेत्, तर्हि पद्मान्वितत्वेनोपस्थितस्य पङ्कजनिकर्तृत्वस्या श्रयाकाङ्क्षा नास्तीति स्वतन्त्रोपस्थित्यर्थमवश्यं लक्षणा, यथा पुरोडाशकपालपदेऽधिष्ठान-लक्षणा । ननु प्रथममेवावयवकुमुदपदैरन्वययोग्यतया स्मृतं पद्मं त्यक्त्वा स्वार्थान्वयानुभव इति चेत्, कुमुदपदतदर्थयोग्यतादिज्ञानात् पूर्वमेव पङ्कजशब्दात् पङ्कजं पद्ममित्यनुभवात् विलम्बे हेत्वभावात्, स्थलपङ्कजन्तु विजातीयमेव । साजात्येऽपि तत्र लक्षणा।

**यत्तु** अयोग्यतया योगार्थो नान्वेति किन्तु योग्यतया रुढ्युपस्थितं पद्मत्वमेवान्वीयते **इति । तन्न ।** पद्मत्वस्य योगार्थगतत्वेन उपस्थित्या निराकाङ्त्वात् । स्वतन्त्रोपस्थितये लक्षणाया अवश्यं वाच्यत्वादिति ।

नन्वेवं पङ्कजपदस्येवापभ्रंशानामपि शक्तिस्ततो नियमेनार्थप्रतीतेः व्यवहाराधीनव्युत्पत्तेरविशेषात् । अन्यथा असति वृत्त्यन्तरे तेभ्योऽर्थधीर्न स्यात् । न च लक्षणा, मुख्यार्थ बाधात् न चापभ्रंशेन स्मारितसाधुशब्दादन्वयबोधः साधुशब्दमजानतामपि पामराणां ततोऽर्थप्रतीतेः तदर्थकसंस्कृतेनार्थो प्रतीतेश्च । शक्त्यारोपात्ततोऽर्थप्रत्यय इति चेत्, न मानाभावात् व्यवहारादिनावृत्तशक्तिग्रहे बाधकाभावाच्च । न च शक्तिसाध्यं शक्यारोपाद्भवितुमर्हति, आरोपितादपि दहनाद्दाहापत्तेः ।

अथ ज्ञायमानकरणे प्रयोजकरूपवत्तया ज्ञायमानादेव फलं बाष्पे धूमारोपाद्वत्न्यनुमितिवदिति चेत् न तर्हि तद्वदेव फलस्यायथार्थत्वापत्तिः । अन्यथा अपभ्रंश एव शक्तिः साधुशब्द एव तथेति किं न स्यात् । न च सादित्वात् देवदत्तादिशब्दवदाधुनिका एव तत्र शङ्केताः गवादिपदे त्वनादित्वात् शक्तिरिति वाच्यम् । सजातीयप्रयोगजन्यप्रयोगत्वस्य भ्रमाद्यजन्यत्वस्य वा अनादित्वस्यापभ्रंशेऽपि सत्वात् । तत्तद्देशीयापभ्रंशेऽपि सङ्केतयितॄणामस्मरणाच्च । न चापभ्रंशानां देशभेदेन एकत्रार्थे बहुत्वात् संस्कृतस्यैकत्वाल्लाघवेन तत्रैव शक्तिः। प्रमाणवतो गौरवस्यापीष्टत्वात् । अन्यथा नानार्थोच्छेदः प्रतीत्यन्यथानुपपत्तिस्तुल्यैव ।

ननूभयोः शक्तत्वे साध्वसाधुविभागाभावात् तद्व्यवहारविरोधः। ''साधुभिर्भाषितव्यम्'', **"नापभ्रंशितवै, न म्लेच्छित वै"** इत्यादिकवैदिकविधिनिषेधानुपपत्तिश्चेति चेत्, तर्हि शक्तत्वाविशेषेऽपि तदभियुक्तेन्द्रपाणिन्यादिप्रणीतव्याकरणौपगृहीतानामेव संस्कृतानां साधुत्वमस्तु । न ह्यपभ्रंशे तैः साधुत्वं स्मर्यते । तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः तेषामेव धर्मोपयोगित्वं स्वभावात् बीजस्येवाङ्कुरे । तस्मादपभ्रंशोऽप्यर्थप्रत्यायकत्वाच्छक्त इति ।

उच्यते । एकत्र शक्त्याप्यन्यत्र तदारोपात् तदर्थप्रतीत्युपपत्तावेकत्रैव शक्तिर्लाघवात्। अनन्यलभ्यस्यैव शब्दार्थत्वात् । अन्यथा वृत्यन्तरोच्छेदः । तदाह-भगवान् जैमिनिः **"अन्यायश्चानेकशब्दत्वमि"**ति । सा च शक्ति: संस्कृत एव सर्वदेशे तस्यैकत्वात् नापभ्रंशेषु तेषां प्रतिदेशमेकत्रार्थे भिन्नभिन्नरूपाणां तावच्छक्तिकल्पने गौरवात् पर्यायबहुतरत्वञ्चोभयत्रापि । न च देशभेदेऽपि प्राकृतस्यैकरूपत्वात् तत्रैव शक्ति:। संस्कृतप्रभवतत्समदेश्शिभेदेन तस्याप्यनेकत्वात् । एवमेकत्र शक्त्यारोपदार्थप्रत्ययोपपत्तौ नापभ्रंशे शक्ति:।

ननु म्लेच्छादीनां संस्कृतमजानतां कथं तच्छक्यारोपः । उच्यते । केनचिद्गौरिति शब्दे प्रयोक्तव्ये प्रमादाद् गावीशब्दे प्रयुक्ते व्युत्पन्नस्तेन गोशब्दमुन्नीय ततो गां प्रतीत्य व्यवहृतवान् । यथाहु: :-

"अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।

अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः" ।।

इति पार्श्वस्थश्च व्युत्पित्सुर्गावीशब्दादर्थदेव अयं गां प्रतीतवान् इत्यवगम्य गावीशब्दमेव गोशक्तत्वेन प्रतीत्य अन्येषां व्युत्पादको बभूवेति ततः प्रभृत्यपभ्रंशे शक्तत्वभ्रमः । एवञ्च प्रथमव्युत्पन्नस्यापभ्रंशादेव स्मारितसाधुशब्दादर्थप्रत्यय-स्तन्मूलकश्चाननुसंहितसाधुशब्दानामपि शक्तिभ्रमात् शक्तिमत्तया ज्ञायमानस्यैव शाब्दज्ञानहेतुत्वात्।

यत्तु-जनकज्ञानस्य भ्रमत्वे शाब्दज्ञानायथार्थत्वं लिङ्गभ्रमजन्यानुमितिवदिति । **तन्न** । न हि शक्तिज्ञानयथार्थत्वं शाब्दप्रमायां प्रयोजकं, अनाप्तोक्ते व्यभिचारात्। नापि जनकज्ञानभ्रमत्वेन अयथार्थत्वं भ्रमानुव्यवसाये व्यभिचारात् । प्रमाजनकत्वञ्चाप-भ्रंशस्यावश्यकशाब्दप्रमाप्रयोजकयोग्यतादेर्यथार्थतद्बोधाद्वा न तु शक्तिज्ञानयथार्थत्वं तन्त्रं गौरवात् । अबाधितसंसर्गज्ञानजनकपदार्थोपस्थापकत्वा**दित्यन्ये** । संसर्गबाधकप्रमाविर-**हादित्यपरे** ।

ननु साधुत्वं न प्रतिपादकत्वं अपभ्रंशेऽतिव्याप्तेः । नापि यस्य यत्रानादि प्रयोगः स तत्र साधुः **"हेऽरयो हेऽलय इति वदन्तोऽसुराः पराबभूवुरिति"** वेदे श्रवणात् अलिशब्देऽपभ्रंशे गतत्वात्, संज्ञाशब्दाव्यापनात् । लौकिकगौणलाक्षणिकयोरसाधुत्वापत्तेश्च । तथाभ्युपगमे वेदेऽपि तयोः साधुत्वं न स्यात् । अनादित्वं सजातीयप्रयोगपूर्वकत्वम् । अपभ्रंशेऽपि नियमतस्तथात्वञ्च सर्गादौ स्वतन्त्रपुरुषप्रयोगेऽव्यापकं भ्रमाद्यजन्यत्वमपभ्रंशेऽपि।

ननु साधुत्वं जातिर्गत्वादिव्यापिका । न चानुपलब्धिबाधः, व्याकरणसंस्कृतश्रोत्र-ग्राह्यत्वात् । न च संज्ञाशब्दानामसाधुत्वापत्तिः । तत्रापि प्रकृतिप्रत्ययोह सम्भवात् । गाव्यादिशब्देऽपि तत्सम्भवात् साधुत्वञ्च स्यादिति चेत्, न । यत्रार्थे तथा सम्भवः तत्र तथैव गवादौ न तथेति तत्रासाधुत्वमिति चेत्, न । जातिरूपत्वे सप्रतियोगिकत्वानुपपत्तौ सर्वस्य सर्वत्र साधुत्वापत्तेः ।

ननु गोशब्दः अश्वे प्रयुक्तः साधुरेव। ज्ञापकस्तु न भवति तच्छक्तत्वेनाज्ञानादिति चेत्, एवं गावीशब्दोऽपि कयाचिद्व्युत्पत्त्या क्वचित् साधुरिति साधुत्वजातियोगात् गव्यपि

साधुः स्यात् । प्रतिशब्दञ्च भिन्नतद्विषयजातिस्वीकारेऽननुगमः । तारत्वादेस्तु जातित्वेऽप्युत्कर्षरूपतया अवधिनिरूप्यत्वम् । नापि यज्ञप्रयोगार्हत्वं साधुत्वम् । एकमवच्छेदकं विना प्रतिशब्दमर्हत्वस्य दुर्निरूप्यत्वात् । साधुत्वेनैव यज्ञे विधानात् । चाण्डालाद्युच्चार्यमाणस्यापि साधुत्वात् । यज्ञाग्रहणेऽपि साधुत्वव्यवहाराच्च । नापि धर्मजनकशब्दत्वम् । अपभ्रंशेऽपि गतत्वात् । पतितोच्चार्यमाणस्यापि साधुत्वाच्च । नापि वेदस्थशब्दत्वम्। अपभ्रंशेऽलिशब्देऽपि गतत्वात्, संज्ञाशब्दे तदभावात् । भाषायां **सदवसश्रुव** इत्यादेः साधुत्वानुशासनविरोधात् सर्वेषां साधुत्वेन सप्रतियोगिकत्वानुपपत्तेश्च । न हि क्वचिद्विषये तद्वेदस्थं क्वचिन्नेति युज्यते, विरोधात् । नापि व्याकरणव्युत्पाद्यशब्दत्वम्। संज्ञाशब्दे तदभावात् । साधुत्वेन सिद्धे व्याकरणप्रवृत्तेः साधुत्वान्वाख्यापकस्य व्याकरणशब्दवाच्यत्वात् ।

उच्यते । यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र शक्तः साधुरित्युच्यते । परेषां शब्दार्थयोः स्वाभाविकसम्बन्धवत् अस्माकमीश्वरसङ्केतस्य नियामकत्वात् । यथा या काचिदोषधी नकूलदंष्ट्रा स्पृष्टा सा विषं हन्ति तथा प्रतिपादकत्वाविशेषेऽपि ईश्वरसङ्केतिता एव शब्दा धर्मोपयोगिनः स्वभावात्। तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः। ईश्वरसङ्केतज्ञानञ्च व्यवहारात् उपमानात् प्रसिद्धार्थपदसामानाधिकरण्यात् आप्तोपदेशात् यववराहेन्द्रादिशब्देषु वाक्यशेषात् कोषात् तदभियुक्तेन्द्रपणिन्यादिरप्रणीतशब्दानुशासनाच्च । तेषां साध्वसाधुविभाग एवाधिकारात् । तदुक्तं **“तत्र तत्त्वमभियोगात् स्यादि”**ति ।

**"अभियुक्ताश्च ये यत्र यन्निबद्धप्रयोजनाः ।**
**ते तत्र गुणदोषाणां ज्ञाने चाधिकृता मताः" ।। इति ।**

न च साधुत्वे सिद्धे शब्दानुशासनं तस्मिंश्च सति तद्धीरित्यन्योन्याश्रयः ।

पूर्वपूर्वशब्दान्वाख्यानेन साधुत्वमवगम्य उत्तरोत्तरानुशासनप्रवृत्तेः । सर्गादौ भगवत एव तत्प्रणीतव्याकरणाद्वा साधुत्वनिश्चयेन उत्तरव्याकरणप्रवृत्तिः । विश्रामविश्रमशब्दयोश्च साधुत्वे पाणिनिचन्द्रगोमिव्याकरणविरोधे **"वौ श्रमेर्विकल्प इष्यत"** इति **महाभाष्यकारवचनादुभयमपि साधु** ।

ननु मैत्रादिशब्दानामीश्वरसङ्केताभावादसाधुत्वे यज्ञादौ न प्रयोग: स्यादिति चेत्, न । **"द्वादशेऽहनि पिता नाम कुर्यादित्यनेन"** सामान्यतस्तेषामपीश्वरसङ्केतविषयत्वात् ।

ननु वासुदेवशब्दस्य वसुदेवापत्ये व्याकरणेन व्युत्पादनात् तत्रैव साधुत्वं न त्वाधुनिकसङ्केतविषये । अथ तत्र प्रकृतिप्रत्ययविभागपरिकल्पना कर्तव्या । तर्हि गाव्यादिशब्देऽपि तथात्वं सम्भवतीति तस्यापि साधुत्वं स्यादिति चेत्, न । **"द्वादशेऽहनि**

**पिता नाम कुर्यादिति" सामान्यतः** तस्येश्वरसङ्केतितत्वेन तस्य साधुत्वनिश्चयात् व्याकरणस्य तद्विशेषविषयत्वमस्तु । न तु गावीशब्दे तथा ।

अथ शास्त्रकारसङ्केतितशब्दादश्वादिषु सङ्केतितगवादिशब्दाद्वा कथमर्थप्रत्ययः। शक्तितदारोपवृत्त्यन्तराणामभावादिति चेत्, न, येन शब्देन उपस्थितेऽर्थे गवादिशब्दसङ्केतग्रहः तस्मादेव गवादिपदेन स्मारितादर्थप्रत्ययात् चेष्टास्मारितपदादिवेति **सम्प्रदायः** ।

**अत्र वदन्ति । नेश्वर**सङ्केतितत्वं साधुत्वम्। तस्य निष्प्रतियोगिकत्वेन सर्वत्र सर्वस्य साधुत्वापत्तेः । नापि यः शब्दः **यत्रेश्वरेण** सङ्केतितः स तत्र साधुः । गौणलाक्षणिकयोरसाधुत्वापत्तेः । केवलयोः प्रकृतिप्रत्यययोः बाधतिग्रामगाम इत्यादेश्च साधुत्वापत्तेः । बाधतीत्यादौ समुदायस्यासङ्केतितत्वादसाधुत्वे बाधत इत्यस्यापि साधुता न स्यात् । प्रकृतिप्रत्यययोः प्रत्येकं सङ्केतितत्वात् । अन्वयस्य प्रत्येकशक्तिलभ्यत्वात् । प्रत्युत प्रकृतिप्रत्ययसमुदायो न साधुः स्यात्, समुदायस्यासङ्केतितत्वात् ईश्वरसङ्केत-मज्ञात्वापि व्याकरणव्युत्पाद्यत्वमवधार्य साधुत्वव्यवहाराच्च । शक्तत्वं साधुत्वमित्यपि न । ईश्वरसङ्केतोक्तदोषग्रासात् ।

अत्रोच्यते । व्याकरणव्युत्पाद्यत्वं साधुत्वम्। यः शब्दो यस्मिन्नर्थे व्याकरणव्युत्पादितः स तत्र साधुः । अत एव गावीशब्दो व्याकरणोक्तव्युत्पत्त्या यमर्थं प्रतिपादयति स तत्र साधुरसाधुरन्यत्र । नाम्नाम**"प्युणादयो बहुलमि"**त्यादिना व्युत्पादनात् । केवलप्रकृतिप्रत्यययोर्बाधतिग्रामगाम इत्यादेश्च न व्युत्पाद्यत्वं, तत्प्रयोगस्यानभिधानात् निषेधाच्च । गौणलाक्षणिकयोश्च यथा प्रतिपादकत्वं तद्व्युत्पादनमपि तत्र तथेति तयोरपि साधुत्वम्। तस्माच्छक्तत्वमीश्वरसङ्केतितत्वं वा अज्ञात्वापि साधुत्वव्यवहारात् ज्ञात्वाप्यव्यवहाराच न तत्साधुत्वं, किन्तु व्याकरणपरिगृहीतत्वतदभावाभ्यामेव प्रामणिकानां साध्वसाधुव्यवहारात् तावेव ते । न च साधुशब्दव्युत्पादकत्वमेव व्याकरणत्वम् इत्यात्माश्रयः । शब्दगुणदोषविद्वद्भिः अभिमुक्तैः प्रकृतिप्रत्ययादिकल्पनया शब्दान्वाख्यायकस्य व्याकरणत्वात् । न च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वं तद्व्युत्पाद्यत्वे साधुत्वं

इत्यन्योन्याश्रय: पूर्वपूर्वव्याकरणत: साधुत्वमवगम्य उत्तरोत्तरव्याकरणेन व्युत्पादनमित्युक्तत्वात् ।

ननु तद्धीजनकतावच्छेदिकाया: शक्ते: तद्धीजनकताविषयकेश्वरसङ्केतस्य वा ज्ञानादर्थप्रत्यय इत्यावश्यकत्वात् लाघवाच्च तद्धीजनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु। किं शक्तेरीश्वरसङ्केतस्य वा ज्ञानेन। अन्यथा मीमांसकस्य शक्तिज्ञानादर्थप्रत्ययो नैयायिकस्येश्वरसङ्केतज्ञानादिति व्यभिचारेणैकस्यापि कारणता न स्यादिति । अत एव लौकिकानां शक्तीश्वरसङ्केताज्ञानेऽपि वृद्धव्यवहारादर्थज्ञाने शब्दस्य जनकत्वमवधार्य अग्रे शब्दादर्थप्रत्ययः । न चैवं लक्षणोच्छेदे गङ्गापदात् विलम्बितार्थधीर्न स्यादिति वाच्यम् ।

लाक्षणिकस्याननुभावकत्वात् । तथात्वेऽपि तीरज्ञानजनकत्वेन ज्ञातस्य न तीरज्ञापकत्वम्, किन्तु प्रवाहज्ञानजनकत्वेन लाघवात् । अथ ज्ञानजनकता ज्ञाप्यसम्बन्धाधीना प्रत्यक्षादौ तथा दर्शनादिति सम्बन्धत्वेन शक्तिसङ्केतयोरन्यतरसिद्धिरिति चेत्, न । तद्धीजनकत्वेन ज्ञातत्वस्यैव सम्बन्धत्वात् । न च तद्धीजनकत्वमेव न गृह्यते सम्बन्धज्ञानं विनेति वाच्यम् । तवापि ज्ञानजनकत्वज्ञानेनैवं प्रत्यक्षादिवदत्रापि सम्बन्धत्वेन शक्तिकल्पनात् । अन्यथा अन्योन्याश्रयः। सम्बन्धज्ञाने सति ज्ञानजनकत्वज्ञानं, तस्मिन् सति सम्बन्धज्ञानात् । यथार्थतद्धीजनकत्वज्ञानं यत्र भवति तत्र तत्पूर्वं सम्बन्धोऽस्त्येवेति चेत्, अस्त्येव पूर्वपूर्वेषां तद्धीजनकत्वेन ज्ञातत्वस्य पूर्वमपि सत्त्वात् । एतावतापि शक्तिः सङ्केतो वा सम्बन्धोऽस्तु तथात्वेऽपि तद्बोधस्य नार्थप्रत्यायकत्वं गौरवात् । किन्तु तद्विषयधीजनकत्वज्ञानस्यैव । एवञ्च तद्धीजनकत्वेन ज्ञातं यत्पदं यदनुभवं जनयति तस्यैव तत्र शक्तत्वं न तु शक्तिरीश्वरसङ्केतो वेति ।

उच्यते । देवदत्तादिपदादर्थबुद्धौ सङ्केतज्ञानस्य कारणतावधारणात् अन्यत्रापि तत्कल्पनात् । न ह्यस्माच्छब्दादयमर्थो बोद्धव्य इति यस्तत्र सङ्केतः तद्बोधं विना ततस्तदर्थप्रत्ययः, सङ्केतज्ञानात् पूर्वं तद्धीजनकत्वस्य तद्ग्रहस्य वा असम्भवात् । सादिपदे तथा अनादिपदे त्वर्थप्रत्ययस्य अन्यथापि भावात् न तत्कल्पनेति चेत्, न । पदत्वस्यैव

प्रयोजकत्वे सम्भवति तत्र विशेषणे गौरवात् । सङ्केत एव मुख्या वृत्तिः तात्पर्यनिर्वाहकत्वात् । अन्वयप्रतियोग्युपस्थापकत्वाच्च ।

लक्षणा च वृत्त्यन्तरम्। यत्र वाच्यार्थान्वयानुपपत्त्या वाच्यसम्बन्धोपस्थापिते वाक्यार्थान्वयः । यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे । तदुच्यते**"वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः । तत्सम्बन्धवशप्राप्तस्यान्वयात् लक्षणोच्यते"** ।। इति ।

अथ तीरे शक्तिरेव शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारणत्वात् । पदानां सम्भूय वाच्यार्थान्वयबोधकत्वव्युत्पत्तेः पदजन्योपस्थितेः शक्तिसाध्यत्वात् । अन्यथा न तत्र शाब्दत्वं तात्पर्यं वा। तयोः शक्तिनियतत्वात् । किञ्च तीरे यदि तात्पर्यमवधृतं तदा तन्निर्वाहकत्वेन शक्तिरेव कल्प्या । क्लृप्तत्वादक्षादिपदवन्नानार्थतैव युक्ता । न त्वक्लृप्तवृत्त्यन्तरं कल्प्यत इति ।

उच्यते । गङ्गापदस्य लक्षणीयतीरादिसहस्त्रेषु प्रत्येकं शक्तिकल्पनं तद्ग्रहार्थं लक्षणीयेषु प्रत्येकं वृद्धव्यवहारान्तरापेक्षा स्यात् । तथा च गौरवमननुभवश्च । लक्षणातु शक्यसम्बन्धस्वरूपैका लक्षणीयविषयकवृद्धव्यवहारान्तरानपेक्षा चेति लाघवात् सैव युक्ता । न च गौरवमपि न्याय्यम्, प्रामाणिकत्वात् लक्ष्यत्वभिमतान्वयबोधस्य शक्तिं तद्ग्रहं वा विनानुपपत्तेः लक्षणायाः कापि कारणत्वाग्रहादिति वाच्यम् । शक्तिं विनापि तीरान्वयबोधोपपत्तेः ।

तथाहि-- व्युत्पन्नो निरूपिताप्तभावस्य गङ्गायां घोषः प्रतिवसतीति वाक्यं श्रुत्वा विमृशति इदं प्रमाणं आप्तोक्तत्वात् । सम्भवति चेदं तथा, । यथा वस्त्रेण पिधेहीत्यत्र कर्मत्वापन्ने द्वारे अध्याहृते योग्ये इतरपदैः स्वार्थान्वयो बोध्यते । तथा शक्या गङ्गापदस्मारितमुख्यार्थस्मारिते तीरे योग्याकाङ्क्षिते इतरपदैः स्वार्थान्वयबोधोऽत्रापि सम्भवति इति ततो मुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वयबुद्धिरस्य उत्पद्यते । एवञ्च तीरान्वितवाक्यार्थबुद्धिः तीरप्रतिबद्धवृद्धव्यवहारादिदर्शनं विनैव जायते पदानां स्मृतयोग्यान्वितस्वार्थप्रतिपादनस्य प्रागेव व्युत्पन्नत्वात् ।

एवञ्च तीरस्मृत्यनुभवयोः शक्यसम्बन्धज्ञानादेवोपपत्तेः न शक्तिः। स्वार्थसम्बन्ध एव च लक्षणा पश्चात्तु परम्परया गङ्गासम्बन्धितीरप्रतिपत्तये अनेनाप्तेन गङ्गापदं प्रयुक्तमिति तात्पर्यधीर्जायते । गङ्गास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते। न्यायत एव तीरस्य प्रथमं वाक्यार्थान्वयबोधोत्पत्तेः ।

अथवा निश्चिते स्वार्थसम्बन्धिनोऽन्वये तद्विशेषज्ञानार्थं तदपेक्षास्तु । न च तदर्थमपि । योग्यतादेरेव तद्विशेषलाभात् । अन्यथानुपस्थिते विशेषे तात्पर्यस्यावगन्तु-मशक्यत्वात् । शक्तिस्मारितशक्यसम्बन्धो वा तज्जन्या शक्यसम्बन्धस्मृतिर्वा लक्षणा । उभयथापि लक्षकपदस्य लक्ष्ये तात्पर्यज्ञानं लक्षणायामनुपयुक्तमेव । उक्तन्यायेन शब्दात् परम्परया अशक्यस्मृतेस्तात्पर्यग्रहात् पूर्वमेव क्लृप्तकारणादुपपत्तेः । शक्त्योपस्थापितार्थे शब्दतात्पर्यात् लक्षणेति । तात्पर्याद्धि वृत्तिरिति च लक्षणास्थले लक्ष्ये वस्तुतस्तात्पर्य-मस्तीत्येवम्परम् ।

नन्वेवं तात्पर्यानपेक्षणे यत्र तीरं नीरञ्चान्वययोग्यं तत्र कदाचित्तीरान्वयोऽपि बोध्येतेति चेत्, न । शक्त्युपस्थापितेन योग्याकाङ्क्षितेनैवान्विताभिधानमिति व्युत्पत्तेः। शाब्दत्वन्तु तीरस्याध्याहृतस्येव इतरपदैस्तीरान्वितस्वार्थान्वयाभिधानात् । तदेवं वृद्धव्यवहारादिदर्शनं विनैव तीरादौ लक्षणेति स्थितम् । अथवा गङ्गायां घोषः प्रतिवसति, तमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य तीरोषितघोषानयने प्रवृत्तिमुपलभ्य किं तीरेऽपि गङ्गापदस्य शक्तिरुत स्वार्थेन सम्बन्धात् स्मारिततीरे तात्पर्यमात्रम् । तीरान्विताभिधानन्तु पदान्तरैः । एवमप्ययोग्यार्थपरत्वाभावेन प्रामाण्यादाप्तोक्तत्वोपपत्तेरिति विचिकित्सन् बालः तीरादौ न शक्तिः तथासत्येकार्थसम्बन्धिषु बहुष्वेकपदस्य बह्वी शक्ति रेवं पदान्तरेष्वपि तेषु तेषु च शक्तिग्रहार्थं वृद्धव्यवहारापेक्षा च । तथा च गौरवमतः स्वार्थसम्बन्धिनि तीरादौ तात्पर्यमात्रम्, लाघवादिति तत्र तत्र लक्षणामेव कल्पयति ।

यस्य चैवं विमर्शः प्रथमं लाक्षणिकपदश्रवणेन जायते तस्य तत्र शक्तिबुद्धावपि यदा लक्षणाख्यवृत्त्यन्तरज्ञानं पूर्वोक्तन्यायेन जायते तदा प्रथमावगतशक्तिज्ञानं मम भ्रम इति

कल्पयति लाघवात् । अन्यत्र तु यत् प्रथमावगतस्य सत्यत्वकल्पनं तदुपपादककल्पनञ्च तल्लाघवादेव । अत्र तु न तथा । अन्यथा सम्बन्धिसहस्रेष्वपि शक्तिकल्पनाप्रसङ्गात् । एवञ्च लक्षणास्थले यस्य प्रयोज्यव्यवहारादाद्या व्युत्पत्तिः तीरादौ स यदा तीरनीरयोरन्वयबोधयोग्यप्रयोगे तीरे व्यवहारं पश्यति तदा तत्रैव शक्तिः तीरधीस्तु प्रयोज्यस्य लक्षणावशात् मम तदनाकलनात्तत्र शक्तिज्ञानं भ्रम इति कल्पयति ।

यदा तूभयानुगतमेकमेवावच्छेदकमस्ति उभयत्र प्रयोगश्च तत्रोभयत्र शक्तिरेव, न लक्षणा । तुल्यवद्व्युत्पत्तेरेकत्र मुख्यत्वोपमर्दे हेत्वभावात् । यत्र तु न तथा तत्रानेकार्थत्वमेव। अक्षादिपदे तावदन्यतरत्वं तत्राप्यनुगतमस्तीति चेत्, न । तावदन्योन्याभाववदन्यत्वं हि तत् । न च तावदन्योन्याभाववदन्यत्वेन रूपेण तावतामक्षपदादवगतिः । किन्तु पाशकत्वादिनैव । किञ्च यदि तीरेऽपि शक्तिस्तदा न तीरमात्रे । किन्तु गङ्गातीरे । तथा च विशिष्टशक्तौ विशेषणे शक्तिरावश्यकी, नागृहीतविशेषणान्यायात् ।

अथ लक्षणापक्षे यथा प्रवाहेणोपलक्षणेन व्यावृत्ततीरविशेषस्यान्वयो न तु तीरान्तरस्य तथा प्रवाहोपलक्षिते तीरे शक्तिरस्तु न तु तीरे प्रवाहेऽपीति चेत्, न । गङ्गापदशक्तौ प्रवाहस्य शक्यत्वेन विशेषणत्वे सम्भवति नोपलक्षणत्वं विशेषणत्वासम्भवे सत्येव उपलक्षणत्वादतः प्रवाहे एव शक्तिः । किञ्च तीरशक्तौ उपलक्षणत्वं प्रवाहस्य न शक्यतावच्छेदकत्वम् । नापि धेनुपदे गोत्वस्येव शक्त्युपाधित्वम्, गौरवात् ।

**अन्ये तु** तीरे नीरे च व्यवहार एव विलक्षणः । नीरे त्वनुपपत्तिं विनैव व्यवहारो निरुपाधिकत्वाच्छक्त्युपपाद्यः । तीरे त्वनुपपत्त्या ह्यौपाधिक एव व्यवहारः । स च शक्त्यभावोपपाद्य **इति । तन्न ।** लक्षणायामव्युत्पन्नो बालः प्रयोज्यस्य तीरान्वितानयनादिरूपं व्यवहारं पश्यन्नन्यत्र दृष्टां शक्तिं कथं न कल्पयेत् ।

अथ लक्षणया तीरत्वेनोपस्थितौ तीरान्तरान्वयोऽपि स्यात् । गङ्गातीरत्वेनैवोपस्थितौ युगपद्वृत्तिद्वयविरोधः। गङ्गोपस्थितेः शक्तिसाध्यत्वादिति चेत्, लक्षणाधीनतीरस्मृतेर्न गङ्गासम्बन्धित्वेन तीरं विषय:। किन्तु यद्वस्तुगत्य गङ्गासम्बन्धि तदेव तीरत्वेन

परिचीयते । सम्बन्धिदर्शनजस्मृतेस्तत्सम्बन्ध्यविषयत्वात् । यथा पदहस्तिदर्शनात् पदार्थहस्तिपकस्मृतेर्न पदहस्तिविषयत्वम् । अत एव तीरान्वितवाक्यार्थबोधेऽपि न गङ्गासम्बन्धित्वेन तीरं विषयः ।

अपि च गङ्गायामित्यादिपदानां आप्तोक्तत्वेन प्रामाण्यात् संभूय पदप्रतिपाद्यान्वयबोधकत्वमेकवाक्यत्वमवगतम्। मुख्यार्थश्चायोग्य इति योग्य आकाङ्क्षितश्चामुख्यार्थोऽपि पदप्रतिपाद्यः कल्प्यते । अन्यथैकवाक्यत्वभङ्गप्रसङ्गात्। न चापदार्थेनैव योग्यतादिमतान्वयबोधकत्वस्त्विति वाच्यम् । गङ्गापदवैयर्थ्यप्रसङ्गात् । प्रतिपाद्यता च लक्षणीयस्य क्लृप्तेनैव स्मार्थसम्बन्धेन न तु शक्त्या गौरवात्तादन्वयबोधश्चेतरपदेनैव । शक्त्योपस्थितस्य पदेनान्वयो बोध्यते अन्यत्र तथा दर्शनात् इति चेत्, न । लाघवेन पदोपस्थापितत्वस्यैव तन्त्रत्वात् । यद्यपि लाक्षणिकस्य पदान्तरेण सम्भूय न प्रतिपादकत्वम्, अननुभावकत्वात् । लक्ष्यस्मृतौ च न सम्भूयकारित्वम् । अत एव नैकवाक्यत्वमपि । तथापि घोषादिपदानां समभिव्याहृतपदप्रतिपाद्यान्वयबोधकत्वमवगतम् । तच्च न लक्षणां विनेति तां कल्पयति ।

**यत्तु** सामान्यतो गङ्गादिपदार्थान्वयो ज्ञात इति तद्रक्षार्थं परम्परया गङ्गादिपदार्थस्मारिते तीरादौ लक्षणा कल्प्यत **इति । तन्न ।** प्रथमं गङ्गापदार्थान्वय बोधकाभावात् । अन्वयबोधेऽपि लक्षणया गङ्गापरिचिततीरस्य घोषान्वयबोधेऽपि गङ्गायाः अन्वयबोधाविषयत्वेन तदन्वयस्यारक्षणत् ।

**यत्तु** गङ्गायां घोष इत्यादेरेकवाक्यत्वं पदस्मारितार्थान्वयबोधकत्वरूपमवगतम् । तच्च यद्यपि गङ्गापदार्थस्य साक्षात् घोषाधारत्वायोग्यत्वात् न सम्भवति, गङ्गासम्बन्धितीरे योग्ये घोषान्वयात् तीरावच्छेदकतया गङ्गापदार्थस्य घोषान्वयादेकवाक्यत्वं सम्भवति । अत एवैकवाक्यत्वस्य सामान्यतोऽवगत पदार्थान्वयस्य च रक्षार्थं गङ्गापदस्मारितस्वार्थस्मारिते तीरे वृत्त्यन्तरं लक्षणा कल्प्यते । तयोरन्यथा भङ्गप्रसङ्गा**दिति । तन्न।** तीरार्थस्य घोषान्वयबोधेऽपि गङ्गापदार्थस्य तदन्वयबोधाविषयत्वात् ।

अथ गङ्गातीरत्वेनोपस्थिते घोषान्वयबोधात् भवति गङ्गायास्तीतीरावच्छेदकतया अन्वयबोधविषयत्वमिति चेत्, न । गङ्गापदाद्गङ्गातीरयोर्युगपदुपस्थितौ वृत्तिद्वयविरोधात्। न ह्युभयोः शक्त्या लक्षणया वोपस्थितिः सम्भवति । अथ लक्षणास्वाभाव्यात् लक्षकपदेन स्वार्थसम्बन्धित्वेनैव लक्षणीयतीरादेरुपस्थितिः । अन्यथा तीरमात्रान्वयप्रसङ्गात् । तथा च लक्षणयैव गङ्गोपस्थितरिति चेत्, न । गङ्गासम्बन्धात् तीरस्य स्मृतिः सम्भवति । न तु गङ्गासम्बन्धस्य तत्सम्बन्धे तत्सम्बन्धाभावात् । अत एव एकसम्बन्धिज्ञानात् अपरसम्बन्धिस्मृतेरपरसम्बन्धिसम्बन्धाविषयत्वनियमः ।

यथा पदहस्तिज्ञानात् पदार्थहस्तिपकयो: स्मृतौ न पदहस्तिनोर्विषयत्वम्। पदे पदस्य-हस्तिनि हस्तिनः सम्बन्धाभावात् । सामान्यतो गङ्गापदार्थन्वयो नावगम्यते बोधकाभावात् । लक्षणा च शब्दात् परम्परया अशक्यासदृशस्यान्वयपरोपस्थितिरूपा शक्यसम्बन्धाद-शक्यासदृशान्वयपरोपस्थितिरूपा वा अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः । स्वशक्य-सम्बन्धो लक्षणेति परमार्थः । उपस्थितिहेतुर्हि वृत्ति: शक्तिवत् । अत एव क्लृप्तेन स्वार्थसम्बन्धेन लक्ष्योपस्थितिसम्भवात् न तदर्थं शक्तिः । न चैवं राजपुरुषादौ षष्ठ्यर्थलक्षणाद्यव्याप्तिः राजसम्बन्धे राजसम्बन्धाभावादिति वाच्यम् । शक्येन राज्ञा स्वसम्बन्धं विना सम्बन्धस्य लक्षयितुमशक्यत्वात् । अन्यथातिप्रङ्गात् । न चात्माश्रयः । राजनिरूपितपुरुषसम्बन्धस्य स्वसंबन्धसम्बन्धस्य च भिन्नत्वात् ।

अथैवं मुख्यपरत्वेऽपि लक्षणा स्याच्छक्यसम्बन्धस्य तीरादौ सत्त्वादिति चेत्, न । लक्षणायां तात्पर्याभावेन शक्तेरिव मुख्यपरत्वेऽपि लक्षणाया मूकत्वात् वृत्तेस्तात्पर्यानुरोधित्वात् । तदुक्तम्–"तात्पर्याद्धि वृत्तिर्न न वृत्तेस्तात्पर्यम्" इति । गोपदादेश्च स्वपरत्वे लक्षणैव न शक्तिः । स्वार्थसम्बन्धेनैव स्वोपस्थितिसम्भवात् ।

**अन्ये तु** पदानामौत्सर्गिकमर्थपरत्वम्। तदभावे स्वपरत्वम्। गामुच्चारयेत्यादौ वाच्याविवक्षया पदेन स्वान्विताभिधानादिति। **तन्न । वृत्तिं** विना स्वपरत्वस्यानिर्वाहात् । अन्यथा वृत्यन्तरोच्छेदः। तत्पदादेव तदन्विताभिधानसम्भवात् ।

ननु पदगोचरश्रोत्रजनितप्रत्यक्षोपस्थितस्वपरत्वमेव पदानाम् । तदन्वितस्वार्थाभिधानन्तु पदान्तरेण । न च वृत्त्युपस्थितेनैव स्वार्थान्वयः पदेनाभिधीयत इति व्युत्पत्तिः । किन्तूपस्थितिमात्रेण लाघवात् अध्याहारे तथैव स्वीकारात् । लक्षणादीनाञ्चोपस्थितिरूपतया तद्द्वारा चान्विताभिधानोपयुक्तत्वात् । लक्षणात्वाद्यसाधारण-रूपेण तदुपयोगे परस्परव्यभिचारादिति चेत्,

न । वर्णानां अयौगपद्येन पदगोचरप्रत्यक्षस्याभावात् । भावे वा योग्यतादि-विमर्शापेक्षया प्रत्यक्षस्यातीतत्वात् । किञ्चैवं गामुच्चारयेत्यादौ विकृतं गांपदमेव उच्चारणकर्म स्यात् तस्यैव श्रोत्रप्रत्यक्षत्वात् न त्वविकृतं गोपदम् । एकमुच्चारयेत्युक्तौ च न प्रकृतं पदान्तरमुच्चारणकर्म स्यात् किन्त्वेकमुच्चारयेति पदमेव । सत्यन्वययोग्यसमभिव्याहृते प्रकरणाणदेरनुपयुक्तत्वात् । अपि चाध्याहारे वृत्त्युपस्थापितेनान्विताभिधानमस्तु । तस्यापदार्थत्वेऽपीतरपदैरन्वयबोधात् । अत्र तु स्वरूपस्य पदार्थत्वमवश्यं वाच्यम्। तच्च वृत्त्यन्तर्भावादेव । अन्यथा गामुच्चारयेत्यादौ द्वितीया अच्छावाकीयं सामेत्यादौ च छप्रत्ययो न स्यात् । अर्थशून्यत्वेनाप्रातिपदिकत्वात् । तस्माच्च छप्रत्ययानुशासनात् । किञ्च गौरस्तीत्यादौ उभयपरत्वसम्भवे स्वपरत्वमेव स्यात् । स्वस्य प्रत्यक्षेण शीघ्रमुपास्थितत्वात् । प्रत्यक्षमूलकस्मृतपदार्थस्यान्वयो भवतीति चेत्, न । उक्तदोषात् । पदार्थस्मरणस्य अन्वयपरत्वानिश्चयाच्च तत्परसन्निधानस्य अन्विताभिधानोपयोगात् । किञ्च विभक्त्युपनीतान्वयप्रकार

कर्मत्वादिनानुपस्थितस्याकाङ्क्षाविरहेण क्रियाद्यन्वयो न स्यात् । स्मृतपदे द्वितीयार्थकर्मत्वान्वय इति चेत्, न । विभक्तेः प्रकृत्यर्थान्वितस्वार्थान्वयबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् ।

अत एव गङ्गायामित्यत्र सप्तम्यर्थान्वयार्थं तीरे लक्षणा । अन्यथा स्मृत्युपनीततीरस्यान्वयबोधसम्भवे लक्षणोच्छेदः । नन्वेवं जबगडदशमाहेत्यादौ निरर्थकेषु लक्षणा न स्यात् । स्वार्थसम्बन्धाभावात् । प्रत्यक्षोपस्थिते स्मृते वा स्वरूपे क्रियान्वय इति

दूषितमेवेति चेत्, न । न हि जबगडदशमाहेत्यत्र समुदाये क्रियान्वयः । समुदायस्योच्चारणासम्भवात् । किन्तु द्वन्द्वानन्तरश्रुतक्रियापदेन प्रत्येकवर्णे स्वार्थान्वयबोधनम्, प्रत्येकवर्णस्य च शक्तत्वेन स्वार्थसम्बन्धादेव स्वस्मिन् लक्षणा। स्तोभेऽप्येवम् । स्वार्थसम्बन्धाग्रहे च स्वरूपोपस्थितिः शक्तिभ्रमात् । निरर्थकस्य स्वरूपे शक्तिरेव वृत्यन्तरं विनैवोपस्थितेः शक्तिसाध्यत्वात् **इत्यप्याहुः** ।

**अन्ये तु** पदस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात् । अन्येन ह्यन्यबोधनेऽतिप्रसङ्गात् शक्तिकल्पनम् । स्वबोधकत्वे च न तथा । यथा घटस्य स्वबोधकत्वं स्वसम्बन्धं विनैव । एवञ्च स्वबोधिते स्वस्मिन् विभक्त्यर्थान्वयोऽपि । न च पदस्य स्वभावात् स्वबोधकत्वे सर्वत्र स्वबोधप्रसङ्ग इति वाच्यम् । इत्यादिपदस्य स्वार्थन्वायानुपपत्यादेः सहकारित्वात् यथा घटस्य स्वबोधकत्वे इन्द्रियसम्बन्धाद्यपेक्षेति। **यत्तु** स्वार्थसम्बन्धिनि तात्पर्यमेव लक्षणा । तत् तत्ताप्तर्यञ्च तत्प्रतीतिमुद्दिश्योच्चरितत्वमिति । **तन्न** । **लक्ष्यस्मृतये** लक्षण सा च स्वार्थसम्बन्धज्ञानादेवेत्यधिकस्य व्यर्थत्वात् । सम्बन्धधीः स्मृतिहेतुः क्लृप्ता न तु तात्पर्यधीरपि तस्या लक्ष्यस्मृतिजन्यत्वेनान्योन्याश्रयप्रसङ्गात्। तात्पर्यज्ञानञ्च लक्षणाबीजानुपपत्तिज्ञानेऽन्वयानुभवे चोपयुक्तमतोऽशक्योपस्थितिस्तदहेतुः शक्यसम्बन्धो वा लक्षणेति तत्स्वरूपे तात्पर्यमनुपयुक्तमेव । लक्ष्ये तात्पर्यात् लक्षणा **"तात्पर्याद्धि वृत्तिरि"**ति च लक्षणास्थले । **वस्तुतस्तु** लक्ष्ये तात्पर्यमस्तीत्येवम्परम्। किञ्चैवं मुख्येऽपि तत्तात्पर्यकत्वमेव वृत्तिरस्तु किं शक्त्या, तात्पर्यमेव वृत्तिं विना न निर्वहतीत्युच्यत इति चेत्, तर्हि लक्षणापि तन्निर्वाहिकैव न तु तदेव । अपि च तात्पर्यानुपपत्तिर्लक्षणाबीजं न तु तदनुपपत्तिरेव तद्बीजं विरोधात् । अत एवाशक्ये तात्पर्यं न लक्षणा वृत्तेस्तात्पर्यनिर्वाहकत्वात् । निर्वाहकसम्बन्धमपश्यत आप्तस्य तात्पर्यभावात् । शक्त्या शक्यसम्बन्धेन वा पदादमुमर्थं जानात्वित्यभिप्रायेण पदप्रयोगे न तु तात्पर्यदेवायममुमर्थं ज्ञास्यतीति बुद्धा तात्पर्यमात्रस्य वृत्तित्वे सर्वस्य सर्वत्र प्रयोगो नानार्थोच्छेदश्च ।

स्वार्थसम्बन्धेनेदं पदमर्थं बोधयिष्यतीति वक्तुरभिप्रायो लक्षणा तदभिप्रायज्ञानं विना श्रोतुर्लक्ष्यानुपस्थितेरि**त्यन्ये** । **तन्न** ।

अयं ह्यभिप्रायः-- प्रयोगनिमित्तं यथा शक्त्यायमर्थं बोधयिष्यतीत्यभिप्राय:। न तु स एव लक्षणा गौरवात् । किन्तु स्वार्थसम्बन्ध एव लक्षणा तत एव लक्ष्योपस्थितिसम्भवात् वृत्तेस्तत्रैवोपयोगात् तस्य चाबोधकत्व स्वार्थसम्बन्धेनायं बोधयिष्यतीत्यभिप्रायवान् वक्ता नाप्तः स्यात् तात्पर्यं धीस्त्वन्यबोधे हेतुरित्युक्तम् । शक्यसंबन्धश्चाविनाभाव एव । यष्टी प्रवेशय मञ्चाः क्रोशन्तीत्यत्रापि प्रवेशनक्रोशनसमये यष्टिधर मञ्चस्थपुरुषयोर्यष्टिमञ्चाविनाभाव एव। एवञ्च छत्रिणो यान्ति काकेभ्यो दधि रक्ष्यतामित्यत्राजहत्स्वार्थलक्षणायामपि छत्रिणःस्तत्समूहानन्तर्गतेनाछत्रिणाप्यविनाभाव एव । काककुक्कुरादीनां दध्युपघातकत्वेन युगपदुपस्थितिसमये काकस्य कुक्कुराद्यविनाभाव:। यत्र तूपाघातकत्वेन काकमात्रमुपस्थितं न कुक्कुरादि तत्र काकपदेऽप्युघातकत्वेन लक्षणापि नास्ति। दध्युपघातकत्वेनातर्किताद्रक्षणोपदेशानर्हत्वादिति **सम्प्रदाय:** ।

वस्तुत: शक्यसम्बन्ध एव लक्षणा, अतिप्रसङ्गश्च सम्बन्धस्याविनाभावस्वरूपत्वेऽपि, तात्पर्यादन्वयनियमः शक्यसम्बन्धमात्रलक्षणापक्षेऽपि, लक्षणाबीजं तात्पर्य्यानुपपत्ति: पदस्य वृत्तिं विना लक्ष्ये तात्पर्यानिर्वाहात् । न तु शक्यान्वयायोग्यत्वं बीजम्। यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायाञ्च शक्यस्यान्वययोग्यत्वेऽपि लक्षणासत्वात्तात्पर्यानुपपत्तिस्तत्रापि। लक्ष्ये तात्पर्यं विना लक्षणानुदयादिति **सम्प्रदाय:**।

वस्तुतोऽन्वयपरप्रमाणशब्दस्य मुख्येऽन्वयायोग्यत्वमेव लक्षणाबीजम् । **"गङ्गायां घोष"** इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्य्यग्रहात्पूर्वमेव मुख्यस्यान्वयायोग्यत्वज्ञानेन लक्षणोपपादनात् । अस्तु वा तत्रापि लक्ष्ये तात्पर्यग्रहः तथापि मुख्येऽन्वयानुपपत्तिरेव लक्षणाबीजं प्रथमोपस्थितत्वात् तात्पर्य्यानुपपत्तिं विनैव लक्षणाबीजत्वसम्भवाच्च। यष्टी: प्रवेशयेत्यत्राजहत्स्वार्थायाञ्च मुख्यस्यान्वयानुपपत्तिरेव । तथाहि प्रकरणादिना ""प्रवेशये"त्यस्य

भोक्तृप्रवेशनपरत्वं यान्तीत्यस्य छत्रितदितरघटितसमूहगमनकर्तृपरत्वञ्च ज्ञातम् । तादृशप्रवेशनगमनयोरन्वयायोग्यावेव यष्टिच्छत्रिणौ ।

अथ प्रकरणादिनैवेतरपदवत् यष्टिच्छत्रिपदयोरपि लक्ष्ये तात्पर्यमवगतमतस्तदनुपपत्तिरेव तद्बीजमिति चेत्, न, लक्षणातः पूर्वमवश्यं लक्ष्योपस्थितौ तत्र तात्पर्य्यग्रहे मानाभावात् । लक्षणाया अन्यथाऽपि सम्भवात् । भावे वास्तु तत्रोभयानुपपत्तिस्तथाप्यन्वयानुपपत्तिरेव लक्षणाबीजं, **"गङ्गायां घोष"** इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्य्यग्रहात्पूर्वमेव मुख्यार्थाऽनुपपत्तेः क्लृप्तत्वात् ।

ननु पदार्थविशेषस्मृतौ तदन्वयबोधे वा प्रकरणादेः सहकारिता न तु तात्पर्य्यग्रह इति चेत् । न । शब्दसहकारित्वेऽननुगमात् तात्पर्य्यग्रहे तु तद्व्याप्यत्वेनानुगमः तात्पर्य्यव्याप्यत्वग्रहे तात्पर्य्यग्रहः सम्भवत्येव । बहुव्रीहौ चित्रगोपदार्थस्यान्वया-योग्यत्वादन्यपदार्थे तात्पर्य्यानुपपत्तिरेव लक्षणाबीजमिति चेत् । न । तत्रापि चित्रगोस्वाम्यानयनपरानयनपदार्थान्वयानुपपत्तेः ।

यद्यपि लक्षणायामन्वयायोग्यत्ववन्निराकाङ्क्षत्वमप्यस्ति तथाहि "गङ्गायां घोष" इत्यत्र घोषस्य निबिडाधाराकाङ्क्षितत्वेन न प्रवाहाकाङ्क्षा, एवं समूहगमनस्य छत्रिषु नाकाङ्क्षा तेष्वपरिसमाप्तेः, तथापि नोभयं निमित्तम् अन्यतरज्ञानेऽपि लक्षणासम्भवात् । नैकैकमेव निमित्तम् अननुगमात्। अन्वयानुपपत्तिव्याप्यत्वेन वानुगमेऽन्वयानुपपत्तिरेव लक्षणाबीजं तस्या उभयत्र सत्त्वात् । लक्षणास्थले च स्मृतशक्यान्वयानुपपत्तिज्ञानानन्तरं गङ्गापदात् पुनः शक्यस्मृतिः स्मृतशक्यात्स्वसम्बन्धेन तीरस्मृतिः शक्तेः शक्यस्मृतौ प्रवाहस्य स्वसम्बन्धेन तीरस्मृतौ सामर्थ्यावधारणात् । अतः शक्यस्मारिततीरस्येतरपदादेवान्वयबोधः ।

अत एव लाक्षणिकं पदं नानुभावकम् अन्वयप्रतियोगिनयोस्तीरस्य ततोऽनुपस्थितेः अन्वयप्रतियोग्युपस्थापकत्वेन पदानामन्वयानुभावकत्वात् । न च गङ्गापदात्स्वशक्यसम्बन्धेन प्रथमं तीरस्मृतिरेव पुनः शक्यस्मरणे गौरवादिति वाच्यम् । गङ्गापदस्य

स्वशक्यसम्बन्धेनान्वयप्रतियोगिस्मारकत्वाकल्पनात् । न चेहैव तत्कल्पनं, क्लृप्तकारणताकस्मृतिद्वयादेव तीरोपस्थितिसम्भवा**दिति प्राञ्चः** ।

**तन्न** । गङ्गापदात्तीरस्यानुपस्थितौ तत्र सप्तम्यर्थान्वयानुपपत्तेः विभक्तेः प्रकृत्युपनीतस्वार्थान्वयबोधकत्वव्युत्पत्तेः प्रकृत्यर्थोपस्थाप्यस्य विभक्त्यर्थान्वयेऽति-प्रसङ्गोऽननुगमश्च । न च प्रकृतितात्पर्य्यविषयस्वार्थान्वयबोधकत्वं विभक्तीनां गौरवात् । एवञ्च प्रकृत्यर्थे विभक्तर्थान्वयनियमाच्छक्यसम्बन्ध एव क्लृप्तः तीरस्मारकत्वेन कल्प्यते । नचैवं गङ्गापढात् साक्षात्तीरोपस्थितौ शक्तिः, तां विनापि तदुपस्थितिसम्भवात् । नन्वेवमन्वयप्रतियोग्युपस्थापकतया इतरपदवल्लाक्षणिकमप्यनुभावकं स्यादिति चेत्, न, इतरपदार्थैः सह स्वशक्यान्वयानुभावकत्वेन क्लृप्तादितरपदादेव तीरानुभवसम्भवेन लाक्षणिकस्याननुभावकत्वात् स्वशक्यान्वयानुभवे पदानां कारणत्वावधारणाच्च ।

अथ यदि गङ्गापदं नान्वयबोधकं तदा गङ्गापदान्तर्भावेन सम्भूयान्वयबोधकत्वलक्षणं नैकवाक्यत्वं स्यान्न वा प्रमाणत्वं तथाच तदुभयरक्षार्थं न लक्षणाकल्पनम्। न च परम्परया साक्षाद्वान्वयप्रतियोगिस्मृतिहेतुत्वेन प्रमाणत्वं, स्मृतेरप्रमाणत्वात् । न चैकवाक्यत्वं, वाक्यभेदेऽपि पदार्थस्मृतिसत्त्वादिति चेत्, न । आप्तोक्तत्वात् गङ्गापदान्तर्भावेनान्वयप्रमाप्रयोजकत्वं सम्भूयान्वयबोधप्रयोजकत्वञ्च गृहीतं तदुभयमपि तीरोपस्थितिद्वारा निर्वहति ।

**नव्यास्तु** लाक्षणिकमप्यनुभावकम् । न चैवं ज्ञाने शक्तिः शक्यत्वादिति लक्ष्यमपि शक्यं स्यात् । प्रवाहशक्तत्वेन ज्ञातादेव गङ्गापदाच्छक्तिं विनापि तीरानुभवसम्भवात्। यथा परेषां जातिशक्तत्वेन ज्ञातादेव व्यक्त्यनुभवसम्भवात् यथा वास्माकं पदार्थशक्तत्वेन ज्ञातादेवान्वयानुभवसम्भवान्न व्यक्त्यन्वययोः शक्तिरिति।

क्वचिद्योगार्थान्वयसम्भवेऽपि रूढिपूर्विका लक्षणा यथा मण्डपं भोजयेत्यत्र रूढ्यर्थगृहविशेषस्यान्वयायोग्यत्वात् रूढ्यर्थगृहसम्बन्धिजनज्ञानं लक्षणया मण्डपपदेन क्रियते न तु योगान्मण्डपान**कर्तुरिति मीमांसकाः** ।

ननु रूढिपूर्विका लक्षणा न युक्ता श्रौर्थपरत्वे सम्भवति लक्षणया अन्याय्यत्वात् रूढ्या योगापहारान्न मुख्यतेति चेत् । न । अपहारो हि न यौगिकार्थस्मृतिः, स्मारकसम्बन्धस्य शक्तेः रूढ्यर्थ इव यौगिकेऽपि सत्त्वात् । नापि योगार्थस्य प्रथममस्मृतिः, यदैव हि समुदायेन स्वार्थस्मरणं तदा अवयवैरपि स्मारकसमुदायज्ञाने अवयवानामपि विषयत्वात्, प्रत्युतावयवैरेव शीघ्रं स्वार्थस्मरणम् अवयवज्ञानपूर्वकत्वात् समुदायज्ञानस्य । विलम्बेऽपि यदा रूढ्यर्थेन लक्षणया स्वार्थसम्बन्धिस्मरणं तदा यौगिकार्थस्मरणं वाच्यं तथाचौत्सर्गिकान्वयाभिधायकत्वानुरोधाद्यौगिकार्थान्वयावबोधोऽस्तु । नापि स्मृतस्याप्यवयार्थ-स्यान्वयवोधबहिर्भूतत्वमपहारः, योग्यतादिबलादवयवार्थस्यान्वयबोधः स्यादेव, न तु रूढ्यर्थस्यायोग्यत्वात् । नापि लक्षणया स्मारितस्यार्थस्य, लाक्षणिकस्यानभिधायकत्वात् ।

अथ मण्डपशब्दस्य गृहविशेषे प्रयोगदर्शनादवयवशक्त्या च तदनिर्वाहात्तत्र समुदाये शक्तिकल्पना । तथाच मण्डपानकर्तरि सत्यपि योगे प्रयोगादर्शनात्तत्रावयवशक्तिकुण्ठनमपि कल्प्यं कार्यानुरोधित्वात् कल्पनायाः । अन्यथा अनेकार्थरूढाक्षादिपदादिव क्वचित् मण्डपानकर्तुरप्यवगमः स्याद् बहुव्रीहौ समुदायशक्तावपि नावयवशक्तीनां कुण्ठनम् अवयवार्थे लम्बकर्णादौ प्रयोगप्राचुर्यात्, कुण्ठनस्य प्रयोगाभावकल्प्यत्वात्, एवञ्च मण्डपादिपदेऽवयवशक्तेः कुण्ठितत्वात् रूढ्यर्थस्योपस्थितस्य परम्परयापि वाक्यार्थप्रतीत्यन्वयाय तत्पूर्विका लक्षणेति चेत्, न, **"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्य"** त्रामिक्षाया उत्पत्तिशिष्टत्वेन विश्वेदेवदेवताकत्वं, **"वाजमन्नमामिक्षारूपं तद्येषामस्ति ते विश्वेदेवा देवता"** इति चतुर्थ्यन्तवाजि-पदाद्योगेनामिक्षारूपान्नयोगिनां विश्वेदेवानामुपस्थितेर्वाजिनस्यापि विश्वेदेवदेवताकत्वमेव ।

ननु वाजिपदात् रूढ्योपस्थितानामश्वानां वाजिने देवतात्वमिति सिद्धान्तः । स न स्यात् रूढ्या योगापहारादश्वानामेव तत्र देवतात्वापत्तेः । न ह्यत्र लम्बकर्णादिवद्वाजिपदस्य विश्वेदेवेषु प्रयोगप्राचुर्य्यमस्ति । अथान्वयप्रकारो विभक्त्योपनीयते, सा च यत: समभिव्यत्हृता

तस्यान्वयं बोधयति विभक्तिश्च समुदायात् । अतः समुदायोपनीतस्य रूढ्यर्थस्यैवान्वयबोधो नावयवोपनीतस्येति चेत्, न, पङ्कजनिकर्तुरिव मण्डपानकर्तुरप्यन्वयबोधसम्भवात् ।

नन्ववयवार्थानां परस्परमन्वयो योग्यतादिसापेक्षतया विलम्बितः रूढ्यर्थधीस्तु न तथेति चेत्, अस्तु तावदवयार्थस्यान्वयधीर्विलम्बिता न तु स्मृतिरूपापि सा तथा, सा चान्वयबोधोपयोगिनी, एवञ्च यथा पङ्कजमानयेत्यत्र प्रथमं पदार्थवाक्यार्थान्वयधीः ततस्तदन्वितजन्मधीः तदनु च परम्परया तथाभूतजन्मनि पङ्कपदार्थान्वयधीः कार्यान्वितव्युत्पत्त्यनुसारात् न तु सिद्धपङ्कजन्मकर्तृत्वानां प्रथममन्वयधीः तथा मण्डपादिपदेऽप्यस्ति । यदि च सिद्धार्थेऽप्यन्वयधीर्योग्यतादिवशात्तदा रूढ्यर्थवयवार्थानां स्मृताववयवार्थान्वयबोधसम्भवात् । रूढ्यर्थान्वितबोधस्येतरपदात्तदर्थस्मरणाकाङ्क्षायोग्यतादि-ज्ञानसापेक्षतया विलम्बितत्वात् ।

अथ यावत्सु वर्णेष्वेका शक्तिस्तावतां वर्णानां स्मृतिरप्येकैव कार्यबलात् कल्प्यते , अत एकदा स्मृतसमुदायनिष्ठशक्तिस्मृतिः शीघ्रा अवयवशक्तीनान्तु स्मृतिर्विच्छद्य कतिचिद्वर्णस्मृताविति विलम्ब इति चेत्, न, यथा हि मण्डपसमुदायगोचरैका स्मृतिस्तथा मण्डादिपदविषयापीति न कश्चिद्विशेषः । अतः कथं योगाद्रूढेर्बलवत्त्वमिति।

उच्यते । यदा मण्डपपदाद्गृहविशेषस्मृतिस्तदैव प्रथमं मण्डार्थोपस्थितिः तदुत्तरम्पिबत्यर्थस्य तदनन्तरं प्रत्ययार्थस्य ततो मण्डपानकर्तृत्वेन ज्ञातस्य स्मृतिः तदेवं रूढियौगिकयोर्बलाबलं शीघ्रविलम्बितधीकृतमेव । तथाच रूढ्यर्थस्य शीघ्रोपस्थितत्वाद्बलवत्त्व-मौत्सर्गिकम् । यत्र तु प्रकरणादिना यौगिकार्थस्य शीघ्रन्धीविषयता तत्र रूढेर्योग एव बलवान् । यथा "अग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैरित्यत्र विश्वेदेवपदाद्योगेन सकलदेवप्रतिपादकात् प्रकरणवशेन सन्निहितवसुरुद्र-मरुदादित्यरूपसकलदेवतानां शीघ्रं बुद्धिस्थता प्रकरणादवयवार्थे संस्कारोद्बोधात्, न तु पूरुरवोमाद्रवः प्रभृतिषु गणेषु रूढादपि विश्वेदेवपदात्तेषां धीः ।

एवं **"सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि"**त्यामिक्षारूपार्थस्योत्पत्तिशिष्टविश्वेदेवदेवताकत्वं ज्ञातं, **"वाजिभ्य"** इति चतुर्थ्यन्तपदादश्वे रूढादपि वाजमन्नं तद्यस्यास्तीति व्युत्पत्त्या वाजनामकामिक्षारूपान्नयोगिनां विश्वेदेवानाञ्च प्रकरणात् शीघ्रमुपस्थितिः । न च रूढ्याश्वानां, तेन वाजिनस्यापि विश्वेदेवदेवताकत्वं प्रतीयते ।

ननु रूढेर्बलवत्त्वादत्रापि रूढ्यर्थधीरेव स्यादिति चेत्, न, द्वयोरुपस्थितयोरनुपस्थितयोर्वा रूढिर्बलीयसी । अत्र तु प्रकरणरूपहेत्वन्तरादुद्बुद्धसंस्कारेण योगार्थ एव ज्ञाने सम्भृतसामग्रीकः । ननु शाब्दानुभवे शब्दकारिता स्मृतिरुपयोगिनी न तु प्रकरणदिकारितापि उच्छृङ्खलज्ञानकारितायास्तस्या अन्विताभिधानानुपयोगादिति चेत्, न। प्रकरणादुद्बुद्धसंस्कारस्यैव शब्दादप्युद्बोध इति प्रकरणसहकृतशब्दादवयवार्थसंस्कारोब्दद्धोधाद-वयवार्थस्मृतिः । शब्दकारिता शीघ्रा वा न तु रूढ्यर्थस्मृतिः तत्र च संस्कारोद्बोधकाभावात् ।

न चैवं लोकेऽपि मण्डपादौ योगस्य बलवत्त्वान्न लक्षणेति वाच्यम् । प्रकरणाद्यभावे हि शीघ्रं रूढ्यर्थोपस्थितौ रूढिपूर्विका लक्षणा प्रकरणादिसत्त्वे तु मण्डपादिपदेऽपि योगार्थ एव बलीयानिति न लक्षणा । अत एव रूढिच्युतकप्रकरणादिसत्त्वेन रूढ्यर्थास्मरणन्न लक्षणा किन्तु योग एव । तस्मात्प्रकरणाद्यभावे रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद्रूढिपूर्विका रूढ्यर्थसम्बन्धिनि लक्षणा । प्रकरणादिसद्भावे तु रूढ्यर्थस्य न स्मृतिरिति योग एवेति तत्त्वम् । न चैवं प्रोद्गातृणमित्यत्रोद्गीथाख्यसामभागयोगिनां त्रयाणां प्रकृतत्वाद्योगस्यैव बलवत्त्वं स्यात् न तु रूढिपूर्विकानुवाके लक्षणेति वाच्यम् । तत्र हि रूढौ योगे च प्रकरणस्य तुल्यत्वाद्रूढ्यर्थस्य शीघ्रोपस्थितत्वेन बलवत्त्वाद्रूढिपूर्विका लक्षणैव ।

अत्र वदन्ति । भवतु रूढ्यर्थस्य शीघ्रमुपस्थितिस्तथापि तस्यायोग्यत्वादनन्वयेन शक्त्योपस्थापितावयवार्थस्यैव योग्यतादिमत्त्वादन्वयबोधो भवेत् प्रतिबन्धकस्य रूढ्यर्थान्वयबोधस्याभावात् लाक्षणिकार्थस्य विलम्बितोपस्थितिकत्वात् ।

नन्वेवं मण्डपं भोजयेत्यत्रावयार्थपरत्वेऽवयवार्थानां प्रथममेकमन्विताभिधानं तदनन्तरं तस्य वाक्यार्थेऽपरमन्विताभिधानमिति तात्पर्य्ये गौरवं रूढिपूर्वकलक्षणायान्तु एकत्रान्विताभिधाने तात्पर्यमिति लाघवमिति चेत् । न । सामग्रीसत्त्वेनावयवार्थान्वय-बोधस्यागौरवेणापहस्तयितुमशक्यत्वात् । लक्षणीये तात्पर्यग्राहकस्याभावात् भावे वा न्यायाभिधानस्य व्यर्थत्वात् ।

ननु रूढ्यर्थस्य प्रथमं स्मृतत्वात्तस्य च लक्षणया परम्परयापि प्रयोजकत्वसम्भवे तत्त्यागायोगाब्दरं लक्षितस्यान्वयबोध इति चेत्, तर्हि, प्रथमं रूढ्यर्थस्मरणसमकालं वा स्मृतस्य मण्डाद्यवयवार्थस्य बाधकं विनान्वयरक्षार्थं तत्त्यागोऽपि नोचितः तत्त्यागहेतोः रूढ्यर्थान्वयबोधस्याभावात् ।

अथ रूढ्यर्थस्योपस्थितिरेव योगार्थान्वयबोधप्रतिबन्धिका न तु रूढ्यर्थान्वयबोधे गौरवात् यत्र च प्रकरणादिना योगार्थान्वयबोधस्तत्र रूढ्यर्थस्य स्मृतिरेव नास्ति संस्कारोब्दोधाभावात्, किन्तु प्रकरण-शब्दाभ्यामवयवार्थस्य संस्कारोद्बोधनादवयवार्थस्यैव स्मृतिरिति चेत्, न, अवयवार्थस्य स्मृतावन्वयबोधे वा रूढ्यर्थस्य स्मृतेः प्रतिबन्धकत्वे मानाभावात् मण्डपपदस्य गृहपरत्वे रूढ्यर्थस्यान्वयबोधो योग्यत्वात् स्मृतस्याप्यवयवार्थस्य नान्वयबोधः क्लृप्तकारणयोग्यताविरहान्न तु रूढ्यर्थस्मृत्या प्रतिबन्धात् । इह तु रुढ्यर्तस्य अयोग्यत्वान्नान्वयबोधः। अवयवार्थस्य योग्यतादिसामग्रीसत्वादन्वयबोधोभवत्येव। यदि च रुढ्यर्थस्मृत्या प्रतिबन्धान्नावयवार्थस्मृतिरन्वयबोधो वा तदा त्वन्मते लम्बकर्णमानयेत्यत्र तद्गुणसंविज्ञाने बहुव्रीहौ अवयवार्थान्वयबोधो नभवेत्। किन्तु रूढ्यर्थान्यपदार्थस्यैव। तस्माद् रूढेः योगापहारिता रूढियोगयोः विरोधे मण्डपादौ, न तु लम्बकर्णादौ। अपहारोपि अयमेव यद्योग्यतया रूढ्यर्थस्यान्वयबोधो भवति नावयवार्थस्यायोग्यत्वात् । न तु योग्यतादिमतोपि अवयवार्थस्यान्वयबोधो भवति। अनन्वितरूढ्यर्थस्मृत्या प्रतिबन्धात् । तस्मान्न न्यायलभ्या रूढिपूर्विका लक्षणा । किन्तु यत्र रूढ्यर्थसम्बन्धिनि तात्पर्यं मानान्तरादवधार्य्यते तत्र रूढिपूर्विका लक्षणा रूढ्यर्थसम्बन्धिविशेषज्ञापनार्थं विशेषे तात्पर्यग्रहस्यावश्यकत्वात् । यत्र तु

प्रकरणाद्यभावान्न योगबलवत्त्वं तत्र रूढ्यर्थस्य शीघ्रोपस्थितत्वान्तेनैवेतरपदार्थान्वय इति रूढेर्योगापहारः । उपपदधातुप्रत्ययार्थानां स्मृतिस्ततस्तेषां योग्यतादिज्ञानं ततोऽवयवार्थान्वय-बोध इति यौगिकार्थस्य विलम्बितोपस्थितकत्वात् यथा **"वर्षासु रथकार आदधीते"**त्यत्र रथकारशब्दाद्रूढ्या जातिविशेषवत्प्रतीतेः शीघ्रत्वात्तस्यैवाधानं प्रतीयते तदर्थं तदनुकूलविद्याप्रयुक्तिरपि तस्याक्षिप्यते न तु रथकारशब्दस्य योगोपस्थितरथकरणयोग्यान्य-तोलब्धविद्यत्रैवर्णिकपरत्वं, विद्याप्रयुक्तिकल्पनातो रथकारशब्दे योगसङ्कोचमात्रस्य लघुत्वादिति युक्तं, शब्दार्थानुरोधेन हि कल्पना न तु कल्पनाभयेन शब्दार्थत्यागः प्रमाणशब्दमूलकत्वेन फलमुखगौरवस्यादोषत्वात् । अत एव च क्रतुविशेषे **"हिरण्मयौ प्राकाशावध्वर्यवे दक्षिणां ददाती"**ति श्रूयते, तत्राध्वर्युशब्दाद्रूढ्या ऋत्विग्विशेषस्य शीघ्रमुपस्थितेः तस्यैव प्राकाशस्य स्वत्वलक्षणसम्बन्धो विधीयते ददातीत्यनुवादः । तेन क्रतुदक्षिणायामध्वर्युभागमात्रबाधः अन्येषामृत्विजां प्राकाशस्वत्वाभावात् क्रतुदक्षिणायामन्वयः । यदि चाध्वरं युनक्तीति यागोपस्थित ऋत्विङ्मात्रे प्राकाशसम्बन्धविधिः स्यात्तदा सर्वेषामेव ऋत्विजां क्रतुदक्षिणाबाधो नाध्वर्युभागमात्रस्य ।

नन्वेवं **"स्वर्गकामो यजेते"**त्यत्र स्वर्गकामशब्दात् स्वर्गकामत्वेन स्त्री-शूद्रयोरप्युपस्थितेरधिकारो बोध्येत शब्दार्थानुरोधाविद्याप्रयुक्तिरपि तयोराक्षिप्येतेति चेत् । न । स्त्री-शूद्रयोर्विद्यानिषेधात् स्वर्गकामपदस्य स्त्री-शूद्रेतरपरत्वं तेन स्वर्गकामपदार्थे सङ्कोचमात्र न बाधः । सङ्कोचे च न शब्दार्थहानं स्वर्गकामत्रैवर्णिकस्याधिकारबोधनात् रथकारशब्दे च पदार्थमात्रस्यैव बाधः स्यात् । यद्यपि सङ्कोचोऽप्येकदेशबाध एवेति सोऽपि न युक्तः तदंशे शब्दार्थहानप्रसङ्गात् , तथापि सामान्यबाधादेकदेशबाध एव लघुरिति । लक्षणा च पदवृत्तिर्वृत्तित्वात् शक्तिवत् ।

ननु **"गभीरायां नद्यां घोष"** इत्यत्र नैकपदे लक्षणा तीरस्यानदीत्वादगभीरत्वाच्च मुख्यलक्ष्ययोरनन्वयापत्तेः । नापि पदद्वये प्रत्येकशक्त्या सम्बन्धिनो गभीरनदीतीरस्या-प्राप्तिप्रसङ्गात् । तस्माद्गभीरनद्योरन्वयबोधानन्तरं वाक्येन स्वज्ञाप्यगभीरनद्यास्तीरं

लक्ष्यते। वाक्यार्थगभीरनदीसम्बन्धिनस्तीरत्वेन प्रतीतेः । न च वाक्ये शक्त्यभावात्तत्सम्बन्धं विना न लक्षणेति वाच्यम् । स्वज्ञाप्यसम्बन्ध एव हि लक्ष्यस्मृतौ तन्त्रम् । न तु सम्बन्धविशेषः शक्तिगौरवात् । ज्ञाप्यश्च स्वशक्यवद्वाक्यार्थोऽपि। घोष-नद्योरन्वयबोधाद्गभीरनद्योरन्वयबोध एव नेति चेत्, न, प्रथमोपस्थितत्वेन गभीरनद्योरन्वयबोधस्य शीघ्रत्वात् । घोषे तदनुपपत्तिज्ञानाधीनतया तीरस्मृतविलम्बेन नदी-घोषयोरन्वयबोधे विलम्बात् । न चैवं वाक्यभेदः, कर्तव्यान्विताभिधानान्तरानुकूलत्वेन वाक्यैकवाक्यतावच्छेदेकवाक्यत्वादिति ।

**अत्र नव्याः** । वाक्यस्य ज्ञाप्याभावेन ज्ञाप्यसम्बन्धाभावान्न लक्षणा । अथान्वयबोधकं वाक्यम् । पदानि हि सम्भूयार्थान्वयं बोधयन्ति न प्रत्येकमात्रमिति चेत् । न। पदं हि स्वार्थान्वयं बोधयति न तु समूहः समूहे स्वार्थाभावात् । न च पदेषु व्यासज्यवृत्तिर्बोधकता, न वेतरपदावच्छिन्ने इतरपदे गौरवात् । किञ्च **"गभीरायां नद्या"**मित्यत्र विभक्तिं विना अन्वयबोधाभावाद्धिभक्त्यन्तर्भावेन वाक्यत्वं, तथाच लक्ष्ये विभक्त्यर्थान्वयो न स्यात् लक्षकार्थस्य लक्ष्येऽनन्वयनियमात् । नापि गभीरायां नदीतिविभक्तिशून्ये लक्षणा अन्वयस्य तदज्ञाप्यत्वाद्विभक्तिश्च प्रकृतिनदीगतं स्वार्थमभिदध्यान्न गभीरनदीगतं तस्या अप्रकृतित्वात् ।

वस्तुतः पदलक्षणयैवोपपत्तौ न वाक्यलक्षणा, तथा हि गभीरनद्योरन्वयबोधोत्तरं नदीपदं गभीरपदं वा स्वज्ञाप्यगभीरनद्यास्तीरं लक्षयति न वाक्यम् । न च विनिगमकाभावात् पदयोर्लक्षणाद्वयं वाक्ये चैकैव लक्षणेति युक्तम्, पदे क्लृप्तत्वाद्वाक्यापेक्षया लघुत्वाच्च पद एव लक्षणा अन्यथा विनिगमकाभावाल्लक्षणाद्वयं पदे एका वाक्ये चापरा लक्षणेति गौरवं स्यात् । अन्वयबोधपूर्विका प्रत्येकं पदद्वये लक्षणैव वाक्ये लक्षणेति च परिभाषा पद-वाक्योर्भिन्नत्वात्, वस्तुतस्तु गभीरपदात् स्वार्थपरम्परासम्बन्धेन लक्ष्योपस्थितौ विलम्बात् नदीपदात् स्वार्थसाक्षात्संबन्धेन शीघ्रं तीरोपस्थितिसम्भवात्तत्रैव लक्षणा ।

अथ **"पदं पांशुना यूपमनक्ति सप्तमं पदं गृह्णाती"**त्यत्र पदस्य ग्रहणकर्मानर्हत्वेन ग्रहणकर्मार्हेष्वञ्जनसाधनत्वेन निरूढेषु सोमक्रयार्थानीयमानैकहायन्युपलक्षितसप्तमपदपांशषु सप्तमार्थान्वितपद-पदार्थान्वयबोधके सप्तमं पदमिति वाक्ये लक्षणेति चेत्, न। अत्रापि हि सप्तमपदयोरन्यबोधानन्तरं सप्तमपदार्थान्वितस्वार्थबोधके पदे लक्षणा न तु वाक्ये । अतएव **"पुरोडाशकपालेन तुषानुपवती"**त्यत्रावघातजनितव्रीहितुषाणां पुरोडाशकपलेनोपवापो विधीयते पुरोडाशश्रपणप्रयोजनत्वेनोपस्थिते च कपाले नोपवापप्रयोजनाकाङ्क्षा नह्येकप्रयोजनस्य किं प्रयोजनमित्याकाङ्क्षा भवति ।

अन्यत्र विनियुक्तत्वेन शब्दादन्यत्राकाङ्क्षा विरहेण विनियोगाप्रतीतेरेव हि विनियुक्तविनियोगविरोधः । अत आकाङ्क्षोत्थापनार्थं पुरोडाशकपालवाक्यस्य पुरोडाशार्थाधिष्ठाने आश्रयस्वरूपे लक्षणेति निरस्तम् । अत्रापि हि पुरोडाशपदेन पुरोडाशश्रपणप्रयोजनकाधिष्ठानमाश्रयस्वरूपं लक्ष्यते । कपालपदञ्च तत्र कपालत्वविशिष्टबोधकमिति पुरोडाशपदे लक्षणा न पुरोडाशकपालवाक्ये ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शक्तिवादः।**

## अथ समासवादः

ननु बहुव्रीहौ **"चित्रगुमानये"**त्यत्र वाक्यार्थचित्रगोस्वामिनः सम्बन्धितया अन्यपदार्थस्य प्रतीतेर्वाक्य एवान्यपदार्थे लक्षणा । अथ **"चित्रा गौर्यस्ये"ति** विग्रहवाक्यस्थं लुप्तं यत्पदं स्मृतमन्यपदार्थं बोधयति यथा **"दधि पश्ये"**त्यादौ लुप्ता द्वितीया स्मृता कर्मत्वं अन्यथा तत्र कर्मत्वे लक्षणापत्तेः । अज्ञातविग्रहस्य वहुव्रीहौ शक्तिभ्रमादन्यपदार्थधीरिति चेत्, न, स्मृतयत्पदात् सम्बन्धितयोपस्थिते अन्यपदार्थे कर्मत्वेनोपस्थितं विना आनयनान्वयानुपपत्तेः, राज्ञः पुरुषमानयेत्यत्र राज्ञ इव विशेषणत्वेनोपस्थिते क्रियान्वयाभावाच्च ।

विभक्तिशून्यत्पदादुपस्थिते च चित्रगुपदेन क्रियया चान्वयो न स्यात् अन्वयप्रकारबोधकविभक्त्यभावात् । न च **"चित्राया गोर्य इति विग्रहे स्मृतप्रथमान्तय"** इति पदादुपस्थितिः प्रथमान्तेनानयनानन्वयात् । प्रथमान्तविग्रहे तदभियुक्तैर्बहुव्रीहेः

साधुत्वनिषेधाच्च । न च **"चित्रा गौर्यस्य तमानयेति"** तत्पदार्थस्य क्रियान्वय इति वाच्यम् । तथाननुभवात्, **"चित्रगोसम्बन्धिनमानये"**ति हि वाक्यार्थधीः विग्रहे तत्पदस्याप्रयोगेण स्मृत्यभावाच्च । यत्तदोर्नित्यसम्बन्धात्तत्पदस्मरणमपीति चेत्, न, अध्याहारापत्तेः, तथापि **"चित्रगुमानये"**त्यत्र विभक्तिस्तत्पदार्थगतं न स्वार्थमुपनयेत् किन्तु गो-गतमेव विभक्तेः प्रकृत्यर्थगतस्वार्थबोधजनकत्वव्युत्पत्तेः । अत एवान्यपदार्थोपस्थापकेन समासेनोक्तार्थत्वात् यत्पदाप्रयोगः । अन्यथा यत्पदप्रयोगोऽपि स्यात् ।

न च यत्पदप्रयोगः साधुत्वार्थमेव स्त्रीप्रत्ययस्येवेति वाच्यम् । **"गोस्त्रियोरुपसर्जनस्ये"**त्यनुशासनबलात्तत्तथैव साधु यत्पदे तूक्तार्थत्वं विना असाधुत्वादन्वये न निमित्तान्तरमस्ति, बहुव्रीहेर्नित्यसमासत्वेन विग्रहाभावाच्च । **"चित्रा गौर्यस्येति"** वाक्यं बहुव्रीहेरन्यपदार्थकथनाय । अन्यथा **"चित्रगुमानये"**त्यत्र प्रक्रान्तप्रक्रंस्यमानयोरभावे यत्पदार्थव्यवहारो न स्यात् ।

न च चित्रापदं चित्रगोस्वामिलक्षकं, तत्र गोपदार्थानन्वयात् । नापि गोपदं लक्षकं, गोस्वामिनि चित्रापदार्थानन्वयापत्तेः । तस्माद्वाक्यार्थचित्रगोसम्बन्धितया पुरुषस्य प्रतीतेर्बहुव्रीहौ वाक्य एव लक्षणेति । वार्तिकमेतत्, वाक्ये निरर्थकतया स्वार्थसम्बन्धाभावेन लक्षणानिषेधात्, अत्रापि पदलक्षणयैवोपपत्तेश्च । तथा हि चित्रगोपदयोरन्वयबोधानन्तरं गोपदं चित्रगोस्वामिलक्षकं स्वज्ञाप्यचित्रगोसम्बन्धेन तत्स्वामिस्मारकत्वात् । चित्रापदं गवान्वितस्वार्थबोधकतया मुख्यार्थमेव । कर्तव्यान्वयबोधानुकूलत्वेन न वाक्यभेदोऽपि ।

न चैवमेकस्यैव गोपदस्यान्यपदार्थे वृत्तौ समासो न स्यात् अनेकस्यान्यपदार्थेर्ते वर्तमानस्य समासानुशासनादिति वाच्यम् । चित्रापदस्यापि परम्परया अन्यदार्थबोधकत्वात् । अस्तु वा चित्रापदेऽपि लक्षणा चित्रापदार्थस्य परम्परया चित्रगोस्वामिसम्बन्धात् । न चैवमेकपदे लक्षणायामितरपदवैयर्थ्यम्, इतरपदमहिम्नैव विशेषस्य लक्षणीयत्वात् । न चैवं वाक्यार्थबोधकपदलक्षणाद्वयमेव वाक्यलक्षणा, पदवाक्योर्भिन्नत्वात् ।

**यत्तु** चित्रापदेन गोपदसन्निधानात् स्वार्थसम्बन्धिनी गौर्लक्ष्यते त्रिगवा च स्वामी लक्षित इति लक्षितलक्षणया अन्यपदार्थधीरिति । **तन्न** । एकपदलक्षणातो लक्षितलक्षणाया जघन्यत्वात् । **"भूवादयो धातवः"** चैत्रादीन् भोजय **"लम्बकर्णमानये"**त्यादितद्गुण-संविज्ञानबहुव्रीहौ चित्रादेर्विशेषणस्यापि कार्य्यान्वयात् । क्रियावाचित्वनियन्त्रितत्वादिरूपेणाजहत्स्वार्थ**लक्षणेति सम्प्रदायः** ।

**अत्राहुः-** अनस्तमितपदपदार्थविभागस्य चित्रगुसमुदायस्यान्योन्यान्वितावयवार्थ-सम्बन्धिन्यन्यपदार्थे शक्तिः कल्प्यते । अतो नानेकार्थत्वम् । न वा अवयवार्थत्यागो न वा तद्गुणसंविज्ञाने लक्षणा योगरूढिस्वीकारात् अवयवार्थाज्ञाने तत्सम्बन्धिनोऽज्ञानात् । मण्डपादौ तु अवयवार्थनिरपेक्षैव गृहविशेषधीरित्यवयवार्थत्याग एव समुदाये रूढिः । तथाह्यस्ति चित्रग्वादिपदस्यान्यपदार्थे तात्पर्यमेव तत्रैव च तात्पर्यं नियमतोऽन्यपदार्थस्य प्रतीतेः तदन्याप्रतीतेश्च, नियततात्पर्यं विना अन्यपदार्थे बहुव्रीहौ नियमत लक्षणापि न स्यात् । तस्मान्नियततात्पर्य्यनिर्वाहिका बहुव्रीहेरन्यपदार्थे शक्तिरेव, लक्षकपदस्य लक्ष्ये तात्पर्यानियमात् तात्पर्य्यनियमे च क्वचिद्बहुव्रीहेरन्यपदार्थपरत्वमपि न स्यात् ।

अथ क्वचिद्बहुव्रीहेरन्यपदार्थे तात्पर्यमेव न भवति यथा **"यजमानपञ्चमा ऋत्विजो लोहितोष्णीषा ऋत्विज"** इत्यत्र यजमानपञ्चमत्वलौहित्ययोर्विधेयत्वेन प्राधान्यात्तत्परतया अन्यपदार्थे तात्पर्याभावादेवं क्वचिल्लोकेऽपीति चेत्, तर्हि तत्रान्यपदार्थे तात्पर्याभावात् तदनुपपत्तिं विना लक्षणाविरहादन्यपदार्थे शक्तिरेव । अन्यथा तत्रान्यपदार्थबुद्ध्यनुदयापत्तिः। न च तत्रान्यपदार्थबुद्धिराभिधानिक्येव न भवतीति युक्तम्, ऋत्विग्भिः सामानाधिकरण्यानुदयात् । तस्माद्बहुव्रीहेर्नियमतोऽन्यपदार्थबुद्ध्युदयात्तत्र शक्तिरेव । यद्यपि शक्तस्य शक्ये न तात्पर्यनियमः लक्ष्येऽपि क्वचित् तात्पर्यात् । तथापि शक्ये तात्पर्यमौत्सर्गिकं क्वचिदन्यत्र प्रयोगादपोद्यते । बहुव्रीहौ चान्यपदार्थादन्यत्रा-प्रयोगाच्छक्यार्थेऽपि तात्पर्यनियमो भवति ।

**यत्तु** केवललाक्षणिकस्याभावाद्बहुव्रीहौ शक्यनियमे परिशेषादन्यपदार्थ एव शक्य इति । **तन्न** । शक्तिं विनापि तात्पर्यनिर्वाहात् ।

अत्रब्रूमः । बहुव्रीहौ न वाक्ये लक्षणा । किन्तु पदे तस्य च नान्यपदार्थे तात्पर्यनियमः क्वचिच्छक्येऽपि तात्पर्यात् । अथास्ति बहुव्रीहिस्थपदद्वयस्यान्यपदार्थे तात्पर्यनियमः ततोऽन्यत्राप्रयोगनियमात् । अतस्तन्निर्वाहिका पदद्वये शक्तिः सैव च वाक्ये वाक्यस्य पदद्वयात्मकत्वादिति चेत्, अस्तु तर्हि बहुव्रीहिस्थपदद्वये निरूढा लक्षणा तयैवान्यपदार्थे तात्पर्यनियमोपपत्तौ समुदायशक्तौ मानाभावात् ।

नवीनास्तु बहुव्रीहावन्यपदार्थस्य लक्ष्यत्वे नियमतो लक्षणीयपदलिङ्गता न स्यात् लक्षकपदस्य लक्षणीयपदलिङ्गग्राहकत्वनियमात् स्वलिङ्गापरित्यागाच्च । अतोऽन्यपदार्थे शक्तिरेवेति । अत्र ब्रूमः । बहुव्रीहेर्लाक्षणिकत्वेन विशेषणपदत्वनियमान्नियमतो लक्षणीयविशेष्यपदलिङ्गकत्वं । समानाधिकरणस्य समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिङ्गत्वनियमात् । भिन्नविभक्तिकयोरिव भिन्नलिङ्गकयोरपि सामानाधिकरण्येन विशेषण-विशेष्यपदभावाभावात् । अजहल्लिङ्गे तु लिङ्गविशेषनियमानुशासनान्न तथा, अन्यदन्यस्य लिङ्गं गृह्णातीत्यत्र विशेषणविशेष्यपदस्य भावत्वमेव नियामकम् ।

अथ नियमतो विशेष्यलिङ्गतैव विशेषणपदस्य बहुव्रीहेः शक्तिं विना न निर्वहतीति चेत्, न, विशेषणपदत्वमेव हि विशेष्यलिङ्गकत्वे तन्त्रं न तु शक्तत्वे सति गौरवात् । दण्ड्ययादिवाक्यस्याशक्तस्यापि पुरुषादिविशेष्यलिङ्गकत्वात्, गुणवाचिशुक्लादिपदानां "शुक्लः पट" इत्यादौ लक्षणया विशेषणानां विशेष्यलिङ्गत्वाच्च ।

ननु शुक्लादेर्गुणिपरत्वे लाक्षणिकत्वेन स्वलिङ्गप्राप्तौ **"गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती"**त्यनुशासनाल्लाक्षणिकस्यापि विशेष्यलिङ्गकत्वम् । न च बहुव्रीहौ तथानुशासनमस्तीति चेत् , न, तस्य न्यायप्राप्तानुवादकत्वात् । अत एव शुक्लं रूपमिति शुक्लगुणवाचकत्वेऽपि लिङ्गानुशासनं परिभूय विशेषणपदत्वात् शुक्लपदं विशेष्यरूपपदस्यैव लिङ्गं गृह्णातीति । अन्यथा **"शुक्लोरूप"**मिति स्यात् । किञ्च बहुव्रीहेर्लिङ्गानुशासनाभावेन

स्वलिङ्गाभावाद्विशेषणोपस्थापकवाक्यत्वाच्च विशेष्यपदलिङ्गतैव युक्ता यथा **"दण्डी पुरुष"** इत्यादौ । वस्तुतो बहुव्रीहेरन्यपदार्थे शक्तावपि कथं नानालिङ्गकत्वं तथा लिङ्गानुशासनाभावात् ।

अथ विशेषणपदत्वाद्विशेष्यपदलिङ्गता विशेष्यपदञ्च नानालिङ्गमतो नानालिङ्गतेति चेत्, तर्हि लाघवाल्लक्षणैवास्तु उक्तन्यायेनैव लक्षणीयविशेष्य-पदलिङ्गत्वोपपत्तेरिति। तत्पुरुषेऽपि **"राजपुरुष"** इत्यादौ पूर्वपदस्य षष्ठ्यर्थसम्बन्धे निरूढलक्षणयैव राजसम्बन्धिपुरुषबुद्ध्युपपत्तेर्न समासे शक्तिरनन्यलभ्यस्य शब्दार्थत्वात् ।

यत्तु समस्यमानपदातिरिक्तं न समासपदं समस्यमानपदानां प्रत्यभिज्ञानादतो न समासे शक्तिरिति । **तन्न** । पदतत्समुदाययोर्भिन्नत्वात् । नन्वनुपपत्तिं विना कथं षष्ठ्यर्थे लक्षणेति चेत्, यदि षष्ठ्यर्थो न लक्ष्यते तदा **"राजपुरुषादौ"** लाघवादिना प्राक्सामानाधिकरण्यावगमाद्राजत्वविशिश्टपुरुषस्यैव वैभक्तिकोऽन्वयः स्यात्, **"राजवाहनमानये"**त्यादौ वाहनपदे वाहनवल्लक्षणा स्यात् । अथ राजत्व-विशिश्टेऽस्मादाद्यानयनान्वयोऽयोग्य इति चेत्, तह्यरनयैवानुपपत्त्या तात्पर्यानुपपत्त्या वा षष्ठ्यर्थे लक्षणा, विभक्त्यर्थापेक्षो हि सर्वत्र नामार्थान्वयः । अतः श्रुतविभक्त्यर्थासम्भवे विभक्त्यर्थलक्षणैवोचिता ।

अथ राजपुरुषादावन्वयप्रकारतया षष्ठ्यर्थसम्बन्धबुद्धिरतो न पूर्वपदे लक्षणा न वा समासे शक्तिरिति । नामार्थयोरन्वयाभिधाने अन्वयप्रकारतया नियमतः षष्ट्यर्थोपस्थितौ हेत्वभावात् शब्दादनुपस्थितस्यान्वयपकारतया भाने मानाभावाच्च । चैत्रस्य नप्तेत्यादौ पुत्रस्य नप्तृपदाच्छक्यतावच्छेदकतयोपस्थितस्यान्वयप्रकारत्वेन ज्ञानम् । राज्ञः पुरुषः इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्येव संबन्धस्मारिका । अतो न लक्षणा न वा शक्तिरित्येके। तन्न । **"राजपुरुषमानये"**त्युक्ते पूर्वं नियमेन विग्रहाश्रवणात्। शाब्दिकानान्तु विग्रहाभिधानं समासार्थकथनपरं विभाषाधिकारे च समासानुशासनं समासविग्रहयोः पर्यायत्वं साधुत्वं वा

बोधयितुम् । विशेषस्तु विग्रहे सोऽर्थो नामविभक्त्यादिभिः शक्त्याभिधीयते समासे तु राजादिपदेन लक्षणया ।

बहुव्रीहौ तु नित्यसमासत्वाभिधानं विग्रहस्यासाधुत्वस्थापनार्थम् । **"चित्रा गौर्यस्ये"**ति विग्रहाभिधानं बहुव्रीहयर्थकथनपरम्। स्यादेतत् **"विभाषेति"** सूत्रेण वाक्यसमासयोस्तुल्यार्थता दर्शिता वाक्ये च मुख्या वृत्तिरतः समासेऽपि सैव वृत्तिः अन्यथा अतुल्यार्थतापत्तेः वाचकस्यैवानुशासनाच्च यथा लिङ्गादेः । न च लाक्षणिकं वाचकम्, अन्यथा गाव्यादेरप्यनुशासनापत्तेः ।

अथ वाचकव्युत्पादनवल्लाक्षणिकव्युत्पादनमपि उभयोरपि ज्ञानयोः पदार्थोपस्थापकत्वादिति चेत्, न, वाचकत्वज्ञानं विना वाच्याज्ञानाद्युक्तं वाचकत्वानुशासनं, लाक्षणिकञ्च शक्यव्युत्पत्त्यैव परम्परया लक्ष्यस्मारकमतो न तस्य व्युत्पत्त्यन्तरापेक्षा । न च प्रयोगानुशासनं व्याकरणं, स च लक्षणायामप्यस्ति अतस्तस्याप्यनुशासनं घोषसमभिव्याहारे गङ्गापदस्येवेति वाच्यम् । गङ्गयामितिमात्रं हयनुश्चिष्टं तच्च स्नातिसमभिव्याहारेऽप्युपपन्नं न तु तत्तद्वाक्यस्थत्वेन । किञ्च गङ्गायामितिपदं नानुशिष्टं किन्तु विभक्तिः सा चोभयत्र वाचिकैवेति न प्रातिपदिकवृत्तेर्मुख्याया वा लक्षणाया वा अपेक्षा, अत एव विभक्तौ न लक्षणा अवाचकस्याननुशासनादिति ।

उच्यते । साधुपदस्यानुशासनं व्याकरणं तस्य साधुत्वज्ञापकत्वेनैव प्रामाणिकप्रसिद्धिसित्वात् । अत एव न गाव्यादेरनुशासनं तस्यासाधुत्वात् । अस्ति च समासः साधुरतोयुक्तं तस्य साधुत्वानुशासनम् । साधुता च लाक्षणिकेनापि सम्भवति पदवाचकता चानन्यलभ्यत्वादवगम्यते, न तु व्याकरणं वाचकत्वानुशासनम्, प्रयोगमात्रे साधूनां टाप्ङीबादीनां शप्श्यनादिविकरणनां इ-ई-नुमाद्यागमानां वर्णविकारषकारणकारादीनां निरर्थकानामपि साधुत्वार्थमनुशासनात् । अत एव द्वयेकयोरित्याद्यनुशासनस्यैकत्व एवैकवचनप्रयोगः साधुरिति साधुत्वज्ञापनार्थत्वेन सार्थकता, अन्यथैकत्वे एकवचनस्य स्वादिसूत्रेण विहितत्वाद्वैयर्थ्यं स्यात् । द्वित्वादावशक्तत्वादेवैकवचनाप्रयोग इति चेत्, न ।

लक्षणया द्वित्वादौ प्रसक्तः प्रयोगोऽसाधुरितिज्ञापकत्वेन सार्थकत्वम् । एवञ्च विभक्तौ न लक्षणा लिङ्गादेस्त्वपूर्वे क्वाप्यनुशासनं नास्तीति लोके क्रियाकार्यत्वे न लक्षणा एवञ्च तृतीयाया अपि लक्षणया न कर्मत्वादौ प्रयोगः सामान्यतः साधु। **"कर्तृकरणयोस्तृतीये"**त्यनुशासनबलात् । व्यत्ययेऽपि च साधुत्वमनुशासनान्तरबलात्। तस्माद् यदि समासो नानुश्चिष्येत तदा तस्य लोके साधुत्वं न ज्ञायेत प्रत्युत गाव्यादिशब्दवदपशब्दतैव स्यात् ।

यदि च **"विभाषेति"** सूत्रं न प्रणीयेत तदा तथाभूतेऽर्थे समासस्यैव साधुत्वं ज्ञायेत न वाक्यस्य तदभिधानशक्तस्यापि श्चैवाल इव पङ्कजादेः । विभाषाशब्दः समास-विग्रहयोः साधुत्वज्ञापनार्थो न तु विकल्पेन समासस्य साधुत्वबोधकः । अवाचकः शब्दः समासोऽतोऽसाधुर्गाव्यादिपदवत्, वाक्यमेव वाचकत्वात्साध्विति शङ्कां तुल्यार्थौ वाक्य-समासाविति बोधयद्विभाषापदमेव निराकरोति। न च साधुत्वादेव शक्तत्वम्, अन्यलभ्यत्वेन शक्तिनिरासात् तिङन्तसुबन्तयोर्व्यभिचाराच्च । तत्र हि समुदाये साधुत्वं प्रत्येकं शक्तिरसाधुत्वञ्च ।

ननु नामार्थयोः राजसम्बन्धि-पुरुषयोर्विभक्तिं विना अन्वयाभावाद्राजसम्बन्धिपुरुषाप्रतीतेः विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेश्च राजसम्बन्धिपुरुषे समासस्य शक्तिरेव, एवं बहुब्रीहिकर्मधारयादावपि सार्थकत्वेऽपि प्रातिपदिकत्वविधा**"नमर्थवादादि"**सूत्रस्य प्रपञ्च इति चेत् । उच्यते । **"नीलं घटमानये"**त्यादौ नामार्थयोर्विशेषणविशेष्योरन्वयबोधे आकाङ्क्षादिकमेव हेतुर्न तु विशेषणविभक्तिरपि नीलस्य घटकर्मत्वाभावात् शब्दात्तथाऽननुभवाच्च, नीलविश्शिष्टस्य कर्मत्वं विभक्त्यर्थबहिर्भावेनैव नीलघटयोरन्वयबोधे स्यान्न त्वन्यथा । न च विभक्तिं विना समस्यमानपदानां साधुत्वन्नेति वाच्यम् ।

विभक्तिं विनापि समासस्य साधुत्वानुशासनात् । तस्मान्नमार्थयोरन्वयबोधे विशेषणविभक्तिः साधुत्वार्था न तु कर्मत्वोपनायिका । एवञ्च राजसम्बन्धिपुरुषस्य विभक्तिं

विनापि पुरुषपदादुपस्थितिः । अत एव तादृशपुरुषपदार्थे विभक्त्यर्थान्वयः । यदि च विभक्तिबलात् क्रियान्वयो नीलमित्य**"स्यारुणया"**न्यायादार्थः समाजस्तथापि राजसम्बन्धिपुरुषयोः क्रियान्व**यादार्थः समाजोऽस्तु** । न च राजसम्बन्धिनः कर्मत्वेनानुपस्थितेर्न क्रियान्वय इति वाच्यम् । समस्यमानपदार्थान्वयार्थं समासाद्विभक्त्यनुशासनमतो विशेषणेऽपि विभक्त्यर्थान्वयादन्यलभ्ये शक्त्यभावनियमात् । समासान्निरर्थकाद्विभक्तिश्च समस्यमानपदार्थमात्रगतमेव स्वार्थमाह तथैव व्युत्पत्त्यन्तरकल्पनात् समासेष्वनन्तशक्तिकल्पनातो लघुत्वात् ।

यद्वा विभक्तेः सन्निहितपदार्थगतस्वार्थबोधकत्वमतो बहुव्रीह्यादावन्वयबोध-पूर्वकोत्तरपदलक्षणायां षष्ठीतत्पुरुषे च विभक्तिसन्निहितोत्तरपदार्थगतस्वार्थबोधकत्वं, विभक्तिसन्निहितपदस्यार्थश्च मुख्यया लक्षणया वा । एवं नीलोत्पलमानयेत्यादौ कर्मधारये विभक्तिं विनैव नामार्थयोरन्वयबोधानन्तरं विशिशष्टस्य कर्मत्वेन क्रियान्वयः। कर्मधारये तु न शक्तिर्न वा लक्षणा ताभ्यां विनापि विवक्षितार्थान्वयबोधोपपत्तेः ।

ननु नीलघटयोः सामानाधिकरण्यप्रतीतेस्तत्र लक्षणैव अन्वयप्रकारत्वादिना च तस्य भाने राजपुरुषादौ षष्ठर्थोपस्थितिरपि तथास्तु । अत्र ब्रूमः । कर्मधारये सामानाधिकरण्यं नामार्थयोरभेदो वा गुणगुणिनोः समवायो वा अनुभूयते स चान्वय एव न त्वन्वयप्रतियोगी। अतोऽन्वयप्रतियोगिनोरुपस्थितिर्नामपदात् शक्त्यैवेति न तदर्थं लक्षणा । ""राजपुरुष" इत्यत्र तु राजसम्बन्धिपुरुषयोरन्वयोऽनुभूयते राजसम्बन्धिनश्चान्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थलक्षणां विना राज्ञः पुरुषं राजसम्बन्धिनं पुरुषं राजपुरुषमानयेत्यादौ पर्यायत्वात् । राजसम्बन्धिनः पुरुषेऽन्वयोऽनुभूयते राजम्बन्धः अन्वयप्रतियोगित्वेन । एवञ्च बहुव्रीहौ सर्वपदानां षष्ठीतत्पुरुषे पूर्वपदस्यान्यपरतया लाक्षणिकत्वात्ताभ्यां कर्मधारयो बलवान् तत्र सर्वेषां पदानां स्वार्थपरतया मुख्यत्वात्। अतएव एतया ऋचा निषादस्थपतिं याजयेदित्यत्र कर्मधारयः एव मुख्यत्वे शब्दस्वरसात् षष्ठीतत्पुरुषे च षष्ठ्यर्थलक्षणापत्तेः ।

एवञ्चेश्वरनिषादप्रतीतेस्तस्यैवाधिकारात्तदपूर्वेण स्वनिर्वाहकतयैवेश्वरनिषादस्यैव यागानुकूलविद्याप्रयुक्तिराक्षिप्यते, अन्यथा मुख्यार्थहानिप्रसङ्गात् ।

नन्वत्र षष्ठ्यर्थलक्षणया लब्धविद्यस्त्रैवर्णिक एव निषादानामीश्वरोऽधिकारी बोध्यते न त्वीश्वरनिषादोऽक्लृप्तविद्याप्रयुक्तिकल्पनातः षष्ठ्यर्थलक्षणाया लघुत्वादिति चेत् । उच्यते । मुख्यार्थान्वयाधीनकल्पनागौरवेण मुख्यार्थो न हीयते किन्तु बाधकं विना मुख्यार्थान्वयबोधस्य प्राथमिकत्वात्तदनुरोधेन तदुपपदाकं कल्प्यते फलमुखञ्च गौरवं न दोषाय प्रमाणवतो गौरवस्य न्याय्यत्वात् । न चाक्लृप्तकल्पनाप्रसङ्ग एव मुख्यार्थन्वये बाधकः, अक्लृप्तस्य प्रागनवगमात् मुख्यार्थान्वयबलादेव तदवगमे उपजीव्यविरोधात् । अन्यथा प्रतीतानुपपत्तिबलात् कल्पना क्वापि न स्यात् अक्लृप्तकल्पनागौरवेण कल्पकस्य बाधितत्वात् ।

अथ शूद्रस्य वेदपाठनिषेधादीश्वरनिषादोऽधिकारी बोधयितुं न शक्यत इति मुख्ये बाधकान्न कर्मधारयः । न चेश्वरनिषादे विधिबलाद्वेदपाठनिषेध एव बाध्यत इति युक्तम् । षष्ठ्यर्थलक्षणया अबाधे सम्भवति निषेधकवेदबाधकल्पनाया अन्याय्यत्वादिति चेत्, न, सामान्यनिषेधस्य तद्विशेषविधाने तदितरपरत्वात् । यथा **"न हिंस्यात्सर्वाभूतानि श्वेतं छागमालभेतेत्यत्र"** । एवं निषादपदस्य मुख्यत्वे शूद्रपदे सङ्कोचमात्रम् । शूद्रपदस्य निषादपरत्वे निषादपदस्य मुख्यत्वबाध एव । यद्यपि सङ्कोचेऽप्येकदेशबाध एव तथापि सङ्कोचेऽद्वयोरपि मुख्यत्वरक्षणादबाधाच्च सङ्कोच एव ज्यायान् ।

**अन्ये तु** नात्र षष्ठ्यर्थोलक्ष्यते अनुपपत्त्यभावात् । अतः समासस्य षष्ठ्यर्थमन्तर्भाव्य शक्तिरेव । अन्यथा कर्मधारयेऽपि पदार्थसामानाधिकरण्यप्रतीतेः तत्रापि लक्षणेति तुल्यम् । अथान्वयप्रकारतया सामानाधिकरण्यप्रतीतेर्न तत्र लक्षणा, तर्हि षष्ठ्यर्थेऽपि तथैव न लक्षणा । नचान्वयप्रकारतया नियमतो विशेषोपस्थितौ प्रमाणं तस्मादुभयत्र समासस्यैव बोधकत्वम्, कर्मधारये तु बलवत्त्वमुत्सर्गतः सामानाधिकरण्यस्योचितत्वात् । निषादस्थपतौ तु स्थपतिपदार्थस्येश्वरस्य प्रतियोग्यपेक्षत्वात्तत्पूरणसमर्थः षष्ठीतत्पुरुष एव

निष्प्रतियोगिके कर्मधारयः नीलोत्पलमित्यादावुत्पलस्य निष्प्रतियोगिकत्वात् । तथाच निषादेश्वरस्याधिकारः, ऐश्वर्यस्य सजातीयापेक्षत्वात् । नरपतिपदान्नरपतेर्नरस्येव निषादस्थपतिपदान्निषादस्येश्वरस्य प्रतीतेरिति ।

**तन्न** । राजवाहनादौ पूर्वपदे षष्ठ्यर्थलक्षणयैव राजसम्बन्धिप्रतीतेः समासे शक्त्यभावात् अनुपपत्तिरुक्तैव । **"उपकुम्भमि"**त्यद्व्ययीभावोऽ**"र्धपिप्पली"**त्यादिश्च तत्पुरुषः पूर्वपदार्थप्रधान एव कुम्भस्य समीपे पिप्पल्याः अर्धे तात्पर्यादतस्तत्रोत्तरपदे षष्ठ्यर्थलक्षणा न तु समासे शक्तिः । नञ्समासे अब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नञि उत्तरपदार्थसदृशे क्षत्रिये लक्षणा । **"अघटः पट"** इत्यादौ च प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभाववल्लक्षणा व्यासेऽपि **"न घटः पट"**इत्यादौ यथा **"शुक्ल पट"** इत्यत्र शुक्लवल्लक्षणा । **"न पचती"**त्यादौ क्रियासम्बन्धे **"भूतले न घट"** इत्यादौ प्रसज्यप्रतिषेधे नञो मुख्यार्थता सुबन्तसम्बन्धेऽपि न समासः विभाषाधिकाराद्विकल्पेन समासानुशासनात् । **"यजतिषु च येयजामहं करोति नानुयाजेष्वि"**त्यत्र पर्युदासे नञ् । तेनायमर्थः यजतिषु यागेषु नानुयाजेषु अनुयाजव्यतिरिक्तेषु, ये यजामह इति मन्त्रं करोति ।

अथ नानुयाजेष्वित्यत्र न पर्युदासे नञ् । तदा हि पदद्वयस्यान्यपरत्वं स्यात्समासापत्तिश्च। तस्मादनुषङ्गात् करोतिना नञोऽन्वयात् प्रसज्यप्रतिषेधः । तेनानुयाजेषु ये यजामह इति मन्त्रं न करोतीत्यर्थः । एवञ्च नानुयाजेष्विति पदद्वयस्य नान्यपरता न वा नञो मुख्यार्थत्यागः समासाभावेन साधुता च इति चेत्, न । समासस्यानित्यत्वात् नानुयाजेष्विति वाक्ये पर्युदासे नञ् ।

न चैवं वाक्यवृत्तिपदत्वान्नञोऽन्यपरत्वाभावः, "गौर्वाहीक" इत्यादौ वाक्येऽपि गवादिपदस्यान्यपरत्वात् । यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्रविधायकतन्निषेधयो-र्विरुद्धार्थत्वेन वाक्यभेदापत्तिः । तस्मात् प्रथमप्रतीतैकवाक्यताबलादेकवाक्यत्वे सम्भवति वाक्यभेदस्यान्याय्यत्वात् नञ्पदे लक्षणा कल्प्यते न तु नञ्पदे मुख्यत्वानुरोधादेकवाक्यतात्यागः । न हि पदार्थानुरोधेन वाक्यार्थकल्पनं किन्तु

वाक्यार्थानुरोधेन पदार्थकल्पना । नपदञ्च केवलं नास्त्येव नञ्पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः । अन्यथा प्रसज्यप्रतिषेधे नञ् न स्यादेव नपदेनैव गतार्थत्वात् ।

**"अमानोना"** इत्यत्रापदमेव निषेधवाचकं समासवाक्यभेदेन नञो द्वैविध्याद्वा तथाभिधानम् । इतरेतरद्वन्द्वे च धवखदिरौ छिन्धीत्यादौ विभक्त्युपनीतद्वित्वस्य धवखदिरयोः प्रत्येकं न योग्यत्वं न वा साकाङ्क्षत्वं द्वित्वमपि प्रत्येकं न योग्यं न वा साकाङ्क्षम् एकत्र द्वित्वाभावात् । न च व्यासज्यवृत्तित्वेन द्वित्वमेकाश्रितमपीति वाच्यम् । स हि द्वित्वमाकाङ्क्षति द्वित्वञ्च तं यत्र द्वित्वं परिसमाप्यते, एकस्य तथात्वे द्वौ बहव इत्येकत्रापि स्यात् अतोन्ददद्वे पदशक्यस्य नान्वयबोधः बोधे वा धवद्वयधीः खरिदद्वयधीश्च स्यात् । तस्मात्पदशक्ये द्वित्वान्वयानुपपत्त्या सहितावस्थमुभयं द्वित्वान्यावगमयोग्यं तत्साकाङ्क्षञ्चेति खदिरसहितधवोपस्थितये धवपदे साहित्यलक्षणा ।

ननु खदिरसहितधवस्यैकत्वात् खदिरसहितो धव इतिवदद्विवचनानुपपत्तिः धवसहितखदिरसाहित्यावस्थालक्षकत्वे च तस्या एकत्वादेकवचनापत्तिः अवस्थाश्रययोरुपसर्जनत्वेन द्विवचनान्वयानुपपत्तिश्चेति चेत्, **अत्र कश्चित्**, अस्यालक्ष्यत्वेऽपि तदाश्रयगतस्वार्थबोधकत्वमेव हि द्विवचनबहुवचनयोः पदवृत्तिवैचित्र्यात् तथैव व्युत्पत्तेः यथा गुणवाचि नीलादिपदं क्वचिद्गुणमात्रवाचकं क्वचित्तदुपलक्षितद्रव्यपरम्, अन्यथा **"नीलः पट"** इति सामानाधिकरण्यं न स्यात् एकत्र वृत्त्यभावात् । यत्तु लक्षिता साहित्यावस्था स्वाश्रयमुभयं लक्षयतीति । तन्न । लक्षितलक्षणाया: जघन्यत्वात् ।

वस्तुतस्तु साहित्याश्रयः प्रधानं साहित्यन्त्ववच्छेदकतया गुणभूतं पदेन लक्ष्यते तेन साहित्याश्रयस्यानेकत्वाद्द्विवचनबहुवचने भवतः । अत एवेतरेतद्वन्द्वः सर्वपदार्थप्रधानः धवश्च खदिरश्चेति विग्रहेण तथैवार्थविवरणात् । समाहारे तु साहित्यावस्था प्रधानं पदार्थो गुणभूतः तेन तस्या एकत्वाद्""भेरीपटहमि"त्यादावेकवचनम् । धर्मे धर्मिणि च तात्पर्याद्द्वन्द्वयोर्भेदः । अत एव युगपदधिकरणवचन इतरेतरद्वन्द्व इति शाब्दिकाः । अधिक्रियत इत्यधिकरणं पदार्थस्तेषां युगपद्वचनमेकेनैकदोपस्थापनं तच्च न

शक्त्या एकपदस्येतरपदार्थे शक्त्यभावात् । अन्यथेतरपदवैयर्थ्यप्रसङ्गः । अनेकार्थत्वेऽप्येकस्यैकत्रानेकार्थपरत्वाभावात् । नापि पदद्वयं मिलितमुभयोरुपस्थापकं, मिलितस्य मिलिते शक्त्यभावात् । नापि द्वन्द्वे शक्तिरेव, पदलक्षणयैवानेकार्थोपस्थितिसम्भवात् । अत एवाङ्गवाङ्गकालिङ्गशब्दाद्द्वन्द्वे बहुषु वर्तमानात् परस्य तद्राजस्याञादेः **"तद्राजस्य बहुषु तेनैवास्त्रियां"** इत्यनेन लोपे अङ्गवङ्ग कलिङ्गा इति भवति । अन्यथा साहित्यलक्षणां विना तेषां प्रत्येकपदस्य बहुषु वृत्त्यभावादञ्लोपे न स्यात् । घटौ घटा इत्यत्रापि घटसहितघटत्वेन द्विवचनबहुवचनान्वययोग्यतेति तदुपस्थितये घटपदे साहित्यलक्षणा । तदर्थप्रदर्शनार्थं द्वन्द्वापवादकं सरूपणामेकेशेषानुशासनमपि । तदुक्तम्-- **"सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः । क्रमेणार्थप्रतीतौ हि न स्याद् द्विवचनादिकम्"**।। इति ।

ननु स्वरूपद्वयमेव साहित्यमतिरिक्तस्याभावात् । स्वरूपयोश्च धवपदादुपस्थितौ युगपद्वृत्तिद्वयविरोधः । न चाजहत्स्वार्था, साधारणरूपाभावात् । एकक्रियान्वयित्वमेकान्वय-प्रकारत्वम् अपेक्षाबुद्धिविशेषविषयत्वादिकं द्वित्वान्वयात् पूर्वमविद्यमानमप्रतीतञ्च धवखदिराविति हि प्रतीतिः न तु रूपान्तरेण । न च धवपदस्य खदिरे स्वार्थसम्बन्धो लक्षणाबीजमस्तीति चेत्, न । साहित्यं हि तुल्यद्वारता सा च धातूपनीतफलानुकूल-सजातीयविजातीयव्यापारप्रचयस्यैकरूपस्तुल्यः सम्बन्धः। द्वन्द्वेऽन्योन्यसम्बन्धोऽप्ययमेव । धवखदिरौ छिन्धीत्यत्र छिदानुकूलो यावान् व्यापारः स तयोस्तुल्य एव भासते च ।

अत एव स्वर्गकामादौ पत्न्याः सहत्वेनानुप्रवेशेऽपि न द्विवचनापत्तिरेकत्वविरोधो वा अतुल्यद्वारकत्वात् दम्पत्योरेकरूपसजातीयविजातीयव्यापारप्रचयसम्बन्धरूपसाहित्याभावात् । एवं छिदानुकूलतुल्यव्यापारत्वेन साहित्यरूपेण शक्यलक्ष्यसाधारणेनाजहत्स्वार्थलक्षणया धवपदादुपस्थिते धवखदिररूपे विभक्त्यर्थद्वित्वान्वयः धवपदार्थस्य खदिरेण सम्बन्धोऽपि तुल्यद्वारत्वमेव । न चास्य लक्ष्यत्वान्न सम्बन्धरूपतेति वाच्यम् । अजहत्स्वार्थायां हि येन रूपेण लक्ष्यता स एव सम्बन्धः यथा छत्रिकाकपदयोः छत्रिघटितसमूहवर्त्तित्वं दध्युपातकत्वञ्च

लक्ष्यमेव सम्बन्धः । न चैवं खदिरपदवैयर्थ्यं लक्षणायां लक्षणीयपदानुपयोगादिति वाच्यम् । खदिरपदं विना न नियता खदिरोपस्थितिरिति साहित्याश्रयद्वितीयविशेषज्ञापनाय पदसार्थकत्वम् अन्यथा लक्षणाविरहेण धवद्वयधीप्रसङ्गात्।

अत एवग्नीषोमीये अग्नीषोमौ देवते इति द्वित्वान्वयबलादेव साहित्यावस्थयोः सापेक्षयोर्देवतात्वं द्वन्द्वे आद्यं पदं लक्षकं प्राथम्यात्, द्वितीयं पदं साहित्यनिरूपकाकाङ्क्षितिसमर्थकं मुख्यमेव उभयोरमुख्यार्थत्वे हेत्वभावात् ।

**अन्ये तु** द्वितीयपदेऽपि लक्षणा समभिव्याहृतविभक्त्यर्थान्वयानुरोधात्। अन्यथा समभिव्याहारभङ्गापत्तेः पदार्थगतस्वार्थबोधिका हि विभक्तिः । न च समासे पदमन्यदस्ति, समस्यमानपदात् समासे शक्त्यभावात्, तेन धवपदार्थगतं खदिरपदार्थगतञ्च द्वित्वं तन्त्रेण विभक्तिराह, अतोधवपदवत् खदिरपदेऽपीतरसम्बन्धावस्थस्वार्थपरता प्रातिपदिकार्थे इतरपदार्थान्वयस्य विभक्त्यर्थगर्भत्वादुभयपदार्थगत एव द्वित्वकर्मत्वे विभक्तिराह । न च द्वयोः सहितावस्थस्वार्थपरत्वे धवद्वयं खदिरद्वयञ्च वाक्यार्थेऽन्वीयेत न त्वेको धवः खदिरश्चेति चतुष्टयापत्तिरिति वाच्यम् । पदद्वयेन हि सहितयोरेकमेव साहित्यं लक्ष्यते । तच्च न चतुष्टयवृत्ति ।

**अपरे तु** द्वितीयपदं फलतोऽनुवादकं यथान्विताभिधाने एकं पदम् । अत एव समुच्चये अन्वाचये च तयोः साहित्यानवगमान्न द्विवचनबहुवचने न वा द्वन्द्वः । यद्यपि चार्थमात्रे द्वन्द्वानुशासनं तथापि यत्रान्योन्यसाहित्यान्वयपूर्वक इतरेतरपदार्थान्वयस्तत्र समासः साधुस्तेनेतरेतरयोगसमाहारयोस्तत्राभावात् समासः । समुच्चये अन्वाचये च न तथा । असम्बद्ध एव एकैकशः क्रियान्वयात् । एवं **"धवं खदिरञ्च छिन्धी"**त्यादौ समुच्चये तुल्यवदसम्बद्धयोः क्रियान्वयधीः, पश्चात्तु तयोरेकरूपसजातीयविजातीयव्यापारप्रचययोगित्वं साहित्यञ्चकारादवगम्यते । क्रियाभेदेऽन्वाचयः यथे"न्धनमाहर्तुं वनं व्रज शाकमप्यानेष्यसी"ति। गौश्चाश्चश्चेति द्वन्द्वसमानार्थकं वाक्यमेव साहित्यं परमनेन न स्फोरितं द्विवचनबहुवचनयोरेव तद्व्यञ्जकत्वात् ।

**यत्तु** द्वित्वान्वयार्थं तदन्वययोग्यार्थोपनयनं अपेक्षाबुद्धिविषयत्वावस्थया च द्वित्वान्वय इत्यपेक्षाबुद्धिविषयत्वावस्थस्वार्थपरतास्तु इदमेव च साहित्यं न त्वेकक्रियान्वयः तस्य च विभक्त्यैव बोधितत्वात् । एकक्रियान्वयाभावेऽपि च द्वित्वान्वयदर्शनादिति । **तन्न** । अपेक्षाबुद्धिविशेषविषयत्वार्थमप्येक उपाधिरवश्यं वाच्य इति तथैव लक्षणाया युक्तत्वात् लाघवात् । न च विना लक्षणामप्यन्यसम्बन्धस्य सतः सापेक्षस्य क्रियान्वयोऽपि विभक्त्या बोध्यत इति ।

अत्रोच्यते । एकस्मृत्यारूढपदद्वयात् स्वस्य शक्त्या स्वस्वार्थयोरेकदा स्मृतिसम्भवादनेकस्मृत्यर्थं न साहित्ये लक्षणा एकैकमात्रगोचरसंस्कारद्वयाद्धि पदयोस्तदर्थयोश्चैका स्मृतिरित्यनुभवसिद्धम् प्रत्येकेन्द्रियसंयोगात् समूहालम्बनमिव । अन्यथा द्वन्द्वे न लक्षणा न वा तया अनेकस्मृतिः पदयोस्तदर्थयोश्चैकस्मृत्यभावात् । एवञ्च पदद्वयादुपस्थिते धवखदिरादिस्वरूपे विभक्त्या द्वित्वान्वयो बोध्यते । यथेन्द्रियसन्निकृष्टे ज्ञाते वा धवखदिरादिस्वरूपे प्रत्यक्षेण द्वित्वं बोध्यते । न च तत्र तयोः स्वरूपातिरिक्तं तुल्यद्वारत्वादिकं साहित्यमस्ति ज्ञायते वा तथा विभक्त्यापि विलक्षणस्वरूपे द्वित्वं बोध्यते। उभयोर्द्वित्वान्यबोधकत्वे विशेषाभावात् ।

ननु योग्यतावच्छेदकरूपेणोपस्थिते इतरपदादन्वयबोधः साहित्याश्रयत्वेन च धवखदिरौ तथा न प्रत्येकं छिद्रेतरत्वविशिश्ष्टे घटपदस्य लक्षणैवेति चेत्, न । उपस्थिते योग्येऽन्वयबोधोऽधिकस्य गुरुत्वात् । घटपदादपि योग्यस्यान्वयो बोध्यते न तु छिद्रेतरत्वेनेत्युक्तम् । स्यादेतत् । पदद्वयात् स्वस्वशक्त्या एकदा स्मृतेनैकत्र इतरपदार्थस्य विभक्त्यर्थस्य चान्वयबोधो न स्यात् इतरपदार्थे इतरपदानां नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वमिति व्युत्पत्तेः व्याप्तेश्च । अनेकञ्च न पदार्थो नापि नामार्थः मिलितपदद्वये पदत्वनामत्वयोरभावात् । अतो द्वित्वान्वययोग्यस्य पदार्थत्वनामार्थत्वनिर्वाहाय द्वन्द्वपदे साहित्यलक्षणेति ।

तन्न । पदार्थत्वं हि वृत्त्या पदोपस्थाप्यत्वं पदतात्पर्यविषयत्वं वा । अस्ति च द्वन्द्वे पदस्यानेकमुपस्थाप्यं तत्र तात्पर्यञ्च । तन्निर्वाहश्चानेकैकस्मृतिद्वारा लक्षणाया पदेन वा स्वस्वशक्त्या पदाभ्यां वेति न कश्चिद्विशेषः । एकपदोपस्थाप्यत्वञ्च न पदार्थत्वं गौरवात् । एवं नामार्थत्वमपि तत्तात्पर्यविषयत्वमेव ।

अथ पदार्थतावच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्वमतो मिलिते तदवच्छिन्नत्वं न मिलितवृत्तिपदार्थतावच्छेदके लक्षणां विनेति चेत्, न, धवखदिरस्वरूपद्वयस्य प्रत्येकं तदवच्छिन्नत्वमेव । मेलकञ्च न स्वरूपद्वयातिरिक्तं प्रत्येक स्यायोग्यत्वात् न द्वित्वान्वयः । तथापि यादृशे द्वित्वान्वयस्तादृशे न तदवच्छिन्नस्तदवच्छिन्ने च न द्वित्वान्वय इति चेत् ,न। स्वरूपद्वयातिरिक्तस्य यादृशपदार्थस्याभावात् ।

वस्तुतः "समभिव्याहृतपदार्थे विभक्त्यर्थान्वय" इति व्युत्पत्तिर्लाघवान्न तु पदार्थतावच्छेदकावच्छिन्ने गौरवात्। ननु विभक्ते: पदार्थतावच्छेदकधर्मव्याप्यसङ्ख्याबोधकत्वं द्वद्वादन्यत्र तथा व्युत्पत्तेरिति उभयगतपदार्थतावच्छेदके साहित्ये लक्षणेति चेत्, न । पदार्थतावच्छेदकधर्मसमानाधिकरणस्वार्थबोधकत्वे विभक्तिव्युत्पत्तिर्लाघवात् न तु सामानाधिकरण्ये नियमांशोऽपि प्रविशति गौरवात् ।

नन्वेवं घटावानय पटञ्चेत्यत्र घटत्वसमानाधिकरणं द्वित्वं समभिव्याहृते पटेऽपीति तमादायान्वयबोधः स्यादिति चेत्, न । विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थान्वय-बोधकत्वं व्युत्पन्नम् । न च घटावित्यत्र पटपदं प्रकृतिः । धवखदिरावित्यत्र धवपदं व्यवहितमपि विभक्तिसमभिव्याहृतमेव तदन्तर्भावेनैव समासस्य प्रातिपदिकत्वात् विभक्त्यर्थान्तर्भावेनैव नामार्थस्य क्रियान्वयित्वात् । विभक्तेरेकपदार्थमात्रगत-सङ्ख्याभिधायकत्वं नानापदार्थगतसङ्ख्यान्वयाबोधकत्वञ्चेति चेत्, न । आद्ये एकमात्रपदयोर्व्युत्पत्तावधिकत्वात् द्वितीयेऽन्वयाबोधकत्वे योग्यताविरहस्योपाधिकत्वात् । न चैकधर्मावच्छेदकं विना यदि स्वरूपद्वये द्वित्वान्वयस्तदा धवञ्च खदिरञ्चेत्यत्रेव वाक्यभेदः

स्यात् द्वित्वविशिश्टैकार्थाप्रतिपादकत्वादिति वाच्यम् । आनयनान्वितद्वित्व-विशिश्टैकार्थबोधकत्वात् । धवखदिराविति च न वाक्यं क्रियायाः प्रत्येकमन्वये वाक्यभेद इत्यपि न । लक्षणापक्षेऽपि प्रत्येकमेव क्रियान्वयित्वात् गमनादिक्रियाया व्यासज्यवृत्तित्वाभावात् । तद्राजानान्तु प्रत्येकं तेनैव बहुषु वर्तमानात्परस्यात्रादेर्लोपो भवति **"तद्राजस्य बहुषु तेनैवेति"** वचनात् न त्वेकत्वबोधकात् । अत एवाङ्गानामपत्यानि राजानो वा अङ्गा इति इत्युदाहरणं अङ्गानामपत्यं राजा वा आङ्ग इति प्रत्युदाहरणंवृत्तिकारोदर्शयति स्म । तस्मान्नानापदादप्युपस्थितेऽनैकत्र द्वित्वान्वय इति नानेकोपस्थित्यर्थं साहित्यलक्षणा ।

अत एव **"चन्द्रे कलङ्कः सुजने दरिद्रता विकाशलक्ष्मीः कमलेषु चञ्चला । मुखाप्रसादः सधनेषु सर्वदा यशो विधातुः कथयन्ति खण्डितम्"** ।। इत्यादावेकैकस्मृत्यारूढनानापदजनितैकस्मृतिविषयेषु कलङ्कादिषु बहुत्वान्वयबोधः मेलकोपस्थापकस्य द्वन्द्वस्य तत्राभावात् तत्कल्पने मानाभावात् एकवचनान्तानां वाक्येऽनन्वयप्रसङ्गाच्च ।

नन्वेवं धवखदिरौ छिन्धीत्यत्र तयोश्छिदानुकूलव्यापारवत्त्वं साहित्यं न प्रतीयेतेति चेत् , न, द्वित्वान्वयबोधात्पूर्वं तन्न प्रतीयत एव तदुत्तरन्तु विभक्त्या क्रियापदेन च सम्भूय छिदानुकूलसजातीयविजातीयव्यापारप्रचयस्य तुल्य एव सम्बन्धो धवे खदिरे च बोध्यते यथा धवं छिन्धि खदिरञ्चेति समुच्चयेन । न चैवं द्वन्द्वसमानार्थत्वेन समुच्चयेऽपि समासः स्यादिति वाच्यम् । द्वन्द्वे युगपदुपस्थिते द्वये एकदा क्रियान्वयबोधे तात्पर्यं तेन तत्र समासः समुच्चये क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्यमित्यसमासः । अन्वाचयेऽप्येवम् ।

किञ्च यदि तुल्यव्यापारत्वेन साहित्येन द्वयोरुपस्थितिः पदार्थता च तदा तुल्यव्यापारौ सहितौ वा गच्छत इति धीः स्यात् न तु चैत्रमैत्राविति पदार्थतावच्छेदकरूपेण पदार्थे विभक्तेः क्रियापदस्य चान्वयबोधकत्वव्युत्पत्तेर्व्याप्तेश्च । यथा दध्युपघातकत्वेन काकादेरितरपदार्थान्वयः सहितावस्थचैत्र-मैत्रत्वेनोपस्थितौ प्रत्येकं

द्वित्वयानुपपत्तिर्वृत्तिद्वयविरोधश्च। अपि च चैत्रमैत्रो गच्छत इत्यत्र गमनस्य व्यासज्यवृत्तित्वाभावात् चैत्रत्वेन गमानन्वयार्थं चैत्रपदात् चैत्रत्वेन द्वित्वान्वयार्थं मैत्रसहितचैत्रत्वेनोपस्थितौ युगपद्वृत्तिद्वयविरोधः । सहितावस्थे च गमनकर्तृत्वाभावात् आख्यातार्थसङ्ख्यान्वयोऽपि न सहितावस्थे ।

न च सहितत्वेनोपस्थिते पदार्थैकदेशे चैत्र मैत्रे च धात्वर्थगमनान्वय इति वाच्यम् । "सहितो गच्छतीति" धीप्रसङ्गात् । न च धात्वर्थगमने आख्यातार्थद्वित्वान्वयः। सामानाधिकरण्यभङ्गप्रसङ्गात् सुबन्ततिङन्तयोरेकसंख्याभिधायकत्वात् । एवं "गर्गा भुञ्जत इत्यत्र भोजनस्यैककर्तृकत्वनियमात् अनेककर्तृकं भोजनं न सम्भवतीति तन्त्रवृत्त्या गर्गत्वेनोपस्थितेऽनेकत्र सुप्तिङर्थबहुत्वान्वयः न तु सहितत्वेनोपस्थिते ।

**यत्तु** तत्रापि धात्वर्थभोजनगतं बहुत्वमाख्यातेनोच्यत इति । **तन्न ।** तिङन्तसुबन्तयोः सामानाधिकरण्यानुपपत्तेः भोजनानां सहितत्वेनानुपस्थितेश्च । यदा चानुगतं रूपं विनैवैकैकपदात् स्वस्वशक्त्योपस्थितेऽनेकत्र योग्यतया द्वित्वबहुत्वान्वयस्तदा सुबन्ततिङन्तसंख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः ।

**यत्तु** साहित्यं नोभयानुगतं तुल्यव्यापारत्वादिकं तेन रूपेण धवखदिरयोर्विभक्तिधात्वर्थान्वयाप्रतीतेः किन्तु प्रत्येकविलक्षणं स्वरूपद्वयमेव प्रत्येकाच्चोभयमन्यदेव । भवति हि द्वयादन्य एकः धवो न धवखदिरौ तौ च न धव इत्यनुभवात् । तथा चैकमात्रवाचकेन द्वयमशक्यं लक्ष्यत इति न वृत्तिद्वयविरोधः । धवपदस्य च स्वार्थनिरूप्यत्वमेव लक्ष्ये स्वरूपद्वये सम्बन्ध एकनिरूप्यत्वाध्रुवस्य । अनुगतधर्मं विनापि धवपदादनेकोपस्थितिध्रुवपदादिव चतुर्दशानाम् । योग्यतया विभक्त्यर्थस्य स्वरूपद्वये धात्वर्थस्य च प्रत्येकमन्वय **इति । तन्न** ।

उक्तरीया हि स्वस्वशक्ता नानापदजनितैकस्मृतिविषयेऽनेकत्र द्वित्वान्वय-बोधसम्भवात् न तदर्थं साहित्यलक्षणा । घटौ घटा इत्यत्र द्वित्वबहुत्वान्वय-योग्यानेकोपस्थितिः शक्तित एव तन्त्रवृत्त्या घटपदात् सम्भवतीति न तदर्थं लक्षणा । यथा

**"ग्रहं सम्मार्ष्टी"**त्यत्र ग्रहपदात्तन्त्रवृत्त्योपस्थितानेकग्रहे सम्मार्गान्वयः । तर्हि तत्रानेकग्रहस्वरूपमात्रज्ञानवदिहाप्यनेकघटस्वरूपधीः स्यात् न तु तेषां सहितावस्थत्वधीरिति चेत्, न । तां विनापि द्वित्वबहुत्वान्वययोग्योपस्थितेः । सहितावस्थत्वेनानेकस्य द्वित्वबहुत्वान्वययोग्यतेति चेत्, न ।

प्रकृत्युपस्थितानेकत्वेनैव तद्योग्यत्वात् लाघवात् । भवत्वनेकत्र द्वित्वान्वयबोधस्तेषां साहित्यधीस्तल्लक्षणां विना न स्यादिति चेत्, न । विभक्त्यर्थधात्वर्थव्यापारान्वयबोधात्पूर्वमनेकत्र तुल्यव्यापारवत्त्वस्याप्रतीतेः । किञ्चैवं न विभक्त्यर्थद्वित्वबहुत्वान्वयानुपपत्त्या लक्षणा, किन्तु साहित्यप्रतीत्यनुरोधात् । न चैवमपि, धातुनैव तुल्यव्यापारवत्त्वस्य बोधनात् तदन्वयबोधात्पूर्वं तत्प्रतीत्यसिद्धेः ।

समाहारे तु **"पाणिपादं" "पञ्चमूली"**त्यादौ तावद्वृत्त्येकधर्माभिधानं लक्षणयैव तदेकत्वादेकवचनम् । **तदाहुः शब्दिकाः** समाहरणं समाहारोऽनेकस्यैकीकरणम् एको धर्म इति यावत् । स चैको धर्मः सेनावनादाविव द्वित्वबहुत्वसङ्ख्यापेक्षाबुद्धिविशेषविषयत्वं वा । विरूपैकशेषे तु **"पितरा"**वित्यत्रैकस्य पितृद्वयाभावात् अगत्या पितृपदेन जनकदाम्पत्ये लक्षणा। विभक्त्युपनीतञ्च द्वित्वं विरूपयोरेव मातापित्रोरवगम्यते, सरूपस्य तु पितृद्वयस्य मातृद्वयस्य वैकं प्रत्यजनकत्वात् । श्वशुरावित्यत्र श्वशुरपदे पत्नीजनकदाम्पत्ये लक्षणा पत्नीजनकद्वित्वञ्चोक्तन्यायात् पत्नीमातापित्रोरेव । ब्राह्मणावानयेत्यत्र दम्पतिपूजाप्रकरणे मानान्तराद्ब्राह्मणाब्राह्मणीपरत्वावगमे **"पुमान् स्त्रिये"**ति विरूपैकशेषत्वाद्ब्राह्मणपदे स्त्रीपुंसलक्षणैवानन्यगतिकत्वात् । पुंलिङ्गत्वन्तु पदार्थैकदेशगतमनूद्यते । स्त्रीपरत्वाज्ञाने न ब्राह्मणपदेन तन्त्रवृत्त्या पुंद्वयमेवोच्यते न तु स्त्रीपुंसौ सरूपैकशेषापेक्षया विरूपैकशेषस्य लाक्षणिकत्वेन जघन्यत्वात् ।

यदि च सरूपैकशेषेऽपि लक्षणा तदप्यौकारान्तपदात्सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोधस्य पुमवरुद्धत्वात् लिङ्गानुरोधात् ङीबाद्यर्थकल्पने मानाभावात् पुन्द्वयमेवावगम्यते न तु स्त्रीपुंसौ । शिवौ नमस्कुर्यादित्यत्र

नमस्यशिशिवान्तराभावाद्विरूपैकशेष इत्यगत्या शिवपदेन शिवश्च शिवा च लक्षणयोच्यते । भ्रातरौ पुत्रावित्यत्रापि मानान्तरात् स्त्रीपरत्वज्ञाने भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषाद्भ्रातृपदेन भ्रातृस्वसारौ पुत्रपदेन पुत्रदुहितरौ लक्ष्येते । स्त्रीपरत्वाज्ञाने च तन्त्रवृत्त्योक्तयुक्त्या भ्रातृद्वयं पुत्रद्वयमेवोच्यते ।

नन्वेवं **"क्षौमे वसानावग्नीनादधीयातामि"**त्यत्राप्यौकारान्तवसानपदात् सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् टाबाद्यर्थकल्पने च हेत्वभावात् पुंद्वयबुद्धौ पुरुषद्वयविधिराधाने स्यात् वसानपदात्तन्त्रवृत्त्यापि स्त्रीपुंसयोर्ज्ञानासम्भवात् । न चैवं **"पुमान् स्त्रिये"**ति विरूपैकशेषोच्छेदः, यत्र तु मानान्तरात् स्त्रीपरत्वधीस्तत्र स्त्रीद्वितीयस्य प्रातिपदिकार्थत्वात् । उभयसमवेतद्वित्वस्य पुंस्यपि सम्भव इति विभक्त्या तद्गतसङ्ख्याभिधाने विरूपैकशेषसम्भवात् । इह तु स्त्रिया उपानायकाभावात् द्वितीयत्वेन स्त्रिया अप्राप्तत्वात् वसानपदस्योक्तयुक्त्या तदुपस्थापकत्वाभावात् सरूपैकशेषतैव स्यादिति । मैवम् । **"क्षौमे वसाना"**वित्यत्र यत् कर्तव्यं तदनया सहेति विधिना अग्न्याधाने सहत्वेन प्राप्तया पत्न्यैव पुंसः सद्वितीयत्वात् न त्वप्राप्तेन पुमन्तरेण वाक्यभेदापत्तेः । पुंस्त्वन्तु विभक्त्या नामार्थगतमेवानुद्यते न तु नामार्थैकदेशगतम् अन्यसहितावस्थपुमर्थस्यैव नामार्थत्वादिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे समासवादः।**

## अथाख्यातवादः ।

आख्यातस्य यत्नवाचकत्वादचेतने **"रथो गच्छती"**त्यादौ आख्याते व्यापारलक्षणा । तथाहि **"पचती"**त्यादावाख्यातस्य यत्नो वाच्य: पचति पाकं करोतीत्यादियत्नार्थककरोतिना सर्वाख्यातविवरणात् । वृद्धव्यवहारादिवद्बाधकाभावे विवरणादपि व्युत्पत्तेः । द्वन्द्वादिसमासस्य विग्रहेण विवरणेऽपि विग्रहार्थे न शक्तिरन्यलभ्यत्वात् । किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विना अनुपपत्तेरि**त्याचार्याः** ।

अत्र वदन्ति आख्यातस्य करोतेश्च न यत्नार्थत्वं **"रथो-गच्छति" "जानाति" "यतते" "निद्राती"**त्यादौ धात्वर्थानुकूलयत्नाभावेऽप्याख्यातप्रयोगात् गमनं करोतीति करोतिना तत्राख्यातविवरणाच्च तत्र व्यापारस्य करोत्यर्थत्वे चेतनेऽपि तथा । न च तत्राख्यातकरोत्योर्गौणत्वम्, मुख्ये बाधकाभावात् । अत एव प्रश्नोत्तरयोर्न यत्नार्थत्वं किन्तु कृञ क्रियावाचित्वमेव तेन किं करोतीतिक्रियामात्रप्रश्ने पचति गच्छतीतिक्रियाविशेषणोत्तरमपि समञ्जसम्भवति ।

अथ क्रियाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यां घटाङ्कुरयोः कृताकृतव्यवहारात् तृजन्तकृञ्धातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयवाचकत्वाच्च कृञो यत्नार्थत्वम्। क्रियामात्रार्थत्वे कृञः क्रियाश्रयः कर्तृपदार्थः स्यात् तथाच कारकमात्रेऽतिप्रसङ्गः । एवञ्च कृञो यत्नार्थत्वे तेन चाख्यातविवरणात् तस्यापि यत्नोऽर्थः । तदुच्यते,

**"कृताकृतविभागेन कर्तृरूपव्यवस्थया ।**

**यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ।।**

सैवाख्यातार्थो भावनोच्यते इति चेत्, न ।

बीजेनाङ्कुरः कृतः स्रगादिना सुखं कृतं बीजमङ्कुरं करोतीति यत्नं विनापि व्यवहारात् । कर्तृपदञ्च न यौगिकम् तथाहि कृञोयत्नार्थत्वे तृचश्च कृत्यर्थत्वे कर्त्रर्थत्वे वा धातुप्रत्ययार्थयोः कृत्योः कृतिकर्त्रोर्वा परस्परमनन्वयः कृतौ कृतिजन्यत्वस्य तद्विषयत्वस्य चाभावात् कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वाच्च । एवं कृञः क्रियार्थत्वे तृचश्च क्रियाश्रयवाचकत्वे तयोः परस्परमनन्वय एवेत्युभयदर्शने कर्तृपदं कर्मादिपदवद्रूढमेव । रूढिश्च कृत्याश्रये क्रियाश्रये वेत्यन्यदेतत् । तस्मात् कृताकृतविभागेन कर्तृरूपव्यवस्थया च न कृञो यत्नार्थत्वमिति । किञ्चाख्यातस्य करोतेश्च न यत्नार्थत्वम् पाकाय यतते पाकं करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य वा प्रतीतेः प्रकृति-प्रत्ययार्थयोः साम्येनान्वयानुपपत्तेः पौनरुक्त्यात् एकत्रैव विध्यनुवाददोषाच्च ।

ननु प्रकृतेस्तदर्थत्वेऽपि प्रत्ययस्य तदर्थत्वं न दोषाय । एको द्वौ बहवः **इषिषिष**तीत्यत्र च व्यभिचारात् । **यत्तु** द्वितीयसङ्ख्येच्छादिकल्पनवदिहापि द्वितीययत्नकल्पनमिति । **तन्न** द्वितीयसङ्ख्येच्छायत्नाभावात् ।

वस्तुतस्तु प्रत्येकं सामर्थ्यावधृतौ सम्भेदे तूभयोपस्थितेरावश्यकत्वेऽप्येकस्यानन्वयेऽप्यदोषात् । "पाकाय यतते" "पाकं कुर्यादि"त्यत्र कृत्यर्थकाख्याते त्वयापि तथैवाङ्गीकारदिति चेत्, न। एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसङ्ख्यान्वयावगमयोग्यत्वात् । लडादेर्यत्ने सामर्थ्यानवधारणाल्लिङः "पचेते"त्यत्र कृतौ सामर्थ्यावधारणाच्च ।

अथायत्नार्थकधातुपराख्यातस्य यत्नार्थत्वं तेन यतत इत्यत्र नानन्वयः, अचेतने चाख्यातप्रयोगो गौण एव । न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता। यद्वा अनुकूलयत्ने प्रवृत्तं पदं तदेकदेशेऽनुकूलमात्रे प्रयुज्यते विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत् । अचेतने च मध्यमपुरुषोत्तमपुरुषौ न भवत एवोपपदयोर्युष्म-दस्मदोश्चेतनार्थत्वात् । भवतु वा गौण एव लोकस्यापर्य्यनुयोज्यत्वादिति चेत्, न । अचेतने आख्यातस्य मुख्यत्वे बाधकाभावेन गौणत्वाभावात् तस्मादाख्यातस्यानुकूलत्वेन व्यापारो वाच्य **इति भट्टाः** । तेन चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव ।

न चैवं पथिश्रमशयाने पचतीति स्यात् श्रमशान्तिद्वारा शयनस्य पाकानुकूलव्यापारत्वादिति वाच्यम् । तव प्रयत्नविशेषस्येवानुकूलव्यापारविशेषस्य वाच्यत्वात् । अन्यथा यत्नवाच्यत्वेऽपि तण्डुलानुकूलयत्नवति पचतीति स्यात् । एवमचेतनेऽपि करोतिना आख्यातविवरणात् करोत्यर्थोऽपि व्यापारविशेष एव, कथं तर्हि चैत्रः पचतीत्यत्र पाकानुकूलयत्नवत्प्रतीतिः, आक्षेपादिति चेत्, न । आख्यातार्थेन व्यापारेण सङ्ख्यया वा यत्नाक्षेपात्, तयोः प्रयत्नं विनापि सत्त्वात् । नापि कर्त्रा, द्रव्यमात्रस्य कर्तृत्वात्, यत्नवतश्च कर्तृत्वेन आख्यातेन तदभिधाने यत्नस्याप्यभिधानात् । नापि धात्वर्थमात्रेण, तस्य प्रयत्नं

विनापि सत्त्वात् । नापि यत्नो धात्वर्थः क्रियायास्तत्फलस्य वा धातुवाच्यत्वात् । अन्यथा "पाक" इत्यत्रापि यत्नानुभवप्रसङ्गादिति चेत्, न,

धात्वर्थविशेषपाकादिना यत्नाक्षेपात्तस्य प्रयत्नं विनाऽनुपपत्तेः । अथ पचतीत्यस्य पाकयत्नवानिति विवरणाद्यत्नार्थतेति चेत्, तर्हि कर्त्रर्थतापि स्यात् । न हि पाकयत्न इत्येव विवरणम् । पचतीत्यस्य तात्पर्यविवरणं तत् तच्चाक्षेपेण निर्वहतीति चेत्, तुल्यं यत्नेपि । कथं तर्हि "रथो गच्छति" "विद्यते व्योमे"ति भावनानुभव इति चेत्, न । कथञ्चित्, भावनाया: धात्वर्थान्वयायोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति ।

उच्यते । चैत्रः पचतीत्यत्र पाकाकूलयत्नानुभवाद्यत्न एवाख्यातार्थो लाघवात् न त्वनुकूलो व्यापारः । यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गौरवात् । न चाचेतनेऽपि आख्यातस्य **मुख्यत्वा**र्थमनुगतो व्यापार एव शक्यः मुख्यत्वसम्भवे त्यागायोगदिति वाच्यम् । शक्तिग्राहकेन प्रमाणेन लघुनि शक्तिपरिच्छेदात् अचेतने प्रयोगस्य वृत्त्यन्तरेणापि सम्भवात् मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः । एतेन व्यापारवाचकाख्यातस्य यत्नसाध्यार्थकपच्यादिधातूप्रसन्दनेन व्यापारविशेषयत्नोपस्थापकत्वमिति निरस्तम् । लाघवेनयत्नस्यैव शक्यत्वात् ।

ननु यत्नेनाख्यातार्थः पाकत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तमिति चेत्, न । चैत्रः पचतीत्यत्र चैत्रः पाकानुकूलवर्तमानयत्नवान् प्रतीयते, न च पाकस्य वर्तमानयत्नेन व्याप्तिरस्ति, अतीतानागते व्यभिचारात् । न च धात्वर्थेनानुमिते यत्ने आख्यातेन वर्तमानत्वान्वयबोधः सम्भवति, यत्नस्यापदार्थत्वात् स्वार्थव्यापारस्य वर्तमानत्वबोधनेनाख्यातस्य पर्यवसितत्वाच्च ।

अथ चैत्रः पाकानुकूलवत्र्तमानव्यापारवानिति शाब्दबोधानन्तरं चैत्र: पाकानुकूलवर्तमानयत्नवान् चेतनत्वे सति पाकानूकूलवर्तमानव्यापारवत्त्वात् मैत्रवत् । अनुमानं विना च पाकयत्ने वर्तमानत्वज्ञानमाख्यातस्य यत्ने शक्तिभ्रमादिति चेत्, न । यत्नाभावकालेऽपि तज्जन्यव्यापारस्य वर्तमानतया व्यभिचारात् । किञ्च व्यापारस्य वाच्यत्वं

तल्लिङ्गकं वर्तमानयत्नानुमानमिति च कल्पनाद्वयाद् वरं यत्नवाच्यत्वं लाघवात् । न चाचेतने आख्यातस्य व्यापारवाचकत्ववधारणात् एवं कल्पनेति युक्तम्, गौणतया शक्तिभ्रमेण वा तत्राख्याताद्व्यापारावगमोपपत्तेः । यत्नविगमदशायां तज्जन्यव्यापारकाले पचतीत्यत्र वर्तमानव्यापाराभिधानमाख्यातेन लक्षणया यथा "रथो"गच्छतित्यत्र । अतोऽन्यलभ्यत्वान्न तदनुरोधेन व्यापारे शक्तिः । अन्यथा तवापि **यत्नकाले** पचतीति न स्यात् । तस्माल्लडाख्यातं यत्नवाचकं आख्यातत्वात् लिङादिवत् तर्कश्चोक्त एव ।

एतेन फलानुकूलो व्यापारो धात्वर्थः, आख्यातवाच्या सङ्ख्यैव। तेन "चैत्रः पचति" "रथोगच्छती"त्यत्र चैत्ररथयोर्धात्वर्थानुकूलव्यापारवत्त्वप्रतीतेर्मुख्य एव प्रयोगः, पचतीत्यत्र यत्नलाभो धात्वर्थेनाक्षेपादिति विक्लित्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति **गुरुमतमपास्तम्** । "पचती"त्यत्र पाकानुकूलयत्न-

वर्तमानत्वस्याक्षेपादलाभेनाख्यातार्थत्वात् ।

**यत्तु** रत्नकोशकारोक्तं धात्वर्थो व्यापारः, आख्यातार्थः उत्पादना । सा चोत्पादकता । सैव भावना । पचतीत्यादौ आख्यातस्य पाकमुत्पादयतीति विवरणात् । धात्वर्थोत्पादना च चेतनाचेतनयोरिति सर्वत्राख्यातप्रयोगो मुख्य एव । "यतते" "जानाती"त्यादावपि यत्नं ज्ञानमुत्पादयतीत्यर्थात् । न तु व्यापारो यत्नो वाख्यातार्थः। "यतत" इत्यादौ मुख्यत्वे सति गौणत्वस्यान्याय्यत्वात् ।

आख्यातार्थविवरणं करोत्यर्थोऽप्युत्पादकतैव। "पाकं करोती"त्यादौ करोतीत्यस्योत्पादयतीति विवरणात् । "घटं करोती"त्यत्र कृञर्थ उत्पत्तिरेवावगम्यते । अत एव किं करोतीति सामान्येनोत्पादनाप्रश्ने पचतीति पाकोत्पादनाविशेषेणोत्तरमपि समञ्जसम् । चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादना चैत्रेणान्वेति । आख्यातार्थ उत्पादनानन्वितैवोत्पत्तेरुत्पत्त्यभावात् ।

वस्तुतस्तूत्पादयतीत्यत्र धात्वर्थ एवोत्पादना । अतोऽनुत्पादनपरधातूत्तरवर्त्तिन आख्यातस्यानन्यलभ्यतयोत्पादना वाच्या । "पचती"त्यादौ यत्नलाभ: पाकादिना धात्वर्थेनाक्षेपान्न तूत्पादनामात्रेण व्यभिचारादिति तदप्यत एव निरस्तम् ।

"पचती"त्यत्र यत्नप्रतीतेर्यत्न एवाख्यातार्थो लाघवान्न तूत्पादकत्वमुपाधितया गौरवात् पाकानुकूलवर्तमानयत्नस्याक्षेपादिनाप्यलाभाच्च ।

वस्तुतस्तु चैत्रो जानातीच्छति यतत इत्यादौ ज्ञानादिमत्त्वं चैत्रस्य प्रतीयते न तूत्पादकत्वं अचेतनेऽपि ज्ञानोत्पादके शब्दलिङ्गेन्द्रियादौ जानातीत्यादिप्रयोगप्रसङ्गात्, घटं जानातीत्युक्ते घटज्ञानवान्न वेति संशयापत्तेश्च । अचेतनस्यापि ज्ञानोत्पादकत्वात् । शब्दादिकं ज्ञापयतीति चानुभवो न तु जानातीति । तस्माल्लाघवात् पचति पक्ष्यत्यपाक्षीदित्यत्रातीतानागतवर्तमानयत्नप्रतीतेश्च यत्न आख्यातवाच्यस्तेन यत्नस्य वर्तमानत्वादिकमाख्यातेनाभिधीयते प्रकारान्तरेण तदलाभात् । जानातीच्छति यतते निद्रातीत्यत्र धात्वर्थ एव यत्नादिश्चैचेणान्वेति यत्नादिमांश्चैत्र इत्यनुभवात् । धात्वर्थे च यत्नादौ नाख्यातार्थयत्नान्वय: । यत्नादिविषयकयत्नस्याभावात् रथो गच्छतीत्यत्राख्याते व्यापारलक्षणा तेन गत्यनुकूलव्यापारवत्त्वमात्रं रथस्य प्रतीयते ।

अथ पाकानुकूलैककृतिकाले पचतीतिवत्कृतेरत्ययेऽग्रिमकृतेरनुत्पादे च मध्येऽप्यपाक्षीत्पक्ष्यतीति च स्यात् । न च ध्रुवपदवत्कृतिप्रचयस्य शक्यत्वात् प्रचयस्य ध्वंसे प्रागभावे वा अपाक्षीत्पक्ष्यतीतिप्रयोग इति वाच्यम् । एवं हि पचतीति न स्यादेव एकदा कृतिप्रचयस्यासत्त्वात् । अथ भूतभविष्यतो: कृत्यभावनिरूप्यत्वं कृतिकाले च कृत्यभावो नास्ति प्रतियोगिजातीयवत्यभावस्यासत्त्वादिति चेत्, न। प्रागभावप्रध्वंसयोः कृतिविशेषप्रतियोगित्वेन कृतिकालेऽपि सत्त्वात् तयो: सकलकृतिप्रतियोगिकत्वासम्भवात् ।

ननु फलायोगव्यवच्छिन्ना कृति: शक्या अत एव पाकानुकूलतण्डुलक्रयकाले पचतीति न प्रयोग: । एवं चरमकृतिकाले पचति तत्प्रागभावकाले पक्ष्यति तद्ध्वंसकाले चापाक्षीदिति मुख्यप्रयोग: तत्पूर्वं पचतीति गौण एवेति चेत्, न । तर्हि मध्येऽपि पक्ष्यतीति स्यात् तदा

चरमकृतेरनागतत्वात्, एवं व्यापारप्रचयस्याख्यातार्थत्वे धात्वर्थत्वे वा मध्ये पक्ष्यत्यपाक्षीदिति स्यात् ।

उच्यते । यत्राख्यातवाच्ये प्रचये एकैकस्य वर्तमानव्यावहारनिमित्तत्वं तत्र तावतां ध्वंसैः प्रागभावैश्च भूत-भविष्यद्व्यवहारः, न तु वर्तमानव्यवहारनिमित्तं किञ्चिदभावात् । चेतनाचेतनयोर्भोजनगमनादौ तथैव प्रयोगात् । प्रयोगे सति निमित्तानुसरणात् । धातोराख्यातस्य वा पाकानुकूलव्यापारवाचकत्ववादिभिरप्यनन्यगतिकतया तथैव स्वीकाराच्च । स्यादेतत्। "चैत्रस्तण्डुलं पचति" "चैत्रेण पच्यते तण्डुल" इत्यत्र कर्तरि कर्मणि चाख्यातार्थसंख्यान्वयात्कर्तृकर्मणी अपि यत्न इव लकारवाच्ये। तेन वाच्यगामिनौ सङ्ख्येति नियमो भवति । अन्यथा आक्षिप्तसङ्ख्येयमात्रान्वये नियमो न **स्यादिति वैयाकरणा**: ।

**तन्न** । कर्तृगता सङ्ख्या यत्र वाच्या तत्र कर्त्रा तदन्वयः प्रतीयते इति तदुपपत्तेः । कर्तृगतैव सङ्ख्या क्व वाच्येति चेत्, अन्योन्याश्रयात् कर्तृवाच्यत्वे तद्गतसङ्ख्याधीः तद्गतसङ्ख्याप्रतीत्या च तद्वाच्यतेति, यत्राख्यातेन कर्तुर्विवक्षा तत्र कर्ता वाच्य इति चेत्, न । यत्र कर्तृगतसङ्ख्या विवक्ष्या तत्र सा वाच्येति तुल्यम् । एवं कर्मापि न शक्यं किन्तु तद्गतसङ्ख्यैव कर्तृकर्मणी लकारवाच्ये इत्यस्यायमर्थः तद्गतसङ्ख्या वाच्येति ।

सम्प्रदायस्तु सङ्ख्येयमात्रसाकाङ्क्षापि सङ्ख्या भावनान्वयिनैवान्वेति एकपदोपात्तत्वप्रत्यासत्तेः । भावना च व्यापारत्वेन शुद्धं प्रातिपदिकार्थमाकाङ्क्षि न तु कर्मकरणदि द्वितीयादिना तस्य व्यापारवत्त्वेनोपस्थितेः । अत एव कर्माद्यपि न व्यापारमाकाङ्क्षति । अतः प्रथमानिर्द्दिष्टेनैव भावनान्वयः । प्रातिपदिकस्यापि क्रियान्वयार्थं व्यापाराकाङ्क्षितत्वात् । "शुद्धश्चाग्निना चैत्रस्तण्डुलं पचती"त्यत्र कर्ता **"चैत्रेण पच्यते तण्डुल"** इत्यत्र कर्म अतस्तत्रैव भावनान्वय इति सङ्ख्यान्वयोऽपि तत्रैव । तदुक्तं **"यं यं भावनानुधावति तं तं सङ्ख्यापीति स्थितिरि"**ति ।

स्यादेतत् । चैत्रस्तण्डुलं पचतीत्यत्र भावनान्वयश्चैत्रे सम्भवति आश्रयत्वात्, **"चैत्रेण तण्डुल: पच्यते"** इत्यत्र भावनान्वयस्तण्डुलस्य न विषयतया यत्नस्य विक्लित्त्यनुकूलव्यापारविषयत्वात् । विषयत्वेनान्वये वा तण्डुलं पचतीत्यत्रापि तण्डुलस्य विषयत्वेन भावनान्वय इति तद्गतैव सङ्ख्या स्यात् नाश्रयतया तत्रावृत्तेश्चैत्रेऽपि न यत्नान्वय: तृतीयार्थयत्नेनावरुद्धत्वात् इत्यनन्वितैव तत्र भावना ।

अचेतने च भावनान्वयाभावात् कथं सङ्ख्यान्वयनियम इति न, यत्नविशेष्ये सङ्ख्यान्वयात्, **"चैतस्तण्डुलं पचती"**त्यत्र तण्डुलस्य कर्मत्वेनान्वयात्तण्डुलवृत्तिफलजनक-व्यापारजनकयत्नाश्रयश्चैत्र इति प्रतीयते इति स एव विशेष्य: । **"चैत्रेण पच्यते तण्डुल"** इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तण्डुल: प्रतीयते इति यत्नस्य परम्परया तण्डुल एव विशेष्य: । एवञ्च यद्यप्युभयत्रैव चैत्रः कर्ता तण्डुलं कर्म तथापि यत्नविशेष्ये सङ्ख्यान्वय: । अचेतनेऽपि **"रथो ग्रामं गच्छती"**त्यत्र **"ग्रामवृत्तिगमनफलजनकव्यापाराश्रयो रथ:"** प्रतीयते, **"रथेन गम्यते ग्राम"** इत्यत्र रथवृत्तिव्यापारजन्यफलाश्रयो ग्रामइति तत्रापि विशेष्ये सङ्ख्यान्वय:।

नचैवं यत्नस्य व्यापारस्य च विशेष्ये सङ्ख्यान्वये नियामकमननुगतमिति वाच्यम् । आख्याततात्पर्यविषयस्य विशेष्ये सङ्ख्यान्वयात् स च यत्नोव्यापारो वा । **"चैत्रेण सुप्यत"** इत्यत्र चैत्रो न भावनाविशेष्य: तृतीयार्थावरुद्धत्वात् । कर्म च तत्र नास्त्येवातो धात्वर्थ एव भावनाविशेष्य: फलत्वाद्विषयत्वाद्वेति तत्र सङ्ख्यान्वयः । द्विवचनबहुवचनयोस्तत्रा-साधुत्वमेव । तदुक्तम् । "आक्षेपलभ्ये सङ्ख्येयेनाभिधानस्य कल्पना । सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थिति:" ।। इति । इदमेव च कर्तु: । कर्मणश्चाक्षेपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथमान्तपदोपस्थाप्यत्वं न तु सङ्ख्यालिङ्गकानुमितिविषयत्वम् अनुमित्या सङ्ख्येयमात्रगतत्वेन सङ्ख्याप्रतीते: ।

ननु नामार्थे भावनान्वयेऽपि न सङ्ख्यान्वय: प्रथमोपस्थितसङ्ख्यान्वयेन तस्या निराकाङ्क्षत्वात् । न च प्रथमा न सङ्ख्यावाचिका किन्तु प्रयोगसाधुरिति वाच्यम् । "चैत्रं

इदानीं राजे"त्यत्र केवलादपि एकत्वप्रतीतेः । अन्यथा प्रथमोपस्थितसङ्ख्या कर्तृ-कर्मान्वयेण सङ्ख्या न तिङर्थ इत्यपि कल्प्येतेति चेत्, न । एकैव हि सङ्ख्या प्रथमाख्याताभ्यामभिधीयते सामानाधिकरण्यानुरोधात् यथा **"चैत्रो दण्डी**"त्यत्र, अन्यथा त्वन्मतेऽप्याख्यातेन चैत्रसङ्ख्यिभधानात् प्रथमावाच्यसङ्ख्यान्वयश्चैत्रे न स्यात् । **"ओदनकामः पचेतेत्यत्रया"** त्वयाप्येषैव गतिरवगन्तव्या तत्र कर्तृरवाच्यत्वादिति वक्ष्यते । अथ कर्ताप्याख्यातवाच्यः **"चैत्रः पचती**"ति सामानाधिकरण्यात् । अन्यथा नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तकत्वेऽप्येकत्र वृत्यभावे सामानाधिरकरण्यं न स्यादिति चेत्, न । **"नीलः पटश्चैत्रः पचति"** "पच्यते तण्डुल" इत्यादौ नाम्नोर्नामाख्यातयोर्वा एकसङ्ख्यावाचकत्वमेव हि शाब्दसामानाधिकरण्यं ।। न तु भिन्नप्रवृत्तिनिमित्तस्यैकत्रार्थे वृत्तिर्गौरवात् **"ओदनकामः पचेते"**त्यादौ व्यभिचाराच्च । विध्याख्यातस्य हि कृतिशक्तस्य नामसामानाधिकरण्यं तयोरेकसङ्ख्याभिधायकत्वात् न त्वेककर्तृवाचकत्वेन । तत्रापि कर्तुर्वाच्यत्वे तस्येष्टसाधनत्वबोधने अप्रवृत्तिस्तस्यासाध्यत्वात् । अयोग्यतया कर्तारं विहाय कृतिविषये पाके पाकविषयकृतौ वेष्टसाधनतान्वये कर्तुरनन्वयादप्रतीतेश्च नाभिधेयत्वम् । **"पचती"**त्यस्य पाकयत्नवानिति विवरणात् कर्ता वाच्य इति चेत्, न। द्वन्द्वादिसमासस्य विग्रहेण विवरणेऽपि विग्रहार्थे शक्त्यभावेन व्यभिचारात् कर्तुरन्यलभ्यत्वेनावाच्यत्वस्थितौ विवरणस्य तात्पर्यविषयज्ञापकत्वात् कर्तृशक्तिभ्रममूलत्वाद्वा।

वस्तुतः "पचती"त्यत्र यत्नवतः शक्यत्वे धात्वर्थस्य विषयत्वेन साध्यत्वेन वा कृतावन्वयो न स्यादितरपदार्थविशेषणतयोपस्थिते पदार्थैकदेशे इतरपदार्थस्यानन्वयात् । "राजपुरुषमानये"त्यत्र राज्ञ इवानयने पदार्थे पदार्थान्वयस्य व्युत्पत्तिसिद्धत्वात् । यत्नस्याश्रयान्वितत्वेनोपस्थितस्येतरानाकाङ्क्षत्वात् । पाकयत्नवतोरन्वये च यत्नवत्साध्यः पाकः पाकजनको यत्नवानिति धीः स्यात् न तु पाक-यत्नयोर्विषयविषयिभावधीः । पाककर्ता । इत्यत्रापि न पाकस्य कृतावन्वयधीः कृतेरपदार्थत्वात् । किन्तु "कृत्याश्रयः पाकजनक" इति प्रतीतिः ।

अत एवापचत्यपि पाचकपदप्रयोगात् वुण: कृतियोग्यता वाच्येति निरस्तम् । पाकस्य कृतावनन्वयप्रसङ्गादिति तत्र पाचकपदं गौणमेव । ननु कर्तृ-कर्मणी लकारवाच्ये तेनाभिहिते कर्तरि कर्मणि चानभिहिताधिकारीया कर्तृ-कर्मविभक्तिर्न भवति किन्तु प्रथमैव लकारेण तयोरनभिधाने च "चैत्रेण पचति तण्डुल:" "चैत्र: पच्यते आदेनमि"त्याद्यपि स्यादिति चेत्, न, कर्तृ-कर्मगतसङ्ख्याभिधानानभिधानाभ्यामेवाभिहितानभिहितकार्योपपत्ते: तादृशप्रयोगस्यासाधुत्वाच्च । साधुत्वे हि सत्यनुशासनं न त्वनुशासनानुरोधेन साधुत्वम् ग्रामगामादौ साधुत्वापत्ते: । नवीनास्तु सुप: प्रकृत्यर्थगतस्वार्थसङ्ख्याबोधकत्वं तिङ: प्रथमान्तपदार्थगतसङ्ख्याबोधकत्वमिति व्युत्पत्तिरेव व्युत्पत्तिश्च तत्स्वभावत्वं तच्च फलोन्नेयम् । प्रथमान्तपदार्थ: कर्ता कर्म वा । अत एव ""चैत्रेण सुप्यते" इत्यत्र प्रथमान्तपदाभावान्न सङ्ख्यान्वय: । न च धात्वर्थे सङ्ख्यान्वय: स्वापस्य द्वित्वबहुत्वेपि द्विवचनबहुवचनयोरभावात्सुप्यत इत्येव प्रयोग: स्यात् । अत एव स्वापमात्रावगमात् आख्यातार्थयत्नसङ्ख्योरनन्वये आख्यातं प्रयोगमात्रे साध्विति तिङं विना धातो: केवलस्यासाधुत्वात् । अतो न सङ्ख्यानुरोधेन कर्तृकर्मणी लकारवाच्ये ।

वयन्तु ब्रूमः । "चैत्रेण पच्यते तण्डुल": **"रथेन गम्यते ग्राम"** इत्यत्र तण्डुलग्रामौक । कर्मणी प्रतीयेते अस्ति च तयो: परसमवेतक्रियाफलशालित्वं कर्मत्वं तच्चाख्यातवाच्यमेव । तण्डुलं पचतीत्यत्र द्वितीयात इवान्यत: कर्मत्वालाभात् । तस्मात्कर्तृत्ववत्कर्मत्वमपि लकारवाच्यम् । तद्धर्मिणोः कर्तृकर्मणोरन्यत एव लाभादिति।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे आख्यातवाद:।**

## अथ धातुवाद: ।

धात्वर्थ: फलमिति मण्डनाचार्या: । तथा हि पच्यथोर्विक्लित्तिर्लाघवान्न तु तत्फलको व्यापारोऽधसस्सन्तापनादिर्गौरवात् गमेरुत्तरसंयोगः पतेरधसस्संयोग: त्यजेर्विभागोऽर्थो न तु तत्फलजनक: स्पन्द: । हन्तेरपि मरणमर्थ: न तु तत्फलजनको व्यापार: खड्गाभिघातादि: गौरवात् । यजत्यर्थोऽपि देवतोद्देश्यकत्यागफलं स्वस्वत्वध्वंस एव । जुहोत्यर्थस्त्यागफलं

प्रक्षेप: । ददात्यर्थ: सम्प्रदानस्वीकारपूर्वकत्यागफलं स्वस्य स्वत्वध्वंसः परस्वत्वं वा न तु तत्तत्फलकत्यागो गौरवात् । न चैवं व्यापारविगमे फलदशायां पचति-गच्छति-ददातीत्यादिप्रयोग: स्यान्न त्वापाक्षीदित्यादि: व्यापारकाले च पचतीत्यादि न स्यादिति वाच्यम् । धात्वर्थानुकूलव्यापारवर्तमानत्वमाख्यातार्थः, तेन व्यापारकाले पचतीत्यादि भवति न तु व्यापारविगमे । न च स्पन्दजन्यसंयोगाविभागाश्रयत्वे**"नाकाशो गच्छति पतति त्यजती"**ति स्यात् विनश्यदवस्थे कर्मणि च न स्यात् संयोग-विभागाद्यभावादिति वाच्यम् । व्यापारवति व्यापारकाले आख्यातप्रयोगात् ।

नन्वेवं धात्वर्थत्वेन फलं क्रिया । तथाच **"तण्डुलं पचती"**त्यादौ तण्डुलादे: कर्मतापि न स्याद् विक्लित्त्यादिरूपक्रियाजन्यफलशक्तित्वाभावादिति चेत्, न । परसमवेत-व्यापारफलशालित्वं कर्मत्वं, स च व्यापारो धात्वर्थ अख्यातार्थो वेत्युभयथापि परसमवेतव्यापारफलशालिनस्तण्डुलादे: कर्मत्वं, विक्लित्त्यनुत्पादे व्यापारकाले पाकोवर्तत इत्यत्र पाकपदे व्यापारलक्षणा लाघवेन विक्लित्ते: शक्यत्वात् । जानातीच्छति-यतते-विद्यते-तिष्ठतीत्यादौ ज्ञानेच्छा-प्रयत्नसत्ता-गतिनिवृत्तिरेव धात्वर्थ:, न ज्ञानादिफलं न वा ज्ञानाद्यनुकूलो व्यापार: ज्ञानादिमत्त्वमात्रप्रतीतेरिति ।

अत्रोच्यते । **"ओदनकाम: पचेते"**त्यत्र विधिप्रत्ययेन धात्वर्थे प्रवृत्त्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वञ्च बोध्यते । न च फले विक्लित्यादावोदनसाधनत्वं न वा फले प्रवृत्ति: सम्भवत, उपायमकृत्वा फलस्य साक्षात् कृत्या साधयितुमशक्यत्वात् । उपायकृतिसाध्यमेव हि फलं न तु तदन्यकृतिसाध्यम् उपायकृतित एव तत्सिद्धेरधस् सन्तापनादे: कृतिसाध्येष्टसाधनत्वं विना विक्लित्त्यर्थमप्रवृत्तेश्च । उपाय एवाध: सन्तापनादिर्यापार: प्रवृत्तिविषयत्वात् कृतिसाध्यत्वेनेष्टसाधनत्वेन च विधिप्रत्ययेन बोध्यत इति फलानुकूलो व्यापार एव धात्वर्थ: ।

अथोपायस्य कृतिसाध्यत्वज्ञानं प्रवर्तकमिति सत्यं किन्तु विधिबोधितफलकृतिसाध्यत्वेन तदुपायकृतिसाध्यत्वमाक्षिप्यते तेन विना तदनुपपत्तेरिति चेत्,

न । व्यवहारात्प्रवृत्तिजनके ज्ञाने विधिप्रत्ययस्य शक्तिग्रहात् प्रवृत्तिसाक्षादुपपादक-विषयत्वात्कल्पनायाः । एवं यजि-गमि-पचि-जुहोति-ददातीनामपि व्यापार एव वाच्यः फले प्रवृत्त्यसम्भवात् । तत्र पच्यर्थोऽधः सन्तापनमेव तच्च रूप-रस-गन्ध-स्पर्शपरावृत्तिफलाविनाभूतम्, अधस्सन्तापने च जातिविशेषो रूपादिपरावृत्तिजनकता-वच्छेदकोऽवश्यं वाच्यः । अन्यथा फलार्थमधः सन्तापनेऽप्रवृत्तेः व्यापारस्याख्यातवाच्यत्वेऽपि विशेषस्यावश्यं वाच्यत्वात् । पच्यर्थे च फलं न विशेषणं न वोपलक्षणं लोकेऽधः सन्तापनविशेषस्य रूपादिपरावृत्त्यव्यभिचारेण व्यावर्त्याभावात् ।

वेदेऽधः सन्तापनमात्रं पाकपदार्थः **"कृष्णलं श्रपयेदि"**त्यादौ फलाभावात् । अस्तु वोपलक्षणं रूपादिपरावृत्तियोग्याधस्सन्तापनं पाकपदार्थः योग्यता च सन्तापने कृष्णलादावप्यस्ति । गमेः स्पन्दविशेष एव वाच्यो न तूत्तरदेशसंयोगजनकत्वेन स्पन्दस्य वाच्यता सर्वस्पन्दानां तथात्वेन व्यावर्त्याभावात् । स्पन्दे च विशेषः संयोगविभागजनकतावच्छेदकः सर्वसिद्ध एव । त्यजेश्च कर्ममात्रं शक्यं न तु पूर्वदेशविभागफलककर्मत्वेन शक्यत्वं सर्वकर्मणां तथात्वेन व्यावर्त्याभावात् । त्यजतीतिप्रयोगे च तद्बुद्धिर्निमित्तम् । पतत्यर्थोऽपि कर्मविशेष एव गुरुत्वासमवायिकारणप्रयोज्याधः संयोगफलजनकः, फलन्तु कर्मविशेषपरिचायकमात्रम्। यजति-ददाति-जुहोती-नामिदं न ममेत्यादितत्तत्सङ्कल्पविशेषपूर्वस्त्याग एव वाच्यः सङ्कल्पे च विशेषस्तु तत्तद्विशेषकृतस्तत्तत्फलविशेषजनकतावच्छेदको मानसप्रत्यक्षसिद्ध एव न तु तत्तत्फलजनकसङ्कल्पविशेषे शक्तिः गौरवात् । देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागत्वं सम्प्रदानस्वीकरणपूर्वकस्वत्वध्वंसपरस्वत्वापत्ति फलजनकत्यागत्वं देवतोद्देश्यकप्रक्षेपफलक-त्यागत्वञ्च तत्तत्सङ्कल्पविशेषपरिचायकमात्रमिति ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे धातुवादः।**

## अथ उपसर्गवादः ।

उपसर्गास्तु द्योतकाः न वाचकाः । द्योतकत्वञ्च धातोरर्थविशेषे तात्पर्यग्राहकत्वं तदुपसन्दानेन तत्र शक्तिर्वा न तु धात्वर्थाभिधायकत्वं पौनरुक्त्यापत्तेः ।

ननु प्रजयतीत्यादौ प्रकर्षस्य विजयते इत्यादावतिशयस्य अभ्यागच्छतीत्यादावाभिमुख्य-सामीप्ययोः प्रतीतावुपसर्गान्वय-व्यतिरेकानुविधानात् पदान्तर-वदत्रापि शक्तिः । न च प्रतिष्ठत इत्यत्र गतिधीर्न स्यात् प्रशब्दस्य प्रकर्षवाचित्वेनातिशयेन गमनार्थधीप्रसङ्गादिति वाच्यम् । तत्र प्रशब्दस्य धात्वर्थावरुद्धार्थत्वात् तच्च गमनमेव धातोरिवप्तस्याप्यनेकार्थत्वात् । न च धातोः सार्थकत्वं क्लृप्तमतस्तत्रानेकार्थता युक्ता उपसर्गे तु नैवमिति वाच्यम् । धातूनां बहुत्वान्न प्रकर्षवाचित्वं गौरवात् । किन्तु प्रशब्दस्यैकस्येति तस्यापि सार्थकत्वात् । धातोरनेकार्थत्वं क्लृप्तं तदभियुक्तैर्नोपसर्गस्येति चेत्, न । तर्हि धातोर्नानार्थत्वे उपसर्गानुविधानमर्थविशेषे न स्यात् अक्षादिपदे तथा दर्शनात् । उपसर्गस्यापि शक्तत्वे धात्वनुविधानं न स्यादिति चेत्, न । साधुत्वार्थं तत्र तदनुविधानं तेन विना प्रयोगाभावात् न तु शक्त्यै । धातोस्तु शक्तावेव तदपेक्षेति वैषम्यम् ।

अथ प्रजयत्यभ्यागच्छतीत्यादौ सामान्यवाचकाद्धातोरेव प्रकर्ष-सामीप्यादिविशिष्टस्य विशेषस्योपस्थितिः। तात्पर्यग्राहकत्वमात्रमुपसर्गाणामिति चेत्, न । प्रकर्षादेर्विशेषस्याशक्यत्वेन तत्र लक्षणायां युगपद्वृत्तिद्वयापत्तेः । "एतेनाभ्यागच्छती"त्यादौ सामीप्यादिविशिष्टधात्वर्थ-प्रतीतेर्वाचकत्वमुपसर्गणाम्, "प्रतिष्ठत" इत्यादौ धातोरेव गमनार्थत्वं तात्पर्यग्राहकस्तु प्रशब्दः। अन्यथा धातूपसर्गार्थयोर्विरोधेनान्वयानुपपत्तेः । एवं धातूपसर्गयोर्विरोधस्तत्र द्योतकत्वमन्यत्र वाचकत्वमिति मतमपास्तम्। अगमनविरोधिगमनस्यैव प्रशब्दार्थत्वात् ।

अत्रोच्यते । आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वमतः प्रतिष्ठत इत्यत्र गमनं धात्वर्थ एव । प्रशब्दार्थत्वे भावनान्वयो न स्यात् प्रकृति-प्रत्यययोः सम्भूयान्वयबोधकत्वनियमात् । एवञ्च प्रोत्तरस्थत्वेन गमने शक्तिरिति प्रशब्दः शक्ततावच्छेदको न शक्त इत्यौपसन्दानिकी शक्तिरेव द्योतकत्वम् ।

प्रकर्षाभिमुख्यसामीप्यादेरुपसर्गवाच्यत्वेऽपि तद्विशिष्टधात्वर्थान्वय: सम्भवत्येव भावनाया **"ओदनं पचती"**त्यत्रौदनविषयकपाकान्वयवदिति यद्यपि तथापि उपसर्गस्य शक्तावच्छेदकत्वं न शक्तत्वं गौरवात् । तथा च प्रोत्तरजित्वेन प्रकृष्टजये शक्ति: । एवं हि क्लृप्तविशेष्यशक्तेर्विशेषणविषयत्वमात्रं कल्प्यते अन्यथा तु शक्त्यन्तरमेव । न चैवं जिपूर्वप्रत्वेन तत्रैव शक्तिरस्त्विति वाच्यम् । धात्ववाच्यत्वे भावनानन्वयप्रसङ्गात् "प्रतिष्ठत"इत्यत्रोपसर्गस्य शक्त्यवच्छेदकत्वमात्रकल्पनाच्च ।

अथ वा **"प्रतिष्ठत"** इत्यत्र विरोधिलक्षणया धातोर्गमनोपस्थिति: प्रशब्दस्तु तात्पर्यग्राहक: अनन्यलभ्यस्य शब्दार्थत्वात् **"प्रजयती**"त्यादावपि विशेष्यवाचकस्य धातोर्विशिष्टे लक्षणा विशेष्याद्विशिष्टस्यान्यत्वात् प्रादेस्तात्पर्यग्राहकत्वम् । न हि शक्तिं विनापि धातुतः प्रतीतिसम्भवे तत्कल्पनमर्हम् । अनन्यलभ्यस्य शब्दार्थत्वात् । व्यतिसे इत्यादौ तु लुप्तः स्मृतो धातुरेवार्थप्रत्यायकः। धातुलोपमजानतस्तत्रार्थप्रत्ययाभावादिति कृतं प्रसक्तानुप्रसक्त्या ।

**इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे उपसर्गवाद:।**

## अथ प्रमाणचतुष्टयप्रामाण्यवादः ।

स्यादेतत्, तथापि सङ्केतग्रहे चेष्टातोऽप्यनुभवसम्भवाच्छब्दवत्सापि प्रमाणमतश्चत्वारि न प्रमाणानीति चेत्, उच्यते, शब्देन चेष्टायां सङ्केतग्रहाच्छब्दस्मृत्युपयोगिनी चेष्टा लिपिवत् शब्द एव प्रमाणमर्थे क्लृप्तत्वात् ।

नन्वेवं सति कथमेडमूकस्य व्यवहारस्तस्य शब्दास्मरणादिति चेत्, न । अव्युत्पन्नत्वाच्चेष्टायां तस्य शब्देन न सङ्केतग्रहो न मानान्तरेणेति समयाग्रहाच्छब्दवत् चेष्टापि तं प्रति कुण्ठितैव । व्यवहारस्तु एडमूकस्यैतद्विषया मम प्रवृत्तिर्निवृत्तिर्वा एतस्याभिप्रेता यदा भवति तदा मामुद्दिश्य अयमेतां-

चेष्टां करोति इत्यन्वय-व्यतिरेकाभ्यां व्याप्तिग्रहात्तथाभिप्रायमनुमाय प्रवृत्तिनिवृत्ती। कशाङ्कुशाभिघातादिव करि-तुरगादे: । न च कृतसमयापि चेष्टा अभिप्रायानुमापिकास्तु किं

शब्दस्मरणेनेति वाच्यम् । अविनाभावाभावात् । न चैवं शब्देऽप्यभिप्रायानुमानादेव प्रवृत्त्याद्यस्त्विति वाच्यम् । शब्दादेव प्रत्येमीत्यनुव्यवसायात्तदनुभावकत्वे स्थिते तदनुकूलशक्तिकल्पनात् । एडमूकादौ तु मानाभावात्तत्प्रवृत्तेरन्यथाप्युपपत्तेः । एवमन्यत्रापि शब्दप्रयोजकत्वे स्थिते तद्द्वारैव चेष्टायामनुभावकत्वं सम्भवतीति न सा पृथक् प्रमाणम् । अथ वा स्मारयतु चेष्टा पदार्थानेव न तु शब्दांस्तथापि सा न प्रमाणम्, ऊर्ध्वाङ्गुलीकरणे यात्रां करिष्यसीत्यादिका कृत्यन्वयिनी प्रयोजकाभिप्रायं स्मारयन्ती प्रमाणमेव न, शङ्खध्वनौ यात्रां करिष्यसीत्यत्र शङ्खध्वनिवत् । ज्ञप्त्यन्वयिनी तु कारकेषु प्रातिपदिकार्थप्रधानक्रिया आनयनादिस्वरूपप्रधाना। तथा च गौरश्वः पुरुष इत्यादिपदैरिव स्वतन्त्रेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः प्रातिपदिकार्थे कर्मत्वादेरानयनादिष्वतीतानागतवर्तमानत्वस्य चान्वयप्रकारस्यानुपस्थितेः । पदैकदेशविभक्ति-विशेषवच्चेष्टैकदेशविशेषात् प्रकरणादिविशेषाद्वा कर्मत्वादि-वर्तमानत्वादिस्मृतिनियम इति चेत्, न ।

कर्मत्वाद्यतीतत्वाद्युपस्थापकचेष्टैकदेशाभावात् । प्रकरणादयस्तु विषयविशेषे शब्दादीन्नियमयन्ति न त्वन्वयप्रकारकर्मत्वादौ कालविशेषे वा प्रवर्तयन्ति । अन्यथा गौरश्वः इत्यादावपि प्रकरणादिभिः कर्मत्वाद्युन्नीय विवक्षितार्थाध्यवसायः स्यात् । न हि चेष्टाकलापप्रकरणादयः कारकविशेषानाक्षेप्तुमलं न तु पदकदम्ब इत्यस्ति नियमः, तथाच कालसङ्ख्याकर्मत्वादिप्रतिपादकविभक्त्यादिसमभिव्याहारवैयर्थ्यप्रसङ्गः । कथं तर्हि ततोऽर्थव्यवहारः संशयप्रतिभयोरन्यतरस्मात् चेष्टास्मारितशब्दानामपि कर्मत्वाद्यन्वयप्रकारोप-स्थापकविभक्त्यादेरभावात् । कथमन्वयबोधकत्वमिति चेत्, न। विभक्त्यादिमतामेव शब्दानां स्मरणात् शब्दमात्रेण सङ्केताग्रहात् ।

नन्वपभ्रंशात् कथं वाक्यार्थधीः तत्रान्वयप्रकारो-पस्थापकविभक्त्यादेरभावात् । न च साधुशब्दस्मरणादिति वाच्यम् । साधुशब्दसङ्कथा-विरहिणामपि पामराणामर्थप्रत्ययात् साधुपदमात्रस्मरणेऽपि कर्मत्वाद्युपस्थापकविभक्त्यादेरभावाच्चेति चेत्, न । यथा हि

पदार्थशक्तत्वेन ज्ञातादपभ्रंशात्पदार्थोपस्थितिः तथा विभक्तर्थकर्मत्वादिशक्तत्वेन ज्ञातादभ्रंश्चैकदेशात् तत्तत्स्वरावच्छिन्नात् कर्मत्वाद्युपस्थिति: ।

अथ साधुशब्देऽन्वयप्रकारविभक्त्यादे: सहकारित्वं न तु चेष्टायां किन्तु तात्पर्यग्राहकत्वमात्रं सहकारीति चेत्, न । समयाधीनप्रवृत्तिकमानमात्रं प्रति तत्सहकारित्वात्। तद्विशेषशब्दस्य गुरुत्वादिति न सा प्रमाणान्तरम् । ऐतिह्यञ्चाप्तोक्तत्वेन शब्द एवान्तर्भवति । अर्थापत्त्यनुपलब्ध्योस्तु यथायथमन्तर्भाव: प्रागेव चिन्तित:। अत: सिद्धं चत्वारि प्रमाणानीत्युपरम्यते ।

धीरा: कुशाग्रमतयो भवत: प्रणम्य मौलौ निधाय करवारिरुहे समीहे ।

वाणीयमर्थरहितापि विशृङ्खलापि सानुग्रहेण हृदयेन विलोकनीया ।।

**इति महामहोपाध्यायश्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दखण्डे**

**प्रमाणचतुष्टयप्रामाण्यवाद: समाप्त: ।**

**समाप्तश्च शब्दाख्यस्तुरीय: परिच्छेद: ।।**

**।। तत्त्वचिन्तामणि: समाप्त: ।।**